॥ श्री गणेशाय नमः ॥

श्रीमद्वामन-जयादित्यविरचिता
पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

काशिका-३

(पञ्चम-षष्ठाध्यायौ)



प्रधानसम्पादकः

आचार्य राधावल्लभत्रिपाठी,

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

सम्पादकमण्डलिः

निर्देशकः- आचार्य रामानुजदेवनाथः

डा. सि. एस्. एस्. नरसिंहमूर्तिः

डा. चन्द्रशेखरभट्टः

श्री सि.हेच्. कृष्णानन्तपद्मनाभः

डा. मधुकेश्वरभट्टः

कु. सुगुण एन्.

विषयानुक्रमणिका

क्र.सं	विषयाः	सूत्राङ्काः
पञ्चमाध्याये		
	प्रथमे पादे	
०१	तद्धितेषु छाधिकारः	५.१.१
०२	तद्धितेषु आर्हीयाः	५.१.१९
०३	तद्धितेषु प्राग्वतीयाः	५.१.७२
०४	तद्धितेषु कालाधिकारः	५.१.७८
०५	तद्धितेषु भावकर्माधिकारः	५.१.११५
	द्वितीये पादे	
०६	तद्धितेषु पाञ्चमिकप्रकरणम्	५.२.१
०७	तद्धितेषु मत्वर्थीया	५.२.९४
	तृतीये पादे	
०८	तद्धितेषु विभक्त्यर्थकप्रत्ययाः	५.३.१
०९	तद्धितेषु स्वार्थिकाः	५.३.२६
१०	तद्धितेषु प्रागिवीयाः	५.३.७०
११	इवार्थकप्रत्यया	५.३.९३
	चतुर्थे पादे	
१२	समासन्तविधिः	५.४.६८
षष्ठाध्याये		
	प्रथमे पादे	
१३	द्विर्वचनप्रकरणम्	६.१.१
१४	सम्प्रसारणप्रकरणम्	६.१.१३
१५	आत्वप्रकरणम्	६.१.४५
१६	लोपप्रकरणम्	६.१.६६
१७	सन्धिप्रकरणम्	६.१.७२
१८	एकादेशप्रकरणम्	६.१.८४
१९	प्रकृतिभावप्रकरणम्	६.१.११५
२०	सुट्प्रकरणम्	६.१.१३५
२१	स्वरसूत्राणि	६.१.१४८

क्र.सं	विषयाः	सूत्राङ्काः
	द्वितीये पादे	
२२	स्वरसूत्राणि	६.२.१
	तृतीये पादे	
२३	अलुकसमासप्रकरणम्	६.३.१
२४	पुंवद्भावप्रकरणम्	६.३.३४
२५	उदादेशप्रकरणम्	६.३.४७
२६	ह्रस्वप्रकरणम्	६.३.६१
२७	मुमागमप्रकरणम्	६.३.६७
२८	सभावप्रकरणम्	६.३.७८
२९	दीर्घप्रकरणम्	६.३.१११
	चतुर्थे पादे	
३०	अङ्गाधिकारप्रकरणम्	६.४.१
३१	दीर्घप्रकरणम्	६.४.१८
३२	आर्धधातुकोद्देश्यकविधयः	६.४.४६
३३	सार्वधातुकोद्देश्यकविधयः	६.४.११०
३४	एत्वादिविधयः	६.४.११९
३५	प्रकृतिभावः	६.४.१६३

॥ श्री गणेशाय नमः ॥

पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

काशिका

अथ पञ्चमाध्याये

प्रथमः पादः

१८८६. प्राक् क्रीताच्छः ॥ १ ॥ (१६६१)

'तेन क्रीतम्' (४.१.३७) इति वक्ष्यति, प्रागेतस्मात्क्रीतसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामश्छप्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति- ''तस्मै हितम्'' (५.१.५) इति । वत्सेभ्यो हितो वत्सीयो गोधुक् । करभीय उष्ट्रः । अकरभीयः। अवत्सीयः''।

अर्थोऽवधित्वेन गृहीतः, न प्रत्ययः । तेन 'प्राक् ठञश्छः' इति नोक्तम् ॥

१८८७. उगवादिभ्यो यत् ॥ २ ॥ (१६६२)

'प्राक् क्रीतात्' इत्येव । उवर्णान्तात्प्रातिपदिकाद् गवादिभ्यश्च यत्प्रत्ययो भवति, प्राक्क्रीतीयेष्वर्थेषु । छस्यापवादः । शङ्कव्यं दारु । पिचव्यः कार्पासः । कमण्डलव्या मृत्तिका। गवादिभ्यः खल्वपि - गव्यम् । हविष्यम् । सनड्गुर्नाम चर्मविकारः, ततः परत्वात् 'चर्मणोऽञ्' (५.१.१५) इत्येष विधिः प्राप्नोति; तथा चरुर्नाम हविः; सक्तुः=अन्नविकारः, अपूपादिषु 'अन्नविकारेभ्यश्च' (ग. सू. १०९) इति पठ्यते, ततः 'विभाषा हविरपूपादिभ्यश्च' (५.१.४) इत्येष विधिः प्राप्नोति; तत्र सर्वत्र पूर्वविप्रतिषेधेन यत्प्रत्यय एवेष्यते-सनड्गव्यं चर्म, चरव्यास्तण्डुलाः, सक्तव्या धाना इति ।

गवादिषु 'नाभि नभं च' (ग. सू. १०६) इति पठ्यते, तस्यायमर्थः-'नाभिशब्दो यत्प्रत्ययमुत्पादयति नभं चादेशमापद्यते' इति । नाभये हितो नभ्योऽक्षः । नभ्यमञ्जनम्।

यस्तु शरीरावयवो नाभिशब्दः, ततः 'शरीरावयवाद्यत्' (५.१.६) इति यति कृते नाभये हितं नाभ्यं तैलमिति भवितव्यम् । गवादिषु यता सन्नियुक्तो नभभावोऽत्र न भवति ।

गो । हविष् । बर्हिष् । खट । अष्टका । युग । मेधा । स्रक् । नाभि नभं च (ग. सू. १०६) । शुनः सम्प्रसारणं वा दीर्घत्वं च तत्सन्नियोगेन चान्तोदात्तत्वम् । शून्यम् ।

चकारस्यानुक्तसमुच्चयार्थत्वात् 'नस्तद्धिते' (६.४.१४४) इति लोपो न स्यात् । ऊधसोऽनङ् च (ग. सू. १०८) ऊधन्यः । कूप । उदर । खर । स्खद । अक्षर । विष । गवादिः ॥

१८८८. कम्बलाच्च संज्ञायाम् ॥ ३ ॥ (१६६३)

कम्बलात् प्राक्क्रीतीयेष्वर्थेषु यत्प्रत्ययो भवति संज्ञायां विषये । छस्यापवादः। कम्बल्यमूर्णापलशतम् । संज्ञायामिति किम्? कम्बलीया ऊर्णाः ।

१८८९. विभाषा हविरपूपादिभ्यः ॥ ४ ॥ (१६६४)

हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्रातिपदिकेभ्यः प्राक्क्रीतीयेष्वर्थेषु विभाषा यत् प्रत्ययो भवति । आमिक्ष्यं दधि, आमिक्षीयं दधि । पुरोडाश्यास्तण्डुला, पुरोडाशीयाः । हविश्शब्दात्तु गवादिपाठान्नित्यमेव भवति । अपूपादिभ्यः - अपूप्यम्, अपूपीयम् । तण्डुल्यम्, तण्डुलीयम् ।

अपूप । तण्डुल । अभ्यूष । अभ्योष । पृथुक । अभ्येष । अर्गल । मुसल। सूप । कटक । कर्णवेष्टक । किण्व । अन्नविकारेभ्यश्च (ग. सू. १०९) पूप । स्थूणा। पीप । अश्व । पत्त्र । अपूपादिः ॥

१८९०. तस्मै हितम् ॥ ५ ॥ (१६६५)

'तस्मै' इति चतुर्थीसमर्थाद् 'हितम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । वत्सेभ्यो हितो गोधुक् वत्सीयः । अवत्सीयः । पटव्यम् [पटीयम्] । गव्यम् । हविष्यम् । अपूप्यम् । अपूपीयम् ।

१८९१. शरीरावयवाद्यत् ॥ ६ ॥ (१६६६)

शरीरम्=प्राणिकायः । शरीरावयववाचिनः प्रातिपदिकाद्यत् प्रत्ययो भवति 'तस्मै हितम्' इत्येतस्मिन्विषये । छस्यापवादः । दन्त्यम् । कण्ठ्यम् । ओष्ठ्यम् । नाभ्यम् । नस्यम् ॥

१८९२. खलयवमाषतिलवृषब्रह्मणश्च ॥ ७ ॥ (१६६८)

खलादिभ्यो यत्प्रत्ययो भवति 'तस्मै हितम्' इत्येतस्मिन्विषये । छस्यापवादः। खलाय हितं खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् ।

वृष्णे हितम्, ब्राह्मणेभ्यो हितमिति वाक्यमेव भवति । छप्रत्ययोऽपि न भवति, अनभिधानात् ।

चकारोऽनुक्तसमुच्चयार्थः-रथाय हिता रथ्या ॥

१८९३. अजाविभ्यां थ्यन् ॥ ८ ॥ (१६६९)

अज, अवि-इत्येताभ्यां थ्यन् प्रत्ययो भवति 'तस्मै हितम्' इत्येतस्मिन्विषये। छस्यापवादः । अजथ्या यूथिः । अविथ्या ॥

१८९४. आत्मन्विश्वजनभोगोत्तरपदात् खः ॥ ९ ॥ (१६७०)

आत्मन्, विश्वजन-इत्येताभ्यां भोगोत्तरपदाच्च प्रातिपदिकात्खः प्रत्ययो भवति 'तस्मै हितम्' इत्येतस्मिन्विषये । छस्यापवादः । आत्मन् इति नलोपो न कृतः प्रकृतिपरिमाणज्ञापनार्थम् । तेनोत्तरपदग्रहणं भोगशब्देनैव सम्बध्यते, न तु प्रत्येकम्। आत्मने हितम् 'आत्मनीनम्' (पै. सं. ५.१४.८) । 'आत्माध्वानौ खे' (६.४.१६९) इति प्रकृतिभावः । विश्वजनेभ्यो हितं विश्वजनीनम् । कर्मधारयादेवेष्यते । षष्ठीसमासाद् बहुव्रीहेश्च छ एव भवति। विश्वजनाय हितं विश्वजनीयम् ।

पञ्चजनादुपसंख्यानम् (म. भा. ५.१.९ वा. ४) । पञ्चजनाच्च खः । अत्रापि कर्मधारयादिष्यते । पञ्चजनीनम् । अन्यत्र - पञ्चजनीयम् ।

सर्वजनाट्ठञ् खश्च (वा. ५) । सार्वजनिकम् , सर्वजनीनम्, अत्रापि कर्मधारयादेव। सर्वजनीयम् अन्यत् ।

महाजनान्नित्यं ठञ्वक्तव्यः (वा. ६) । महाजनाय हितं माहाजनिकम् । तत्पुरुषादेव । बहुव्रीहेस्तु छ एव भवति - महाजनीयम् ।

भोगोत्तरपदात्खल्वपि - मातृभोगीणः । पितृभोगीणः । भोगशब्दः शरीरवाची। केवलेभ्यो मात्रादिभ्यश्छ एव भवति । मात्रीयम् । पित्रीयम् ।

राजाचार्याभ्यां तु नित्यम् (वा. ४) । भोगोत्तरपदाभ्यामेव प्रत्यय इष्यते, न केवलाभ्याम्। राजभोगीनः । आचार्यादणत्वं च (मभा. ५.१.९) । आचार्यभोगीनः। केवलाभ्यां वाक्यमेव भवति- राज्ञे हितम्, आचार्याय हितमिति ॥

१८९५. सर्वपुरुषाभ्यां णढञौ ॥ १० ॥ (१६७२)

सर्वपुरुषाभ्यां यथासंख्यं णढञौ प्रत्ययौ भवतः, 'तस्मै हितम्' (५.१.५) इत्येतस्मिन्विषये। छस्यापवादः । सर्वस्मै हितं सार्वम् । पौरुषेयम् ।

सर्वाण्णस्य वा वचनम् (म. भा. ५.१.१० वा. १) । सर्वीयम् ।

पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम् (वा. २) पौरुषेयो वधः, विकारः, समूहो वा, तेनकृतः-पौरुषेयो ग्रन्थः ॥

१८७६. माणवचरकाभ्यां खञ् ॥ ११ ॥ (१६७३)

माणवचरकशब्दाभ्यां खञ् प्रत्ययो भवति, 'तस्मै हितम्' (५.१.५) इत्येतस्मिन्विषये । छस्यापवादः । माणवाय हितं माणवीनम् । चारकीणम् ॥

१८९७. तदर्थं विकृतेः प्रकृतौ ॥ १२ ॥ (१६७४)

प्रकृतिः=उपादानकारणम्, तस्यैव उत्तरमवस्थान्तरम्=विकृतिः । विकृतिवाचिनः प्रातिपदिकात्प्रकृतावभिधेयायां यथाविहितं प्रत्ययो भवति । 'तदर्थम्' इति प्रत्ययार्थविशेषणम् । तदिति सर्वनाम्ना विकृतिः परामृश्यते, विकृत्यर्थायां प्रकृतौ प्रत्ययः । तदर्थग्रहणेन प्रकृतेरनन्यार्थताऽऽख्यायते, न प्रकृतिविकारसंभवमात्रे प्रत्ययः, किं तर्हि? प्रकृतेरनन्यार्थत्वे विवक्षिते । प्रत्ययार्थस्य च तदर्थत्वे सति सामर्थ्याल्लभ्या चतुर्थी समर्थविभक्तिः । केचित्तु 'तस्मै हितम्' इत्यनुवर्त्तयन्ति । अङ्गारेभ्यो हितानि एतानि काष्ठानि अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः । शङ्कव्यं दारु । पिचव्यः कार्पासः ।

तदर्थमिति किम्? यवानां धानाः । धानानां सक्तवः । प्रकृत्यन्तरनिवृत्तिरत्र विवक्षिता, न तादर्थ्यम् । धानानां सक्तवो न लाजानामिति ।

विकृतेरिति किम्? उदकार्थः कूपः । विकृतिaहणेऽक्रियमाणे या काचित्प्रकृतिर्गृह्यते, नोपादानकारणमेव । भवति च कूप उदकस्य प्रकृतिः; तत्रोत्पादनात्। न तु उदकं तस्य विकृतिः; अत्यन्तभेदात् ।

प्रकृताविति किम्? अस्यर्था कोशी । असिरयसो विकृतिर्भवति, न तु कोशी तस्य प्रकृतिर्भवति । द्वयोरपि प्रकृतिविकृत्योर्ग्रहणे विवक्षितः प्रकृतिविकारभावो लभ्यते ॥

१८९८. छदिरुपधिबलेर्ढञ् ॥ १३ ॥ (१६७५)

छदिरादिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति 'तदर्थं विकृतेः प्रकृतौ' (५.१.१२) इत्येतस्मिन्विषये । छस्यापवादः । छादिषेयाणि तृणानि । औपधेयं दारु । बालेयास्तण्डुलाः ।

उपधिशब्दात्स्वार्थे प्रत्ययः । उपधीयत-इत्युपधिः=रथाङ्गम् । औपधेयमपि तदेव दारु ॥

१८९९. ऋषभोपानहोर्ञ्यः ॥ १४ ॥ (१६७६)

ऋषभ, उपानह् - इत्येताभ्यां ञ्यः प्रत्ययो भवति 'तदर्थं विकृतेः प्रकृतौ' (५.१.१२) इत्येतस्मिन्विषये । छस्यापवादः । आर्षभ्यो वत्सः । औपानह्यो मुञ्जः।

चर्मण्यपि प्रकृतित्वेन विवक्षिते पूर्वप्रतिषेधादयमेवेष्यते - औपानह्यं चर्म॥

१९००. चर्मणोऽञ् ॥ १५ ॥ (१६७७)

'चर्मणः' इति षष्ठी । चर्मणो या विकृतिः तद्वाचिनः प्रातिपदिकादञ् प्रत्ययो भवति 'तदर्थं विकृतेः प्रकृतौ' (५.१.१२) इत्येतस्मिन्विषये । छस्यापवादः.। वार्ध्रं चर्म । वारत्रं चर्म ॥

१९०१. तदस्य तदस्मिन्स्यादिति ॥ १६ ॥ (१६७८)

'तत्' इति प्रथमा समर्थविभक्तिः, 'अस्य' इति प्रत्ययार्थः, 'स्यात्' इति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः । एवं द्वितीयेऽपि वाक्ये । सप्तम्यर्थे तु प्रत्यय इत्येतावान्विशेषः । प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमासमर्थं स्याच्चेत्तद्भवति । इतिकरणस्ततश्चेद्विवक्षा । प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः । प्रासादीयं दारु । सप्तम्यर्थे खल्वपि-प्राकारोऽस्मिन्देशे स्यात् प्राकारीयो देशः। प्रासादीया भूमिः ।

स्यादिति संभावनायां लिङ् 'संभावनेऽलम्' इति चेत् (३.३.१५४) इत्यादिना, इष्टकानां बहुत्वेन तत्संभाव्यते । प्राकार आसामिष्टकानां स्यादिति । देशस्य च गुणेन संभाव्यते-प्रासादोऽस्मिन्देशे स्यादिति ।

प्रकृतिविकारभावस्तादर्थ्यं चेह न विवक्षितम्, किं तर्हि? योग्यतामात्रम्; तेन पूर्वस्यायमविषयः । द्विस्तद्ग्रहणं न्यायप्रदर्शनार्थम्-अनेकस्मिन्प्रत्ययार्थे प्रत्येकं समर्थविभक्तिः सम्बन्धनीयेति ।

अथेह कस्मान्न भवति-प्रासादो देवदत्तस्य स्यादिति, गुणवानयं सम्भाव्यते, प्रासादलाभोऽस्येति? 'इतिकरणो विवक्षार्थ' इत्युक्तम् ॥

१९०२. परिखाया ढञ् ॥ १७ ॥ (१६७९)

परिखाशब्दाद् ढञ् प्रत्ययो भवति 'तदस्य तदस्मिन्स्यादिति' (५.१.१६) एतस्मिन्नर्थे । छस्यापवादः । पारिखेयी भूमिः ।

छयतोः पूर्णोऽवधिः । इतः परमन्यः प्रत्ययो विधीयते ॥

१९०३. प्राग्वतेष्ठञ् ॥ १८ ॥ (१६८०)

'तेन तुल्यं क्रिया चेद्वतिः' (५.१.११५) इति वक्ष्यति । प्रागेतस्माद्वतिसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः ठञ् प्रत्ययस्तेष्वधिकृतो वेदितव्य। वक्ष्यति-'पारायणतुरायणचान्द्रायणं वर्त्तयति' (५.१.७२) । पारायणिकः । तौरायणिकः। चान्द्रायणिकः ॥

१९०४. आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥ १९ ॥ (१६८१)

'तदर्हति' (५.१.६३) इति वक्षयति । आ एतस्मादर्हसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्य, गोपुच्छादीन्वर्जयित्वा । अभिविधौ वायमाकारः, तेनार्हत्यर्थेऽपि ठञ्भवत्येव । ठञधिकारमध्ये तदपवादः ठञ्विधीयते । वक्ष्यति-'तेन क्रीतम्' (५.१.३७) । नैष्किकम् । पाणिकम् ।

अगोपुच्छसंख्यापरिमाणादिति किम्? गोपुच्छेन क्रीतं गौपुच्छिकम् ।

संख्या-षाष्टिकम् । परिमाण-प्रास्थिकम् । कौडविकम् । ठञ् प्रत्युदाह्रियते।

संख्यापरिमाणयोः को विशेषः? भेदगणनम्=संख्या, एकत्वादिः । गुरुत्वमानम्=उन्मानं पलादिः । आयाममानम्=प्रमाणं वितस्त्यादिः । आरोहपरिणाहमानम्=परिमाणं प्रस्थादि ॥

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ॥ (म.भा. ५.१.२९)

१९०५. असमासे निष्कादिभ्यः ॥ २० ॥ (१६८२)

'आर्हात्' (५.१.१९) इत्येव । निष्कादिभ्यः शब्देभ्योऽसमासे ठक्प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः । नैष्किकम् । पाणिकम् । पादिकम् । माषिकम् ।

असमास इति किम्? परमनैष्किकम् । उत्तमनैष्किकम् । ठञेव भवति, 'परिमाणान्तस्य' (७.३.१७) इत्युत्तरपदवृद्धिः ।

अथ किमर्थमसमास इत्युच्यते, यावता ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते (व्या. परि. ८९)? निष्कादिष्वसमासग्रहणं ज्ञापकम्-पूर्वत्र तदन्ताप्रतिषेधस्य । 'उगवादिभ्यो यत्' (५.१.२) - गव्यम्, सुगव्यम्, अतिसुगव्यम्। 'विभाषा हविरपूपादिभ्यः' (५.१.४) - अपूप्यम्। अपूपीयम् । यवापूप्यम्, यवापूपीयम्। 'शरीरावयवाद्यत्' (५.१.६)-दन्त्यम्, राजदन्त्यम् इत्येवमादि सिद्धं भवति ।

इत उत्तरं च संख्यापूर्वपदानां तदन्तविधिरिष्यते । 'पारायणतुरायणचान्द्रायणं वर्तयति' (५.१.७२) - द्वैपारायणिकः, त्रैपारायणिकः । लुगान्तायास्तु प्रकृतेर्नेष्यते.। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । त्रिशूर्पम् । द्विशूर्पेण क्रीतमिति तदन्तविधिप्रतिषेधात् 'शूर्पादञन्यतरस्याम्' (५.१.२६) इत्यञ् न भवति, सामान्यविहितष्ठञेव भवति । द्विशौर्पिकम् (म. भा.) ।

ठञो द्विगुं प्रत्यनिमित्तत्वाल्लुगभावः । तथा चोक्तम् - 'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (म. भा.) इति ।

निष्क । पण । पाद । माष । वाह । द्रोण । षष्टि । निष्कादिः ॥

१९०६. शताच्च ठन्यतावशते ॥ २१ ॥ (१६८६)

'आर्हाद्' इत्येव । शतशब्दात् ठन्यतौ प्रत्ययौ भवतः अशतेऽभिधेये, आर्हीयेष्वर्थेषु । कनोऽपवादः । शतेन क्रीतं शतिकम् । शत्यम् ।

अशते इति किम्? शतं परिमाणमस्य शतकं निदानम् (म. भा.) । प्रत्ययार्थोऽत्र सङ्घः। शतमेव वस्तुतः प्रकृत्यर्थान्न भिद्यते । इह तु न भवति - शतेन क्रीतं शत्यं शाटकशतम्, शतिकं शाटकशतमिति (म. भा.) । वाक्येन ह्यत्र प्रत्ययार्थस्य तत्त्वं गम्यते, न श्रुत्या । तथा चोक्तम्-'शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः' (म.भा.) इति ।

चकारोऽसमास इत्यनुकर्षणार्थः । द्वौ च शतं च द्विशतम्, द्विशतेन क्रीतं द्विशतकम्। त्रिशतकम् ।

'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' इत्यनया इष्ट्या समासादपि प्राप्नोति ॥

१९०७. संख्याया अतिशदन्ताया कन् ॥ २२ ॥ (१६८७)

'आर्हात्' इत्येव । संख्याया अत्यन्ताया अशदन्तायाश्च कन्प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञोऽपवादः । पञ्चभिः क्रीतः पञ्चकः पटः । बहुकः । गणकः।

अतिशदन्ताया इति किम्? साप्ततिकः । चात्वरिंशत्कः ।

अर्थवतस्तिशब्दस्य ग्रहणाड्डतेः पर्युदासो न भवति (म. भा.) - कतिकः ॥

१९०८. वतोरिड् वा ॥ २३ ॥ (१६८८)

वत्वन्तस्य संख्यात्वात् कन् सिद्ध एव, तस्य त्वनेन वा इडागमो विधीयते। वतोः परस्य कनो वा इडागमो भवति आर्हीयेष्वर्थेषु । तावतिकः, तावत्कः । यावतिकः, यावत्कः ॥

१९०९. विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ॥ २४ ॥ (१६८९)

विंशतित्रिंशद्भ्यां ड्वुन् प्रत्ययो भवति, असंज्ञायां विषये, आर्हियेष्वर्थेषु । विंशकः । त्रिंशकः । 'ति विंशतेर्डिति' (६.४.१४२) इति तिलोपः ।

असंज्ञायामिति किम्? विंशतिकः । त्रिंशत्कः ।

कथं पुनरत्र कन्, यावता 'अतिशदन्तायाः' इति पर्युदासेन भवितव्यम् (म. भा.) ? योगविभागः करिष्यते - 'विंशतित्रिंशद्भ्याम् कन्' प्रत्ययो भवति, ततः 'ड्वुनसंज्ञायाम्' (म. भा.) इति ॥

१९१०. कंसाट्टिठन् ॥ २५ ॥ (१६९०)

कंसाट्टिठन् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः । टकारो ङीबर्थः। इकार उच्चारणार्थः । नकारः स्वरार्थः । कंसिकः । कंसिकी ।

अर्द्धाच्चेति वक्तव्यम् (म. भा. ५.१.२५ वा. १) । अर्द्धिकः । अर्द्धिकी ।

कार्षापणाट्टिठन्वक्तव्यः (वा. २) । कार्षापणिकः । कार्षापणिकी ।

प्रतिशब्दश्चास्यादेशो वा वक्तव्यः (वा. २) । प्रतिकः । प्रतिकी ॥

१९११. शूर्पादञन्यतरस्याम् ॥ २६ ॥ (१६९१)

शूर्पशब्दादन्यतरस्यामञ् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः । पक्षे सोऽपि भवति । शूर्पेण क्रीतं शौर्पम्, शौर्पिकम् ॥

१९१२. शतमानविंशतिकसहस्रवसनादण् ॥ २७ ॥ (१६९२)

शतमानादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठक्ठञोरपवादः। शतमानेन क्रीतं शातमानं शतम् । वैशतिकम् । साहस्रम् । वासनम् ॥

१९१३. अध्यर्धपूर्वद्विगोर्लुगसंज्ञायम् ॥ २८ ॥ (१६९३)

'आर्हात्' इत्येव । अध्यर्धशब्दः पूर्वो यस्मिंस्तस्मादध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च परस्य आर्हीयस्य लुग् भवति, असंज्ञायां विषये । अध्यर्धकंसम् । द्विकंसम्। अध्यर्धशूर्पम् । द्विशूर्पम् । त्रिशूर्पम् ।

असंज्ञायामिति किम्? पाञ्चलौहितिकम् । पाञ्चकलापिकम् । लोहिनीशब्दस्य 'भस्याऽढे तद्धिते' (६.३.३५) इति पुंवद्भावः ।

प्रत्ययान्तस्य विशेषणमसंज्ञाग्रहणम्-न चेत्प्रत्ययान्तं संज्ञेति ।

अद्ध्यर्द्धशब्दः संख्यैव, किमर्थं भेदेनोपादीयते? ज्ञापकार्थम्-क्वचिदस्य संख्याकार्यं न भवति, 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (५.४.१७) इति॥

१९१४. विभाषा कार्षापणसहस्राभ्याम् ॥ २९ ॥ (२६९४)

अध्यर्धपूर्वाद् द्विगोश्च कार्षापणसहस्रान्तादुत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति। पूर्वेण लुकि नित्ये प्राप्ते विकल्प्यते । अध्यर्धकार्षापणम्, अध्यर्धकार्षापणिकम् । द्विकार्षापणम्, द्विकार्षापणिकम् । औपसंख्यानिकस्य टिठनो लुक् । अलुक्पक्षे च प्रतिरादेशो विकल्पितः । अध्यर्धप्रतिकम् । द्विप्रतिकम् । त्रिप्रतिकम् । सहस्रात्-अध्यर्धसहस्रम्,

अध्यर्धसाहस्रम् । द्विसहस्रम्, द्विसाहस्रम्। अलुक्पक्षे 'संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः ।

सुवर्णशतमानयोरुपसंख्यानम् (म. भा. ५.१.२९ वा. १) । अध्यर्धसुवर्णम्, अध्यर्धसौवर्णिकम् । द्विसुवर्णम्, द्विसौवर्णिकम् । अध्यर्धशतमानम्, अध्यर्धशातमानम्। द्विशतमानम्, द्विशातमानम् । 'परिमाणान्तस्य०' (७.३.१७) इत्युत्तरपदवृद्धिः ॥

१९१५. द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥ (१६९५)

'द्विगोः' इत्येव । द्वित्रिपूर्वाद्द्विगोर्निष्कान्तादार्हीयप्रत्ययस्य विभाषा लुग्भवति। द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् ।

बहुपूर्वाच्चेति वक्तव्यम् (म. भा. ५.१.३० वा. २) । बहुनिष्कम्, बहुनैष्किकम्। 'परिमाणान्तस्य०' (७.३.१७) इत्युत्तरपदवृद्धिः ॥

१९१६. बिस्ताच्च ॥ ३१ ॥ (१६९६)

'द्वित्रिपूर्वात्' इति चकारेणानुकृष्यते । द्वित्रिपूर्वाद्बिस्तान्ताद् द्विगोः परस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति । द्विबिस्तम्, द्विबैस्तिकम् । त्रिबिस्तम्, त्रिबैस्तिकम्। बहुबिस्तम्, बहुबैस्तिकम् ॥

१९१७. विंशतिकात्खः ॥ ३२ ॥ (१६९७)

अध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च विंशतिकशब्दान्तादार्हीयेष्वर्थेषु खः प्रत्ययो भवति । अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् । त्रिविंशतिकीनम् । विधानसामर्थ्यादस्य लुग्न भवति॥

१९१८. खार्या ईकन् ॥ ३३ ॥ (१६९८)

'अध्यर्धपूवाद् द्विगोः' इत्येव । अध्यर्धपूर्वात्प्रातिपदिकाद् द्विगोश्च खारीशब्दान्तादार्हीयेष्वर्थेषु ईकन् प्रत्ययो भवति । अध्यर्धखारीकम् । द्विखारीकम्।

केवलायाश्चेति वक्तव्यम् (म.भा. ५.४.३३ वा. १) । खारीकम् ।

काकिण्याश्चोपसंख्यानम् (वा. २) । अध्यर्धकाकिणीकम् । द्विकाकिणीकम्। त्रिकाकिणीकम् ।

केवलायाश्च (वा. ३) । काकिणीकम् ॥

१९१९. पणपादमाषशताद्यत् ॥ ३४ ॥ (१६९९)

'अध्यर्धपूर्वाद् द्विगोः' इत्येव । अध्यर्धपूर्वाद् द्विगोश्च पणपादमाषशत-शब्दान्तादार्हीयेष्वर्थेषु यत् प्रत्ययो भवति । अध्यर्धपण्यम्, द्विपण्यम्, त्रिपण्यम् । पाद-अध्यर्धपाद्यम्, द्विपाद्यम्, त्रिपाद्यम् । पद्भावो न भवति - 'पद्यत्यतदर्थे' (६.३.४३) इति; प्राण्यङ्गस्य स (६.३.४२) इष्यते, इदं तु परिमाणम्। माष - अध्यर्धमाष्यम्, द्विमाष्यम्, त्रिमाष्यम् । शत - अध्यर्धशत्यम्, द्विशत्यम्, त्रिशत्यम्॥

१९२०. शाणाद्वा ॥ ३५ ॥ (१७००)

'अध्यर्धपूवाद् द्विगोः' इत्येव । शाणशब्दादध्यर्धपूर्वाद् द्विगोरार्हीयेष्वर्थेषु वा यत् प्रत्ययो भवति । ठञोऽपवादः । पक्षे सोऽपि भवति, तस्य च लुक् । अध्यर्धशाण्यम्, अध्यर्धशाणम् । द्विशाण्यम्, द्विशाणम् । त्रिशाण्यम्, त्रिशाणम् ।

शताच्चेति वक्तव्यम् (म. भा. ५.१.३५ वा. १) । अध्यर्धशत्यम्, अध्यर्धशतम्। द्विशत्यम्, द्विशतम् । त्रिशत्यम्, त्रिशतम् ॥

१९२१. द्वित्रिपूर्वादण्च ॥ ३६ ॥ (१७०१)

'शाणाद्वा' (५.१.३५) इत्येव । द्वित्रिपूर्वाच्छाणान्तात्प्रातिपदिकादार्हीयेष्वर्थेषु अण् प्रत्ययो भवति, चकाराद्यच्च वा । तेन त्रैरूप्यं सम्पद्यते- द्वैशाणम्, द्विशाणम्, द्विशाण्यम् । त्रैशाणम्, त्रिशाण्यम्, त्रिशाणम् । 'परिमाणान्तस्यासंज्ञाशाणयोः' (७.३.१७) इति पर्युदासादादिवृद्धिरेव भवति ॥

१९२२. तेन क्रीतम् ॥ ३७ ॥ (१७०२)

ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः, तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते । 'तेन' इति तृतीयासमर्थात् 'क्रीतम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सप्तत्या क्रीतं साप्ततिकम् । आशीतिकम् (५.१.१८)। नैष्किकम् । पाणिकम् । पादिकम् । माषिकम् (५.१.२०) । शत्यम्, शतिकम् । (५.१.२१) द्विकम् । त्रिकम् (४.१.२२) ।

'तेन' इति मूल्यात्करणे तृतीया समर्थविभक्तिः । अन्यत्रानभिधानान्न भवति-देवदत्तेन क्रीतम्, पाणिना क्रीतमिति ।

द्विवचनबहुवचनान्तात्प्रत्ययो न भवति-प्रस्थाभ्यां क्रीतम्, प्रस्थैः क्रीतमिति; अनभिधानादेव ।

यत्र तु प्रकृत्यर्थस्य संख्याभेदावगमे प्रमाणमस्ति, तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भवति - द्वाभ्यां क्रीतं द्विकम्, त्रिकम्, पञ्चकम् । तथा - मुद्गैः क्रीतं मौद्गिकम्, माषिकम्; न ह्येकेन मुद्गेन क्रयः संभवति (म. भा.) ॥

१९२३. तस्य निमित्तं संयोगोत्पातौ ॥ ३८ ॥ (१७०४)

'तस्य' इति षष्ठीसमर्थात् 'निमित्तम्' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत्तन्निमित्तं संयोगश्चेत्स भवति उत्पातो वा । संयोगः=सम्बन्धः । प्राणिनां शुभाशुभसूचकः महाभूतपरिणामः=उत्पातः । शतस्य निमित्तं धनपतिना संयोगः शत्यः शतिकः । साहस्रः । उत्पातः खल्वपि-शतस्य निमित्तमुत्पातो दक्षिणाक्षिस्पन्दनम्-शत्यम्, शतिकम् । साहस्रम् ।

तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् (म. भा. ५.१.३८ वा. १) । वातस्य शमनं कोपनं वा वातिकम् । पैत्तिकम् । श्लैष्मिकम्।

सन्निपाताच्चेति वक्तव्यम् (वा. २) । सान्निपातिकम् ॥

१९२४. गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ॥ ३९ ॥ (१७०५)

गोशब्दाद् द्व्यचश्च प्रातिपदिकात्संख्यापरिमाणाश्वादिविवर्जिताद्यत् प्रत्ययो भवति 'तस्य निमित्तं संयोगोत्पातौ' (५.१.३८) इत्येतस्मिन्नर्थे । ठञादीनामपवादः। गोर्निमित्तं संयोग उत्पातो वा गव्यः । द्व्यचः खल्वपि - धन्यम् । स्वर्ग्यम् । यशस्यम् । आयुष्यम् ।

असंख्यापरिमाणाश्वादेरिति किम्? पञ्चानां निमित्तं पञ्चमम् । सप्तकम् । अष्टकम् । परिमाण-प्रास्थिकम् । खारीकम् । अश्वादि - आश्विकः ।

ब्रह्मवर्चसादुपसंख्यानम् (म. भा. ५.१.३९ वा. १) । ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगः ब्रह्मवर्चस्यम् ।

अश्व । अश्मन् । गण । ऊर्णा । उमा । वसु । वर्ष । भङ्ग । अश्वादिः ॥

१९२५. पुत्राच्छ च ॥ ४० ॥ (१७०६)

पुत्रशब्दाच्छः प्रत्ययो भवति चकाराद्यच्च 'तस्य निमित्तं संयोगोत्पातौ' (५.१.३८) इत्येतस्मिन्विषये । 'द्व्यचः' इति नित्ये यति प्राप्ते वचनम् । पुत्रस्य निमित्तं संयोग उत्पातो वा पुत्रीयम् । पुत्र्यम् ॥

१९२६. सर्वभूमिपृथिवीभ्यामणञौ ॥ ४१ ॥ (१७०७)

सर्वभूमि-पृथिवी-शब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः 'तस्य निमित्तं संयोगोत्पातौ' (५.१.३८) इत्येतस्मिन्विषये । ठकोऽपवादौ । सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । पार्थिवः । सर्वभूमेरनुशतिकादि (७.३.२०) - पाठादुभयपदवृद्धिः ॥

१९२७. तस्येश्वरः ॥ ४२ ॥ (१७०८)

'तस्य' इति षष्ठीसमर्थाभ्यां सर्वभूमि-पृथिवी-शब्दाभ्यामणञौ प्रत्ययौ भवतः 'ईश्वरः' इत्येतस्मिन्विषये । सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ।

षष्ठीप्रकरणे पुनः षष्ठीसमर्थविभक्तिनिर्देशः प्रत्ययार्थस्य निवृत्तये; अन्यथा संयोगोत्पाताविव ईश्वरोऽपि प्रत्ययार्थस्य निमित्तस्य विशेषणं सम्भाव्येत ॥

१९२८. तत्र विदित इति च ॥ ४३ ॥ (१७०९)

'तत्र' इति सप्तमीसमर्थाभ्यां सर्वभूमि-पृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः 'विदितः' इत्येतस्मिन्नर्थे । विदितः=ज्ञातः, प्रकाशित इत्यर्थः । सर्वभूमौ विदितः सार्वभौमः पार्थिवः ॥

१९२९. लोकसर्वलोकाट्ठञ् ॥ ४४ ॥ (१७१०)

लोक-सर्वलोक-शब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां 'विदितः' इत्येतस्मिन्विषये ठञ् प्रत्ययो भवति । लोके विदितः लौकिकः । सार्वलौकिकः । अनुशतिकादित्वाद् (४.३.२०) उभयपदवृद्धिः ॥

१९३०. तस्य वापः ॥ ४५ ॥ (१७११)

'तस्य' इति सप्तमीसमर्थाद् 'वापः' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । उप्यतेऽस्मिन्वापः, क्षेत्रमुच्यते । प्रस्थस्य वापः=क्षेत्रं प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

१९६१. पात्रात्ष्ठन् ॥ ४६ ॥ (१७१२)

पात्रशब्दात् ष्ठन् प्रत्ययो भवति तस्य वापः' (५.१.४५) इत्येतस्मिन्विषये । ठञोऽपवादः। नकारः स्वरार्थः । षकारो ङीषर्थः । पात्रशब्दः परिमाणवाची । पात्रस्य वापः पात्रिकं क्षेत्रम् । पात्रिकी क्षेत्रभक्तिः ॥

१९३२. तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ४७ ॥ (१७१३)

'तत्' इति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमासमर्थं वृद्ध्यादि चेत्तद्दीयते । 'दीयते' इत्येकवचनान्तं वृद्ध्यादिभिः प्रत्येकमभिसम्बध्यते । तत्र (१) यदधमर्णेन उत्तमर्णाय मूलधनातिरिक्तं देयं तद् वृद्धिः । (२) ग्रामादिषु स्वामिग्राह्यो भागः=आयः । (३) पटादीनामुपादानमूलादतिरिक्तं द्रव्यं=लाभः । (४) रक्षानिर्वेशो राजभागः = शुल्कः । (५) उत्कोचः=उपदा । पञ्चास्मिन्वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते पञ्चकः । सप्तकः । शत्यः, शतिकः । साहस्रः ।

चतुर्थ्यर्थ उपसंख्यानम् (म.भा. ५.१.४७ वा. १) । पञ्चास्मै वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते पञ्चको देवदत्तः ।

सिद्धं त्वधिकरणत्वेन विवक्षितत्वात् । सममब्राह्मणे दानमिति यथा ॥

१९३३. पूरणार्धाड्डन् ॥ ४८ ॥ (१७१४)

पूरणवाचिनः शब्दादर्धशब्दाच्च ठन् प्रत्ययो भवति, 'तदस्मिन्वृद्ध्याय-लाभशुल्कोपदा दीयते' (५.१.४७) इत्येतस्मिन्नर्थे । यथायथं ठक्टिठनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन्दीयते। द्वितीयिकः । तृतीयिकः । पञ्चमिकः । सप्तमिकः। अर्धिकः । अर्धशब्दो रूपकार्धस्य रूढिः ॥

१९३४. भागाद्यच्च ॥ ५९ ॥ (१७१५)

भागशब्दाद्यत् प्रत्ययो भवति, चकाराड्ढँश्च, 'तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते' (५.१.४७) इत्येतस्मिन्नर्थे । ठञोऽपवादः । भागो वृद्ध्यादिरस्मिन्दीयते भाग्यम्, भागिकं शतम्। भाग्या, भागिका विंशतिः । भागशब्दोऽपि रूपकार्धस्य वाचकः ॥

१९३५. तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ॥ ५० ॥ (१७१६)

'तत्' इति द्वितीयासमर्थाद्धरत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । प्रकृतिविशेषणम्-'भाराद्वंशादिभ्यः' इति, वंशादिभ्यः परो यो भारशब्दस्तदन्तात्प्रातिपदिकादिति । वंशभारं हरति वहत्यावहति वा वांशभारिकः। कौटजभारिकः । बाल्वजभारिकः ।

भारादिति किम्? वंशं हरति । वंशादिभ्य इति किम्? व्रीहिभारं हरति ।

अपरा वृत्तिः-भाराद्वंशादिभ्य इति, भारभूतेभ्यो वंशादिभ्य इत्यर्थः । भारशब्दोऽर्थद्वारेण वंशादीनां विशेषणम् । भारभूतान्वंशान् हरति वांशिकः । कौटजिकः। बाल्वजिकः ।

भारादिति किम्? वंशं हरति । वंशादिभ्य इति किम्? भारभूतान् व्रीहीन् वहति ।

सूत्रार्थद्वयमपि चैतदाचार्येण शिष्याः प्रतिपादिताः, तदुभयमपि ग्राह्यम् । हरति देशान्तरं प्रापयति चोरयति वा । वहत्युत्क्षिप्य धारयतीत्यर्थः । आवहति उत्पादयतीत्यर्थः ।

वंश । कुटज । बल्वज । मूल । अक्ष । स्थूणा । अश्मन् । अश्व । इक्षु । खट्वा । वंशादिः ।

१९३६. वस्नद्रव्याभ्यां ठन्कनौ ॥ ४१ ॥ (१७१७)

वस्न-द्रव्यशब्दाभ्यां द्वितीयासमर्थाभ्यां यथासंख्यं ठन्,कन्-इत्येतौ प्रत्ययौ भवतो हरत्यादिष्वर्थेषु । वस्नं हरति वहति वा वस्निकः । द्रव्यकः ॥

१९३७. संभवत्यवहरति पचति ॥ ५२ ॥ (१७१८)

'तत्' इति द्वितीया समर्थविभक्तिरनुवर्त्तते । तदिति द्वितीया-समर्थात्सम्भवत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । तत्राधेयस्य प्रमाणानतिरेकः=सम्भवः । उपसंहरणम्=अवहारः । विक्लेदनम्=पाकः । प्रस्थं संभवति अवहरति पचति वा प्रास्थिकः । कौडविकः । खारीकः ।

ननु च पाके च सम्भवोऽस्ति ? नास्त्यत्र नियोगः-प्रस्थं पचति ब्राह्मणी प्रास्थिकी ।

तत्पचतीति द्रोणादण्च (म. भा. ४.१.५२ वा. १) । द्रोणं पचति द्रौणी । द्रौणिकी ॥

१९३८. आढकाचितपात्रात् खोऽन्यतरस्याम् ॥ ५३ ॥ (१७१९)

आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्योऽन्यतरस्यां संभवादिष्वर्थेषु खः प्रत्ययो भवति। ठञोऽपवादः । पक्षे सोऽपि भवति । आढकं संभवत्यवहरति पचति वा आढकीना, आढकीना, आढकिकी । आचितीना, आचितिकी । पात्रीणा, पात्रिकी ॥

१९३९. द्विगोष्ष्ठँश्च ॥ ५४ ॥ (१७२०)

'आढकाचितपात्रात्' इत्येव । आढकाचितपात्रान्ताद् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति चकारात्खः, अन्यतरस्याम् । विधानसामर्थ्यादनयोर्लुग्न भवति। ठञस्तु पक्षेऽनुज्ञातस्य 'अध्यर्धपूर्वद्विगोः' (५.१.२८) इति लुग्भवत्येव । नकारः स्वरार्थः । षकारो ङीषर्थः । द्व्याढकिकी, द्व्याढकीना, द्व्याढकी (४.१.२१) । द्व्याचितिकी, द्व्याचितीना, द्व्याचिता । 'अपरिमाणविस्ताचित' (४.१.२२) इति ङीपः प्रतिषेधः । द्विपात्रिकी, द्विपात्रीणा, द्विपात्री ॥

१९४०. कुलिजाल्लुक्खौ च ॥ ५५ ॥ (१७२१)

'द्विगोः' इत्येव । कुलिजशब्दान्ताद् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भवतः। चकारात्ष्ठँश्च। 'अन्यतरस्याम्' ग्रहणानुवृत्त्या लुगपि विकल्प्यते, ठञः पक्षे श्रवणं भवति । तेन चातूरूप्यं संपद्यते-द्वे कुलिजे संभवत्यवहरति पचति वा द्विकुलिजिकी, द्विकुलिजीना, द्विकुलिजा,द्वैकुलिजिकी ।

'परिमाणान्तस्यासंज्ञाशाणयोः' (७.३.२०) इत्यत्र कुलिजग्रहणमपीष्यते तेनोत्तरपदवृद्धिरपि न भवति ॥

१९४१. सोऽस्यांशवस्नभृतयः ॥ ५६ ॥ (१७२२)

'स' इति प्रथमासमर्थात् 'अस्य' इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत् प्रथमासमर्थमंशवस्नभृतयश्चेत्ता भवन्ति । अंश=भागः । वस्नम्=मूल्यम् । भृतिः=वेतनम् । पञ्च अंशो वस्नो वा भृतिर्वास्य पञ्चकः । सप्तकः । साहस्रः॥

१९४२. तदस्य परिमाणम् ॥ ५७ ॥ (१७२३)

'तत्' इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत् प्रथमासमर्थं परिमाणं चेत्तद्भवति प्रस्थः परिमाणमस्य प्रास्थिको राशिः । खारशतिकः। शत्यः, शतिकः । साहस्रः । द्रौणिकः । कौडाविकः । वर्षशतं परिमाणमस्य वार्षशतिकः । वार्षसहस्रिकः । षष्टिर्जीवितपरिमाणमस्येति षाष्टिकः । साप्ततिकः।

समर्थविभक्तिः प्रत्ययार्थश्च पूर्वसूत्रादेवानुवर्तिष्यते, किमर्थं पुनरनयोरुपादानम्? पुनर्विधानार्थम् । द्वे षष्टी जीवितपरिमाणमस्य द्विषाष्टिकः । द्विसाप्ततिकः । पुनर्विधानसामर्थ्याद् 'अध्यर्धपूर्वद्विगोर्लुक्' (५.१.२८) न भवति ॥

१९४३. संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ॥ ५८ ॥ (१७२४)

'तदस्य परिमाणम्' (५.१.४७) इति वर्त्तते । संख्यावाचिनः प्रातिपदिकात् परिमाणोपाधिकात्प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति । 'संज्ञासङ्घसूत्राध्ययनेषु' इति प्रत्ययार्थविशेषणम् ।

तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः (म. भा.) - पञ्चैव पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः ।

सङ्घ-पञ्च परिमाणमस्य, पञ्चकः सङ्घः । अष्टकः ।

सूत्र-अष्टावध्यायाः परिमाणमस्य सूत्रस्य अष्टकं पाणिनीयम् । दशकं वैयाघ्रपदीयम् । त्रिकं काशकृत्स्नम् । ननु चाध्यायसमूहः सूत्रसङ्घ एव भवति? नैतदस्ति; प्राणिसमूहे सङ्घशब्दो रूढः ।

अध्ययन-पञ्चकोऽधीतः । सप्तकोऽधीत । आष्टकः । नवकः । अधीतिः = अध्ययनम्, तस्य संख्यापरिमाणं पञ्चावृत्तयः =पञ्च वाराः, पञ्चरूपाण्यस्य अध्ययनस्य पञ्चकमध्ययनम्॥

स्तोमे डविधिः पञ्चदशाद्यर्थः (म. भ. ५.१.५८ वा. ८) । पञ्चदश मान्त्राः परिमाणमस्य पञ्चदशः स्तोमः । सप्तदशः । एकविंशः ।

शन्शतोर्डिनिश्छन्दसि (?) । पञ्चदशिनोऽर्द्धमासाः (तै. सं. ७.५.२०.१).। त्रिंशिना मासः (तै. सं. ७.५.२०.१) ।

विंशतेश्चेति वक्तव्यम् (?) । विंशिनोऽङ्गिरसः ॥

१९४४. पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्य-शीतिनवतिशतम् ॥ ५९ ॥ (१७२५)

'तदस्य परिमाणम्' (५.१.४७) इति वर्त्तते । पंक्त्यादयः शब्दा निपात्यन्ते। यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् । पञ्चानां टिलोपः, तिः प्रत्ययश्च। पञ्च परिमाणमस्य पंक्तिश्छन्दः । द्वयोर्द्वशतोर्विन्भावः शतिच्च प्रत्ययः-द्वौ दशतौ परिमाणमस्य सङ्घस्य विंशतिः (म. भा.) । त्रयाणां दशताम् त्रिन्भावः शच्च प्रत्ययः-त्रयो दशतः परिमाणमस्य त्रिंशत् । चतुर्णां दशतां चत्वारिन्भावः शच्च प्रत्ययः-चत्वारो दशतः परिमाणमस्य चत्वारिंशत् । पञ्चानां दशतां पञ्चाभावः शच्च प्रत्ययः-पञ्च दशतः परिमाणमस्य पञ्चाशत् । षण्णां दशतां षड्भावः, तिः प्रत्ययः, अपदत्वं च - षड् दशतः परिमाणमस्य षष्टिः । सप्तानां दशतां सप्तभावः तिः प्रत्ययश्च - सप्त दशतः परिमाणमस्य सप्ततिः । अष्टानां दशतामशीभावस्तिः प्रत्ययश्च अष्टौ दशतः परिमाणमस्य अशीतिः । नवानां दशतां नवभावस्तिः प्रत्ययश्च - नव दशतः परिमाणमस्य नवतिः । दशानां दशतां शभावः तश्च प्रत्ययः - दश दशतः परिमाणमस्य सङ्घस्य शतम् ।

विंशत्यादयो गुणशब्दाः ते यथाकथञ्चिद्व्युत्पाद्याः । नात्रावयवार्थेऽभिनि-वेष्टव्यम्; तथा हि-पंक्तिरिति क्रमसन्निवेशेऽपि वर्तते - ब्राह्मणपंक्तिः, पिपीलिकापंक्तिरिति । न चात्रावयवार्थः कश्चिदस्ति ।

या चैषां विषयभेदेन गुणमात्रे गुणिनि च वृत्तिः, स्वलिङ्गसंख्यानुविधानं च, एतदपि सर्वं स्वाभाविकमेव ।

सहस्रादयोऽप्येवञ्जातीयकास्तद्वदेव द्रष्टव्याः । उदाहरणमात्रमेतदिति ॥

१९४५. पञ्चद्दशतौ वर्गे वा ॥ ६० ॥ (१७२६)

'पञ्चत्' , 'दशत्' -इत्येतौ वा निपात्येते 'तदस्य परिमाणम्' इत्येतस्मिन्विषये वर्गेऽभिधेये । 'संख्यायाः' (५.१.५८) इति कनि प्राप्ते डतिर्निपात्यते । वावचनात्पक्षे सोऽपि भवति । पञ्च परिमाणमस्य पञ्चद् वर्गः, दशद्वर्गः । पञ्चको वर्गः, दशको वर्गः ॥

१९४६. सप्तनोऽञ् छन्दसि ॥ ६१ ॥ (३४९१)

'वर्गे' इत्येव । 'तदस्य परिमाणम्' इति च । सप्तन्-शब्दाच्छन्दसि विषयेऽञ् प्रत्ययो भवति वर्गेऽभिधेये । सप्त साप्तान्यसृजन् (तै. सं. ५.४.७.५)॥

१९४७. त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ६२ ॥ (१७२७)

'तदस्य परिमाणम्' इत्येव । 'वर्गे' इति निवृत्तम् । त्रिंशच्चत्वारिंशच्छब्दाभ्यां संज्ञायां विषये डण्प्रत्ययो भवति 'तदस्य परिमाणम्' इत्येतस्मिन्विषये ब्राह्मणेऽभिधेये। अभिधेये सप्तम्येषा, न विषयसप्तमी । तेन मन्त्रभाषयोरपि भवति । त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ब्राह्मणानि । चात्वारिंशानि ब्राह्मणानि । कानिचिदेव ब्राह्मणान्युच्यन्ते ॥

१९४८. तदर्हति ॥ ६३ ॥ (१७२८)

'तत्' इति द्वितीयासमर्थात् 'अर्हति' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवित। श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः । वास्त्रयुग्मिकः (५.१.१८) । शत्यः, शतिकः (५.१.२१)। साहस्रः (५.१.२७) ॥

१९४९. छेदादिभ्यो नित्यम् ॥ ६४ ॥ (१७२९)

नित्यग्रहणं प्रत्ययार्थविशेषणम् । छेदादिभ्यो द्वितीयासमर्थेभ्यो 'नित्यमर्हति' इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । छेदं नित्यमर्हति छैदिकः । भैदिकः ।

छेद । भेद । द्रोह । दोह । वर्त्त । कर्ष । सम्प्रयोग । विप्रयोग । प्रेषण । सम्प्रश्न । विप्रकर्ष । विरागो विरङ्गं च (ग. सू. ११०) । (वैरङ्गिकः ।) छेदादिः ॥

१९५०. शीर्षच्छेदाद्यच्च ॥ ६५ ॥ (१७३०)

शीर्षच्छेदशब्दाद् द्वितीयासमर्थात् ‘ नित्यमर्हति’ इत्यस्मिन्नर्थे यत्प्रत्ययो भवति, चकाराद्यथाविहितञ्च । शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः, शैर्षच्छेदिकः। प्रत्ययसन्नियोगेन शिरसः शीर्षभावो निपात्यते ॥

१९५१. दण्डादिभ्यो यः ॥ ६६ ॥ (१७३१)

‘नित्यम्’ इति निवृत्तम् । दण्डादिभ्यो द्वितीयासमर्थेभ्यः ‘अर्हति’ इत्येतस्मिन्नर्थे यः प्रत्ययो भवति । ठकोऽपवादः । दण्डमर्हति दण्ड्यः । मुसल्यः ।

दण्ड । मुसल । मधुपर्क । कशा । अर्घ । मेधा । मेघ । युग । उदक । वध। गुहा । भाग । इभ । दण्डादिः ॥

१९५२. छन्दसि च ॥ ६७ ॥ (३४९२)

प्रातिपदिकमात्राच्छन्दसि विषये ‘तदर्हति’ इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति। ठञादीनामपवादः । उदक्या वृत्तयः । यूप्यः पलाशः । गर्त्यो देशः ॥

१९५३. पात्राद् घँश्च ॥ ६८ ॥ (१७३२)

पात्रशब्दाद् घन् प्रत्ययो भवति, चकाराद्यच्च, ‘तदर्हति’ इत्येतस्मिन्नर्थे । ठक्ठञोरपवादः । पात्रं परिमाणमप्यस्ति । पात्रमर्हति पात्रियः, पात्र्यः ॥

१९५४. कडङ्करदक्षिणाच्छ च ॥ ६९ ॥ (१७३३)

कडङ्कर-दक्षिणाशब्दाभ्यां छः प्रत्ययो भवति, चकाराद्यच्च ‘तदर्हति’ इत्येतस्मिन्विषये। ठकोऽपवादः । कडङ्करमर्हति कडङ्करीयो गौः । कडङ्कर्यः । दक्षिणामर्हति दक्षिणीयो भिक्षुः । दक्षिण्यो ब्राह्मणः ।

दक्षिणाशब्दस्य अल्पाच्तरस्य पूर्वनिपातेन लक्षणव्यभिचारचिह्नेन यथासंख्याभावं सूचयति ॥

१९५५. स्थालीबिलात् ॥ ७० ॥ (१७३४)

छयतावनुवर्त्तेते । स्थालीबिलशब्दाच्छयतौ प्रत्ययौ भवतः ‘तदर्हति’ इत्येतस्मिन्नर्थे । ठकोऽपवादौ स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः । स्थालीबिल्याः । पाकयोग्या इत्यर्थः॥

१९५६. यज्ञर्त्विग्भ्यां घखञौ ॥ ७१ ॥ (१७३५)

यज्ञशब्दाद्, ऋत्विक्शब्दाच्च यथासंख्यं घखञौ प्रत्ययौ भवतः 'तदर्हति ' इत्येतस्मिन्विषये । ठकोऽपवादः । यज्ञियो ब्राह्मणः । आर्त्विजीनो ब्राह्मणः ।

यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् (म. भा. ५.१.७१) । यज्ञकर्मार्हति यज्ञियो देशः। ऋत्विक्कर्मार्हति आर्त्विजीनं ब्राह्मणकुलम् ।

आर्हीयाणां ठगादीनं पूर्णोऽवधिः । अतः परं प्राग्वतीयष्ठञेव भवति ॥

१९५७. पारायणतुरायणचान्द्रायणं वर्तयति ॥ ७२ ॥ (१७३६)

समर्थविभक्तिरनुवर्त्तते । 'अर्हति' इति निवृत्तम् । पारायणादिभ्यो द्वितीयासमर्थेभ्यः 'वर्त्तयति' इत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति । पारायणं वर्त्तयत्यधीते पारायणिकश्छात्रः । तौरायणिको यजमानः । चान्द्रायणिकस्तपस्वी ॥

१९५८. संशयमापन्नः ॥ ७३ ॥ (१७३७)

संशयशब्दाद् द्वितीयासमर्थाद् 'आपन्नः' इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। संशयमापन्नः प्राप्तः सांशयिकः स्थाणुः ॥

१९५९. योजनं गच्छति ॥ ७४ ॥ (१७३८)

योजनशब्दाद् द्वितीयासमर्थाद् 'गच्छति' इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। योजनं गच्छति यौजनिकः ॥

क्रोशशत-योजनशतयोरुपसंख्यानम् (म. भा. ५.१.७४ वा. १) क्रोशशतम् गच्छति क्रौशशतिकः । यौजनशतिकः ।

ततोऽभिगमनमर्हतीति च क्रोशशत-योजनशतयोरुपसंख्यानम् (वा. २) । क्रोशशतादभिगमनमर्हति क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ॥

१९६०. पथः ष्कन् ॥ ७५ ॥ (१७३९)

पथिन्शब्दाद् द्वितीयासमर्थाद् 'गच्छति' इत्येतस्मिन्नर्थे ष्कन्प्रत्ययो भवति । नकारः स्वरार्थः । षकारो ङीषर्थः । पन्थानं गच्छति पथिकः । पथिकी ॥

१९६१. पन्थो ण नित्यम् ॥ ७६ ॥ (१७४०)

नित्यग्रहणं प्रत्ययार्थविशेषणम् । पथः पन्थ इत्ययमादेशो भवति, भवति णश्च प्रत्ययः 'नित्यं गच्छति' इत्येतस्मिन्विषये । पन्थानं नित्यं गच्छति पान्थो भिक्षां याचते ।

नित्यमिति किम्? पथिकः ॥

१९६२. उत्तरपथेनाहृतं च ॥ ७ ॥ (१७४१)

निर्देशादेव समर्थविभक्तिः । उत्तरपथशब्दात्तृतीयासमर्थाद् 'आहृतम्' इत्येतस्मिन्विषये ठञ् प्रत्ययो भवति । चकारः प्रत्ययार्थसमुच्चये, गच्छतीति च । अत्रापि तृतीयैव समर्थविभक्तिः । उत्तरपथेनाहृतम् औत्तरपथिकम् । उत्तरपथेन गच्छति औत्तरपथिकः ।

आहृतप्रकरणे वारिजङ्गलकान्तारपूर्वपदादुपसंख्यानम् (म. भा. ५.१.७७ वा. १)

वारिपथेनाहृतं वारिपथिकम् । वारिपथेन गच्छति वारिपथिकः । जङ्गलपथेनाहृतं जाङ्गलपथिकम् । जङ्गलपथेन गच्छति जाङ्गलपथिकः । स्थलपथेनाहृतं स्थालपथिकम् । स्थलपथेन गच्छति स्थालपथिकः । कान्तारपथेनाहृतं कान्तारपथिकम् । कान्तारपथेन गच्छति कान्तारपथिकः ।

अजपथशंकुपथाभ्यां चोपसंख्यानम् (वा. २) । अजपथेनाहृतं गच्छति वा आजपथिकः । शंकुपथिनाहृतं गच्छति वा शांकुपथिकः ।

मधुकमरिचयोरण् स्थलात् (वा. ३) । स्थलपथेनाहृतं स्थालपथं मधुकम्। स्थालपथं मरिचम् ॥

१९६३. कालात् ॥ ७८ ॥ (१७४२)

'कालात्' इत्यधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं तद्वेदितव्यम्। वक्ष्यति - 'तेन निर्वृत्तम्' (५.४.७९) । मासेन निर्वृत्तं मासिकम् । आर्द्धमासिकम्। 'सांवत्सरिकम्' ।

'कालात्' इत्याधिकारः 'व्युष्टादिभ्योऽण्' (५.१.९७) इति यावत् ॥

१९६४. तेन निर्वृत्तम् ॥ ७९ ॥ (१७४३)

'तेन' इति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात् 'निर्वृत्तम्' इत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति । अह्ना निर्वृत्तम् आह्निकम् । आर्द्धमासिकम् । सांवत्सरिकम्॥

१९६५. तमधीष्टो भृतो भूतो भावी ॥ ८० ॥ (१७४४)

'तम्' इति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकात् 'अधीष्टो भृतो भूतो वा भावी' इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । अधीष्टः=सत्कृत्य व्यापारितः। भृतः=वेतनेन क्रीतः। भूतः=स्वसत्तया व्याप्तकालः । भावी=तादृश एवानागतः। 'कालाध्वनोरत्यन्तसंयोगे' (२.३.५) इति द्वितीया । मासमधीष्टो मासिकोऽध्यापकः। मासं भृतो मासिकः कर्मकरः । मासं भूतो मासिको व्याधिः । मासं भावी मासिक उत्सवः ।

ननु चाध्येषणं भरणं च मूहूर्तं क्रियते, तेन कथं मासो व्याप्यते? अध्येषणभरणे क्रियार्थे, तत्र फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव व्याप्त इत्युच्यते ॥

१९६६. मासाद्वयसि यत्खञौ ॥ ८१ ॥ (१७४५)

मासशब्दाद्वयस्यभिधेये यत्खञौ प्रत्ययौ भवतः । ठञोऽपवादः । अघीष्टादीनां चतुर्णामधिकारेऽपि सामर्थ्याद् 'भूतः' इत्येवाभिसम्बध्यते । मासं भूतो मास्यः, मासीनः ।

वयसीति किम्? मासिकम् ॥

१९६७. द्विगोर्यप् ॥ ८२ ॥ (१७४६)

'मासाद्वयसि' इति वर्तते । मासान्ताद् द्विगोर्यप् प्रत्ययो भवति वयस्यभिधेये। द्वौ मासौ भूतः द्विमास्यः । त्रिमास्यः ॥

१९६८. षण्मासाण्ण्यच्च ॥ ८३ ॥ (१७४७)

'वयसि' इत्येव । षण्मासशब्दाद्वयस्यभिधेये ण्यत्प्रत्ययो भवति, यप् च । औत्सर्गिकष्ठञपीष्यते, स चकारेण समुच्चेतव्यः । स्वरितत्वाच्चानन्तरोऽनुवर्त्तिष्यते। तेन त्रैरूप्यं भवति - षाण्मास्यः, षण्मास्यः, षाण्मासिकः ॥

१९६९. अवयसि ठँश्च ॥ ८४ ॥ (१७४८)

षण्मासशब्दादवयस्यभिधेये ठन् प्रत्ययो भवति । चकारेणानन्तरस्य ण्यस्य समुच्चयः क्रियते । षण्मासिको रोगः । षाण्मास्यः ॥

१९७०. समायाः खः ॥ ८५ ॥ (१७४९)

अधीष्टादयश्चत्वारोऽर्था अनुवर्तन्ते । समाशब्दाद् द्वितीयासमर्थाद् अधीष्टादिष्वर्थेषु खः प्रत्ययो भवति । ठञोऽपवादः । समामधीष्टो भृतो भावी वा समीनः ।

'केचित्' तेन निर्वृत्तम्' (७.१.७९) इति सर्वत्रानुवर्तयन्ति । समया निर्वृत्तः समीनः ॥

१९७१. द्विगोर्वा ॥ ८६ ॥ (१७५०)

'समायाः खः' (५.१.८५) इत्येव । समाशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु पञ्चसु वा खः प्रत्ययो भवति । पूर्वेण नित्यः प्राप्तो विकल्प्यते । 'प्रग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (७.३.१७) इति प्राप्तिरस्त्येव । खेन मुक्ते पक्षे ठञपि भवति । द्विसमीनः, द्वैसमिकः । त्रिसमीनः, त्रैसमिकः ॥

१९७२. रात्र्यहस्संवत्सराच्च ॥ ८७ ॥ (१७५१)

'द्विगोः' इत्येव । रात्रि, अहः, संवत्सर-इत्येवमन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति । खेन मुक्ते पक्षे ठञपि भवति । द्विरात्रीणः, द्वैरात्रिकः । त्रिरात्रीणः, त्रैरात्रिकः । द्व्यहीनः, द्वैयह्निकः । त्र्यहीणः, त्रियह्निकः । द्विसंवत्सरीणः, द्विसांवत्सरिकः। त्रिसंवत्सरीणः, त्रिसांवत्सरिकः । 'संख्यायाः संवत्सरसंख्यस्य च' (७.३.१५) इत्युत्तरपदवृद्धिः ॥

१९७३. वर्षाल्लुक् च ॥ ८८ ॥ (१७५३)

'द्विगोः' इत्येव । वर्षान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति । पक्षे ठञ्। तयोश्च वा लुग्भवति । एवं त्रीणि रूपाणि भवन्ति - द्विवर्षीणो व्याधिः, द्विवार्षिकः, द्विवर्षः। त्रिवर्षीणः, त्रिवार्षिकः, त्रिवर्षः । 'वर्षस्याभविष्यति' (७.३.१६) इत्युत्तरपदवृद्धिः । भाविनि तु त्रैवर्षिकः ॥

१९७४. चित्तवति नित्यम् ॥ ८९ ॥ (१७५५)

चित्तवति प्रत्ययार्थेऽभिधेये वर्षशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषूत्पन्नस्य प्रत्ययस्य नित्यं लुग्भवति । पूर्वेण विकल्पे प्राप्ते वचनम् । द्विवर्षो दारकः ।

चित्तवतीति किम्? द्विवर्षीणो व्याधिः ॥

१९७५. षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥ ९० ॥ (१७५६)

षष्टिकशब्दो निपात्यते । बहुवचनमतन्त्रम् । षष्टिरात्रशब्दात्तृतीयासमर्थात्कन् प्रत्ययो निपात्यते 'पच्यन्ते' इत्येतस्मिन्नर्थे, रात्रिशब्दस्य च लोपः । षष्टिरात्रेण पच्यन्ते षष्टिकाः । संज्ञैषा धान्यविशेषस्य । तेन मुद्गादिष्वतिप्रसङ्गो न भवति ॥

१९७६. वत्सरान्ताच्छश्छन्दसि ॥ ९१ ॥ (३४९३)

वत्सरान्तात्प्रातिपदिकान्निर्वृत्तादिष्वर्थेषु छन्दसि विषये छः प्रत्ययो भवति । ठञोऽपवादः । इद्वत्सरीयः, 'इदावत्सरीयः' (काठ. सं. १३.१५.७१) ॥

१९७७. संपरिपूर्वात्ख च ॥ ९२ ॥ (३४९४)

संपरिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः प्रत्ययो भवति, चकाराच्छश्च । सं॒ व॒त्स॒रीणाः॑ (तै.सं. ४.३.१३.४) 'परिवत्स॒रीणं (ऋ. ७.१०.३.८) । संवत्सरीयः। 'परिवत्सरीयः (काठ. सं. १३.१५.७१) ॥

१९७८. तेन परिजय्यलभ्यकार्यसुकरम् ॥ ९३ ॥ (१७५७)

'तेन' इति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात् 'परिजय्य, लभ्य, कार्य, सुकर' इत्येतेष्वर्थेषु ठञ् प्रत्ययो भवति । मासेन परिजय्यः, शक्यते जेतुं मसिको व्याधिः । सांवत्सरिकः । मासेन लभ्यो मासिकः पटः । मासेन कार्यं मासिकं चान्द्रायणम् । मासेन सुकरो मासिकः प्रासादः ॥

१९७९. तदस्य ब्रह्मचर्यम् ॥ ९४ ॥ (१७५८)

'तत्' इति द्वितीया समर्थविभक्तिः सा चात्यन्तसंयोगे । अस्येति प्रत्ययार्थः। 'ब्रह्मचर्यम्' इति द्वाभ्यामपि सम्बध्यते-कालस्य व्यापकम्, प्रत्ययार्थस्य च स्वमिति। तदिति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकात् 'अस्य' इति षष्ठ्यर्थे ठञ्प्रत्ययो भवति, ब्रह्मचर्यं चेद् गम्यते । मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी । आर्द्धमासिकः। सांवत्सरिकः ।

अपारा वृत्तिः -

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेत्तद्भवति । मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम् । आर्धमासिकम्। सांवत्सरिकम् ।

पूर्वत्र ब्रह्मचारी प्रत्ययार्थः उत्तरत्र ब्रह्मचर्यमेव । उभयमपि प्रमाणमुभयथा सूत्रप्रणयनात् ।

महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम् (म. भा. ५.१.९४ वा. १) । माहानामिकम्। गौदानिकम् । आदित्यव्रतिकम् ।

तच्चरतीति च (वा. २) । महानाम्न्य ऋचः (तै. आ.), तत्सहचरितं व्रतं तच्छब्देनोच्यते। महानम्नीश्चरति महानामिकः आदित्यव्रतिकः । गौदानिकः । ['भस्याढे' (६.३.३५ वा.) इति पुंवद्भावेन ङीपि निवृत्ते 'नस्तद्धिते' (६.१.१४४) इति टिलोपः ।]

अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः (वा.३) । अवान्तरदीक्षां चरति अवान्तरदीक्षी। तिलव्रती ।

अष्टाचत्वारिंशतो ड्वंश्च डिनिश्च वक्तव्यः (वा. ४) । अष्टाचत्वारिंशद्वर्षाणि व्रतं चरति, अष्टाचत्वारिंशकः । अष्टाचर्वरिंशी ।

चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च वक्तव्यः (वा. ५) । चातिर्मास्यानि चरति चातुर्मासकः । चातुर्मासी ।

चतुर्मासाण्ण्यो यज्ञे तत्र भवे (वा. ६) । चतुर्षु मासेषु भवानि चातुर्मस्यानि।

संज्ञायामण्वक्तव्यः (वा. ७) । चतुर्षु भवा चातुर्मासो पौर्णमासी । आषाढी। कार्तिकी । फाल्गुनी ।

१९८०. तस्य च दक्षिणा यज्ञाख्येभ्यः ॥ ९५ ॥ (१७५९)

'तस्य' इति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यः 'दक्षिणा' इत्येतस्मिन्नर्थे ठञ् प्रययो भवति । अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी । वाजपेयिकी । राजसूयिकी।

आख्याग्रहणमकालादपि यज्ञवाचिनो यथा स्यादिति; इतरथा हि कालाधिकारादेकाहद्वादशाहप्रभृतय एव यज्ञा गृह्येरन् । 'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (७.३.१७) इति कालाधिकारेऽपि द्वादशाहादिष्वस्ति प्राप्तिः॥

१९८१. तत्र च दीयते कार्यं भववत् ॥ ९६ ॥ (१७६०)

'तत्र' इति सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद् दीयते, कार्यम् - इत्येतयोरर्थयोर्भववत्प्रत्ययो भवति । यथा-मासे भवं मासिकम् । सांवत्सरिकम् (४.३.११) । प्रावृषेण्यम् (४.३.१७) । वासन्तिकम् (४.३.११), वासन्तम् (४.३.१६)। हैमनम् (४.३.२२) । हैमन्तम् (४.३.१६) । हैमन्तिकम् (४.३.११) । शारदम् (४.३.१६) । वतिः सर्वसादृश्यार्थः ।

योगविभागश्चात्र कर्त्तव्यः - 'तत्र च दीयते' ,'यज्ञाख्येभ्यः' इति । अग्निष्टोमे दीयते आग्निष्टोमिकं भक्तम् । राजसूयिकम् । वाजपेयिकम् ।

कालाधिकारस्य पूर्णोऽवधिः । अतः परं सामान्येन प्रत्ययविधानम् ॥

१९८२. व्युष्टादिभ्योऽण् ॥ ९७ ॥ (१७६१)

'तत्र' इति सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो दीयते, कार्यम्-इत्येतयोरण् प्रत्ययो भवति । व्युष्टे दीयते कार्यं वा वैयुष्टम् । नैत्यम् ।

अण्प्रकरणे अग्निपदादिभ्य उपसंख्यानम् (म.भा. ५.१.९७ वा. १) । आग्निपदम्। पैलुमूलम् । किं वक्तव्यम्? न वक्तव्यम्; अत्रैव ते पठितव्याः ।

व्युष्ट । नित्य । निष्क्रमण । प्रवेशन । तीर्थ । सम्भ्रम आस्तरण । संग्राम । संघात। अग्निपद । पीलूमूल । प्रवास । उपसंक्रमण । व्युष्टादिः ॥

१९८३. तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ९८ ॥ (१७६२)

'दीयते' कार्यम्' इति वर्त्तते । तेनेति तृतीयासमर्थाभ्यां यथाकथाच-हस्तशब्दाभ्यां यथसंख्यं णयतौ प्रत्ययौ भवतः । दीयते, कार्यमित्येतयोरर्थयोः प्रत्येकमभिसम्बन्धः, यथासंख्यं नेष्यते । यथाकथाचशब्दोऽव्ययसमुदायोऽनादरे वर्त्तते । तृतीयार्थमात्रं चात्र सम्भवति, न तु तृतीया समर्थविभक्तिः । यथाकथाच दीयते कार्यं वा यथाकथाचम् । हस्तेन दीयते कार्यं वा हस्त्यम् ॥

१९८४. सम्पादिनि ॥ ९९ ॥ (१७६३)

'तेन' इत्येव तृतीयासमर्थात्सम्पादिन्यभिधेये ठञ् प्रत्ययो भवति । गुणोत्कर्षः = सम्पत्तिः । आवश्यके णिनिः (३.३.१७०) । कर्णवेष्टाकाभ्यां संपादि मुखं कार्णवेष्टकिकं मुखम्। वास्त्रयुगिकं शरीरम् । वस्त्रयुगेण विशेषतं शोभते इत्यर्थः॥

१८७५. कर्मवेषाद्यत् ॥ १०० ॥ (१७६४)

कर्मन्, वेष-शब्दाभ्यां तृतीयासमर्थाभ्यां यत्प्रत्ययो भवति 'सम्पादिनि' इत्येतस्मिन्विषये। ठञोऽपवादः । कर्मणा सम्पद्यते कर्मण्यं शरीरम् । वेषेण संपद्यते वेष्यो नटः ।

१९८६. तस्मै प्रभवति सन्तापादिभ्यः ॥ १०१ ॥ (१७६५)

'तस्मै' इति चतुर्थीसमर्थेभ्यः 'सन्तापादिभ्यः प्रभवति' इत्यस्मिन्विषये ठञ् प्रत्ययो भवति । समर्थः शक्तः=प्रभवतीत्युच्यते । अलमर्थे चतुर्थी । सन्तापाय प्रभवति सान्तापिकः । सान्नाहिकः ।

सन्ताप । संनाह । संग्राम । संयोग । संपराय । संपेष । निष्पेष । निसर्ग । असर्ग । विसर्ग । उपसर्ग । उपवास । प्रवास । सघांत । संमोदन । सक्तुमांसौदनाद्विगृहीतादपि ॥

१९८७. योगाद्यच्च ॥ १०२ ॥ (१७६६)

योगशब्दाद्यत्प्रत्ययो भवति, चकराद् ठञ् 'तस्मै प्रभवति' इत्येतस्मिन्विषये। योगाय प्रभवति योग्यः, यौगिकः ॥

१९८८. कर्मण उकञ् ॥ १०३ ॥ (१७६७)

कर्मन्शब्दादुकञ् प्रत्ययो भवति 'तस्मै प्रभवति' इत्येतस्मिन्नर्थे । ठञोऽपवादः। कर्मणे प्रभवति कार्मुकं धनुः । धनुषोऽन्यत्र न भवति, अनभिधानात् ॥

१९८९. समयस्तदस्य प्राप्तम् ॥ १०४ ॥ (१७६८)

समयशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्राप्तं चेत्तद्भवति । समयः प्राप्तोऽस्य सामयिकं कार्यम् । उपनतकालमित्यर्थम् । समर्थविभक्तिनिर्देश उत्तरार्थः ॥

१९९०. ऋतोरण् ॥ १०५ ॥ (१७६९)

'तदस्य प्राप्तम्' इत्यनुवर्त्तते । ऋतुशब्दात्तदिति प्रथमासमर्थाद् 'अस्य' इति षष्ठ्यर्थेऽण् प्रत्ययो भवति 'तदस्य प्राप्तम्' इत्येतस्मिन् विषये । ऋतुः प्राप्तोऽस्य आर्त्तवं पुष्पम् ।

तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् (?) । उपवस्ता प्राप्तोऽस्य औपवस्त्रम् । प्राशिता प्राप्तोऽस्य प्राशित्रम् ॥

१९९१. छन्दसि घस् ॥ १०६ ॥ (३४९५)

ऋतुशब्दाच्छन्दसि विषये घस् प्रत्ययो भवति 'तदस्य प्राप्तम्' इत्येतस्मिन्विषये। अणोऽपवादः । 'अ॒यं ते॒ योनिऋ॑त्वियः॒' (ऋ. ३.२९.१०) ॥

१९९२. कालाद्यत् ॥ १०७ ॥ (१७७०)

कालशब्दाद्यत्प्रत्ययो भवति 'तदस्य प्राप्तम्' इत्यस्मिन्विषये । कालः प्राप्तोस्य काल्यस्तापः । काल्यं शीतम् ॥

१९९३. प्रकृष्टे ठञ् ॥ १०८ ॥ (१७७१)

'कालात्' इत्येव, 'तदस्य' इति च । 'प्राप्तम्' इति निवृत्तम् । प्रकर्षेण कालो विशेष्यते। प्रकर्षे वर्तमाना त्कालात्प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति । प्रकृष्टो दीर्घः कालोऽस्य कालिकमृणम् । कालिकं वैरम् ।

ठञ्ग्रहणं विस्पष्टार्थम् ॥

१९९४. प्रयोजनम् ॥ १०९ ॥ (१७७२)

'तदस्य' इत्येव । तदिति प्रथमासमर्थाद् 'अस्य' इति षष्ठ्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम्। गाङ्गामहिकम्॥

१९९५. विशाखाषढादण्मन्थदण्डयोः ॥ ११० ॥ (१७७३)

विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति 'तदस्य प्रयोजनम्' इत्येतस्मिन्विषये यथासंख्यं मन्थदण्डयोरभिधेययोः । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः ।

चूडादिभ्य उपसंख्यानम् (?) । चूडा प्रयोजनमस्य चौडम् । श्रद्धा प्रयोजनमस्य श्राद्धम्॥

१९९६. अनुप्रवचनादिभ्यश्छः ॥ १११ ॥ (१७७४)

अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति 'तदस्य प्रयोजनम्' इत्येतस्मिन्विषये । ठञोऽपवादः । अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम् । उत्थापनीयम् ॥

विशिपूरिपतिरुहि प्रकृतेरनात्सपूर्वपदादुपसंख्यानम् (म. भा. ५.१.१११ वा.१)। (विशि-) गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम् । (पूरि-) प्रपापूरणीयम् । (पति-) अश्वप्रपतनीयम् । (रुहि-) प्रासादारोहणीयम् ।

स्वर्गादिभ्यो यद्वक्तव्यः (वा. २) स्वर्गः प्रयोजनमस्य स्वर्ग्यम् । यशस्यम् । आयुष्यम्। काम्यम् । धन्यम् ।

पुण्याहवचनादिभ्यो लुग्वक्तव्यः (वा. ३) । पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम् । स्वस्तिवाचनम् । शान्तिवाचनम् ।

अनुप्रवचन । उत्थापन । प्रवेशन । अनुप्रवेशन । उपस्थापन । संवेशन । अनुवेशन । अनुवचन । अनुवादन । अनुवासन । आरम्भण । आरोहण । प्ररोहण। अन्वारोहण । अनुप्रवचनादिः ॥

१९९७. समापनात् सपूर्वपदात् ॥ ११२ ॥ (१७७५)

समापनशब्दात् सपूर्वपदाद्=विद्यमानपूर्वपदाच्छः प्रत्ययो भवति 'तदस्य प्रयोजनम्' इत्येतस्मिन्विषये । ठञोऽपवादः । छन्दस्समापनं प्रयोजनमस्य छन्दःसमापनीयम् । व्याकरणसमापनीयम् ।

पदग्रहणं बहुच्पूर्वनिरासार्थम् ॥

१९९८. ऐकागारिकट् चौरे ॥ ११३ ॥ (१७७६)

'ऐकागारिकट्' इति निपात्यते चौरेऽभिधेये । एकागारं प्रयोजनमस्य ऐकागारिकः चौरः । ऐकागारिकी ।

किमर्थमिदं निपात्यये, यावता 'प्रयोजनम्' इत्येव सिद्धष्ठञ्? चौरे नियमार्थ वचनम् । इह मा भूत् एकागारं प्रयोजनमस्य भिक्षोरिति ।

टकारः कार्यावधारणार्थः-ङीबेव भवति, न ञित्स्वर इति ।

अपरे पुनरिकट् प्रत्ययं वृद्धिं च निपातयन्ति ॥

१९९९. आकालिकडाद्यन्तवचने ॥ ११४ ॥ (१७७७)

'आकालिकट्' इति निपात्यते आद्यन्तवचने । समानकालशब्दस्याकालशब्द आदेशः । आद्यन्तयोश्चैतद्विशेषणम् । इकट् प्रत्ययश्च निपात्यते । समानकालावाद्यन्तावस्य आकालिकः स्तनयित्नुः । आकालिकी विद्युत् । जन्मना तुल्यकालविनाशा । उत्पादानन्तरं विनाशिनीत्यर्थः।

आकालाट् ठंश्च (म. भा. ५.१.११४ वा. २) । चात् ठञ्च । आकालिका विद्युत् । ठञः पूर्णोऽवधिः ।

२०००. तेन तुल्यं क्रिया चेद्वतिः ॥ ११५ ॥ (१७७८)

तेनेति तृतीयासमर्थात्तुल्यमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति यत्तुल्यं क्रिया चेत्सा भवति । ब्राह्मणेन तुल्यं वर्त्तते ब्राह्मणवत् । राजवत् ।

क्रियाग्रहणं किम्? गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः । पुत्रेण तुल्यो गोमान् ।

२००१. तत्र तस्येव ॥ ११६ ॥ (१७७९)

'तत्रे' ति सप्तमीसमर्थात् 'तस्य' इति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति । मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः । पाटलिपुत्रवत् साकेते परिखा । षष्ठीसमर्थात् - देवदत्तस्येव देवदत्तवद् यज्ञदत्तस्य गावः । यज्ञदत्तस्येव देवदत्तस्य दन्ताः यज्ञादत्तवत् ॥

२००२. तदर्हम् ॥ ११७ ॥ (१७८०)

तदिति द्वितीयासमर्थात् 'अर्हम्' इत्येतस्मिन्नर्थे वतिः प्रत्ययो भवति । राजानमर्हति राजवत्पालनम् । ब्राह्मणवत् । ऋषिवत् । क्षत्रियवत् ॥

२००३. उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥ (३४९६)

उपसर्गात्ससाधने धात्वर्थे वर्त्तमानात्स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये । 'यदुद्वतो' निवतो यासि॒ वप्स॒द् (ऋ. १०.१४२.४), उद्गतानि निगतानि च (म. भा.) ॥

२००४. तस्य भावस्त्वतलौ ॥ ११९ ॥ (१७८१)

तस्येति षष्ठीसमर्थाद् 'भावः' इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः । भवतोऽस्मादभिधानप्रत्ययाविति भावः । शब्दस्य प्रवृत्तिनिमित्तं भावशब्देनोच्यते । अश्वस्य भावः अश्वत्वम्, अश्वता । गोत्वम्, गोता ॥

२००५. आ च त्वात् ॥ १२० ॥ (१७८२)

'ब्रह्मणस्त्वः' (५.१.१३६) इति वक्ष्यति । आ एतस्मात्त्वसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामस्तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ । वक्ष्यति-'पृथ्वादिभ्य इमनिज्वा' (५.१.१२२) इति । प्रथिमा, पार्थवम्, पृथुत्वम्, पृथुता । म्रदिमा, मार्दवम्, मृदुत्वम्, मृदुता ।

अपवादैः सह समावेशार्थं वचनम् । कर्मणि च विधानार्थं 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५.१.१२४) इति । चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । स्त्रियाः भावः स्त्रैणम्, स्त्रीत्वम्, स्त्रीता । पुंसो भावः पुंस्त्वम्, पुंस्ता, पौस्नम् ॥

२००६. न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटबुध कतरसलसेभ्यः ॥ १२१ ॥ (१७५६)

इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषान्न भवन्ति चतुरादीन्वर्जयित्वा । वक्ष्यति- 'पत्यन्तपुरोहितादिभ्यो यक्' (५.१.१२८) इति । अपतित्वम्, अपतिता । अपटुत्वम्, अपटुता । अरमणीयत्वम्, अरमणीयता ।

नञ्पूर्वादिति किम्? बार्हस्पत्यम् । प्राजापत्यम् । तत्पुरुषादिति किम्? नास्य पटवः सन्तीत्यपटुः, तस्य भाव आपटवम् । आलघवम् । अचतुरादिभ्य इति किम्? आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आबुध्यम् । आकत्यम्। आरस्यम् । आलस्यम् ॥

२००७. पृथ्वादिभ्य इमनिज्वा ॥ १२२ ॥ (१७८४)

'पृथु' -इत्येवमादिभ्यः प्रातिपदिकेभ्य इमनिच्प्रत्ययो भवति वा 'तस्य भावः' इत्येतस्मिन्नर्थे । वावचनमणादेः समावेशार्थम् । पृथोर्भावः प्रथिमा, पार्थवम्। म्रदिमा, मार्दवम्। 'तुरिष्ठेमेयस्सु' (६.४.१५४) 'टेः' (६.४.१५५) इति टिलोपः। 'र ऋतो हलादेर्लघोः' (६.४.१६१) इति रेफादेशः । त्वतलौ सर्वत्र भवत एव-पृथुत्वम्, पृथुता । मृदुत्वम्, मृदुता ।

पृथु । मृदु । महत् । पटु । तनु । लघु । बहु । साधु । वेणु । आसु । बहुल.। गुरु। दण्ड । ऊरु । खण्ड । चण्ड । बाल । अकिञ्चन । होड । पाक । वत्स । मन्द । स्वादु । ह्रस्व । दीर्घ । प्रिय । वृष । ऋजु । क्षिप्र । क्षुप्र । क्षुद्र । पृथ्वादिः।

२००८. वर्णदृढादिभ्यः ष्यञ् च ॥ १२३ ॥ (१७८७)

वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति, चकारादिमनिच्च, 'तस्य भावः' इत्येतस्मिन्विषये । शुक्लस्य भावः शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता । काष्ण्यम्, कृष्णिमा, कृष्णत्वम्, कृष्णता । दृढादिभ्यः-दार्ढ्यम्, दृढिमा, दृढत्वम्, दृढता ।

षकारो ङीषर्थः - औचिती, याथाकामी ।

दृढ । परिवृढ । भृश । कृश । चक्र । आभ्र । लवण । ताभ्र । अम्ल । शीत। उष्ण । जड । बधिर । पण्डित । मधुर । मूर्ख । मूक । 'वेर्यातलाभमतिमनःशारदानाम्' (ग. सू. १११)। 'समो मतिमनसोर्जवने (ग. सू. ११२) । दृढादिः ॥

२००९. गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ १२४ ॥ (१७८८)

गुणमुक्तवन्तो गुणवचनाः । गुणवचनेभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ्प्रत्ययो भवति । चकाराद् भावे च । कर्मन्शब्दः क्रियावचनः। जडस्य भावः कर्म वा जाड्यम् । ब्राह्मणादिभ्यः खल्वपि-ब्राह्मण्यम् । माणव्यम्।

आ पादपरिसमाप्तेर्भावकर्माधिकारः । ब्राह्मणादिराकृतिगणः । आदिशब्दः प्रकारवचनः ।

चातुर्वर्ण्यादीनां स्वार्थ उपसंख्यानम् (म.भा. ५.१.१२४ वा. १) । चत्वार एव वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैलोक्यम् । त्रैस्वर्यम् । षाड्गुण्यम् । सैन्यम्। सान्निध्यम्। सामीप्यम् । औपम्यम् । सौख्यम् ।

ब्राह्मण । वाडव । माणव । चोर । मूक । आराधय । विराधय । अपराधय । उपराध्। एकभाव । द्विभाव । त्रिभाव । अन्यभाव । समस्थ । विषमस्थ । परमस्थ । मध्यमस्थ । अनीश्वर । कुशल । कपि । चपल । अक्षत्रज्ञ । निपुण । अर्हतो नुम् च (वा.२) (ग.सू. ११३) आर्हन्त्यम् । संवादिन् । संवेशिन् । बहुभाषिन् । वालिश। दुष्पुरुष । कापुरुष । दायाद । विशसि [विशस्ति]। धूर्त्त । राजन् । सम्भाषिन् । शीर्षपातिन् । अधिपति । अलस । पिशाच। पिशुन । विशाल । गणपति । धनपति। नरपति । गडुल । निव । निधान । विष । सर्ववेदादिभ्यः स्वार्थे (ग. सू. ११४) । चतुर्वेदस्योभयपदवृद्धिश्च । (ग. सू. ११५) चातुर्वैद्यम् । ब्राह्मणादिः ॥

२०१०. स्तेनद्यन्नलोपश्च ॥ १२५ ॥ (१७९०)

स्तेनशब्दात्षष्ठीसमर्थाद्भावकर्मणोर्यत्प्रत्ययो भवति, नशब्दस्य लोपश्च भवति। स्तेनस्य भावः कर्म वा स्तेयम् ।

'स्तेनात्' इति केचिद् योगविभागं कुर्वन्ति । स्तेनात्ष्यञ् भवति - स्तैन्यम्। ततः 'यन्नलोपश्च' । स्तेनादित्येव-स्तेयम् ॥

२०११. सख्युर्यः ॥ १२६ ॥ (१७९१)

सखिशब्दाद् यः प्रत्ययो भवति भावकर्मणोरर्थयोः । सख्युर्भावः कर्म वा सख्यम् ।

दूतवणिग्भ्यां चेति वक्तव्यम् (?) । दूत्यम् । वणिज्यम् । कथं वाणिज्यम्? ब्राह्मणादित्वात् ॥

२०१२. कपिज्ञात्योर्ढक् ॥ १२७ ॥ (१७९२)

कपि, ज्ञाति-शब्दाभ्यां ढक् प्रत्ययो भवति भावकर्मणोरर्थयोः । कपेर्भावः कर्म वा कापेयम् । ज्ञातेयम् ।

यथासंख्यमर्थयोः सर्वत्रैवात्र प्रकरणे नेष्यते ॥

२०१३. पत्यन्तपुरोहितादिभ्यो यक् ॥ १२८ ॥ (१७९३)

पत्यन्तात्प्रातिपदिकात्पुरोहितादिभ्यश्च यक् प्रत्ययो भवति भावकर्मणोरर्थयोः। सेनापतेर्भावः कर्म वा सैनापत्यम् । गार्हपत्यम् । प्राजापत्यम् । पौरोहित्यम् । राज्यम् ।

पुरोहित । राजन् । राजाऽसे (ग. सू. ११६) । संग्रामिक । एषिक । वर्मित.। खण्डिक । दण्डिक । छत्त्रिक । मिलिक । पिण्डिक । बाल । मन्द । स्तनिक । चूडितिक । कृषिक ।

पूतिक । पत्त्रिक । प्रतिक । अजानिक । सलनिक । सूचिक। शाक्वर । सूचक । पक्षैक । सारथिक । जलिक । सूतिक । अञ्जलिक। सूचक । पुरोहितादिः ॥

२०१४. प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥ १२९ ॥ (१७९४)

प्राणभृज्जातिवाचिभ्यः प्रातिपदिकेभ्यो वयोवचनेभ्य उद्गात्रादिभ्यश्चाञ् प्रत्ययो भवति भावकर्मणोरर्थयोः । अश्वस्य भावः कर्म वा आश्वम् । औष्ट्रम् । वयोवचनेभ्यः-कौमारम् । कैशोरम् । उद्गात्रादिभ्यः-औद्गात्रम् । औन्नेत्रम् ।

उद्गातृ । उन्नेतृ । प्रतिहर्तृ । रथगणक । पक्षिगणक । सुष्ठु । दुष्ठु । अध्वर्यु। वधू । सुभग मन्त्रे (ग. शू. ११७) । उद्गात्रादिः ॥

२०१५. हायनान्तयुवादिभ्योऽण् ॥ १३० ॥ (१७९५)

हायनान्तेभ्यः प्रातिपदिकेभ्योः युवादिभ्यश्चाण् प्रत्ययो भवति भावकर्मणोरर्थयोः। द्विहायनस्य भावः कर्म वा द्वैहायनम् । त्रैहायनम् [त्रैहायणम् ।] युवादिभ्यः-यौवनम् । स्थाविरम्।

श्रोत्रियस्य य लोपश्च वाच्यः (म. भा. ५.१.१३० वा.) श्रोत्रियस्य भावः कर्म वा श्रौत्रम्।

युवन् । स्थविर । होतृ । यजमान । कमण्डलु । पुरुषासे (ग. सू. ११८) । सुहृत् । यातृ। श्रवण । कुस्त्री । सुस्त्री । सुहृदय । सुभ्रातृ । दुर्भ्रातृ । वृषल । हृदयासे । क्षेत्रज्ञ । कृतक। परिव्राजक । कुशल । निपुण । पिशुन । सब्रह्मचारिन्। कुतूहल । अनृशंस । युवादिः॥

२०१६. इगन्ताच्च लघुपूर्वात् ॥ १३१ ॥ (१७९६)

इगन्ताच्च लघुपूर्वादण् प्रत्ययो भवति भावकर्मणोः । लघुपूर्वग्रहणेन प्रातिपदिकसमुदायो विशेष्यते । लघुः पूर्वोऽवयवोऽस्येति लघुपूर्वः । कुतः पुनरसौ लघुः पूर्वः? इक्सन्निधानादिक इति विज्ञायते । लघुपूर्वो यस्मादिकस्तदन्तात्प्रातिपदिकादित्ययमर्थो विवक्षितः ।

अपरे तत्पुरुषकर्मधारयं वर्णयन्ति-इक्चासावन्तश्चेतीगन्तः । लघुपूर्वग्रहणेन स एव विशेष्यते, पश्चात्तेन प्रातिपदिकस्य तदन्तविधिरिति । अस्मिन्व्याख्याने-अन्तग्रहणमतिरिच्यते। 'लघुपूर्वादिकः' इत्येतावदेव वाच्यं स्यात् । शुचेर्भावः कर्म वा शौचम् । मौनम् । नागरम् । हारीतकम् । पाटवम् । लाघवम् ।

इगन्तादिति किम्? घटत्वम् । पटत्वम् । लघुपूर्वादिति किम्? कण्डूत्वम् । पाण्डुत्वम्।

कथं काव्यमिति? ब्राह्मणादिषु कविशब्दो द्रष्टव्यः ॥

२०१७. योपधाद् गुरूपोत्तमाद् वुञ् ॥ १३२ ॥ (१७९७)

त्रिप्रभृतीनामन्तस्य समीपमुपोत्तमम् । गुरुरुपोत्तमं यस्य तद् गुरूपोत्तमम् । यकारोपधाद् गुरूपोत्तमाद्वुञ् प्रत्ययो भवति भावकर्मणोः । रमणीयस्य भाव कर्म वा रामणीयकम् । वासनीयकम् ।

योपधादिति किम्? विमानत्वम् । गुरुपोत्तमादिति किम्? क्षत्त्रियत्वम् ।

सहायाद्वेति वक्तव्यम् (?) । साहायकम् । साहाय्यम् ॥

२०१८. द्वन्द्वमनोज्ञादिभ्यश्च ॥ १३३ ॥ (१७९८)

द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च वुञ् प्रत्ययो भवति भावकर्मणोः । गोपालपशुपालानां भावः कर्म वा गौपालपशुपालिका । शैष्योपाध्यायिका । कौत्सकुशिकिका । मनोज्ञादिभ्यः - मानोज्ञकम्, काल्याणकम् ।

मनोज्ञ । कल्याण । प्रियरूप । छान्दस । छात्त्र । मेधाविन् । अभिरूप । आढ्य । कुलपुत्र । श्रोत्रिय । चोर । धूर्त्त । वैश्वदेव । युवन् । ग्रामपुत्र । ग्रामखण्ड। ग्रामकुमार । अमुष्यपुत्र । अमुष्यकुल । शतपुत्र । कुशल । मनोज्ञादिः ।

२०१९. गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ १३४ ॥ (१७९९)

गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति, प्रत्येकं भावकर्मणोरर्थयोः श्लाघादिषु विषयभूतेषु । तत्र श्लाघा=विकत्थनम् । अत्याकारः=पराधिक्षेपः, तदवेतः=तत्प्राप्तः तज्ज्ञो वा । तदिति गोत्रचरण-योर्भावकर्मणी निर्दिश्येते । तत्प्राप्तस्तदवगतवान् 'तदवेतः' इत्युच्यते । श्लाघायां तावत्-गार्गिकया श्लाघते । काठिकया श्लाघते । गार्ग्यत्वेन कठत्वेन च विकत्थत इत्यर्थः । अत्याकारे-गार्गिकयात्याकुरुते । काठिकयात्याकुरुते । गार्ग्यत्वेन कठत्वेन च परानधिक्षिपतीत्यर्थः । तदवेतः- गार्गिकामवेतः । काठिकामवेतः । गार्ग्यत्वं कठत्वं च प्राप्त इत्यर्थः । तद्वाऽवगतवानित्यर्थः ।

श्लाघादिष्विति किम? गार्ग्यत्वम् । कठत्वम् ॥

२०२०. होत्राभ्यश्छः ॥ १३५ ॥ (१८००)

होत्राशब्द ऋत्विग्विशेषवचनः । ऋत्विग्विशेषवाचिभ्यश्छः प्रत्ययो भवति भावकर्मणोः । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । मित्त्रावरुणीयम् । ब्राह्मणाच्छंसीयम् । आग्नीध्रीयम् । प्रतिप्रस्थात्रीयम् । त्वष्ट्रीयम् । पोत्रीयम् ।

बहुवचनं स्वरूपविधिनिरासार्थम् ॥

२०२१. ब्रह्मणस्त्वः ॥ १३६ ॥ (१८०१)

'होत्राभ्यः' इत्यनुवर्त्तते । ब्रह्मन्शब्दाद्धोत्रावाचिनस्त्वः प्रत्ययो भवति भावकर्मणोः । छस्यापवादः । ब्रह्मणो भावः कर्म वा ब्रह्मत्वम् ।

'न' इति वक्तव्ये त्ववचनं तलो बाधनार्थम् ।

यस्तु जातिशब्दो ब्राह्मणपर्यायो ब्रह्मन्शब्दः, ततस्त्वतलौ भवत एव- ब्रह्मत्वम्, ब्रह्मता ।

भवनावधिकयोर्नञ्स्नञोरधिकारः समाप्तः ॥

॥ इति काशिकावृत्तौ पञ्चमस्याध्यायस्य प्रथमाः पादः ॥

अथ पञ्चमाध्याये

द्वितीयः पादः

२०२२. धान्यानां भवने क्षेत्रे खञ् ॥ १ ॥ (१८०२)

निर्देशादेव समर्थविभक्तिः । धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यो भवनेऽभिधेये खञ् प्रत्ययो भवति, तच्चेद् भवनं क्षेत्रं भवति । भवनमिति-भवन्ति=जायन्तेऽस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् । कौद्रवीणम् । कौलत्थीनम् ।

धान्यानामिति किम्? तृणानां भवनं क्षेत्रमित्यत्र न भवति । क्षेत्रमिति किम्? मुद्गानां भवनं कुशूलम् ।

बहुवचनं स्वरूपविधिनिरासार्थम् ।

२०२३. व्रीहिशाल्योर्ढक् ॥ २ ॥ (१८०३)

व्रीहि-शालि-शब्दाभ्यां ढक् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये । खञोऽपवादः। व्रीहीणां भवनं क्षेत्रं व्रैहेयम् । शालेयम् ॥

२०२४. यवयवकषष्टिकाद्यत् ॥ ३ ॥ (१८०४)

यवादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति भवने क्षेत्रेऽभिधेये । खञोऽपवादः । यवानां भवनं क्षेत्रं यव्यम् । यवक्यम् । षष्टिक्यम् ॥

२०२५. विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ ४ ॥ (१८०५)

तिल, माष, उमा, भङ्गा, अणु-इत्येतेभ्यो विभाषा यत्प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञि प्राप्ते वचनम्, पक्षे सोऽपि भवति । उमाभङ्गयोरपि धान्यत्वमाश्रितमेव। तिल, माष, उमा, भङ्गा, अणु-एषां भवनं क्षेत्रं - तिल्यम्, तैलीनम् । माष्यम्, माषीणम् । उम्यम्, औमीनम् । भङ्ग्यम्, भाङ्गीनम् । अणव्यम्, आणवीनम् ॥

२०२६. सर्वचर्मणः कृतः खखञौ ॥ ५ ॥ (२८०६)

सर्वचर्मन्शब्दात्तृतीयासमर्थात् 'कृतः' इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः.। सर्वशब्दश्चात्र प्रत्ययार्थेन कृतेन सम्बध्यते, न चर्मणा । तत्रायमसमर्थसमासो द्रष्टव्यः । सर्वश्चर्मणा कृत इत्येतस्मिन् वाक्यार्थे वृत्तिः । सर्वचर्मीणः सार्वचर्मीणः॥

२०२७. यथामुखसम्मुखस्य दर्शनः खः ॥ ६ ॥ (१८०७)

यथामुखशब्दात्सम्मुखशब्दात्षष्ठी-समर्थाद् 'दर्शनः' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति। दृश्यतेऽस्मिन्निति दर्शनः=आदर्शादिः, प्रतिबिम्बाश्रय उच्यते । निपातनात्सादृश्येऽव्ययीभावः । यथामुखं दर्शनः - यथामुखीनः । सर्वस्य मुखस्य दर्शनः - सम्मुखीनः ॥

२०२८. तत्सर्वादेः पथ्यङ्गकर्मपत्त्रपात्रं व्याप्नोति ॥ ७ ॥ (१८०८)

'तत्' इति द्वितीया समर्थविभक्तिः । 'व्याप्नोति' इति प्रत्ययार्थः । परिशिष्टं प्रकृतिविशेषणम् । सर्वादेः प्रातिपदिकात् पथिन्, अङ्ग, कर्मन्, पत्त्र, पात्र - इत्येवमन्ताद् द्वितीयासमर्थात् 'व्याप्नोति' इत्यस्मिन्नर्थे खः प्रत्ययो भवति । सर्वपथं व्यप्नोति सर्वपथीनो रथः । सर्वाङ्गीणस्तापः । सर्वकर्मीणः पुरुषः । सर्वपत्त्रीणः सारथिः । सर्वपात्रीण ओदनः ॥

२०२९. आप्रपदं प्राप्नोति ॥ ८ ॥ (१८०९)

'प्रपदम्' इति पादस्याग्रमुच्यते, आङ् मर्यादायाम्, तयोरव्ययीभावः । आप्रपदशब्दात्तदिति द्वितीयासमर्थात् 'प्राप्नोति' इत्यस्मिन्नर्थे खः प्रत्ययो भवति । आप्रपदं प्राप्नोति - आप्रपदीनः पटः । शरीरेणासम्बद्धस्यापि पटस्य प्रमाणमाख्यायते.॥

२०३०. अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ९ ॥ (१८१०)

अनुपदादिभ्यः शब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो यथासंख्यम् 'बद्धा' , 'भक्षयति', 'नेय' -इत्येतेष्वर्थेषु खः प्रत्ययो भवति । अनुरायामे, सादृश्ये वा । अनुपदं बद्धा उपानत् -

अनुपदीना। पदप्रमाणेत्यर्थः । सर्वान्नानि भक्षयति - सर्वान्नीनो भिक्षुः । अयः = प्रदक्षिणम् । अनयः = प्रसव्यम् । प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्परशारैः पदानामसमावेशः सोऽयानयः । अयानयं नेयः अयानयीनः योनः शारः (म. भा.) । फलकशिरसि स्थित इत्यर्थः ॥

२०३१. परोवरपरम्परपुत्रपौत्रमनुभवति ॥ १० ॥ (१८११)

परोवर, परम्पर, पुत्रपौत्र - इत्येतेभ्यस्तदिति द्वितीयासमर्थेभ्यः 'अनुभवति' इत्येतस्मिन्नर्थे खः प्रत्ययो भवति । परोवरेति परस्योत्वं प्रत्ययसन्नियोगेन निपात्यते। परांश्चावरांश्चानुभवति परोवरीणः (म. भा.) ।

परपरतराणां च परम्परभावो निपात्यते । परांश्च परतरांश्चानुभवति परम्परीणः। पुत्रपौत्राननुभवति पुत्रपौत्रीणः ।

परम्परशब्दो विनापि प्रत्ययेन दृश्यते - 'मन्त्रिपरम्परा मन्त्रं भिनत्तीति । तच्छब्दान्तरमेव द्रष्टव्यम् ॥

२०३२. अवारपारात्यन्तानुकामं गामी ॥ ११ ॥ (१८१२)

अवारपार, अत्यन्त, अनुकाम-इत्येतेभ्यो द्वितीयासमर्थेभ्यः 'गामी' इत्येतस्मिन्नर्थ खः प्रत्ययो भवति । गमिष्यतीति गामी । 'भविष्यति गम्यादयः' (३.३.०३) इति । 'अकेनोर्भविष्यदाधमर्ण्ययोः' (३.२.७०) इति षष्ठीप्रतिषेधः । अवारपारं गामी अवारपारीणः ।

विगृहीतादपीष्यते (म. भा. वा. १) । विपरीताच्च (म. भा. वा. २) । अवारीणः। पारावारीणाः ।

अत्यन्तं गामी अत्यन्तीनः । भृशं गन्तेत्यर्थः । अनुकामं गामी अनुकामीनः। यथेष्टं गन्तेत्यर्थः ॥

२०३३. समांसमां विजायते ॥ १२ ॥ (१८१३)

'समांसमाम्' इति वीप्सा, सुबन्तसमुदायः प्रकृतिः, विजायत = गर्भं धारयतीति प्रत्ययार्थः । गर्भधारणेन सकलापि समा व्याप्यत इति अत्यन्तसंयोगे द्वितीया (२.३५)। समांसमां विजायते समांसमीना गौः । समांसमीना वडवा ।

पूर्वपदे सुपोऽलुग्वक्तव्यः (म. भा. वा. १) ।

केचित्तु 'समायां समायां विजायते' इति विगृह्णन्ति, 'गर्भमोचने विजनिर्वर्त्तते' - इत्याहुः, तेषां पूर्वपदे यलोपमात्रं निपात्यते, परिशिष्टस्यालुग्वक्तव्यः ।

अनुत्पत्तावुत्तरपदस्य च वा यलोपो वक्तव्यः (म. भा. ५.२.१२ वा. ४) । समां समां विजायते । समायां समायां विजायत इति वा ॥

२०३४. अद्यश्वीनावष्टब्धे ॥ १३ ॥ (१८१४)

'विजायते' इति वर्त्तते । 'अद्यश्वीनः' इति निपात्यते अवष्टब्धे विजने=आसन्ने प्रसवे। आविदूर्ये हि मूर्धन्यो विधीयते - 'अवाच्चालम्बनाविदूर्ययोः' (८.३.६८) इति । अद्य वा श्वो वा विजायते अद्यश्वीना गौः । अद्यश्वीना वडवा ।

केचित्तु- 'विजायते इति नानुवर्त्तते, अवष्टब्धमात्रे निपातनम्' -इत्याहुः । अद्यश्वीनं मरणम्। अद्यश्वीनो वियोग इति ॥

२०३५. आगवीनः ॥ १४ ॥ (१८१५)

'आगवीनः' इति निपात्यते । गोराङ्पूर्वाद्, आ तस्य गोः प्रतिदानात् कारिणि खः प्रत्ययो निपात्यते (म. भा.) । आगवीनः कर्मकरः ॥ यो गवा भृतः कर्म करोति आ तस्य गोः प्रत्यर्पणात् ॥

२०३६. अनुग्वलङ्गामी ॥ १५ ॥ (१८१६)

गोः पश्चाद् 'अनुगु' । अनुगुशब्दाद् 'अलङ्गामी' इत्यस्मिन्नर्थे खः प्रत्ययो भवति । अनुगु पर्याप्तं गच्छति अनुगवीनो गोपालकः ॥

२०३७. अध्वनो यत्खौ ॥ १६ ॥ (१८१७)

तदिति द्वितीया समर्थविभक्तिरनुवर्त्तते, अलङ्गामीति च प्रत्ययार्थः । अध्वन्शब्दाद् द्वितीयासमर्थाद् 'अलङ्गामी' इत्येतस्मिन्नर्थे यत्खौ प्रत्ययौ भवतः । अध्वानमलङ्गामी अध्वनीनः, अध्वन्यः । 'ये चाभावकर्मणोः' (६.४.१६८), 'आत्माध्वानौ खे' (६.४.१६९) इति प्रकृतिभावः ॥

२०३८. अभ्यमित्राच्छ च ॥ १७ ॥ (१८१८)

अभ्यमित्रशब्दाद् द्वितीयासमर्थाद् 'अलङ्गामी' इत्येतस्मिन्नर्थे छः प्रत्ययो भवति। चकाराद्यत्खौ च । अभ्यमित्रमलङ्गामी अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः। अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ॥

२०३९. गोष्ठात्खञ् भूतपूर्वे ॥ १८ ॥ (१८१९)

गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम् । गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते.। भूतपूर्वग्रहणं तस्यैव विशेषणम् । गोष्ठशब्दाद् भूतपूर्वोपाधिकात्स्वार्थे खञ् प्रत्ययो भवति । गौष्ठीनो देशः ।

भूतपूर्वग्रहणं किम्? गोष्ठो वर्तते ॥

२०४०. अश्वस्यैकाहगमः ॥ १९ ॥ (१८२०)

निर्देशादेव समर्थविभक्तिः । अश्वशब्दात्षष्ठीसमर्थाद् 'एकाहगमः' इत्येतदर्थे खञ् प्रत्ययो भवति । एकाहेन गम्यत इत्येकाहगमः । अश्वस्यैकाहगमोऽध्वा आश्वीनः। 'आश्वीनानि शतं पतित्वा' (तां ब्रा. २१.१.९) ।

२०४१. शालीनकौपीने अधृष्टाकार्ययोः ॥ २० ॥ (१८२१)

शालीन-कौपीन-शब्दौ निपात्येते यथासंख्यमधृष्टे, अकार्ये चाभिधेये । अधृष्टः - अप्रगल्भः । अकार्यम्=अकरणार्ह, विरुद्धम् । शालीनकौपीने अधृष्टाकार्ययोः पर्यायौ यथाकथञ्चिद् व्युत्पादयितव्यौ । शालाप्रवेशनमर्हति, कूपावतारमर्हति (म. भा.) - इत्यर्थयोः खञ् प्रत्यय उत्तरपदलोपश्च निपात्यते । शालीनो जडः । कौपीनं पापम् ॥

२०४२. व्रातेन जीवति ॥ २१ ॥ (१८२२)

निर्देशादेव तृतीया समर्थविभक्तिः । व्रातशब्दात्तृतीयासमर्थात् 'जीवति' इत्यस्मिन्नर्थे खञ् प्रत्ययो भवति । नानाजातीया अनियतवृत्तय उत्सेधजीविनः सङ्घाः = व्राताः (म.भा.) । उत्सेधः = शरीरम्, तदायास्य ये जीवन्ति ते उत्सेधजीविनः, तेषां कर्म - व्रातम् । तेन व्रातेन जीवति - व्रातीनः । तेषामेव व्रातानामन्यतम उच्यते। यस्त्वन्यस्तदीयेन [व्रातेन] जीवति तत्र नेष्यते ॥

२०४३. साप्तपदीनं सख्यम् ॥ २२ ॥ (१८२३)

'साप्तपदीनम्' इति निपात्यते सख्येऽभिधेये । सप्तभिः पदैरवाप्यते साप्तपदीनम्। 'सख्यं
जनाः साप्तपदीनमाहुः' ।

कथं साप्तपदीनः सखा, साप्तपदीनं मित्त्रमिति? यदा गुणप्रधानः साप्तपदीनशब्दः सखिभावे तत्कर्मणि च वर्तते तदा सख्यशब्देन सामानाधिकरण्यं भवति, यदा तु लक्षणया वर्त्तते तदा पुरुषेण सामानाधिकरण्यं भवति ॥

२०४४. हैयङ्गवीनं संज्ञायाम् ॥ २३ ॥ (१८२४)

'हैयङ्गवीनम्' इति निपात्यते संज्ञायां विषये । ह्योगोदोहस्य हियङ्ग्वादेशः, तस्य विकारे (म. भा.) खञ् प्रत्ययो भवति संज्ञायाम् । ह्योगोदोहस्य विकारः - हैयङ्गवीनम्, घृतस्य संज्ञा । तेनेह न भवति - ह्योगोदोहस्य विकार उदश्वित् (म. भा.) ॥

२०४५. तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २४ ॥ (१८२५)

'तस्य' इति षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंख्यं पाकमूलयोरर्थयोः कुणब्, जाहच्-इत्येतौ प्रत्ययौ भवतः । पीलूनां पाक ः पीलुकुणः। कर्कन्धुकुणः । कर्णादिभ्यः - कर्णस्य मूलं कर्णजाहम् ।

पीलु । कर्कन्धु । शमी । करीर । कुवल । बदर । अश्वत्थ । खदिर । पील्वादिः।

कर्ण । अक्षि । नख । मुख । केश । पाद । गुल्फ । भ्रू । शृङ्ग । दन्त । ओष्ठ। पृष्ठ। अङ्गुष्ठ । कर्णादिः ॥

२०४६. पक्षात्तिः ॥ २५ ॥ (१८२६)

'तस्य' इत्येव । तस्येति षष्ठीसमर्थात्पक्षशब्दात् मूलेऽभिधेये तिः प्रत्ययो भवति । मूलग्रहणमनुवर्त्तते, पाकग्रहणम्; (म. भा.) 'एकयोगनिर्दिष्टा-नामप्येकदेशोऽनुवर्तते' (व्या. परि. २३) इति । पक्षस्य मूलं पक्षतिः = प्रतिपत् ॥

२०४७. तेन वित्तश्चुञ्चुप्चणपौ ॥ २६ ॥ (१८२७)

'तेन' इति तृतीयासमर्थाद् 'वित्त' इत्येतस्मिन्नर्थे चुञ्चुप्, चणप् - इत्येतौ प्रत्ययौ भवतः । वित्तः - प्रतीतः, ज्ञात इत्यर्थः । विद्यया वित्तः, विद्याचुञ्चुः - विद्याचणः ॥

२०४८. विनञ्भ्यां नानाञौ नसह ॥ २७ ॥ (१८२८)

वि, नञ्-इत्येताभ्यां यथासंख्यं ना, नाञ् - इत्येतौ प्रत्ययौ भवतः । 'नसह' इति प्रकृतिविशेषणम् (म. भा.) । असहार्थे पृथग्भावे वर्त्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः । विना । नाना ॥

२०४९. वेः शालच्छङ्कटचौ ॥ २८ ॥ (१८२९)

विशब्दात् शालच्, शङ्कटच् - इत्येतौ प्रत्ययौ भवतः । ससाधनक्रियावचनादुपसर्गात्स्वार्थे प्रत्ययौ भवतः । विगते शृङ्गे विशाले । विशङ्कटे। तद्योगाद् गौरपि विशालः, विशङ्कट इत्युच्यते ।

परमार्थतस्तु गुणशब्दा एते यथाकथञ्चिद्व्युत्पाद्यन्ते । नात्र प्रकृतिप्रत्ययार्थयोरभिनिवेशः ॥

२०५०. संप्रोदश्च कटच् ॥ २९ ॥ (१८३०)

सम्, प्र, उद् - इत्येतेभ्यः कटच् प्रत्ययो भवति । चकाराद्वेश्च । सङ्कटः । प्रकटः । उत्कटः । विकटः ।

कटच्प्रकरणेऽलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् (म. भा. ५.२.२९ वा. १,२) । अलाबूनां रजः अलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाकटम् ।

गोष्ठादयः स्थानादिषु पशुनामादिभ्य उपसंख्यानम् (वा. ३) । गवां स्थानं गोगोष्ठम् । महिषीगोष्ठम् ।

सङ्घाते कटच् वक्तव्यः (वा. ३) अवीनां सङ्घातः अविकटम् ।

विस्तारे पटच् वक्तव्यः (वा. ३) । अविपटम् ।

द्वित्वे गोयुगच् (वा. ३) । उष्ट्रगोयुगम् । अश्वगोयुगम् ।

प्रकृत्यर्थस्य षट्त्वे षड्गवच् (?) । हस्तिषड्गवम् । अश्वषड्गवम् ।

विकारे स्नेहे तैलच् (वा. ३) । एरण्डतैलम् । इङ्गुदतैलम् । तिलतैलम ।

भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ (वा. ३) । इक्षुशाकटम् । इक्षुशाकिनम्। मूलशाकटम् । मूलशाकिनम् ॥

२०५१. अवात् कुटारच्च ॥ ३० ॥ (१८३१)

अवशब्दात् कुटारच्प्रत्ययो भवति । चकारात् कटच् । अवकुटारम् । अवकटम्॥

२०५२. नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः ॥ ३१ ॥ (१८३२)

'अवात्' इत्येव । नमनम्=नतम् । नासिकायाः सम्बन्धिनि नतेऽभिधेये टीटच्, नाटच्, भ्रटच्-प्रत्यया भवन्ति संज्ञायां विषये । नासिकाया नतम् अवटीटम्.। अवनाटम् । अवभ्रटम् । तद्योगान्नासिकापि । पुरुषोऽपि तथोच्यते-अवटीटः, अवनाटः, अवभ्रट इति ॥

२०५३. नेर्बिडज्बिरीसचौ ॥ ३२ ॥ (१८३३)

'नते नासिकायाः' इत्यनुवर्त्तते, 'संज्ञायाम्' इति च । निशब्दान्नासिकाया नतेऽभिधेये बिडच्, बिरीसच्-इत्येतौ प्रत्ययौ भवतः । निबिडम् । निबिरीसम् । तद्योगान्नासिकापि । पुरुषोऽपि-निबिडः । निबिरीसः ।

कथं निबिडाः केशाः, निबिडं वस्त्रम्? उपमानाद्भविष्यति ॥

२०५४. इनच्पिटच्चिक चि च ॥ ३३ ॥ (१८३४)

'नेः' इत्येव, 'नते नासिकायाः' इति च । निशब्दान्नासिकाया नतेऽभिधेये इनच्, पिटच्-इत्येतौ प्रत्ययौ भवतः, तत्संनियोगेन च निशब्दस्य यथासंख्यं चिक, चि - इत्येतावादेशौ भवतः । चिकिनः । चिपिटः ।

ककारः प्रत्ययो वक्तव्यश्चिक्च प्रकृत्याऽऽदेशः । चिक्कः । तथा चोक्तम् - 'इनच्पिटच्काश्चिकचिचिकादेशाश्च वक्तव्याः' (म. भा. ५.२.३३ वा. १) इति ॥

क्लिन्नस्य चिल् पिल्लश्चास्य चक्षुषी (वा.२) । क्लिन्नस्य चिल्, पिल्-इत्येतावादेशौ भवतो लश्च प्रत्ययः 'अस्य चक्षुषी' इत्येतस्मिन्नर्थे । क्लिन्ने अस्य चक्षुषी चिल्लः । पिल्लः॥

चुल्लादेशो वक्तव्यः (वा,२) । चुल्लः ।

अस्येत्यनेन नार्थः । चक्षुषीरेवाभिधाने प्रत्यय इष्यते । क्लिन्ने चक्षुषी चिल्ले। पिल्ले। चुल्ले । तद्योगात्तु पुरुषस्तथोच्यते ॥

२०५५. उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥ ३४ ॥ (१८३५)

उप, अधि-इत्येताभ्यां यथासंख्यमासन्नारूढयोर्वर्त्तमानाभ्यां स्वार्थे त्यकन्प्रत्ययो भवति। संज्ञाधिकाराच्च नियतविषयमासन्नारूढं गम्यते । पर्वतस्यासन्नम् = उपत्यका । तस्यैवाऽऽरूढम्=अधित्यका । 'प्रत्ययस्थात्कात्पूर्वस्य' (७.३.४४) इतीत्वमत्र न भवति, संज्ञाधिकारादेव ॥

२०५६. कर्मणि घटोऽठच् ॥ ३५ ॥ (१८३६)

निर्देशादेव समर्थविभक्तिः । कर्मशब्दात्सप्तमीसमर्थाद् 'घटः' इत्येतस्मिन्नर्थेऽठच् प्रत्ययो भवति । घटत इति घटः । कर्मणि घटते कर्मठः पुरुषः ॥

२०५७. तदस्य सञ्जातं तारकादिभ्यः इतच् ॥ ३६ ॥ (१८३७)

तदिति प्रथमासमर्थेभ्यस्तारकादिभ्यः शब्देभ्यः 'अस्य' इति षष्ठ्यर्थे इतच् प्रत्ययो भवति । सञ्जातग्रहणं प्रकृतिविशेषणम् । तारकाः सञ्जाता अस्य नभसः तारकितं नभः । पुष्पित्तो वृक्षः ।

तारका । पुष्प । मुकुल । कण्टक । पिपासा । सुख । दुःख । ऋजीष । कुड्मल। रोग। विचार । व्याधि । निष्क्रमण । मूत्र । पुरीष । किसलय । कुसुम.। प्रचार । तन्द्रा । वेग । बुभुक्षा । श्रद्धा । उत्कण्ठा । भर । द्रोह । गर्भादप्राणिनि (ग. सू. १२०) । तारकादिराकृतिगणः॥

२०५८. प्रमाणे द्वयसच्दघ्नञ्मात्रचः ॥ ३७ ॥ (१८३८)

'तदस्य' इत्यनुवर्त्तते । तदिति प्रथमासमर्थाद् 'अस्य' इति षष्ठ्यर्थे द्वयसच्, दघ्नच्, मात्रच् - इत्येते प्रत्यया भवन्ति यत्तत्प्रथमासमर्थं प्रमाणं चेत्तद्भवति । ऊरुः प्रमाणमस्य ऊरुद्वयसम्, ऊरुदघ्नम्, ऊरुमात्रम् । जानुद्वयसम्, जानुदघ्नम् जानुमात्रम्॥

प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम । (म. भा. वा.)

ऊरुद्वयसमुदकम् । ऊरुदघ्नमुदकम् । मात्रच्पुनरविशेषेण, प्रस्थमात्रमित्यपि भवति ।

प्रमाणे लो वक्तव्यः (म.भा. ५.२.३७ वा.) प्रमणशब्दा इति ये प्रसिद्धास्तेभ्य उत्पन्नस्य प्रत्यस्य लुग्भवति । शमः प्रमाणमस्य शमः । दिष्टिः । वितस्तिः ।

द्विगोर्नित्यम् (म. भा. ५.२.३७ वा.) । द्वौ शमौ प्रमणमस्य द्विशमः । त्रिशमः। द्विवितस्तिः । नित्यग्रहणं किम्? संशये श्राविणं वक्ष्यति, तत्रापि द्विगोर्लुगेव यथा स्यात् । द्वे दिष्टी स्यातां वा न वा, द्विदिष्टिः ।

डट् स्तोमे वक्तव्य (म. भा. ५.२.३७ वा.) । पञ्चदशः स्तोमः । पञ्चदशी रात्रिः । टिच्वान् ङीप् ।

शन्शतोर्डिनिर्वक्तव्यः (म. भा. ५.२.३७ वा.) । पञ्चदशिनोऽर्द्धमासाः, त्रिंशिनो मासाः (तं. सं. ७.५.२०.१) ।

विंशतेश्चेति वक्तव्यम् (म. भा.) । विंशिनोऽङ्गिरसः (गो. ब्रा. १.१.८.१) ।

प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः (म. भा. वा.) । शममात्रम्। दिष्टिमात्रम् । प्रस्थमात्रम् । कुडवमात्रम् । पञ्चमात्रम् । दशमात्रा गावः.।

वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् (म. भा. ५.२.३७ वा.) । तावदेव तावद्द्वयसम् । तावन्मात्रम् । एतावद्द्वयसम् । एतावन्मात्रम् । यावद्द्वयसम् । यावन्मात्रम् ॥

२०५९. पुरुषहस्तिभ्यामण्च ॥ ३८ ॥ (१८३९)

'तदस्य' इत्येव, 'प्रमाणे' इति च । पुरुषहस्तिभ्यां प्रथमासमर्थाभ्यां प्रमाणोपाधिकाभ्यामस्येति षष्ठ्यर्थेऽण् प्रत्ययो भवति, चकारादृवयसजादयश्च । पुरुषः प्रमाणमस्य पौरुषम्, पुरुषद्वयसम्, पुरुषदध्नम्, पुरुषमात्रम् । हास्तिनम्, हस्तिद्वयसम्, हस्तिदध्नम्, हस्तिमात्रम् ।

द्विगोर्नित्यं लुक् - द्विपुरुषमुदकम्, त्रिपुरुषमुदकम् । द्विहस्ति, त्रिहस्ति । द्विपुरुषी, त्रिपुरुषी । द्विहस्तिनी, त्रिहस्तिनी ॥

२०६०. यत्तदेतेभ्यः परिमाणे वतुप् ॥ ३९ ॥ (१८४०)

'तदस्य' इत्येव । यत्तदेतेभ्यः प्रथमासमर्थेभ्यः परिमाणोपाधिकेभ्यः 'अस्य' इति षष्ठ्यर्थे वतुप् प्रत्ययो भवति । यत्परिमाणमस्य यावान् । तावान् । एतावान् ।

प्रमाणग्रहणेऽनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात् ।

डावतावथवैशेष्यान्निर्देशः पृथगुच्यते ।
मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोः ॥ (म. भा. ५.२.३९)

वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् (म. भा. ५.२.३९ वा. १) 'न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते' (ऋ. ७.३२.२३)। त्वावतः पुरुवसो (ऋ. ८.४६.१) । यज्ञं विप्रस्य मावतः (ऋ. १.१४२.स्) । त्वत्सदृशस्य, मत्सदृशस्येत्यर्थः ॥

२०६१. किमिदम्भ्यां वो घः ॥ ४० ॥ (१८४१)

किमिदम्भ्यामुत्तरस्य वतुपो वकारस्य घकारादेशो भवति । कियान् । इयान्।

एतदेव चादेशविधानं ज्ञापकम् - किमिदम्भ्यां वतुत्प्रत्ययो भवतीति । अथ वा - योगविभागेन वतुपं विधाय पश्चाद्वो घो विधीयते (म. भा.) ॥

२०६२. किमः संख्यापरिमाणे इति च ॥ ४१ ॥ (१८४२)

संख्यायाः परिमाणम्, संख्यापरिच्छेद इत्यर्थः । संख्यापरिमाणे वर्त्तमानात् किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिः प्रत्ययो भवति । चकारादवतुप् च । तस्य च वकारस्य घादेशो भवति । पृच्छ्यमानत्वात् परिच्छेदोपाधिकायां संख्यायां वर्त्तमानात्किमः प्रत्ययो विज्ञायते । का संख्या परिमाणमेषां ब्राह्मणानां कति ब्राह्मणाः । कियन्तो ब्राह्मणाः ।

अथ वा - संख्यैव परिमाणात्मिका परिच्छेदस्वभावा गृह्यते - का संख्या परिमाणं येषामिति ।

ननु च संख्या एवमात्मिकैव परिच्छेदस्वभावा, सा किमर्थं परिमाणेन विशेष्यते? यत्रापरिच्छेदकत्वेन विवक्ष्यते तत्र मा भूदिति । क्षेपे हि परिच्छेदो नास्ति - केयमेषां संख्या दशानामिति ॥

२०६३. संख्याया अवयवे तयप् ॥ ४२ ॥ (१८४३)

'तदस्य' इत्येव । संख्याया अवयवे वर्त्तमानाया अस्येति षष्ठ्यर्थे तयप् प्रत्ययो भवति। अवयवा अवयविनः सम्बन्धिन इति सामर्थ्यादवयवी प्रत्ययार्थो विज्ञायते । पञ्च अवयवा अस्य पञ्चतयम् । दशतयम् । चतुष्टयम् । चतुष्टयी ॥

२०६४. द्वित्रिभ्यां तयस्यायज्वा ॥ ४३ ॥ (१८४४)

पूर्वेण विहितस्य तयस्य द्वित्रिभ्यां परस्य वाऽयजादेशो भवति । द्वाववयवावस्य द्वयम्, द्वितयम् । त्रयम्, त्रितयम् ।

तयग्रहणं स्थानिनिर्देशार्थम्; अन्यथा प्रत्ययान्तरमयज्विज्ञायेत । तत्र को दोषः? त्रयी गतिरिति तयनिबन्धन ईकारो (४.१.१५) न स्यात्, 'प्रथमचरमतय' (१.१.३३) इत्येष विधिश्च न स्यात् । द्वये, द्वयाः । चकारः स्वरार्थः ॥

२०६५. उभादुदात्तो नित्यम् ॥ ४४ ॥ (१८४५)

उभशब्दात्परस्य तयपो नित्यमयजादेशो भवति स चोदात्तः । वचनसामर्थ्यादादेरुदात्तत्वं विज्ञायते । उभशब्दो यदि लौकिकी संख्या, ततः पूर्वेणैव विहितस्य तयप आदेशविधानार्थं वचनम् । अथ न संख्या, ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते । उभयो मणिः । 'उभयेऽस्य देवमनुष्याः' (तै.सं. १.६.७.१) ॥

२०६६. तदस्मिन्नधिकमिति दशान्तड्डः ॥ ४५ ॥ (१८४६)

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे दशान्तात्प्रातिपदिकाद् डः प्रत्ययो भवति यत्तत्प्रथमा समर्थमधिकं चेत्तद्भवति । इतिकरणस्ततश्चेद्विवक्षा । एकादश अधिका अस्मिन् शते एकादशं शतम् । एकादशं सहस्रम् । द्वादशं शतम् । द्वादशं सहस्रम् ।

दशान्तादिति किम्? पञ्चाधिका अस्मिन् शते । अन्तग्रहणं किम्? दशाधिका अस्मिन् शते ।

प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते (म. भा.) - एकादश कार्षापण अधिक अस्मिन् कार्षापणशते एकदशं कार्षापणशतमिति ।

इह तु न भवति - एकादश माषा अधिका अस्मिन् कार्षापणशत इति (म. भा.) ।

'शतसहस्रयोश्चेष्यते' (म. भा. इष्टि) । इह न भवति - एकादशाधिका अस्यां त्रिंशतीति।

'इतिकरणो विवक्षार्थः' इत्युक्तम्, तत इदं सर्व लभ्यते ।

कथमेकादशं शतसहस्रमिति ? शतानाम् सहस्रम्, सहस्राणां वा शतमिति शतसहस्रमित्युच्यते ।

तत्र 'शतसहस्रयोः' इत्येव सिद्धम् ।

अधिके समानजतातावष्टं शतसहस्रयोः ।
यस्य संख्या तदाधिक्ये डः कर्तव्यो मतो मम ॥ (म. भा. ५.२.४५)

२०६७. शदन्तविंशतेश्च ॥ ४६ ॥ (१८४७)

'तदस्मिन्नधिकम्' इत्यनुवर्तते, 'डः' इति च । शदन्तात् प्रातिपदिकाद्विंशतेश्च डः प्रत्ययो भवति 'तदस्मिन्नधिकम्' इत्येतस्मिन् विषये । त्रिंशदधिका अस्मिन् शते त्रिंशं शतम्।

शद्ग्रहणेऽन्तग्रहणं प्रत्ययग्रहणे यस्मात्स तदादेरधिकार्थम् । एकत्रिंशं शतम्। एकचत्वारिंशं शतम् । संख्याग्रहणं च कर्त्तव्यम् । इह मा भूत् - गोत्रिंशदधिका अस्मिन् गोशते इति ।

विंशतेश्च (म. भा. ५.२.४६ वा. ३) । विंश शतम् ।

तदन्तादपीति वक्तव्यम् (वा.) । एकविंशं शतम् ।

संख्याग्रहणं च कर्त्तव्यम् (म. भा. ५.२.४६ वा. २) इह मा भूत् - गोविंशतिरधिकाऽस्मिन्गोशते इति ॥

२०६८. संख्याया गुणस्य निमाने मयट् ॥ ४७ ॥ (१८४८)

'तदस्य' इत्यनुवर्तते 'तदस्य सञ्जातम्' (५.२.३६) इत्यतः । तदिति प्रथमासमर्थात्संख्यावाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे मयट् प्रत्ययो भवति यत्तत्प्रथमासमर्थं गुणस्य निमाने चेत्तद् वर्तते । गुणः = भागः । निमानम् = मूल्यम्। गुणो येन निमीयते मूल्यभूतेन सोऽपि सामर्थ्याद्भाग एव विज्ञायते । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद् यवानाम् । त्रिमयम् । चतुर्मयम् ।

भागेऽपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे । तेन सामानाधिकरण्यं भवति द्विमयमुदश्विदिति । गुणस्येति चैकत्वं विवक्षितम्, तेनेह न भवति - द्वौ भागौ यवानां त्रय उदश्वितः (म. भा.) इति ।

भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते । इह न भवति - एको भागो निमानमस्येति । भूयस इति च प्रत्ययार्थात्प्रकृत्यर्थस्याधिक्यमात्रं विवक्षितम्। वहुत्वमतन्त्रम्, तेन द्विशब्दादपि भवति ।

गुणशब्दः समानावयववचनः । तेनेह न भवति - द्वौ भागौ यवानामध्यर्द्धम् उदश्वितः (म. भा.) इति ।

निमेये चापि दृश्यते (म. भा. ५.२.४७ वा. ५) निमेये वर्त्तमानायाः संख्याया निमाने प्रत्ययो दृश्यते । उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य द्विमया यवा उदश्वितः । त्रिमया यवा उदश्वितः । चतुर्मयाः (म. भा.) ।

गुणस्येति किम्? द्वौ व्रीहियवौ निमानस्योदश्वितः । निमान इति किम्? द्वौ गुणौ क्षीरस्यैकस्तैलस्य द्विगुणं तैलं पच्यते क्षीरेणेत्यत्र मा भूत् ॥

२०६९. तस्य पूरणे डट् ॥ ४८ ॥ (१८४९)

तस्येति षष्ठीसमर्थात्संख्यावाचिनः प्रातिपदिकात् 'पूरणे' इत्यस्मिन्नर्थे डट् प्रत्ययो भवति । पूर्यतेऽनेनेति पूरणम् । येन संख्या=संख्यानं पूर्यते=सम्पद्यते स तस्याः पूरणः । एकादशानाम् पूरण एकादशः । त्रयोदशः । यस्मिन्नुपसञ्जातेऽन्या संख्या सम्पद्यते स प्रत्ययार्थः । इह न भवति - पञ्चानां मुष्टिकानां पूरणो घट इति ॥

२०७०. नान्तादसंख्यादेर्मट् ॥ ४९ ॥ (१८५०)

'डट्' वर्तते । नकारान्तात्सम्ख्यावाचिनः प्रातिपदिकादसंख्यादेः परस्य डटो मडागमो भवति । नान्तादिति पञ्चमी डट आगमसम्बन्धे षष्ठीं प्रकल्पयति। पञ्चानां पूरणः पञ्चमः । सप्तमः ।

नान्तादिति किम्? विंशतेः पूरणो विंशः । असंख्यादेरिति किम्? एकादशानां पूरण एकादशः ॥

२०७१. थट् च च्छन्दसि ॥ ५० ॥ (३४९७)

नान्तादसंख्यादेः परस्य डटश्छन्दसि विषये थडागमो भवति । चकारात्पक्षे मडपि भवति। पर्णमयानि पञ्चथानि भवन्ति (काठ. सं. ८.२) । पञ्चथः (काठ. सं. ९.३) । सप्तथः (काठ. सं. ३७.११) । मट् - पञ्चममिन्द्रियमस्यापाक्रामन् (काठ. सं. ९.१२) ।

२०७२. षट्कतिकतिपयचतुरां थुक् ॥ ५१ ॥ (१८५१)

'डट्' इत्यनुवर्तते, तदिह सप्तम्या विपरिणम्यते । षट्, कति, कतिपय, चतुर् - इत्येतेषां डटि परतस्थुगागमो भवति । कतिपयशब्दो न संख्या । तस्यास्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते । षण्णां पूरणः षष्ठः । कतिथः । कतिपयथः । चतुर्थः।

चतुरश्छयतावाद्यक्षरलोपश्च (म. भा. ५.२.५१ वा.१) । चतुर्णां पूरणः तुरीयः तुर्यः ॥

२०७३. बहुपूगगणसङ्घस्य तिथुक् ॥ ५२ ॥ (१८५२)

'डटि' इत्येव । बहु, पूग, गण, सङ्घ-इत्येतेषां डटि परतस्तिथुगागमो भवति। पूगसङ्घशब्दयोरसङ्ख्यात्वादिदमेव ज्ञापकं डटो भावस्य । बहूनां पूरणो बहुतिथः । पूगतिथः । गणतिथः । सङ्घतिथः ॥

२०७४. वतोरिथुक् ॥ ५३ ॥ (१८५३)

'डटि' इत्येव । वतोर्डटि परत इथुगागमो भवति । वत्वन्तस्य सङ्ख्यात्वात्पूर्वेण इड्विहितस्तस्मिन्नयमागमो विधीयते । यावतां पूरणो यावतिथः । तावतिथः । एतावतिथः॥

२०७५. द्वेस्तीयः ॥ ५४ ॥ (१८५४)

द्विशब्दात्तीयः प्रत्ययो भवति 'तस्य पूरणे' इत्यस्मिन्विषये । डटोऽपवादः । द्वयोः पूरणो द्वितीयः ॥

२०७६. त्रेः संप्रसारणं च ॥ ५५ ॥ (१८५५)

त्रिशब्दात्तीयः प्रत्ययो भवति 'तस्य पूरणे' इत्येतद्विषये । तत्सन्नियोगेन त्रेः संप्रसारणं च भवति । डटोऽपवादः । त्रयाणां पूरणस्तृतीयः । 'हलः' (६.४.२) इति संप्रसारणस्य दीर्घत्वं न भवति । 'अणः' इति तत्रानुवर्त्तते - 'ढ्रलोपे' (६.३.१११) इत्यतः, पूर्वेण च णकारेणाण्ग्रहणम् ॥

२०७७. विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥ ५६ ॥ (१८५६)

विंशत्यादिभ्यः परस्य डटस्तमडागमो भवत्यन्यतरस्याम् । पूरणाधिकाराद् डट् प्रत्यय आगमी विज्ञायते । विंशतेः पूरणः विंशतितमः, विंशः । एकविंशतितमः, एकविंशः । त्रिविंशतितमः, त्रिविंशः । त्रिंशत्तमः, त्रिंशः । एकत्रिंशत्तमः, एकत्रिंशः।

विंशत्यादयो लौकिकाः सङ्ख्याशब्दा गृह्यन्ते, न पङ्क्त्यादिसूत्रसन्निविष्टाः। तद्ग्रहणे ह्येकविंशतिप्रभृतिभ्यो न स्यात्;ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् (व्या. परि. ८९) । एवं च सति 'षष्ट्यादेश्चासङ्ख्यादेः' (५.२.५८) इति पर्युदासो युज्यत एव ॥

२०७८. नित्यं शतादिमासार्धमाससंवत्सराच्च ॥ ५७ ॥ (१८५७)

शतादयः संख्याशब्दा लौकिका गृह्यन्ते । शतादिभ्यो मासार्धमास-संवत्सरशब्देभ्यश्च परस्य डटो नित्यं तमडागमो भवति । मासादयः सङ्ख्याशब्दा न भवन्ति, तेभ्योऽस्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते । शतस्य पूरणः शततमः । सहस्रतमः । लक्षतमः । मासस्य पूरणो मासतमो दिवसः । अर्धमासतमः। संवत्सरतमः ।

'षष्ट्यादेश्चासङ्ख्यादेः' (५.२.५८) इति वक्ष्यमाणेन सिद्धे शतादिग्रहणं सङ्ख्याद्यर्थम् । एकशततमः । द्विशततमः ॥

२०७९. षष्ट्यादेश्चासंख्यादेः ॥ ५८ ॥ (१८५८)

षष्ट्यादेः सङ्ख्याशब्दादसङ्ख्यादेः परस्य डटो नित्यं तमडागमो भवति । 'विंशत्यादिभ्यः' (५.२.५६) इति विकल्पेन प्राप्ते नित्यार्थम् । षष्टितमः । सप्ततितमः।

असङ्ख्यादेरिति किम्? एकषष्टः । एकषष्टितमः । एकसप्तः । एकसप्ततितमः॥

२०८०. मतौ छः सूक्तसाम्नोः ॥ ५९ ॥ (१८५९)

'मतौ' इति मत्वर्थ उच्यते । प्रातिपदिकान्मत्वर्थे छः प्रत्ययो भवति सूक्ते सामनि चाभिधेये । मत्त्वर्थग्रहणेन समर्थविभक्तिः प्रकृतिविशेषणम्, प्रत्ययार्थ इति सर्वमाक्षिप्यते । अच्छावाकशब्दोऽस्मिन्निति अच्छावाकीयं सूक्तम् । मित्रावरुणीयम्। यज्ञायज्ञीयं साम । वारवन्तीयम् ।

अनुकरणशब्दाश्च स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति, तेनानेकपदादपि सिद्धम् - अस्य वामीयम्, कयाषुभीयम् ॥

२०८१. अध्यायानुवाकयोर्लुक् ॥ ६० ॥ (१८६०)

'मतौ' इत्येव । मत्त्वर्थ उत्पन्नस्य छस्य लुग्भवति, अध्यायानुवाकयोरभिधेययोः। केन पुनरध्यायानुवाकयोः प्रत्ययः? इदमेव लुग्वचनं ज्ञापकं तद्विधानस्य । विकल्पेन च लुगयमिष्यते । गर्दभाण्डशब्दोऽस्मिन्नस्ति गर्दभाण्दोऽध्यायः, अनुवाको वा; गर्दभाण्डीयः (म. भा.) । दीर्घजीवितः दीर्घजीवितीयः । पलितस्तम्भः, पलितस्तम्भीयः॥

२०८२. विमुक्तादिभ्योऽण् ॥ ६१ ॥ (१८६१)

'मतौ' इत्येव, 'अध्यायानुवाकयोः' इति च । विमुक्तादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति मत्त्वर्थे, अध्यायानुवाकयोरभिधेययोः । विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तोऽध्यायः, अनुवाको वा । दैवासुरः ।

विमुक्त । देवासुर । वसुमत । सत्वत् । उपसत् । दशार्हपयस् । हविर्द्धान । मित्री । सोमापूषन् । अग्नाविष्णु । वृत्रहति । इडा । रक्षोसुर । सदसत् । परिषादक्। वसु । मरुत्वत् । पत्नीवत् । महीयल । दशार्ह । वयस् । पतत्रि । सोम । महित्री । हेतु। विमुक्तादिः ॥

२०८३. गोषदादिभ्यो वुन् ॥ ६२ ॥ (१८६२)

'मतौ' इत्येव, 'अध्यायानुवाकयोः' इति च । गोषदादिभ्यः प्रातिपदिकेभ्यो वुन्प्रत्ययो भवति मत्त्वर्थेऽध्यायानुवाकयोः । गोषदशब्दोऽस्मिन्नस्ति गोषदकोऽध्यायोऽनुवाको वा । इषेत्वकः । मातरिश्वकः ।

गोषद । इषेत्वा । मातरिश्वन् । देवस्यात्वा । देवीरापः । कृष्णोस्याखरेष्ठः । दैवींधियम्। रक्षोहण । अञ्जन । प्रभूत । प्रतूर्त । कृशानु । गोषदादिः ॥

२०७४. तत्र कुशलः पथः ॥ ६३ ॥ (१८६३)

'वुन्' इत्येव । तत्रेति सप्तमीसमर्थात् पथिन्शब्दात् 'कुशलः' इत्यस्मिन्नर्थे वुन्प्रत्ययो भवति । पथि कुशलः पथकः ॥

२०८५. आकर्षादिभ्यः कन् ॥ ६४ ॥ (१८६४)

'तत्र' इत्येव, 'कुशलः' इति च । आकर्षादिभ्यः प्रातिपदिकेभ्यः सप्तमीसमर्थेभ्यः 'कुशलः' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति । आकर्षे कुशलः आकर्षकः । त्सरुकः।

आकर्ष । त्सरु । पिपासा । पिचण्ड । अशनि । अश्मन् । विचय । चय । जय। आचय। अय । नय । निपाद । गद्गद । दीप । ह्रद । ह्राद । ह्लाद । शकुनि.। आकर्षादिः ॥

२०८६. धनहिरण्यात्कामे ॥ ६५ ॥ (१८६५)

'तत्र' इत्येव, 'कन्' इति च । धनहिरण्यशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्याम् 'कामे' इत्यस्मिन्नर्थे कन्प्रत्ययो भवति । कामः = इच्छा, अभिलाषः । धने कामः धनको देवदत्तस्य। हिरण्यको देवदत्तस्य ॥

२०८७. स्वाङ्गेभ्यः प्रसिते ॥ ६६ ॥ (१८६६)

'तत्र' इत्येव, 'कन्' इति च । स्वाङ्गवाचिभ्यः शब्देभ्यस्तत्रेति सप्तमीसमर्थेभ्यः 'प्रसिते' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति । प्रसितः = प्रसक्तः तत्पर इत्यर्थः । केशेषु प्रसितः केशकः । केशादि रचनायां प्रसक्त एवमुच्यते ।

बहुवचनं स्वाङ्गसमुदायशब्दादपि यथा स्यात् - दन्तौष्ठकः । केशनखकः॥

२०८८. उदराद्गाद्यूने ॥ ६७ ॥ (१८६७)

'तत्र' इत्येव, 'प्रसिते' इति च । उदरशब्दात्सप्तमीसमर्थात् 'प्रसिते' इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । 'आद्यूने' इति प्रत्ययार्थविशेषणम् । उदरेऽविजिगीषुर्भण्यते । यो बुभुक्षयाऽत्यन्तं पीड्यते स एवमुच्यते । उदरे प्रसित औदरिक आद्यूनः । [आद्यूनोऽविजिगीषुः ।] आद्यून इति किम्? उदरकः (५.२.६६)॥

२०८९. सस्येन परिजातः ॥ ६८ ॥ (१८६८)

कन्प्रत्यय इत्येव स्वर्यते, न ठक् । निर्देशादेव तृतीया समर्थविभक्तिः । सस्यशब्दात्तृतीयासमर्थाति 'परिजातः' इत्यस्मिन्नर्थे कन् प्रत्ययो भवति । सस्यशब्दोऽयं गुणवाची । परिः=सर्वतो भावे वर्त्तते । यो गुणैः सम्बद्धो जायते, यस्य किञ्चिदपि वैगुण्यं नास्ति, तस्येदमभिधानम् । सस्येन परिजातः सस्यकः शालिः । सस्यकः साधुः । सस्यको मणिः । आकरशुद्ध इत्यर्थः ॥

२०९०. अंशं हारी ॥ ९९ ॥ (१८६९)

अंशशब्दान्निर्देशादेव द्वितीयासमर्थाद् 'हारी' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति। अंशं हारी अंशको दायादः । अंशकः पुत्रः ।

'हारी' इत्यावश्यके णिनिः (३.३.१७०), तत्र षष्ठीप्रतिषेधात् कर्मणि द्वितीयैव भवति ॥

२०९१. तन्त्रादचिरापहृते ॥ ७० ॥ (१८७०)

तन्त्रशब्दान्निर्देशादेव पञ्चमीसमर्थाद् 'अचिरापहृते' इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। अचिरापहृतः = स्तोककालापहृत इत्यर्थः । तन्त्रादचिरापहृतः तन्त्रकः पटः । तन्त्रकः प्रावारः । प्रत्यग्रो नव उच्यते ॥

२०९२. ब्राह्मणकोष्णिके संज्ञायाम् ॥ ७१ ॥ (१८७१)

ब्राह्मणक, उष्णिक - इत्येतौ शब्दौ कन्प्रत्ययान्तौ निपात्येते संज्ञायां विषये। ब्राह्मणको देशः । उष्णिका यवागूः ।

यत्रायुधजीविनो ब्राह्मणाः सन्ति तत्र 'ब्राह्मणक' इति संज्ञा । अल्पान्ना यवागूः 'उष्णिका' इत्युच्यते ॥

२०९३. शीतोष्णाभ्यां कारिणि ॥ ७२ ॥ (१८७२)

शीतोष्णशब्दाभ्यां कारिण्यभिधेये कन्प्रत्ययो भवति । क्रियाविशेषणाद् द्वितीयासमर्थादयं प्रत्ययः । शीतं करोति शीतकः = अलसः, जड उच्यते । उष्णं करोति उष्णकः = शीघ्रकारी, दक्ष उच्यते ॥

२०९४. अधिकम् ॥ ७३ ॥ (१८७३)

'अधिकम्' इति निपात्यते । अध्यारूढस्योत्तरपदलोपः कँश्च प्रत्ययः (म. भा.) । अधिको द्रोणः खार्याम् । अधिका खारी द्रोणेन ।

कर्त्तरि कर्मणि चाऽध्यारूढशब्दः ॥

२०९५. अनुकाभिकाभीकः कमिता ॥ ७४ ॥ (१८७४)

अनुक, अभिक, अभीक-इत्येते शब्दाः कन्प्रत्ययान्ता निपात्यन्ते 'कमिता' इत्यस्मिन्नर्थे । अभेः पक्षे दीर्घत्वं च निपात्यते । अनुकामयते अनुकः । अभिकः। अभीकः ॥

२०९६. पार्श्वेनान्विच्छति ॥ ७५ ॥ (१८७५)

पार्श्वशब्दात्तृतीयासमर्थाद् 'अन्विच्छति' इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति । अनृजुरुपायः - पार्श्वम्, तेनार्थानन्विच्छति पार्श्वकः = मायावी, कौसृतिकः, जालिक उच्यते ॥

२०९७. अयः शूलदण्डाजिनाभ्यां ठक्ठञौ ॥ ७६ ॥ (१८७६)

'अन्विच्छति' इत्येव । अयःशूलदण्डाजिनाभ्यां तृतीयासमर्थाभ्याम् 'अन्विच्छति' इत्येतस्मिन्नर्थे ठक्ठञौ प्रत्ययौ भवतः । तीक्ष्ण उपायः = अयःशूलमुच्यते, तेनान्विच्छति आयःशूलिकः (म.भा.) । साहसिकः इत्यर्थः । दम्भः = दण्डाजिनम्, तेनान्विच्छति दाण्डाजिनिकः । दाम्भिकः इत्यर्थः ॥

२०९८. तावतिथं ग्रहणमिति लुग्वा ॥ ७७ ॥ (१८७७)

तावतां पूरणं तावतिथम् । गृह्यतेऽनेनेति ग्रहणम् । प्रकृतिविशेषणं चैतत् । पूरणप्रत्ययान्तात्प्रातिपदिकाद् ग्रहणोपाधिकात्स्वार्थे कन्प्रत्ययो भवति । पूरणस्य प्रत्ययस्य वा लुक् । द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विकं ग्रहणम्, द्वितीयकम् । त्रिकम्, तृतीयकम् । चतुष्कम्, चतुर्थकम् ।

तावतिथेन गृह्णातीति कन्वक्तव्यः, पूरणप्रत्ययस्य च नित्यं लुक् (म. भा. ५.२.७७ वा. १,२) । षष्ठेन रूपेण ग्रन्थं गृह्णाति षट्को देवदत्तः । पञ्चकः चतुष्कः ।

इतिकरणो विवक्षार्थः, तेन ग्रन्थविषयमेव ग्रहणं विज्ञायते, नान्यविषयम् ॥

२०९९. स एषां ग्रामणीः ॥ ७८ ॥ (१८७८)

'स' इति प्रथमासमर्थाद् 'एषामिति षष्ठ्यर्थे कन्प्रत्यो भवति, यत्तत्प्रथमासमर्थे ग्रामणीश्चेत्स भवति । ग्रामणीः = प्रधानः मुख्यः, इत्यर्थः । देवदत्तो ग्रामणीरेषां - देवदत्तकाः। यज्ञदत्तकाः ।

ग्रामणीरिति किम्? देवदत्तः शत्रुरेषाम् ॥

२१००. शृङ्खलमस्य बन्धनं करभे ॥ ७९ ॥ (१८७९)

शृङ्खलशब्दात्प्रथमासमर्थादस्येति षष्ठ्यर्थे कन्प्रत्ययो भवति । यत्तत्प्रथमासमर्थं बन्धनं चेत्तद्भवति, यत्तदस्येति निर्दिष्टं करभश्चेत्स भवति । शृङ्खलं बन्धनमस्य करभस्य- शृङ्खलकः । उष्ट्राणां बालकाः = करभा, तेषां काष्ठमयं पाशकं पादे व्यतिषच्यते, तदुच्यते शृङ्खलमिति ।

यद्यपि रज्ज्वादिकमपि तत्रास्ति तथापि शृङ्खलमस्यास्वतन्त्रीकरणे भवति साधनमिति बन्धनमित्युच्यते ॥

२१०१. उत्क उन्मनाः ॥ ८० ॥ (१८८०)

'उत्कः' इति निपात्यते, उन्मनाश्चेत्स भवति । उद्गतं मनो यस्य स उन्मनाः। उच्छब्दात् ससाधनक्रियावचनात् तद्वति कन्प्रत्ययो निपात्यते । उत्को देवदत्त । उत्कः प्रवासी। उत्सुक इत्यर्थ ॥

२१०२. कालप्रयोजनाद् रोगे ॥ ८१ ॥ (१८८१)

अर्थलभ्या समर्थविभक्तिः । कालात्प्रयोजनाच्च यथायोगं समर्थविभक्तियुक्ताद् रोगेऽभिधेये कन्प्रत्ययो भवति । कालः = दिवसादिः, प्रयोजनम्=कारणम्, रोगस्य फलं वा । द्वितीयेऽह्नि भवो द्वितीयको ज्वरः । चतुर्थकः । प्रयोजनात् - विषपुष्पैर्जनितो विषपुष्पको ज्वरः । काशपुष्पकः । उष्णं कार्यमस्य उष्णकः, शीतको ज्वरः ।

उत्तरसूत्रादिह संज्ञाग्रहणमपकृष्यते । तेनायं प्रकारनियमः सर्वो लभ्यते ॥

२१०३. तदस्मिन्नन्नं प्राये संज्ञायाम् ॥ ८२ ॥ (१८८२)

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे कन् प्रत्ययो भवति, यत्तत्प्रथमासमर्थमन्नं चेत्प्रायविषयं तद् भवति । प्रायः = बाहुल्यम् । संज्ञाग्रहणं तदन्तोपाधिः । गुडापूपाः प्रायेणान्नमस्यां पौर्णमास्यां गुडापूपिका । तिलापूपिका पौर्णमासी ।

वटकेभ्य इनिर्वक्तव्यः (म. भा. ५.२.८२ वा. १) । वटकिनी पौर्णमासी ॥

२१०४. कुल्माषादञ् ॥ ८३ ॥ (१८८३)

कुल्माषशब्दाञ् प्रत्ययो भवति 'तदस्मिन्नन्नं प्राये संज्ञायाम्' (५.२.८२) इत्येतस्मिन्नर्थे। ञकारो वृद्धिस्वरार्थः । कुल्माषाः प्रायेणान्नमस्यां - कौल्माषी पौर्णमासी ॥

२१०५. श्रोत्रियँश्छन्दोऽधीते ॥ ८४ ॥ (१८८४)

'श्रोत्रियन्' इति निपात्यते 'छन्दोऽधीते' इत्यस्मिन्नर्थे । नकारः स्वरार्थः । श्रोत्रियो ब्राह्मणः ।

'श्रोत्रियँश्छन्दोऽधीते' इति वाक्यार्थे पदवचनम् (म. भा. ५/२/८४ वा. १).।

छन्दसो वा श्रोत्रभावः, तदधीते इति घँश्च प्रत्ययः । (म. भा. वा. २)

कथं छन्दोऽधीते छान्दसः? वाग्रहणमनुवर्त्तते, 'तावतिथं ग्रहणमिति लुग्वा' (५.२.७७) इत्यतः ॥

२१०६. श्राद्धमनेन भुक्तमिनिठनो ॥ ८५ ॥ (१८८५)

'श्राद्धम्' इति प्रकृतिः, 'अनेन' इति प्रत्ययार्थः, 'भुक्तम्' इति प्रकृतिविशेषणम्। श्राद्धशब्दाद् भुक्तोपाधिकादनेनेत्यस्मिन्नर्थे इनिठनौ प्रत्ययौ भवतः । श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये वर्तित्वा प्रत्ययमुत्पादयति । श्राद्धं भुक्तमनेन श्राद्धी, श्राद्धिकः । इनिठनोः समानकालग्रहणम् (म. भा.) -अद्य भुक्ते श्राद्धे श्वः श्राद्धिक इति प्रयोगो मा भूत् ॥

२१०७. पूर्वादिनिः ॥ ८६ ॥ (१८८६)

'अनेन' इति प्रत्ययार्थः कर्ताऽनुवर्त्तते । न च क्रियामन्तरेण कर्त्ता सम्भवतीति यां काञ्चित्क्रियामध्याहृत्य प्रत्ययो विधेयः । पूर्वाद् 'अनेन' इत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । पूर्वं गतमनेन, पीतं भुक्तं, वा पूर्वी, पूर्विणौ,पूर्विणः ॥

२१०८. सपूर्वाच्च ॥ ८७ ॥ (१८८७)

विद्यमानं पूर्व यस्मादिति सपूर्वं प्रातिपदिकम्, तस्य पूर्वशब्देन तदन्तविधिः.। सपूर्वात्प्रातिपदिकात्पूर्वशब्दान्तादनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । पूर्वं कृतमनेन कृतपूर्वी कटम् । भूक्तपूर्वी ओदनम् । 'सुप्सुपा' (२.१.४) इति समासं कृत्वा तद्धित उत्पाद्यते ।

योगद्वयेन चानेन - 'पूर्वादिनिः' (५.२.८६) 'सपूर्वाच्च' (५.२.८७) इति-परिभाषाद्वयं ज्ञाप्यते 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शाक. परि. ६५), 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (व्या. परि. ८९) इति ॥

२१०९. इष्टादिभ्यश्च ॥ ८८ ॥ (१८८८)

'अनेन' इत्येव । इष्टादिभ्यः प्रातिपदिकेभ्योऽनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति। इष्टमनेन इष्टी यज्ञे । पूर्ती श्राद्धे । 'क्तस्येन्विषयस्य कर्मणि' इति सप्तम्युपसंख्यायते।

इष्ट । पूर्त । उपसादित । निगदित । परिवादित । निकथित । परिकथित । सङ्कलित। निपठित । सङ्कल्पित । अनर्चित । विकलित । संरक्षित । निपतित । पठित। परिकलित । अर्चित । परिरक्षित । पूजित । परिगणित । उपगणित । अवकीर्ण । परित। उपकृत । उपाकृत। आयुक्त । आम्नात । श्रुत । अधीत । आसेवित । अपवारित । अवकल्पित । निराकृत । अनुयुक्त । उपनत । अनुगुणित। अनुपठित । व्याकुलित । निगृहीत। इष्टादिः ॥

२११०. छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥ ८९ ॥ (१८८९)

परिपन्थिन्, परिपरिन्-इत्येतौ शब्दौ छन्दसि विषये निपात्येते पर्यवस्थातरि वाच्ये । पर्यवस्थाता=सम्पन्नप्रतिपक्ष उच्यते । 'मा त्वा परिपन्थिनो विदन् । मा त्वा परिपरिणो विदन्' (वाज.सम्. ४.३४)

२१११. अनुपद्यन्वेष्टा ॥ ९० ॥ (१८९०)

'अनुपदी' इति निपात्यतेऽन्वेष्टा चेत्स भवति । पदस्य पश्चादनुपदम् । अनुपदी गवाम्। अनुपदी उष्ट्राणाम् ॥

२११२. साक्षाद् द्रष्टरि संज्ञायाम् ॥ ९१ ॥ (१८९१)

साक्षाच्छब्दोव्ययम् । तस्मादिनिः प्रत्ययो भवति द्रष्टरि वाच्ये । संज्ञाग्रहणमभिधेय नियमार्थम् । साक्षाद् द्रष्टा-साक्षी, साक्षिणौ, साक्षिणः । संज्ञाग्रहणादुपद्रष्टैवोच्यते; नदाता, ग्रहीता वा ॥

२११३. क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥ ९२ ॥ (१८९२)

क्षेत्रियजिति निपात्यते । 'परक्षेत्रे चिकित्स्यः' इत्येतस्मिन् वाक्यार्थे पदवचनम्। परक्षेत्राद्वा तत्रेति सप्तमीसमर्थात् 'चिकित्स्यः' इत्येतस्मिन्नर्थे घच् प्रत्ययः परशब्दलोपश्च निपात्यते । परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः । क्षेत्रियं कुष्ठम् । परक्षेत्रम्=जन्मान्तरशरीरम्, तत्र चिकित्स्यः क्षेत्रियः । असाध्योऽप्रत्याख्येयो व्याधिरुच्यते। नामृतस्य निवर्तत इत्यर्थः ।

अथ वा - क्षेत्रियं विषम् । यत्परक्षेत्रे=परशरीरे संक्रमय्य चिकित्स्यते ।

अथ वा - क्षेत्रियाणि तृणानि । यानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि=नाशयितव्यानि ।

अथ वा - क्षेत्रियः = पारदारिकः । परदाराः = परक्षेत्रम्, तत्र चिकित्स्यः = निग्रहीतव्यः। सर्व चैतत्प्रमाणम् ॥

२११४. इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्र-दत्तमिति वा ॥ ९३ ॥ (१८९३)

इन्द्रियमित्यन्तोदात्तं शब्दरूपं निपात्यते । रूढिरेषा चक्षुरादीनां करणानाम् । तथा च व्युत्पत्तेरनियमं दर्शयति । इन्द्रशब्दात्षष्ठीसमर्थात् 'लिङ्गम्' इत्येतस्मिन्नर्थे घच्प्रत्ययो भवति। इन्द्रस्य लिङ्गमिन्द्रियम् । इन्द्रः = आत्मा, स चक्षुरादिना करणेनानुमीयते, नाकर्तृकं

करणमस्ति । इन्द्रेण दृष्टम्, तृतीयासमर्थात्प्रत्ययः । आत्मना दृष्टमित्यर्थः । इन्द्रेण सृष्टम् । आत्मना सृष्टम्, तत्कृतेन शुभाशुभेन कर्मणोत्पन्नमिति कृत्वा । इन्द्रेण जुष्टम्, आत्मना जुष्टम्=सेवितम्; तद्द्वारेण विज्ञानोत्पादनाद् इन्द्रेण दत्तम्, आत्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय ।

इतिकरणः प्रकारार्थः । सति सम्भवे व्युत्पत्तिरन्यथापि कर्तव्या; रूढेरनियमादिति।

वाशब्दः प्रत्येकमभिसम्बध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयति ॥

२११५. तदस्यास्त्यस्मिन्निति मतुप् ॥ ९४ ॥ (१८९४)

तदिति प्रथमा समर्थविभक्तिः । अस्यास्मिन्निति प्रत्ययार्थौ । अस्तीति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे 'अस्मिन्' इति सप्तम्यर्थे वा मतुप् प्रत्ययो भवति, यत्तत्प्रथमासमर्थमस्ति चेत्तद्भवति। अस्त्यर्थोपाधिकं चेत्तद्भवतीत्यर्थः । इतिकरणस्ततश्चेद्विवक्षा । गावोऽस्य सन्ति गोमान् देवदत्तः । वृक्षा अस्मिन् सन्ति वृक्षवान् पर्वतः । यवमान् । प्लक्षवान् ।

इतिकरणाद्विषयनियमः -

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।

संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥ (म. भा. ५.२.९४)

भूम्नि तावत् - गोमान् । निन्दायाम् - कुष्ठी, ककुदावर्तिनी । प्रशंसायाम् - रूपती कन्या । नित्ययोगे - क्षीरिणो वृक्षाः । अतिशायने - उदरिणी कन्या । ससर्गे - दण्डी, छत्री । [अस्तिविवक्षायाम्-अस्तिमान् ॥]

गुणवचनेभ्यो मतुपो लुग्वक्तव्यः (म. भा. ५.२.९४ वा. ३) । शुक्लो गुणोऽस्यास्ति शुक्लः पटः । कृष्णः । श्वेतः ॥

२११६. रसादिभ्यश्च ॥ ६५ ॥ (१९९५)

रसादिभ्यः प्रातिपदिकेभ्यो मतुप् प्रत्ययो भवति, 'तदस्यास्त्यस्मिन्' इत्येतस्मिन्विषये। रसवान् । रूपवान् ।

किमर्थमिदमुच्यते, न पूर्वसूत्रेणैव मतुप् सिद्धः? रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम् - अन्ये मत्वर्थीया मा भूवन्निति ।

कथं रूपिणी कन्या, रूपिको दारकः? प्रायिकमेतद्वचनम् ।

इतिकरणो विवक्षार्थोऽनुवर्त्तते ।

अथ वा-'गुणात्' इत्यत्र पठ्यते, तेन ये रसनेन्द्रियादिग्राह्या गुणाः, तेषामेवायं पाठः । इह मा भूत् - रूपिणी, रूपिक इति, शोभायोगः गम्यते । रसिको नट (म. भा.) इत्यत्र भावयोगः ।

रस । रूप । गन्ध । स्पर्श । शब्द । स्नेह । 'गुणात्' (ग. सू. २१) । 'एकाचः' (ग. सू. १२२) । गुणग्रहणं रसादीनां विशेषणम् । रसादिः ॥

२११७. प्राणिस्थादातो लजन्यतरस्याम् ॥ ९६ ॥ (१९०३)

प्राणिस्थवाचिनः शब्दादाकारान्ताल्लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे । चूडालः, चूडावान् । कर्णिकालः, कर्णिकावान् ।

प्राणिस्थादिति किम्? शिखावान् प्रदीपः । आदिति किम्? हस्तवान् । पादवान् ।

प्राण्यङ्गादिति वक्तव्यम् (म. भा. ५.२.९६) । इह मा भूत् - चिकीर्षाऽस्यास्ति, जिहीर्षाऽस्यास्ति चिकीर्षावान् जिहीर्षावान् ।

प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चकारः - चूडालोऽस्तीत्यत्र 'स्वरितो वाऽनुदात्ते पदादौ' (८.२.६) इति स्वरितबाधनार्थः ॥

२११८. सिध्मादिभ्यश्च ॥ ९७ ॥ (१९०४)

'लजन्यतरस्याम्' इति वर्त्तते । सिध्मादिभ्यः प्रातिपदिकेभ्यो लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे । सिध्मलः, सिध्मवान् । गडुलः, गडुमान् ।

अन्यतरस्यांग्रहणेन मतुप्समुच्चीयते, न तु प्रत्ययो विकल्प्यते । तस्मादकारान्तेभ्य इनिठनौ प्रत्ययौ न भवतः ।

सिध्म । गडु । मणि । नाभि । जीव [बीज] । निष्पाव । पांसु । सक्तु । हनु। मांस । परशु । पार्ष्णिधमन्योर्दीर्घश्च (ग. सू. १२३) । पार्ष्णीलः । धमनीलः । पर्ण। उदक । प्रज्ञा । मण्ड । पार्श्व । गण्ड । ग्रन्थि । वातदन्तबललललाटानामूङ् च (ग. सू. १२४) । वातूलः । दन्तूलः । बलूलः । ललाटूल । जटाघटाकलाः क्षेपे (ग. सू. १२५) । जटालः । घटालः । कलालः। सक्थि । कर्ण । स्नेह । शीत । श्याम । पिङ्ग। पित्त । शुष्क । पृथु । मृदु । मञ्जु। पत्त्र । चटु । कपि । कण्डु । संज्ञा । क्षुद्रजन्तूपतापयोश्चेष्यते (ग.सू. १२६) । क्षुद्रजन्तु-यूकालः । मक्षिकालः। उपतापात् - विचर्चिकालः । विपादिकालः । मूर्छालः । सिध्मादिः ॥

२११९. वत्सांसाभ्यां कामबले ॥ ९८ ॥ (१९०५)

वत्सांसशब्दाभ्यां लच्प्रत्ययो भवति यथासंख्यं कामवति, बलवति चार्थे । वत्सलः । अंसलः ।

वृत्तिविषये वत्सांसशब्दौ स्वभावात्कामबलयोर्वर्त्तमानौ तद्वति प्रत्ययमुत्पादयतः। न ह्यत्र वत्सार्थः, अंसार्थो वा विद्यते; वत्सल इति स्नेहवानुच्यते - वत्सलः स्वामी, वत्सलः पितेति ।

अंसल इति चोपचितमांसो बलवानुच्यते । न चायमर्थो मतुपि सम्भवतीति नित्यं लजेव भवति; अन्यत्रांसवती गौः, अंसवान् दुर्बलः ।

२१२०. फेनादिलच्च ॥ ९९ ॥ (१९०६)

फेनशब्दादिलच् प्रत्ययो भवति मत्वर्थे । चकाराल्लच्च । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं सर्वत्रैवानुवर्तते । फेनिलः, फेनलः, फेनवान् ॥

२१२१. लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ १०० ॥ (१९०७)

लोमादिभ्यः पामादिभ्यः पिच्छादिभ्यश्च त्रिभ्यो गणेभ्यो यथासंख्यं श, न, इलच् - इत्येते प्रत्यया भवन्ति मत्वर्थे, मतुप् च । लोमादिभ्यः शो भवति - लोमशः, लोमवान् । पामादिभ्यो नो भवति - पामनः, पामवान् । पिच्छादिभ्य इलच् भवति - पिच्छिलः, पिच्छवान्। उरसिलः, उरस्वान् ।

लोमन् । रोमन् । वल्गु । बभ्रु । हरि । कपि । शुनि । तरु । लोमादिः ।

पामन् । वामन् । हेमन् । श्लेष्मन् । कद्रु । बलि । श्रेष्ठ । पलल । सामन्। अङ्गात्कल्याणे (ग. सू. १२७) । शाकीपलालीदद्रवां ह्रस्वत्वं च (म. भा. ५.२.१०० वा. १) । (ग.सू. १२८) । (शाकिनम् । पलालिनम् । दद्रुणम्) । विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः (म. भा. वा. २) (ग. सू. १२९) । लक्ष्म्या अच्च (ग. सू. १३०) । पामादिः ।

पिच्छ । उरस् । ध्रुवका । क्षुवका । जटाघटाकलाः क्षेपे (ग. सू. १३१) । वर्ण उदक । पङ्क । प्रज्ञा । पिच्छादिः ॥

२१२२. प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥ १०१ ॥ (१९०८)

प्रज्ञा, श्रद्धा, अर्चा, वृत्ति - इत्येतेभ्यो णः प्रत्ययो भवति मतुबर्थे । मतुप्सर्वत्र समुच्योयते । प्राज्ञः, प्रज्ञावान् । श्राद्धः, श्रद्धावान् । आर्चः, अर्चावान्। वार्त्तः, वृत्तिमान् ॥

२१२३. तपःसहस्राभ्यां विनीनी ॥ १०२ ॥ (१९०९)

तपः सहस्रशब्दाभ्यां विनि इनि-इत्येतौ प्रत्ययौ भवतो मत्वर्थे । प्रत्ययार्थयोस्तु यथासंख्यं सर्वत्रैवास्मिन् प्रकरणे नेष्यते । तपोऽस्यास्मिन् वा विद्यते तपस्वी । सहस्री ।

असन्तत्वाददन्तत्वाच्च सिद्धे प्रत्यये (५.२.१२१, ११५) पुनर्वचनमणा (५.२.१०३) वक्ष्यमाणेन बाधा मा भूदिति । सहस्रात्तु ठनपि बाध्यते ॥

२१२४. अण् च ॥ १०३ ॥ (१९१०)

तपः सहस्राभ्यामण् च प्रत्ययो भवति । तापसः । साहस्रः । योगविभाग उत्तरार्थः, यथासंख्यार्थश्च ।

अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम् (म. भा. ५.२.१०३ वा. २) । ज्योत्स्ना विद्यतेऽस्मिन्पक्षे ज्यौत्स्नः पक्षः । तामिस्रः । कौण्डलः । कौतपः । वैसर्पः । वैपादिकः ॥

२१२५. सिकताशर्कराभ्यां च ॥ १०४ ॥ (१९११)

सिकताशर्कराभ्यामण्प्रत्ययो भवति मत्वर्थे । सैकतो घटः । शार्करं मधु ।

अदेशे इहोदाहरणम् । देशे तु लुबिलचौ भविष्यतः ॥

२१२६. देशे लुबिलचौ च ॥ १०५ ॥ (१९१२)

सिकताशर्कराभ्यां देशेऽभिधेये लुबिलचौ भवतः । चकारादण् च, मतुप् च । कस्य पुनरयं लुप्? मतुबादीनामन्यतमस्य; विशेषाभावात् । सिकता अस्मिन्विद्यन्ते सिकता देशः, सिकतिलः, सैकतः, सिकतावान् । शर्करा देशः, शर्करिलः, शार्करः, शर्करावान् । देश इति किम्? सैकतो घटः । शार्करं मधु ॥

२१२७. दन्त उन्नत उरच् ॥ १०६ ॥ (१९१३)

'उन्नते' इति प्रकृतिविशेषणम् । दन्तशब्दादुन्नतोपाधिकादुरच् प्रत्ययोभवति मत्वर्थे । दन्ता उन्नता अस्य सन्ति दन्तुरः ।

उन्नत इति किम्? दन्तवान् ॥

२१२८. ऊषसुषिमुष्कमधो रः ॥ १०७ ॥ (१९१४)

ऊष, सुषि, मुष्क, मधु - इत्येतेभ्यो रः प्रत्ययो भवति मत्वर्थे । ऊषरं क्षेत्रम् । सुषिरं काष्ठम् । मुष्करः पशुः । मधुरो गुडः ।

इतिकरणो विवक्षार्थः सर्वत्राभिधेयनियमं करोति । इह न भवति - ऊषोऽस्मिन् घटे विद्यते, मध्वस्मिन्घटे विद्यते (म. भा.) इति ।

रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् (म. भा. ५.२.१०७ वा. १) खमस्यास्ति कण्ठविवरं महत् - खरः । मुखमस्यास्तीति सर्वस्मिन्वक्तव्ये मुखरः । कुञ्जावस्य स्तः - कृञ्जरः । हस्तिहन् कुञ्जशब्देनोच्यते ।

नगपांशुपाण्डुभ्यश्चेति वक्तव्यम् (म. भा. वा. २) । नगरम्, पांशुरम्, पाण्डुरम्।

कच्छवा ह्रस्वत्वं च (?) । कच्छुरम् ॥

२१२९. द्युद्रुभ्यां मः ॥ १०८ ॥ (१९१५)

द्युद्रुशब्दाभ्यां मः प्रत्ययो भवति मत्वर्थे । द्युमः । द्रुमः । रूढिशब्दावेतौ । रूढिषु च पुनर्मतुप् न विकल्प्यते ॥

२१३०. केशाद्वोऽन्यतरस्याम् ॥ १०९ ॥ (१९१६)

केशशब्दाद्वः प्रत्ययो भवति मत्वर्थेऽन्यतरस्याम् ।

ननु च प्रकृतमन्यतरस्यांग्रहणमनुवर्त्तत एव? मतुप्समुच्चयार्थं तदित्युक्तम्, अनेन त्विनिठनौ प्राप्येते । ततश्चातूरूप्यं भवति - केशवः, केशी, केशिकः, केशवानिति॥

वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् (म. भा. ५.२.१०९ वा. १) । मणिवः । हिरण्यवः । कुरराव । कुमाराव । राजीव । कुञ्जाव । इष्टकाव.। बिम्बाव।

अर्णसो लोपश्च । (?) । अर्णवः ।

छन्दसीवनिपौ च वक्तव्यौ (म. भा.) । वश्च मतुप् च । "रथीरभून्मुद्गलानी गविष्ठौ" (ऋ. १०.१०२.२) । "सुमङ्गलीरियं वधूः" (ऋ. १०.८५.३३) । वनिप्- "मघवानमीमहे" (ऋ. १०.१६७.२) । वकारमतुपौ च, उद्वा च - उद्वती च ।

मेधारथाभ्यामिरन्निरचौ वक्तव्यौ (म. भा. वा. ३) । मेधिरः (ऋ. १.३१.२) । रथिरः (ऋ. ३.१.१७) ॥

२१३१. गाण्ड्यजगात्संज्ञायाम् ॥ ११० ॥ (१९१७)

गाण्डी, अजग - इत्येताभ्यां वः प्रत्ययो भवति संज्ञायां विषये मत्वर्थे । गाण्डीवं धनुः। अजगवं धनुः । ह्रस्वादपि भवति - गाण्डिवं धनुरिति । तत्र तुल्या हि संहिता दीर्घह्रस्वयोः । उभयथा च सूत्रं प्रणीतम् ॥

२१३२. काण्डाण्डादीरन्नीरचौ ॥ १११ ॥ (१९१८)

काण्ड, अण्ड-इत्येताभ्यां यथासंख्यमीरन्नीरचौ प्रत्ययौ भवतो मत्वर्थे । काण्डीरः। अण्डीरः ॥

२१३३. रजःकृष्यासुतिपरिषदो वलच् ॥ ११२ ॥ (१९१९)

रजःप्रभृतिभ्यः प्रातिपदिकेभ्यो वलच् प्रत्ययो भवति मत्वर्थे । रजस्वला स्त्री। कृषीवलः कुटुम्बी । आसुतीवलः शौण्डिकः । परिषद्वलो राजा । 'वलः' (६.३.११८) इति दीर्घत्वम् । इतिकरणो विषयनियमार्थः सर्वत्र सम्बध्यते । तेनेह न भवति - रजोऽस्मिन् ग्रामे विद्यत इति।

वलच्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् (म. भा. ५.२.११२ वा. १) । भ्रातृवलः पुत्रवलः । उत्साहवलः ॥

२१३४. दन्तशिखात्संज्ञायाम् ॥ ११३ ॥ (१९२०)

दन्त, शिखा - शब्दाभ्यां वलच् प्रत्ययो भवति मत्वर्थे संज्ञायां विषये । दन्तावलः सैन्यः । दन्तावलो गजः । शिखावलं नगरम् । । शिखावला स्थूणा ॥

२१३५. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिन-मलीमसाः ॥ ११४ ॥ (१९२१)

ज्योत्स्नादयः शब्दा निपात्यन्ते मत्वर्थे संज्ञायां विषये । ज्योतिष उपधालोपो नश्च प्रत्ययो निपात्यते - ज्योत्स्ना चन्द्रप्रभा । तमस उपधाया इकारो रश्च-तमिस्रा रात्रिः । स्त्रीत्वमतन्त्रम् । अन्यत्रापि दृश्यते - तमिस्रं नभः । शृङ्गादिनच्प्रत्ययो निपात्यते - शृङ्गिणः। ऊर्जोऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ - ऊर्जस्वी ऊर्जस्वलः। गोर्मिनिप्रत्ययो निपात्यते - गोमी । मलशब्दादिनजीमसचौ प्रत्ययौ निपात्येते - मलिनः, मलीमसः ॥

२१३६. अत इनिठनौ ॥ ११५ ॥ (१९२२)

अकारान्तात्प्रातिपदिकादिनिठनौ प्रत्ययौ भवतः । दण्डी, दण्डिकः । छत्त्री, छत्त्रिकः ।

अन्यतरस्यामित्यधिकारान्मतुबपि भवति । दण्डवान् । छत्रवान् ।

तपरकरणं किम्? श्रद्धावान् ।

'एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ' । (म. भा. ५.२.११५ श्लोक०)

एकाक्षरात्तावत् - स्ववान् । खवान् । कृतः - कारकवान् । जातेः - व्याघ्रवान् । सिंहवान् । सप्तम्याम् - दण्डा अस्यां सन्ति दण्डवती शालेति ।

'इतिकरणो विषयनियमार्थः सर्वत्र सम्बध्यते' इत्युक्तम्, तेन क्वचिद्भवत्यपि - कार्यी, हार्यी, तण्डुली, तण्डुलिक इति ॥

२१३७. व्रीह्यादिभ्यश्च ॥ ११६ ॥ (१९२३)

व्रीह्यादिभ्यः प्रातिपदिकेभ्य इनिठनौ प्रत्ययौ भवतो मत्वर्थे । मतुब्भवत्येव । व्रीही, व्रीहिकः, व्रीहिमान् । मायी, मायिकः, मायावान् ।

न च व्रीह्यादिभ्यः सर्वेभ्यः प्रत्ययद्वयमिष्यते, किं तर्हि ?

'शिखादिभ्य इनिर्वाच्य इकन्यवखादिषु' (म. भा. ५.२.११६ श्लोकभाष्यम्)

परिशिष्टेभ्य उभयम् ।

शिखा, मेखला, संज्ञा, बलाका, माला, वीणा, वडवा, अष्टका, पताका, कर्मन्, चर्मन्, हंसा इत्येतेभ्य इनिरेवेष्यते । यवखद, कुमारी, नौ-इत्येतेभ्य इकन्नेवेष्यते । परिशिष्टेभ्यो द्वावपि प्रत्ययौ भवतः ।

व्रीहिग्रहणं किमर्थम्, यावता तुन्दादिषु व्रीहिशब्दः पठ्यते, तत्र इनिठनौ चकारेण विधीयेते ? एवं तर्हि तुन्दादिषु व्रीहिग्रहणमर्थग्रहणं विज्ञायते । शालयोऽस्य सन्ति शालित्नः, शाली, शालिकः, शालिमान् इति ।

व्रीहिशिखादयः पूर्वं पठिताः । यवखद । कुमारी । नौ । शीर्षान्नञः (ग. सू. १३२) । अशीर्षी, अशीर्षिकः ॥

२१३८. तुन्दादिभ्य इलच्च ॥ ११७ ॥ (१९२४)

तुन्दादिभ्यः प्रातिपदिकेभ्य इलच् प्रत्ययो भवति मत्वर्थे । चकारादिनिठनौ मतुप् च । तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान् । उदरिलः, उदरी, उदरिकः, उदरवान्।

तुन्द । उदर । पिचण्ड । घट । यव । व्रीहि । स्वाङ्गाद्विवृद्धौ च (ग. सू. १३३).। तुन्दादिः ॥

२१३९. एकगोपूर्वाद्ठञ् नित्यम् ॥ ११८ ॥ (१९२५)

एकपूर्वाद् गोपूर्वाच्च प्रातिपदिकान्नित्यं ठञ् प्रत्ययो भवति मत्वर्थे । एकशतमस्यास्तीति ऐकशतिकः । ऐकसहस्रिकः । गोपूर्वाच्च - गौशतिकः । गौसहस्रिकः ।

अत इत्येव - एकविंशतिरस्यास्तीति न भवति ।

कथमैकगविकः ? समासान्ते कृते भविष्यति । कथं गौशकटिकः? शकटीशब्देन समानार्थः शकटशब्दोऽस्ति ततो भविष्यति । अवश्यं च 'अत' इत्यनुवर्त्यम्, 'द्वन्द्वोपतापगर्ह्यात्' (५.२.१२८) इत्येवमाद्यर्थम् ।

नित्यग्रहणं मतुपो बाधनार्थम् । कथमेकद्रव्यवत्त्वादिति? नैवायं साधुः । एकेन वा द्रव्यवत्त्वादिति समर्थनीयम् ॥

२१४०. शतसहस्रान्ताच्च निष्कात् ॥ ११९ ॥ (१९२६)

शतान्तात् सहस्रान्ताच्च प्रातिपदिकाट्ठञ् प्रत्ययो भवति मत्वर्थे । तौ चेच्छतसहस्रशब्दौ निष्कात् परौ भवतः । निष्कशतमस्यास्ति नैष्कशतिकः । नैष्कसहस्रिकः ।

सुवर्णनिष्कशतमस्यास्तीत्यनभिधानान्न भवति ॥

२१४१. रूपादाहतप्रशंसयोर्यप् ॥ १२० ॥ (१९२७)

आहतप्रशंसे प्रकृत्युपाधी । आहतप्रशंसाविशिष्टार्थे वर्त्तमानाद्रूपशब्दाद्यप् प्रत्ययो भवति मत्वर्थे । आहतं रूपमस्य रूप्यो दीनारः । रूप्यः केदारः । रूप्यं कार्षापणम्। प्रशस्तं रूपमस्यास्ति रूप्यः पुरुषः । निघातिकाताडनादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते।

आहतप्रशंसयोरिति किम्? रूपवान् ।

यप्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् (म. भा. ५.२.१२० वा. १) । हिम्याः पर्वताः । गुण्या ब्राह्मणाः ॥

२१४२. अस्मायामेधास्रजो विनिः ॥ १२१ ॥ (१९२८)

असन्तात्प्रातिपदिकात्, माया, मेधा, स्रज् - इत्येतेभ्यश्च विनिः प्रत्ययो भवति मत्वर्थे । मतुप् सर्वत्र समुच्चीयत एव । असन्तात्तावत् - यशस्वी, तपस्वी, पयस्वी। मायावी । मेधावी। स्रग्वी ।

मायाशब्दाद् व्रीह्यादिषु पाठादिनिठनावपि भवतः - मायी, मायिकः ॥

२१४३. बहुलं छन्दसि ॥ १२२ ॥ (३४९८)

छन्दसि विषये बहुलं विनिः प्रत्ययो भवति मत्वर्थे । 'अग्ने तेजस्विन्' (तै. सं. ३.३.११)। न भवति - 'सूर्यो वर्चस्वान्।'

छन्दसि विनिप्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घत्वं चेति वक्तव्यम् (म. भा.५.२.१२२ वा. १) । अष्ट्रावी (ऋ. १०.१०२.८) । मेखलावी । द्वयावी (अ.प्रा.३.४.१) । उभयावी (ऋ. ५.७.१०) । रुजावी । हृदयावी । द्वयोभयहृदयानि दीर्घत्वं प्रयोजयन्ति ।

मर्मणश्चेति वक्तव्यम् (म. भा.) । मर्मावी ।

सर्वत्रामयस्योपसंख्यानम् (म. भा. वा.२) । छन्दसि भाषायां च । आमयावी (तै.सं. ३.२.३) ।

शृङ्गवृन्दाभ्यामारकन्वक्तव्यः (म. भा. वा.३) । शृङ्गारकः । वृन्दारकः (श. ब्रा. १४.३.११.१) ।

फलबर्हाभ्यामिनज्वक्तव्यः (म. भा. वा. ४) । फलिनः । बर्हिणः ।

हृदयाच्चालुरन्यतरस्याम् (म. भा. वा. ५) । हृदयालुः, हृदयी, हुदयिकः, हृदयवान् ।

शीतोष्णतृप्रेभ्यस्तन्न सहत इत्यालुज्वक्तव्यः (म. भा. वा. ६) । शीतं न सहते शीतालुः। उष्णालुः । तृप्रालुः ।

तन्न सहत इति हिमाच्चेलुः (म. भा. वा. ७) । हिमं न सहते हिमेलुः ।

बलादूलच् (म. भा. वा. ८) । बलं न सहते बलूलः ।

वातात्समूहे च (म. भा.वा. ९) । वातं न सहत इति च । वातानाम् समूहः, वातं न सहत इति वा वातूलः ।

पर्वमरुद्भ्यां तन् 'वक्तव्यः (म. भा. वा. १०) पर्वतः (मं सं ४.१२.५) । मरुत्तः (ऐ.ब्रा. ३९.७) ।

अर्थात्तदभावे इनिर्वक्तव्यः (?) । अर्थी । तदभाव इत्येव - अर्थवान् ।

तदेतत्सर्वं बहुलग्रहणेन सम्पद्यते ॥

२१४४. ऊर्णाया युस् ॥ १२३ ॥ (१९२९)

ऊर्णाशब्दाद्युस् प्रत्ययो भवति मत्वर्थे । सकारः पदसंज्ञार्थः । ऊर्णाऽस्य विद्यते ऊर्ण्णायुः (वाज. सं. १३.५०) ।

केचिच्छन्दोग्रहणानुवर्तयन्ति ॥

२१४५. वाचो ग्मिनिः ॥ १२४ ॥ (१९३०)

वाच्शब्दात् ग्मिनिः प्रत्ययो भवति मत्वर्थे । वाग्ग्मी, वाग्ग्मिनौ, वाग्ग्मिनः॥

२१४६. आलजाटचौ बहुभाषिणि ॥ १२५ ॥ (१९६)

वाच् शब्दात्प्रथमासमर्थादालच्, आटच् - इत्येतौ भवतो मत्वर्थे बहुभाषिण्यभिधेये। ग्मिनेरपवादः । वाचालः । वाचाटः ।

कुत्सित इति वक्तव्यम् (म. भा.) । यो हि सम्यग् बहु भाषते स वाग्मीत्येव भवति (म. भा.) ॥

२१४७. स्वामिन्नैश्वर्ये ॥ १२६ ॥ (१६३२)

'स्वामिन्' इति निपात्यते ऐश्वर्ये गम्यमाने । स्वशब्दादैश्वर्यवाचिनो मत्वर्थे आमिन्प्रत्ययो निपात्यते । स्वमस्यास्तीति = ऐश्वर्यमस्यास्तीति स्वामी, स्वामिनौ, स्वामिनः।

ऐश्वर्य इति किम्? स्ववान् ॥

२१४८. अर्शआदिभ्योऽच् ॥ १२७ ॥ (१९३३)

'अर्शस्' इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच्प्रत्ययो भवति मत्वर्थे । अर्शांसि अस्य विद्यन्ते अशसः । उरसः । आकृतिगणश्चायम् ।

यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत्सर्वमिह द्रष्टव्यम् ।

अर्शस् । उरस् । तुन्द । चतुर । पलित । जटा । घटा । अभ्र । कर्दम । आम। लवण। स्वाङ्गाद्धीनात् (ग. सू. १३४) । वर्णात् (ग. सू. १३५) । अर्शआदिः ॥

२१४९. द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ॥ १२८ ॥ (१९३४)

द्वन्द्वः = समासः, उपतापः = रोगः, गर्ह्यम् = निन्द्यम्, तद्विषयेभ्यः शब्देभ्यः प्राणिस्थार्थवाचिभ्य इनिः प्रत्ययो भवति मत्वर्थे । द्वन्द्वात्तावत् - कटकवलयिनी, शङ्खनूपुरिणी। उपतापात् - कुष्ठी, किलासी । गर्ह्यात् - ककुदावर्त्ती, काकतालुकी।

प्राणिस्थादिति किम्? पुष्पफलवान् वृक्षः ।

प्राण्यङ्गान्नेष्यते - पाणिपादवती ।

अत इत्यनुवर्त्तते, तेनेह न भवति - चित्रललाटिकावती ॥

सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ।

२१५०. वातातिसाराभ्यां कुक् च ॥ १२९ ॥ (२९३५)

वातातिसारशब्दाभ्यामिनिः प्रत्ययो भवति, तत्सन्नियोगेन च तयोः कुगागमो भवति । वातातिसारयोरुपतापत्वात् पूर्वेणैव सिद्धे प्रत्यये कुगर्थमेवेदं वचनम् । वातकी । अतिसारकी ।

पिशाचाच्चेति वक्तव्यम् (म. भा.) । पिशाचकी वैश्रवणः (म. भा.) ।

रोगे चायमिष्यते । इह न भवति - वातवती गुहेति ॥

२१५१. वयसिपूरणात् ॥ १३० ॥ (१९३६)

इनिरनुवर्तते । पूरणप्रत्ययान्तात् प्रातिपदिकादिनिः प्रत्ययो भवति मत्वर्थे वयसि द्योत्ये। पञ्चमो मासोऽस्यास्ति संवत्सरो वा पञ्चमी उष्ट्रः । नवमी । दशमी ।

सिद्धे सति नियमार्थ वचनम् - इनिरेव भवति, ठन्न भवतीति ।

वयसीति किम्? पञ्चमवान् ग्रामरागः ॥

२१५२. सुखादिभ्यश्च ॥ १३१ ॥ (१९३७)

'सुख' - इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो नियम्यते मत्वर्थे । सुखी । दुःखी।

'माला क्षेपे' इति पठ्यते, व्रीहयादिषु च मालाशब्दोऽस्ति । तदिह क्षेपे मतुब्बाधानार्थं वचनम् ।

सुख । दुःख । तृप्र । कृच्छ्र । आम्र । अलीक । करुणा । कृपण । सोढ । प्रमीप । शील । हल । माला क्षेपे (ग. सू. १३६) । प्रणय । सुखादिः ॥

२१५३. धर्मशीलवर्णान्ताच्च ॥ १३२ ॥ (१९३८)

अन्तशब्दः प्रत्येकमभिसम्बध्यते, धर्माद्यन्तात्प्रातिपदिकादिनिः प्रत्ययो नियम्यते। ब्राह्मणानां धर्मो ब्राह्मणधर्मः, सोऽस्यास्तीति ब्राह्मणधर्मी । ब्राह्मणशीली। ब्राह्मणवर्णी॥

२१५४. हस्ताज्जातौ ॥ १३३ ॥ (१९३९)

हस्तशब्दादिनिः प्रत्ययो नियम्यते मत्वर्थे, समुदायेन चेज्जातिरभिधीयते । हस्तोऽस्यास्तीति हस्ती, हस्तिनौ, हस्तिनः । जाताविति किम्? हस्तवान्पुरुषः ॥

२१५५. वर्णाद् ब्रह्मचारिणि ॥ १३४ ॥ (१९४०)

वर्णशब्दादिनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेद् ब्रह्मचारी भण्यते । ब्रह्मचारीति त्रैवर्णिकोऽभिप्रेतः, स हि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति, नियममासेवते इत्यर्थः । वर्णी, वर्णिनौ, वर्णिनः ।

ब्रह्मचारिणीति किम्? वर्णवान् ।

ब्राह्मणादयस्त्रयो वर्णा वर्णिन उच्यन्ते ॥

२१५६. पुष्करादिभ्यो देशे ॥ १३५ ॥ (१९४१)

'पुष्कर' -इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो भवति समुदायेन चेद्देशोऽभिधीयते। पुष्करिणी । पद्मिनी ।

देश इति किम्? पुष्करवान् हस्ती ।

इनिप्रकरणे बलाद्बाहूरुपूर्वादुपसंख्यानम् (म. भा. ५.२.१३५ वा.१) । बाहुबली। ऊरुवली ।

सर्वादेश्चेति वक्तव्यम् (वा.२) । सर्वधनी । सर्वबीजी । सर्वकेशी नटः ।

अर्थाच्चासन्निहिते (वा.३) । अर्थी । असन्निहित इति किम्? अर्थवान् ।

तदन्ताच्चेति वक्तव्यम् (वा.४) धान्यार्थी । हिरण्यार्थी ।

पुष्कर । पद्म । उत्पल । तमाल । कुमुद । नड । कपित्थ । बिस । मृणाल। कर्दम । शालूक । विगर्ह । करीष । शिरीष । यवास । प्रवास । हिरण्य । पुष्करादिः॥

२१५७. बलादिभ्यो मतुबन्यतरस्याम् ॥ १३६ ॥ (१९४२)

बलादिभ्यः प्रातिपदिकेभ्यो मतुप्प्रत्ययो भवति । अन्यतरस्यांग्रहणेन प्रकृत इनिः समुच्चीयते । बलवान्, बली । उत्साहवान्, उत्साही ।

बल । उत्साह । उद्भाव । उद्वास । उद्वाम । शिखा । पूग । मूल । दंश । कुल। आयाम। व्यायाम । उपयाम । आरोह । अवरोह । परिणाह । युद्ध । बलादिः ॥

२१५८. संज्ञायां मन्माभ्याम् ॥ १३७ ॥ (१९४३)

मन्नन्तात्प्रातिपदिकान्मशब्दान्ताच्च इनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेत्संज्ञा गम्यते । प्रथिमिनी । दामिनी । मशब्दान्तात् - होमिनी । सोमिनी ।

संज्ञायामिति किम्? सोमवान् । होमवान् ॥

२१५९. कंशंभ्यां बभयुस्तितुतयसः ॥ १३८ ॥ (१९४४)

कम्, शमिति मकारान्तावुदकसुखयोर्वाचकौ; ताभ्यां ब, भ, युस्, ति, तु, त, यस् - इत्येते सप्त प्रत्यया भवन्ति मत्वर्थे । कम्बः, शम्बः । कम्भः शम्भः। कयुः, शंयुः। कन्तिः, शन्तिः । कन्तुः, शन्तुः । कन्तः, शन्तः । कंयः, शंयः ।

सकारः पदसंज्ञार्थः, तेनानुस्वारपरसवर्णौ सिद्धौ भवतः । संज्ञायां हि असत्याम् - कम्यः, शम्य इति स्यात् ॥

२१६०. तुन्दिबलिवटेर्भः ॥ १३९ ॥ (१९४५)

तुन्दि, बलि, वटि - इत्येतेभ्यो भः प्रत्ययो भवति मत्वर्थे । तुन्दिरिति वृद्धा नाभिरुच्यते, सास्यास्तीति तुन्दिभः, बलिभः वटिभः ।

बलिशब्दः पामादिषु पठ्यते, तेन बलिन इत्यपि भवति ॥

२१६१. अहंशुभमोर्युस् ॥ १४० ॥ (१९४६)

'अहम्' इति शब्दान्तरमहङ्कारे वर्त्तते, 'शुभम्' इत्यव्ययम् शुभपर्यायः; ताभ्यां युस्प्रत्त्ययो भवति मत्वर्थे । सकारः पदसंज्ञार्थः । अहंयुः । अहंकारवानित्यर्थः। शुभंयुः । कल्याणवानित्यर्थः ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ पञ्चमस्याध्यायस्य द्वितीयः पादः ॥ ५.२ ॥

अथ पञ्चमाध्याये
तृतीयः पादः

२१६२. प्राग्दिशो विभक्तिः ॥ १ ॥ (१९४७)

दिक्शब्देभ्य सप्तमीपञ्चमीप्रथमाभ्यः' (५.३.२७).। इति वक्ष्यति, प्रागेतस्माद्दिक्संशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसंज्ञास्ते वेदितव्याः । वक्ष्यति - 'पञ्चम्यास्तसिल्' (५.३.७) । ततः । यतः । कुतः ।

तसिलादीनां विभक्तित्वे प्रयोजनम् - त्यदादिविधयः इदमो विभक्तिस्वरश्च। इह । 'ऊडिदम्' (६.१.१७६) इति विभक्त्युदात्तत्वं सिद्धं भवति ।

अतः परं स्वार्थिकाः प्रत्ययाः, तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यपेक्षत्वान्नोपयुज्यत इति द्वयमपि निवृत्तम् । वावचनं तु वर्त्तते एव, तेन विकल्पेन तसिलादयो भवन्ति - कुतः, कस्मात्, कुत्र, कस्मिन्निति ॥

२१६३. किंसर्वनामबहुभ्योऽदयादिभ्यः ॥ २ ॥ (१९४८)

'प्राग्दिशः' इत्येव । किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशः प्रत्यया वेदितव्याः। सर्वनामत्वात्प्राप्तेग्रहणे दयादिपर्युदासः क्रियते । कुतः, कुत्र । यतः, यत्र । ततः, तत्र । बहुतः। बहुत्र ।

अदयादिभ्य इति किम्? द्वाभ्याम्, द्वयोः । प्रकृतिपरिसंख्यानं किमर्थम्? वृक्षात्, वृक्षे । प्राग्दिश इत्येव - वैयाकरणपाशः ।

सर्वनामत्वादेव सिद्धे किमो ग्रहणं दयादिपर्युदासाद् ।

बहुग्रहणे संख्याग्रहणम् (म. भा. ५.३.२ वा.१) । इह न भवति - बहोः सूपात्, बहौ सूपे इति ॥

२१६४. इदम इश् ॥ ३ ॥ (१९४९)

'प्राग्दिशः' इत्येव । इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः । शकारः सर्वादेशार्थः । इह ॥

२१६५. एतेतौ रथोः ॥ ४ ॥ (१९५०)

रेफथकारादौ प्राग्दिशीये प्रत्यये परत इदम एतेतावादेशौ भवतः । इशोऽपवादः। रेफेऽकार उच्चारणार्थः । 'इदमो र्हिल्' (५.३.१६) एतर्हि । 'इदमस्थमुः' (५.३.२४), इत्थम् ॥

२१६६. एतदोऽश् ॥ ५ ॥ (१९५१)

'प्राग्दिशः' इत्येव । एतदः प्राग्दिशीये परतोऽशित्ययमादेशो भवति । शकारः सर्वादेशार्थः। अतः । अत्र ।

'एतदः' इति योगविभागः कर्त्तव्यः (म. भा.) । एतदो रथोः परत एत, इत्-इत्येतावादेशौ भवतः - एतर्हि, इत्थम् । रेफादिः 'अनद्यतने र्हिलन्यतरस्याम्' (५.३.२१) इति विद्यत एव । थमुप्रत्ययः पुनरेतद उपसंख्येयः ॥

२१६७. सर्वस्य सोऽन्यतरस्यां दि ॥ ६ ॥ (१९५२)

सर्वस्य 'स' इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये परतोऽन्यतरस्याम्। सर्वदा। सदा ।

प्राग्दिशीय इत्येव - सर्वं ददातीति सर्वदा ब्राह्मणी ॥

२१६८. पञ्चम्यास्तसिल् ॥ ७ ॥ (१९५३)

पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यस्तसिल्प्रत्ययो भवति । कुतः । यतः । ततः। बहुतः॥

२१६९. तसेश्च ॥ ८ ॥ (१९५५)

'प्रतियोगे पञ्चम्यास्तसिः' (५.४.४४), 'अपादने चाहीयरुहोः' (५.४.४५) इति वक्ष्यति । तस्य तसेः किंसर्वनामबहुभ्यः परस्य तसिलादेशो भवति । कुत आगतः । यतः । ततः । बहुत आगतः ।

तसेस्तसिल्वचनं स्वर्थं विभक्त्यर्थं च ॥

२१७०. पर्यभिभ्यां च ॥ ९ ॥ (१९५६)

परि, अभि - इत्येताभ्यां तसिल् प्रत्ययो भवति ।

सर्वोभयार्थे वर्तमानाभ्यां प्रत्यय इष्यते । परितः । सर्वत इत्यर्थः । अभितः। उभयत इत्यर्थः ॥

२१७१. सप्तम्यास्त्रल् ॥ १० ॥ (१९५७)

किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल् प्रत्ययो भवति । कुत्र । यत्र । तत्र । बहुत्र ॥

२१७२. इदमो हः ॥ ११ ॥ (१९५८)

इदमः सप्तम्यन्ताद्धः प्रत्ययो भवति । त्रलोऽपवादः । इह ॥

२१७३. किमोऽत् ॥ १२ ॥ (१९५९)

किमः सप्तम्यन्तादत्प्रत्ययो भवति । त्रलोऽपवादः । क्व भोक्ष्यसे । क्वाध्येष्यसे।

त्रलमपि केचिदिच्छिन्ति- कुत्र । तत्कथम् ? उत्तरसूत्राद्वावचनं पुरस्तादपकृष्यते॥

२१७४. वा ह चच्छन्दसि ॥ १३ ॥ (१९६१)

किमः सप्तम्यन्ताद्वा हः प्रत्ययो भवति छन्दसि विषये । यथाप्राप्तं च । क्व। कुह (ऋ. ८.७३.४) । कुत्रचिदस्य सा दूरे क्व ब्राह्मणस्य चावकाः ॥

२१७५. इतराभ्योऽपि दृश्यन्ते ॥ १४ ॥ (१९६३)

सप्तमीपञ्चम्यपेक्षमितरत्वम् । इतराभ्यो विभक्तिभ्यस्तसिलादयो दृश्यन्ते । दृशिग्रहणं प्रायिकविध्यर्थम्, तेन भवदादिभिर्योग एवैतद्विधानम् ।

के पुनर्भवदादयः? भवान्दीर्घायुरायुष्मान् देवानाम्प्रिय इति । स भवान् = ततो भवान्, तत्र भवान् । तं भवन्तम् = तत्र भवन्तम्, ततो भवन्तम् । तेन भवता = तत्र भवता, ततो भवता । तस्मै भवते = ततो भवते, तत्र भवते । तस्माद्भवतः - ततो भवतः, तत्र भवतः । तस्य भवतः = ततो भवतः, तत्र भवतः.। तस्मिन् भवति = ततो भवति, तत्र भवति । एवं दीर्घायुः प्रभृतिष्वप्युदाहार्यम्॥

२१७६. सर्वैकान्यकिंयत्तदः काले दा ॥ १५ ॥ (१९६४)

'सप्तम्याः' इति वर्त्तते, न तु 'इतराभ्यः' इति । सर्वादिभ्यः प्रातिपदिकेभ्यो दा प्रत्ययो भवति । त्रलोऽपवादः । सर्वस्मिन् काले सर्वदा । एकदा । अन्यदा । कदा । तदा ।

काल इति किम्? सर्वत्र देशे ॥

२१७७. इदमो र्हिल् ॥ १६ ॥ (१९६५)

'सप्तम्याः' इत्येव । 'काले' इति च । इदमः सप्तम्यन्तात्काले वर्त्तमानाद् र्हिल् प्रत्ययो भवति । हस्यापवादः । लकारः स्वरार्थः । अस्मिन् काले एतर्हि । काले इत्येव - इह देशे ॥

२१७८. अधुना ॥ १७ ॥ (१९६६)

'अधुना' इति निपात्यते । इदमोऽश्भावो धुना च प्रत्ययः । अस्मिन् काले अधुना ॥

२१७९. दानीं च ॥ १८ ॥ (१९६७)

इदमः सप्तम्यन्तात्काले वर्तमानाद्दानीं प्रत्ययो भवति । अस्मिन् काले इदानीम् ॥

२१८०. तदो दा च ॥ १९ ॥ (१९६८)

तदः सप्तम्यन्तात्काले वर्तमानाद् दा प्रत्ययो भवति, चकाराद्दानीं च । तस्मिन्काले तदा, तदानीम् ।

तदो दावचनमनर्थकम्; विहितत्वात् ॥

२१८१. तयोर्दार्हिलौ चच्छन्दसि ॥ २० ॥ (३४९९)

'तयोः' इति प्रातिपदिकनिर्देशः । तयोरिदमः तदश्च यथासंख्यं दा-र्हिलौ प्रत्ययौ भवतश्छन्दसि विषये । चकराद्यथाप्राप्तं च । इदावत्सरीयः (काठ. सं. १३.१५) । इदं तर्हि । इदानीम् । तदानीम् ॥

२१८२. अनद्यतने र्हिलन्यतरस्याम् ॥ २१ ॥ (१९६९)

'छन्दसि' इति न स्वर्यते, सामान्येन विधानम् । किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्योऽनद्यतने कालविशेषे वर्त्तमानेभ्यो र्हिल् प्रत्ययो भवत्यन्यतरस्याम् । कर्हि, कदा । यर्हि, यदा । तर्हि, तदा ॥

२१८३. सद्यः परुत्परायैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ २२ ॥ (१९७०)

'सप्तम्याः' इति, 'काले' इति च वर्त्तते । सद्यःप्रभृतयः शब्दा निपात्यन्ते । प्रकृतिः, प्रत्ययः, आदेशः, कालविशेष इति सर्वमेतन्निपातनाल्लभ्यते ।

समानस्य सभावो निपात्यते द्यश्च प्रत्ययः (म. भा. ५.३.२२ वा. १), अहन्यभिधेये (म. भा.) । समानेऽहनि सद्यः ।

पूर्वपूर्वतरयोः परभावो निपात्यते, उदारी च प्रत्ययौ, सम्वत्सरेऽभिधेये (म. भा. वा. २)। पूर्वस्मिन्संवत्सरे परुत् । पूर्वतरे संवत्सरे परारि (म. भा.) ।

इदम इशभावः समसण् प्रत्ययो निपात्यते संवत्सरेऽभिधेये (म. भा. वा.३)। अस्मिन्संवत्सरे ऐषमः (म. भा.) ।

परस्मादेद्यविः प्रत्ययोऽहनि (म. भा. वा.४) । परस्मिन्नहनि परेद्यवि ।

इदमोऽशभावो द्यश्च (म. भ. वा.५) प्रत्ययोऽहनि (म. भा.) । अस्मिन्नहनि अद्य।

पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस्-प्रत्ययो निपात्यतेऽहन्यभिधेये (म. भा. वा.६)। पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः । अन्यतरस्मिन्नहनि अन्यतरेद्युः। इतरस्मिन्नहनि इतरेद्युः । अपरस्मिन्नहनि अपरेद्युः । अधरस्मिन्नहनि अधरेद्युः । उभयोरह्नोः उभयेद्युः । उत्तरस्मिन्नहनि उत्तरेद्युः ।

द्युश्चोभयाद्वक्तव्यः (म. भा. वा. ७) । उभयद्युः ॥

२१८४. प्रकारवचने थाल् ॥ २३ ॥ (२९७१)

'किंसर्वनामबहुभ्योऽदयादिभ्यः' (५.३.२) इति वर्त्तते । 'सप्तम्याः' इति, 'काले' इति च निवृत्तम् । सामान्यस्य भेदको विशेषः = प्रकारः । प्रकृत्यर्थविशेषणं चैतत् । प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे थाल् प्रत्ययो भवति । तेन प्रकारेण तथा । यथा । सर्वथा ।

जातीयरोऽपीदृशमेव लक्षणम्, स तु स्वभावात्प्रकारवति वर्त्तते । थाल्पुनः प्रकारमात्रे ॥

२१८५. इदमस्थमुः ॥ २४ ॥ (१९७२)

इदम्-शब्दात्प्रकारवचने थमुः प्रत्ययो भवति । थलोऽपवादः । अनेन प्रकारेण इत्थम् । उकारो मकारपरित्राणार्थः ॥

२१८६. किमश्च ॥ २५ ॥ (१९७३)

किंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति । केन प्रकारेण कथम् । योगविभाग उत्तरार्थः ॥

२१८७. था हेतौ चच्छन्दसि ॥ २६ ॥ (३५००)

किंशब्दाद्धेतौ वर्तमानात्था प्रत्ययो भवति, चकारात्प्रकारवचने छन्दसि विषये। हेतौ तावत् - 'कथा ग्रामं न पृच्छसि' (ऋ. १०.१५६.१) । केन हेतुना न पृच्छसीत्यर्थः। प्रकारवचने - कथा देवा आसन्पुराविदः ।

विभक्तिसंज्ञायाः पूर्णोऽवधिः ॥

२१८८. दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ २७ ॥ (१९७४)

दिशां शब्दाः दिक्शब्दाः, तेभ्यो दिक्शब्देभ्यो दिग्देशकालेषु वर्तमानेभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्योऽस्तातिः प्रत्ययो भवति स्वार्थे ।

यथासंख्यमत्र नेष्यते । पुरस्ताद्वसति, पुरस्तादागतः, पुरस्ताद्रमणीयम् । अधस्ताद् वसति अधस्तादागतः, अधस्ताद्रमणीयम् ।

दिक्शब्देभ्य इति किम्? ऐन्द्र्यां दिशि वसति । सप्तमीपञ्चमीप्रथमाभ्य इति किम्? पूर्व ग्रामं गतः । दिग्देशकालेष्विति किम्? पूर्वस्मिन्गुरौ वसति ।

इकारस्तकारपरित्राणार्थः ॥

२१८९. दक्षिणोत्ताराभ्यामतसुच् ॥ २८ ॥ १९७८)

दक्षिणोत्ताराभ्यां दिग्देशकालेषु वर्तमानाभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां स्वार्थेऽतसुच् प्रत्ययो भवति । अस्तातेरपवादः । दक्षिणाशब्दः काले न सम्भवतीति दिग्देशवृत्तिः परिगृह्यते। दक्षिणतो वसति, दक्षिणत आगतः, दक्षिणतो रमणीयम्। उत्तरतो वसति, उत्तरत आगतः, उत्तरतो रमणीयम् ।

अकारो विशेषणार्थः - 'षष्ठ्यतसर्थप्रत्ययेन' (२.३.३०) इति ।

२१९०. विभाषा परावराभ्याम् ॥ २९ ॥ (१९७९)

परावरशब्दाभ्यां विभाषाऽतसुच्प्रत्ययो भवति अस्तातेरर्थे । परतो वसति, परत आगतः, परतो रमणीयम् । परस्ताद्वसति, परस्तादागतः, परस्ताद्रमणीयम् । अवरतो वसति, अवरत आगतः, अवरतो रमणीयम् । अवरताद्वसति, अवरतादागतः, अवरताद्रमणीयम् ॥

२१९१. अञ्चेर्लुक् ॥ ३० ॥ (१९८०)

अञ्चत्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातिप्रत्ययस्य लुग् भवति । प्राच्यां दिशि वसति। 'लुक्तद्धितलुकि' (१.२.४९) इति स्त्रीप्रत्ययोऽपि निवर्तते । प्राग्वसति, प्रागागतः, प्राग्रमणीयम्, प्रत्यग्वसतिः, प्रत्यगागतः, प्रत्यग्रमणीयम् ॥

२१९२. उपर्युपरिष्टात् ॥ ३१ ॥ (१९८१)

उपरि, उपरिष्टात् - इत्येतौ शब्दौ निपात्येते अस्तातेरर्थे । ऊर्ध्वस्योपभाव रिल्-रिष्टातिलौ च प्रत्ययौ निपात्येते । उर्ध्वायां दिशि वसति उपरि वसति, उपर्यागतः, उपरि रमणीयम् । उपरिष्टाद् वसति उपरिष्टादागतः, उपरिष्टाद्रमणीयम् ।

२१९३. पश्चात् ॥ ३२ ॥ (१९८२)

'पश्चात्' इत्ययं शब्दो निपात्यतेऽस्तातेरर्थे । अपरस्य पश्चभाव आतिश्च प्रत्ययः (म. भा.) । अपरस्याम् दिशि वसति पश्चाद्दिशि वसति, पश्चादागतः, पस्चाद्रमणीयम्।

दिक्पूर्वपदस्यापरस्य पश्चभावो वक्तव्यः, आतिश्च प्रत्ययः (म. भा. वा. १,२).। दक्षिणपश्चात् । उत्तरपश्चात् ।

अर्धोत्तरपदस्य दिक्पूर्वपदस्य पश्चभावो वक्तव्यः (म. भा. वा.३) । दक्षिणपश्चार्धः। उत्तरपश्चार्धः ।

विनापि पूर्वपदेन पश्चभवो वक्तव्यः (म. भा. वा.४) । पश्चार्धः । उत्तरपश्चार्धः॥

२१९४. पश्च पश्चा चच्छन्दसि ॥ ३३ ॥ (३५०१)

पश्च पश्चाशब्दौ निपात्येते छन्दसि विषये अस्तातेरर्थे । चकारात् पश्चादित्यपि भवति। अपरस्य पश्चभावोऽकाराकारौ च प्रत्ययौ निपात्येते । परो व्याप्तो जायते पश्च सिंहः, पश्चा सिंहः, पश्चात्सिंहः ॥

२१९५. उत्तराधरदक्षिणादातिः ॥ ३४ ॥ (१८९३)

उत्तराधरदक्षिणशब्देभ्य आतिः प्रत्ययो भवति अस्तातेरर्थे । उत्तरस्यां दिशि वसति उत्तराद्वसति, उत्तरादागतः, उत्तराद्रमणीयम् । अधराद्वसति, अधरादागतः, अधराद्रमणीयम्। दक्षिणाद्वसति, दक्षिणादागतः, दक्षिणाद्रमणीयम् ॥

२१९६. एनबन्यतरस्यामदूरेऽपञ्चम्याः ॥ ३५ ॥ (११९६)

उत्तराधरदक्षिणशब्देभ्य एनप् प्रत्ययो भवत्यन्यतरस्यामस्तातेरर्थे । अदूरे चेदवधिमानवधेर्भवति । विभक्तित्रये प्रकृते 'पञ्चम्याः' इति पञ्चमी पर्युदस्यते। तेनायं सप्तमीप्रथमान्ताद्विज्ञायते प्रत्ययः । उत्तरेण वसति, उत्तराद्वसति, उत्तरतो वसति। उत्तरेण रमणीयम्, उत्तराद्रमणीयम्, उत्तरतो रमणीयम् । अधरेण वसति, अधराद्वसति, अधस्ताद्वसति । अधरेण रमणीयम्, अधराद्रमणीयम्, अधस्ताद्रमणीयम्। दक्षिणेन वसति, दक्षिणाद्वसति, दक्षिणतो वसति । दक्षिणेन रमणीयम्, दक्षिणाद्रमणीयम्, दक्षिणतो रमणीयम्।

अदूर इति किम्? उत्तराद्वसति । अपञ्चम्या इति किम्? उत्तरादागतः ।

'अपञ्चम्या इति प्रागसेः' (म. भा. ५.३.३५ वा.१) असिप्रत्ययस्तु पञ्चम्यन्तादपि भवति।

केचिदिहोत्तरादिग्रहणं नानुवर्तयन्ति । दिक्शब्दमात्रात्प्रत्ययं मन्यन्ते - पूर्वेण ग्रामम्, अपरेण ग्रामम् ॥

२१९७. दक्षिणादाच् ॥ ३६ ॥ (१९८५)

'अदूर' इति न स्वर्यते । 'अपञ्चम्याः' इति वर्तते । दक्षिणशब्दादाच्प्रत्ययो भवति अस्तातेरर्थे । दक्षिणा वसति । दक्षिणा रमणीयम् । अपञ्चम्या इत्येव - दक्षिणत आगतः ।

चकारो विशेषणार्थः, 'अञ्चूत्तरपदाजाहियुक्ते' (२.३.२९) इति ॥

२१९८. आहि च दूरे ॥ ३७ ॥ (१९८६)

दक्षिणशब्दादाहिः प्रत्ययो भवति अस्तातेरर्थे, चकारादाच्, दूरे चेदवधिमानवधेर्भवति। दक्षिणाहि वसति, दक्षिणा वसति । दक्षिणाहि रमणीयम्, दक्षिणा रमणीयम् ।

दूर इति किम्? दक्षिणतो वसति ।

अपञ्चम्या इत्येव - दक्षिणत आगतः ॥

२१९९. उत्तराच्च ॥ ३८ ॥ (१८८७)

उत्तरशब्दादाजाही प्रत्ययौ भवतः अस्तातेरर्थे, दूरे चेदवधिमानवधेर्भवति । उत्तरा वसति, उत्तराहि वसति । उत्तरा रमणीयम्, उत्तराहि रमणीयम् ।

दूर इत्येव - उत्तरेण प्रयाति ।

अपञ्चम्या इत्येव - उत्तरादगतः ॥

२२००. पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥ ३९ ॥ (१९७५)

'अपञ्चम्याः' इति निवृत्तम् । तिसृणां विभक्तीनामिह ग्रहणम् । पूर्वाधरावराणामसिः प्रत्ययो भवति अस्तोतेरर्थे । तत्सन्नियोगेन चैषां यथासंख्यं पुर्, अध्, अव् - इत्येते आदेशा भवन्ति । असीत्यविभक्तिको निर्देशः । पुरो वसति, पुर आगतः पुरो रमणीयम् । अधो वसति, अध आगतः, अधो रमणीयम्। अवो वसति, अव आगतः, अवो र्मणीयम् ॥

२२०१. अस्ताति च ॥ ४० ॥ (१९७६)

सप्तम्यन्तमेतत् । अस्तातिप्रत्यये परतः पूर्वादीनां यथासंख्यं पुरादय आदेशा भवन्ति । इदमेवादेशविधानं ज्ञापकम् - अस्तातिरेभ्यो भवति, असिप्रत्ययेन न बाध्यत इति । पुरस्ताद्वसति, पुरस्तादागतः, पुरस्ताद्रमणीयम् । अधस्तद्वसति, अधस्तादागतः, अधस्ताद्रमणीयम् ॥

२२०२. विभाषाऽवरस्य ॥ ४१ ॥ (१९७७)

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । अवरस्यास्तातौ परतो विभाषा 'अव्' इत्ययमादेशो भवति । अवस्ताद्वसति, अवस्तादागतः, अवस्ताद्रमणीयम् । अवरस्ताद्वसति, अवरस्तादागतः, अवरस्ताद् रमणीयम् ॥

२२०३. संख्याया विधार्थे धा ॥ ४२ ॥ (९९८८)

संख्यावाचिभ्यः प्रातिपदिकेभ्यो विधार्थे वर्तमानेभ्यो धा प्रत्ययो भवति स्वार्थे। विधा = प्रकारः, स च सर्वक्रियाविषय एव गृह्यते । क्रियाप्रकारे वर्तमानायाः संख्याया धा प्रत्ययः । एकधा भुङ्क्ते । द्विधा गच्छति । त्रिधा । चतुर्धा । पञ्चधा.॥

२२०४. अधिकरणविचाले च ॥ ४३ ॥ (१९८९)

'संख्यायाः' इत्येव । अधिकरणम् = द्रव्यम्, तस्य विचालः = सम्ख्यान्तरापादनम् - एकस्यानेकीकरणम्, अनेकस्य वा एकीकरणम् । अधिकरणविचाले गम्यमाने सम्ख्यायाः स्वार्थे धा प्रत्ययो भवति । एकं राशि पञ्चधा कुरु, अष्टधा कुरु, अनेकमेकधा कुरु ॥

२२०५. एकाद्धो ध्यमुञन्यतरस्याम् ॥ ४४ ॥ (१९९०)

एकशब्दत्परस्य धाप्रत्ययस्य ध्यमुञादेशो भवत्यन्यतरस्याम् । एकधा राशिं कुरु, ऐकध्यं कुरु (म. भा.) । एकधा भुङ्क्ते, ऐकध्यं भुङ्क्ते ।

प्रकरणादेव लब्धे पुनर्धाग्रहणम् - विधार्थे विहितस्यापि यथा स्यात् । अनन्तरस्यैव ह्येतत्प्राप्नोति ॥

२२०६. द्वित्र्योश्च धमुञ् ॥ ४५ ॥ (१९९१)

'धा' इत्यनुवर्तते । द्वित्र्योः सम्बन्धिनो धाप्रत्ययस्य विधार्थेऽधिकरणविचाले च विहितस्य धमुञादेशो भवत्यन्यतरस्याम् । चकारो विकल्पानुकर्षणार्थः । द्विधा, द्वैधम् । त्रिधा, त्रैधम् ।

धमुञन्तात्स्वार्थे डदर्शनम् (म. भा. ५.३.४५ वा. १) । मतिद्वैधानि संश्रयन्ते। मतित्रैधानि संश्रयन्ते ॥

२२०७. एधाच्च ॥ ५६ ॥ (१९९२)

द्वित्र्योः सम्बन्धिनो धाप्रत्ययस्य एधाजादेशो भवत्यन्यतरस्याम् । चकारो विकल्पानुकर्षणार्थः । द्वेधा, द्वैधम्, द्विधा । त्रेधा, त्रैधम्, त्रिधा ॥

२२०८. याप्ये पाशप् ॥ ४७ ॥ (१९९३)

याप्यः = कुत्सित इत्युच्यते । याप्ये वर्तमानात्प्रातिपदिकात्स्वार्थे पाशप् प्रत्ययो भवति। कुत्सितो वैयाकरणो - वैयाकरणपाशः । याज्ञिकपाशः ।

यो व्याकरणशास्त्रे प्रवीणो दुःशीलः, तत्र कस्मान्न भवति ? यस्य गुणस्य सद्भावाद् द्रव्ये शब्दनिवेशः, तस्य कुत्सायां प्रत्ययः ॥

२२०९. पूरणाद्भागे तीयादन् ॥ ४८ ॥ (१९९४)

पूरणप्रत्ययो यस्तीयः, तदन्तात्प्रातिपदिकाद्भागे वर्तमानात् स्वार्थेऽन् प्रत्ययो भवति । स्वरार्थं वचनम् । द्वितीयो भागः द्वितीयः । तृतीयः ।

भाग इति किम्? द्वितीयम् । तृतीयम् ।

पूरणग्रहणमुत्तरार्थम्, न ह्यपूरणस्तीयोऽस्ति; मुखतीयादिरनर्थकः ॥

२२१०. प्रागेकादशभ्योऽच्छन्दसि ॥ ४९ ॥ (१९९५)

'पूरणाद्भागे' इत्येव । प्रागेकादशभ्यः संख्याशब्देभ्यः पूरणप्रत्ययान्तेभ्यो भागे वर्तमानेभ्यः स्वार्थेऽन् प्रत्ययो भवति अच्छन्दसि विषये । स्वरार्थं वचनम् । पञ्चमः। सप्तमः। नवमः । दशमः ।

प्रागेकादशभ्य इति किम्? एकादशः, द्वादशः । अच्छन्दसीति किम्? 'पञ्चममिन्द्रियस्यापाक्रामत्' (मै. सं. १.९.४) ॥

२२११. षष्ठाष्टमाभ्यां ञ च ॥ ५० ॥ (१९९६)

'भागे' इत्येव । 'अच्छन्दसि' इति च । षष्ठाष्टमाभ्यां भागेऽभिधेयेऽच्छन्दसि विषये ञः प्रत्ययो भवति । चकारादेश्च । षष्ठो भागः षाष्ठः, षष्ठः । आष्टमः, अष्टमः॥

२२१२. मानपश्वङ्गयोः कन्लुकौ च ॥ ५१ ॥ (१९९७)

'भागे' इत्येव । षष्ठाष्टमाभ्यां यथासंख्यं कन्लुकौ च भवतो मानपश्वङ्गयोर्भागयोरभिधेययोः । षष्ठको भागो मानं चेत्तद्भवति । अष्टमो भागः पश्वङ्गं चेत्तद्भवति । कस्य लुक्? ञस्य लुक्, अनो वा । चकाराद्यथा प्राप्तं च । षाष्ठः, षष्ठः । आष्टमः, अष्टमः ।

मानपश्वङ्गयोरिति किम्? षाष्ठः, षष्ठः । आष्टमः, अष्टमः ॥

२२१३. एकादाकिनिच्चासहाये ॥ ५२ ॥ (१९९८)

एकशब्दादसहायवचिनः स्वार्थे आकिनिच् प्रत्ययो भवति । चकारात्कन्लुकौ च । आकिनिचः, कनो वा लुग्विज्ञायते । स च विधानसामर्थ्यात्पक्षे भवति । एकाकी, एककः, एकः।

असहायग्रहणं संख्याशब्दनिरासार्थम् । तदुपादाने हि द्विबहवोर्न स्यात् - एकाकिनौ, एकाकिनः ॥

२२१४. भूतपूर्वे चरट् ॥ ५३ ॥ (१९९९)

पूर्वं भूत इति विगृह्य 'सुप्सुपा' इति समासः। भूतपूर्वशब्दोऽतिक्रान्त-कालवचनः । प्रकृतिविशेषणं चैतत् । भूतपूर्वत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात्स्वार्थे चरट् प्रत्ययो भवति। आढ्यो भूतपूर्वः आढ्यचरः । सुकुमारचरः। टकारो ङीबर्थः - आढ्यचरी ॥

२२१५. षष्ठ्या रूप्य च ॥ ५४ ॥ (२०००)

षष्ठ्यन्तात्प्रातिपदिकाद्रूप्यः प्रत्ययो भवति, चकाराच्चरट् च । षष्ठ्यन्तात्प्रात्ययविधानात्सम्प्रति भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणम्, न तु पकृत्यर्थविशेषणम् । देवदत्तस्य भूतपूर्वो गौः देवदत्तरूप्यः । देवदत्तचरः ।

२२१६. अतिशायने तमबिष्ठनौ ॥ ५५ ॥ (२००१)

अतिशयनमतिशायनम् = प्रकर्षः । निपातनाद्दीर्घत्वम् । प्रकृत्यर्थविशेषणं चैतत्। अतिशायनविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकात् स्वार्थे तमबिष्ठनौ प्रत्ययौ भवतः । प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति । सर्वे इमे आढ्याः, अयमेषामतिशयेनाढ्य आढ्यतमः । दर्शनीयतमः । सुकुमारतमः । सर्व इमे पटवः, अयमेषामतिशयेन पटुः पटिष्ठः । लघिष्ठ । गरिष्ठः ।

यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्तादपरः प्रत्ययो भवत्येव - 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' (वाज. सं. १.१), 'युधिष्ठिरः शेष्ठतमः कुरूणामिति॥

२२१७. तिङश्च ॥ ५६ ॥ (२००२)

तिङन्ताच्चातिशायने द्योत्ये तमप् प्रत्ययो भवति । 'ङ्याप्प्रातिपदिकात्' (४.१.१) इत्यधिकारात् तिङो न प्राप्नोतीति इदं वचनम् । सर्व इमे पचन्तीति, अयमेषामतिशयेन पचति पचतितमाम् । जल्पतितमाम् ।

इष्ठन् नोदाह्रियते; गुणवचने तस्य नियतत्वात् ॥

२२१८. द्विवचनविभज्योपपदे तरबीयसुनौ ॥ ५७ ॥ (२००५)

द्वयोरर्थयोर्वचनं द्विवचनम् । विभक्तव्यः=विभज्यः । निपातनाद् यद्भवति । द्व्यर्थे विभज्ये चोपपदे प्रातिपदिकात् तिङन्ताच्चातिशायने तरबीयसुनौ प्रत्ययौ भवतः । तमबिष्ठनोरपवादः । यथासंख्यमत्र नेष्यते । द्वाविमावाढ्यौ, अयमनयोरतिशयेनाढ्य आढ्यतरः। सुकुमारतरः । पचतितराम् । जल्पतितराम् ।

ईयसुन्खल्वपि-द्वाविमौ पटू, अयमनयोरतिशयेन पटः पटीयान् । लघीयान्।

विभज्ये चोपपदे - माथुराः पाटलिपुत्रकेभ्य आढ्यतराः । दर्शनीयतराः । पटीयांसः । लघीयांसः ॥

२२१९. अजादी गुणवचनादेव ॥ ५८ ॥ (२००६)

इष्ठन्नीयसुनावजादी सामान्येन विहितौ, तयोरयं विषयनियमः क्रियते - गुणवचनादेव भवतस्तौ नान्यस्मादिति । पटीयान् । लघीयान् । पटिष्ठः । लघिष्ठः।

इह न भवतः - पाचकतरः, पाचकतम इति ।

एवकार इष्टतोऽवधारणार्थः - प्रत्ययनियमोऽयम्, न प्रकृतिनियम इति । पटुतरः, पटुतमः ॥

२२२०. तुश्छन्दसि ॥ ५९ ॥ (२००७)

'तुः' इति तृन्तृचोः सामान्येन ग्रहणम् । त्रन्ताच्छन्दसि विषये अजादी प्रत्ययौ भवतः। पूर्वेण गुणवचनादेव नियमे कृते छन्दसि प्रकृत्यन्तराण्यभ्यनुज्ञायन्ते - त्रन्तादप्यजादी भवत इति । 'आसुतिं करिष्ठः' (ऋ. ७.९७.७) । दोहीयसी धेनुः । 'भस्याऽढे तद्धिते' (६.३.३५) इति पुंवद्भावे कृते 'तुरिष्ठेमेयस्सु' (३.४.१५४) इति तृचो निवृत्तिः ॥

२२२१. प्रशस्यस्य श्रः ॥ ६० ॥ (२००९)

प्रशस्यशब्दस्य 'श्र' इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः । 'अजादी' इति प्रकृतस्य सप्तमी विभक्तिर्विपरिणम्यते ।

ननु च प्रशस्यशब्दस्यगुणवचनत्वादजादी न सम्भवतः? एवं तर्हि आदेशविधानसामर्थ्यात् तद्विषयो नियमो न प्रवर्तते - अजादी गुणवचनादेवेति ।

एवमुत्तरेष्वपि योगेषु विज्ञेयम् ।

सर्व इमे प्रशस्याः अयमेषामतिशयेन प्रशस्यः श्रेष्ठः । उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः श्रेयान् । अयमस्मात् श्रेयान् । 'प्रकृत्यैकाच्' (६.४.१६३) इति प्रकृतिभावाच्छ्रशब्दस्य टिलोप-यस्येतिलोपौ न भवतः ॥

२२२२. ज्य च ॥ ६१ ॥ (२०११)

प्रशस्यशब्दस्य 'ज्य' इत्ययमादेशो भवति अजाद्योः प्रत्यययोः परतः । सर्व इमे प्रशस्याः, अयमेषमतिशयेन प्रशस्यः ज्येष्ठः । उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः ज्यायान् । अयमस्मात् ज्यायान् । 'ज्यादादीयसः' (६.४.१६०) इत्याकारः॥

२२२३. वृद्धस्य च ॥ ६२ ॥ (२०१३)

वृद्धशब्दस्य च 'ज्य' इत्ययमादेशो भवत्यजाद्योः प्रत्यययोः परतः । तयोश्च सत्त्वं नियमाभावेन पूर्ववत् ज्ञाप्यते । सर्व इमे वृद्धाः, अयमेषामतिशयेन वृद्धः - ज्येष्ठः । उभाविमौ वृद्धौ, अयमनयोरतिशयेन वृद्धः ज्यायान् । अयमस्मात् ज्यायान्।

'प्रियस्थिर' (६.४.१५७) इत्यादिना वृद्धशब्दस्य वर्षादेशो विधीयते । वचनसामर्थ्यात्पक्षे सोऽपि भवति वर्षिष्ठः, वर्षीयानिति ॥

२२२४. अन्तिकबाढयोर्नेदसाधौ ॥ ६३ ॥ (२०१४)

अन्तिकबाढयोर्यथासंख्यं नेद, साध - इत्येतावादेशौ भवतोऽजाद्योः परतः। तयोश्च सत्त्वं पूर्ववद्विज्ञेयम् ।

निमित्तभूतयोर्यथासंख्यमत्र नेष्यते ।

सर्वाणीमान्यन्तिकानि, इदमेषामतिशयेनान्तिकं नेदिष्ठम् । उभे इमे अन्तिके, इदमनयोरतिशयेन नेदीयः । इदमस्मान्नेदीयः सर्व इमे बाढमधीयते, अयमेषामतिशयेन बाढमधीते साधिष्ठः । उभाविमौ बाढमधीयाते, अयमनयोरतिशयेन बाढमधीते साधीयः। अयमस्मात् साधीयोऽधीते ॥

२२२५. युवाल्पयोः कनन्यतरस्याम् ॥ ६४ ॥ (२०१९)

युवाल्पशब्दयोः कनित्ययमादेशो भवत्यन्यतरस्यामजाद्योः परतः । तयोश्च सत्त्वं पूर्ववज्ज्ञेयम् । सर्व इमे युवानः, अयमेषामतिशयेन युवा कनिष्ठः । द्वाविमौ युवानौ, अयमनयोरतिशयेन युवा कनीयान् । यविष्ठः, यवीयान् । सर्व इमेऽल्पाः,

अयमेषामतिशयेनाल्पः कनिष्ठः । उभाविमावल्पौ, अयमनयोरतिशयेनाल्पः कनीयान्। अयमस्मात्कनीयान् अल्पिष्ठः अल्पीयानिति वा ॥

२२२६. विन्मतोर्लुक् ॥ ६५ ॥ (२०२०)

विनो मतुपश्च लुग् भवति अजाद्योः प्रत्यययोः परतः । इदमेव वचनं ज्ञापकमजादिसभ्दावस्य । सर्वे इमे स्रग्विणः, अयमेषामतिशयेन स्रग्वी स्रजिष्ठः। उभाविमौ स्रग्विणौ, अयमनयोरतिशयेन स्रग्वी स्रजीयान् । अयमस्मात् स्रजीयान्। सर्व इमे त्वग्वन्तः, अयमेषामतिशयेन त्वग्वी त्वचिष्ठः । उभाविमौ त्वग्वन्तौ, अयमनयोरतिशयेन त्वग्वान् त्वचीयान् । अयमस्मात्त्वचीयान् ॥

२२२७. प्रशंसायां रूपप् ॥ ६६ ॥ (२०२१)

प्रशंसा=स्तुतिः । प्रकृत्यर्थस्य विशेषणं चैतत् । प्रशंसाविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे रूपप् प्रत्ययो भवति । स्वार्थिकाश्च प्रत्ययाः प्रकृत्यर्थविशेषस्य द्योतका भवन्ति । प्रशस्तो वैयाकरणो वैयाकरणरूपः । याज्ञिकरूपः ।

प्रकृत्यर्थस्य वैशिष्ठ्ये प्रशंसा भवति । वृषलरूपोऽयं यः पलाण्डुना सुरां पिबति (म. भा.)। चोररूपः । दस्युरूपः, योऽक्ष्णोरप्यञ्जनमपहरेत् ।

'तिङश्च' (५.३.५६) इत्यनुवर्त्तते - पचतिरूपम् । पचतोरूपम् । कियाप्रधानमाख्यातम् ।

एका च क्रियेति रूपप्प्रत्ययान्ताद् द्विवचनबहुवचने न भवतः ।

नपुंसकलिङ्गं तु भवति; लोकाश्रयत्वाल्लिङ्गस्य ॥

२२२८. ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥ ६७ ॥ (२०२२)

सम्पूर्णता = पदार्थानां समाप्तिः । स्तोकेनासम्पूर्णता = ईषदसमाप्तिः । प्रकृत्यर्थविशेषणं चैतत् । ईषदसमाप्तिविशिष्टे स्वार्थे वर्तमानात् कल्पब्, देश्य, देशीयर - इत्येते प्रत्यया भवन्ति। ईषदसमाप्तः पटुः पटुकल्पः । पटुदेश्यः । पटुदेशीयः । मृदुकल्पः । मृदुदेश्यः । मृदुदेशीयः ।

'तिङश्च' (५.३.४६) इत्येव - पचतिकल्पम् । जल्पतिकल्पम् ॥

२२२९. विभाषा सुपो बहुच् पुरस्तात्तु ॥ ६८ ॥ (२०२३)

ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् सुबन्ताद्विभाषा बहुच् प्रत्ययो भवति । स तु पुरस्तादेव भवति, न परतः । चित्करणमन्तोदात्तार्थम् । ईषदसमाप्तः पटुः बहुपटुः । बहुमृदुः। बहुगुडो द्राक्षा ।

विभाषावचनात् कल्पबादयोऽपि भवन्ति ।

सुब्ग्रहणम् - तिङन्तान्मा भूदिति ॥

२२३०. प्रकारवचने जातीयर् ॥ ६९ ॥ (२०२४)

सामान्यस्य भेदको विशेषः = प्रकारः, तस्य वचने । प्रकृत्यर्थविशेषणं चैतत्। सुबन्तात्प्रकारविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे जातीयर् प्रत्ययो भवति । प्रकारवति चायं प्रत्ययः । थाल्पुनः प्रकारमात्र एव भवति । पटुप्रकारः पटुजातीयः। मृदुजातीयः । दर्शनीयजातीयः ॥

२२३१. प्रागिवात्कः ॥ ७० ॥ (२०२५)

'इवे प्रतिकृतौ' (५.३.९६) इति वक्ष्यति, प्रागेतस्मादिवसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, कप्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति - 'अज्ञाते' (५.३.७३) इति - अश्वकः । गर्दभकः ।

तिङन्तादयं प्रत्ययो नेष्यते । अकजिष्यते ।

'तिङश्च' (५.३.५६) इत्यनुवृत्तमुत्तरसूत्रेणैव सम्बन्धनीयम् ॥

२२३२. अव्ययसर्वनाम्नामकच्प्राक् टेः ॥ ७१ ॥ (२०२६)

'तिङश्च्' (५.३.५६) इत्येव । अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेष्वकच्प्रत्ययो भवति, स च प्राक् टेः, न परतः । कस्यापवादः । उच्चकैः । नीचकैः । शनकैः। सर्वनाम्नः खल्वपि - सर्वके । विश्वके । उभयके ।

'प्रातिपदिकात्' , 'सुपः' -इति द्वयमिहानुवर्तते, तत्राभिधानतो व्यवस्था भवति - क्वचित्प्रातिपदिकस्य टेः प्राक् प्रत्ययो भवति, क्वचित्सुबन्तस्य टेः प्राक्प्रत्ययः। युष्मकाभिः, अस्मकाभिः , युष्मकासु, अस्मकासु, युवकयोः, आवकयोः - इत्यत्र प्रातिपदिकस्य । त्वयका, मयका, त्वयकि, मयकि - इत्यत्र सुबन्तस्य.।

अकच्प्रकरणे तूष्णीमः काम् प्रत्ययो वक्तव्यः (म. भा. ५.३.७२ वा.१) । स च मित्त्वादन्त्यादचः परो भवति । तूष्णीकामास्ते । तूष्णीकां तिष्ठति ।

शीले को मलोपश्च वक्तव्यः (म. भा. वा.२) । तूष्णींशीलः तूष्णीकः ।

'तिङश्च' (५.३.५६) इति प्रकृतमत्र सम्बध्यते - पचतकि । जल्पतकि ॥

२२३३. कस्य च दः ॥ ७२ ॥ (२०२७)

ककारान्तस्य प्रातिपदिकस्याकच्सन्नियोगेन दकारादेशो भवति । चकारः सन्नियोगार्थः। सामर्थ्याच्चाव्ययग्रहणमनुवर्तते, न सर्वनामग्रहणम्; ककारान्तस्य सर्वनाम्नोऽसम्भवात् धिक्-धकित् । हिरुक् - हिरकुत् । पृथक् - पृथकत् ॥

२२३४. अज्ञाते ॥ ७३ ॥ (२०२८)

अज्ञातविशेषः = अज्ञातः । अज्ञातत्वोपाधिकेऽर्थे वर्तमानात्प्रातिपदिकात् तिङन्ताच्च स्वार्थे यथाविहितं प्रत्ययो भवति । स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत् । कस्यायमश्व इति स्वस्वामिसम्बन्धेनाज्ञातेऽश्वे प्रत्ययः - अश्वकः। गर्दभकः । उष्ट्रकः ।

एवमन्यत्रापि यथायोगमज्ञातता विज्ञेया । उच्चकैः । नीचकैः । सर्वके । विश्वके । पचतकि । जल्पतकि ॥

२२३५. कुत्सिते ॥ ७४ ॥ (२०२९)

कुत्सितः = गर्हितः, निन्दितः । प्रकृत्यर्थविशेषणं चैतत् । कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे यथाविहित्तं प्रत्ययो भवति । कुत्सितोऽश्वः अश्वकः। उष्ट्रकः । गर्दभकः । नीचकैः । सर्वके । विश्वके । पचतकि । जल्पतकि ॥

२२३६. संज्ञायां कन् ॥ ७५ ॥ (२०३०)

'कुत्सिते' इत्येव । कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् कन् प्रत्ययो भवति, प्रत्ययान्तेन चेत्संज्ञा गम्यते । कस्यापवादः । शूद्रकः । धारकः । पूर्णकः ॥

२२३७. अनुकम्पायाम् ॥ ७६ ॥ (२०३१)

कारुण्येनाभ्युपपत्तिः परस्य = अनुकम्पा, तस्यां गम्यमानायां सुबन्तात्तिङन्ताच्च यथाविहितं प्रत्ययो भवति । पुत्रकः । वत्सकः । दुर्बलकः । बुभुक्षितकः । स्वपितकि। श्वसितकि ॥

२२३८. नीतौ च तद्युक्तात् ॥ ७७ ॥ (२०३२)

सामदानादिरुपायः = नीतिः । नीतौ च गम्यमानायां तद्युक्तादनुकम्पायुक्ताद्यथा-विहितं प्रत्ययो भवति । हन्त ते धानकाः । हन्त ते तिलकाः। एहकि । अद्धकि । अनुकम्प्यमानो दानेनाराधयति ।

पूर्वेण प्रत्यासन्नानुकम्पासम्बन्धाद् अनुकम्प्यमानादेव प्रत्ययो विहितः; सम्प्रति व्यवहितादपि यथा स्यादिति वचनम् ॥

२२३९. बहवचो मनुष्यनाम्नष्ठञ्वा ॥ ७८ ॥ (२०३३)

'अनुकम्पायाम्' (५.३.७६) इति, 'नीतौ च तद्युक्तात्' (५.३.७७) इति च वर्त्तते । बहवचः प्रातिपदिकान्मनुष्यनामधेयाद्वा ठच्प्रत्ययो भवति अनुकम्पायां गम्यमानायां नीतौ च, देविकः । देवदत्तकः । यज्ञिकः, यज्ञदत्तकः । बहवच इति किम्? दत्तकः । गुप्तकः । मनुष्यनाम्न इति किम्? मद्रबाहुकः । भद्रबाहुकः ॥

२२४०. घनिलचौ च ॥ ७९ ॥ (२०३४)

'अनुकम्पायाम्' इत्यादि सर्वमनुवर्तते । पूर्वेण ठचि विकल्पेन प्राप्ते वचनम्। बहवचो मनुष्यनाम्नो घन्, इलच् - इत्येतौ प्रत्ययौ भवतः । चकाराद्यथाप्राप्तं च.। देवियः, देविलः, देविकः, देवदत्तकः । यज्ञियः, यज्ञिलः, यज्ञिकः, यज्ञदत्तकः ॥

२२४१. प्राचामुपादेरडज्वुचौ च ॥ ८० ॥ (२०३६)

पूर्ववत् सर्वमनुवर्तते । उपशब्द आदिर्यस्य तस्मादुपादेः प्रातिपदिकाद् बहवचो मनुष्यनाम्नः - अडच्, वुच्-प्रत्ययौ भवतः । चकाराद् घनिलचौ प्रत्ययौ भवतः, ठच्च वा । उपडः, उपकः, उपियः, उपिलः, उपिकः, उपेन्द्रदत्तकः ।

प्राचांग्रहणं पूजार्थम् । 'वा' इत्येव हि वर्तते ॥

२२४२. जातिनाम्नः कन् ॥ ८१ ॥ (२०३७)

'बहवचः' इति नानुवर्तते । सामान्येन विधानम् । जातिशब्दो यो मनुष्यनामधेयो व्याघ्र, सिंह - इत्येवमादिः, तस्मादनुकम्पायां नीतौ च कन्प्रययो भवति । व्याघ्रकः। सिंहकः । शरभकः ।

वावचनानुवृत्तेर्यथादर्शनम् अन्योऽपि भवति - व्याघ्रिलः, सिंहिलः ।

नामग्रहणं स्वरूपनिवृत्त्यर्थम् ॥

२२४३. अजिनान्तस्योत्तरपदलोपश्च ॥ ८२ ॥ (२०३९)

'कन्' इत्यनुवर्तते, 'मनुष्यनाम्नः' इति च । अजिनशब्दान्तात् प्रातिपदिकान्मनुष्यनाम्नोऽनुकम्पायां कन्प्रत्ययो भवति, तस्य चोत्तरपदलोपः । व्याघ्राजिनो नाम कश्चिन्मनुष्यः सोऽनुकम्पितः व्याघ्रकः । सिंहकः ॥

२२४४. ठाजादावूर्ध्वं द्वितीयादचः ॥ ८३ ॥ (२०३५)

'लोप' इत्यनुवर्तते । अस्मिन्प्रकरणे यष्ठोऽजादिश्च प्रत्ययस्तस्मिन् परतः प्रकृतेर्द्वितीयादच ऊर्ध्वं यच्छब्दरूपं तस्य लोपो भवति । ऊर्ध्वग्रहणं सर्वलोपार्थम्। अनुकम्पितो देवदत्तः देविकः, देवियः, देविलः । यज्ञिकः, यज्ञियः यज्ञिलः । उपडः, उपकः, उपियः, उपिलः, उपिकः ।

ठग्रहणमुको द्वितीयत्वे कविधानार्थम् (म. भा. ५.३.८३ वा.१) । अजादिलक्षणे हि माथितिकादिवत्प्रसङ्ग । वायुदत्तः, वायुकः । पितृदत्तः, पितृकः ।

चतुर्थादच ऊर्ध्वस्य लोपो वक्तव्यः (म. भा.) । अनुकम्पितो बृहस्पतिदत्तः बृहस्पतिकः, बृहस्पतियः, बृहस्पतिलः ।

अनजादौ विभाषा लोपो वक्तव्यः (म. भा.) । देवदत्तकः, देवकः । यज्ञदत्तकः, यज्ञकः।

लोपः पूर्वपदस्य च ठाजादावनजादौ च वक्तव्यः (म. भा.) । दत्तिकः, दत्तिलः, दत्तियः, दत्तकः ।

विनाऽपि प्रत्ययेन पूर्वोत्तरपदयोर्विभाषा लोपो वक्तव्यः (म. भा.) । देवदत्तो दत्तः, देव इति वा ।

उवर्णाल्ल इलस्य च (म. भा.) । भानुदत्तो भानुलः । वसुदत्तो वसुलः ।

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ॥ (म. भा. पूर्वाचार्यकारिका)

द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम् (मा. भा. ५.३.८३ वा.३) । लहोडः, लहिकः । कहोडः, कहिकः ।

एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः (म. भा. ५.३.८४ वा.७) । वागाशीः वाचिकः । स्रचिकः । त्वचिकः ।

कथं षडंगुलिदत्तः षडिक इति? षषष्ठाजादिवचनात्सिद्धम् (म. भा. ५.३.८४ वा.८) ॥

२२४५. शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ८४ ॥ (२०३८)

शेवलादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये परतः तृतीयादच ऊर्ध्वस्य लोपो भवति । पूर्वस्यायमपवादः । अनुकम्पितः शेवलदत्तः शेवलिकः, शेवलियः, शेवलिलः। सुपरिकः, सुपरियः, सुपरिलः । विशालिकः, विशालियः, विशालिलः। वरुणिकः, वरुणियः, वरुणिलः । अर्यमिकः, अर्यमियः, अर्यमिलः ।

शेवलादीनां तृतीयादचो लोपः स चाकृतसन्धीनामिति वक्तव्यम् (?) । शेवलेन्द्रदत्तः, सुपर्याशीर्दत्तः-शेवलिकः, सुपरिक इति यथा स्यात्; शेवलयिकः, सुपर्यिक इति मा भूत् ॥

२२४६. अल्पे ॥ ८५ ॥ (२०४०)

परिमाणापचये अल्पशब्दः प्रकृतिविशेषणं चैतत् । अल्पत्वविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकाद्यथाविहितं प्रत्ययो भवति । अल्पं तैलं तैलकम् । घृतकम् । सर्वकम् । विश्वकम् । उच्चकैः । नीचकैः । पचतकि । जल्पतकि ॥

२२४७. ह्रस्वे ॥ ८६ ॥ (२०४१)

ह्रस्वत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्ययो भवति । दीर्घप्रतियोगी ह्रस्वः । ह्रस्वो वृक्षो वृक्षकः । प्लक्षकः । स्तम्भकः ॥

२२४८. संज्ञायां कन् ॥ ८७ ॥ (२०४२)

'ह्रस्वे' इत्येव । ह्रस्वत्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् प्रत्ययो भवति । पूर्वस्यायमपवादः । वंशकः । वेणुकः । दण्डकः ॥

२२४९. कुटीशमीशुण्डाभ्यो रः ॥ ८८ ॥ (२०४३)

'ह्रस्वे' इत्येव । संज्ञाग्रहणं नानुवर्तते, सामान्येन विधानम् । कुटो-शमी-शुण्डाभ्यो ह्रस्वार्थे द्योत्ये रः प्रत्ययो भवति । कस्यापवादः । ह्रस्वा कुटी कुटीरः। शमीरः । शुण्डारः ।

स्वार्थिकत्वेऽपि पुंल्लिङ्गता; लोकश्रयत्वाल्लिङ्गस्य (व्या. परि. ७४) ॥

२२५०. कुत्वा डुपच् ॥ ८९ ॥ (२०४४)

'ह्रस्वे' इत्येव । कुतूशब्दाद्ध्रस्वत्वे द्योत्ये डुपच्प्रत्ययो भवति । कस्यापवादः। ह्रस्वा कुतूः कुतुपम्=चर्ममयं स्नेहभाजनमुच्यते । कुतूरित्यावपनस्याख्या ॥

२२५१. कासूगोणीभ्यां ष्टरच् ॥ ९० ॥ (२०४५)

'ह्रस्वे' इत्येव । कासू-गोणीशब्दाभ्यां ह्रस्वत्वे द्योत्ये ष्टरच्प्रत्ययो भवति । कस्यापवादः। षकारो ङीषर्थः । ह्रस्वा कासूः कासूतरी । गोणीतरी । कासूरिति शक्तिः, आयुधविशेष उच्यते ॥

२२५२. वत्सोक्षाश्वर्षभेश्च तनुत्वे ॥ ९१ ॥ (२०४६)

'ह्रस्वे' इति निवृत्तम् । वत्स, उक्षन्, अश्व, ऋषभ-इत्येतेभ्यस्तनुत्वे द्योत्ये ष्टरच्प्रत्ययो भवति । यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः, तस्य तनुत्वे प्रत्ययः (म. भा.) । वत्सतरः । उक्षतरः । अश्वतरः । ऋषभतरः ।

प्रथमवया वत्सः, तस्य तनुत्वं द्वितीयवयसः प्राप्तिः । तरुण उक्षा, तस्य तनुत्वं तृतीयवयः प्राप्तिः । अश्वेनाश्वायामुत्पन्नोऽश्वः, तस्य तनुत्वमन्यपितृकता । अनड्वानृषभः, तस्य तनुत्वं भारोद्वहने मन्दशक्तिता ॥

२२५३. किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ॥ ९२ ॥ (२०४७)

किं, यत्, तत्-इत्येतेभ्यः प्रातिपदिकेभ्यो द्वयोरेकस्य निर्द्धारणे डतरच् प्रत्ययो भवति । निर्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः । जात्या, क्रियया, गुणेन, संज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्धारणम् । कतरो भवतोः कठः? कतरो भवतोः कारकः? कतरो भवतोः पटुः? कतरो भवतोर्देवदत्तः? यतरो भवतोः कारकः । यतरो भवतोः पटुः । यतरो भवतोर्देवदत्तः, ततर आगच्छतु ।

महाविभाषयाऽत्र प्रत्ययो विकल्प्यते । को भवतोर्देवदत्तः, स आगच्छतु ।

'निर्धारणे' इति विषयसप्तमीनिर्देशः । 'द्वयोः' इति समुदायान्निर्धारणविभक्तिः। 'एकस्य' इति निर्द्देशो निर्धार्यमाणनिर्द्देशः ॥

२२५४. वा बहूनां जातिपरिप्रश्ने डतमच् ॥ ९३ ॥ (२०४८)

'किंयत्तदः' इति वर्तते, 'निर्धारणे' ,'एकस्य' इति च । 'बहूनाम्' इति निर्धारणे षष्ठी । बहूनां मध्ये एकस्य निर्धारणे गम्यमाने जातिपरिप्रश्नविषयेभ्यः किमादिभ्यो वा डतमच् प्रत्ययो भवति । कतमो भवतां कठः? यतमो भवतां कठः, ततम आगच्छतु ।

वावचनमकजर्थम् - यको भवतां कठः, सक आगच्छतु ।

महाविभाषा च प्रत्ययविकल्पार्थाऽनुवर्तत एव - को भवतां कठः । यो भवतां कठः, स आगच्छतु ।

जातिपरिप्रश्न इति किम्? को भवताम् देवदत्तः ।

परिप्रश्नग्रहणं च किम एव विशेषणम्, न यत्तदोः; असम्भवान् । जातिग्रहणं तु सर्वैः सम्बध्यते ।

किमोऽस्मिन्विषये डतरमपीच्छन्ति केचित् - कतरो भवतां कठः, कतरो भवतां कालाप इति । तत्र 'कतरकतमौ जातिपरिप्रश्ने' (२.१.६३) इति वचनात्सिद्धम्॥

२२५५. एकाच्च प्राचाम् ॥ ९४ ॥

एकशब्दात्प्राचामाचार्याणां मतेन डतरच्, डतमच्-इत्येतौ प्रत्ययौ भवतः स्वस्मिन्विषये । चकारो डतरचोऽनुकर्षणार्थः । द्वयोर्निर्द्धारणे डतरच् । बहूनाम् निर्द्धारणे डतमच् । 'जातिपतिप्रश्ने' इति नानुवर्तते, सामान्येन विधानम् । एकतरो भवतोर्द्देवदत्तः । एकतमो भवतां देवदत्तः ।

प्राचांग्रहणं पूजार्थम्; विकल्पोऽनुवर्तते एव ॥

२२५६. अवक्षेपणे कन् ॥ ९५ ॥ (२०५०)

अवक्षिप्यते येन तदवक्षेपणम् । तस्मिन्वर्तमानात्प्रातिपदिकात्कन् प्रत्ययो भवति। व्याकरणकेन नाम त्वं गर्वितः । याज्ञिककेन नाम त्वं गर्वितः ।

परस्य कुत्सार्थं यदुपादीयते तदिहोदाहरणम्; यत्पुनः स्वयमेव कुत्सितम्, तत्र 'कुत्सिते' (५.३.७४) इत्यनेन कन्प्रत्ययो भवति - देवदत्तकः यज्ञदत्तक (म. भा.) इति ।

प्रागिवीयस्य पूर्णोऽवधिः ॥

२२५७. इवे प्रतिकृतौ ॥९६ ॥ (२०५१)

'कन्' इत्यनुवर्तते । इवार्थे यत्प्रातिपदिकं वर्तते तस्मात्कन्प्रत्ययो भवति । इवार्थः सादृश्यम्, तस्य विशेषणं प्रतिकृतिग्रहणम् । प्रतिकृतिः = प्रतिरूपकम्, प्रतिच्छन्दकम् । अश्व इवायमश्वप्रतिकृतिः अश्वकः । उष्ट्रकः । गर्दभकः ।

प्रतिकृताविति किम्? गौरिव गवयः ॥

२२५८. संज्ञायां च ॥ ९७ ॥ (२०५२)

'इव' इत्यनुवर्तते, 'कन्' इति च । इवार्थे गम्यमाने कन्प्रत्ययो भवति, समुदायेन चेत् संज्ञा गम्यते । अप्रतिकृत्यर्थ आरम्भः । अश्वसदृशस्य संज्ञा अश्वकः । उष्ट्रकः। गर्दभकः ॥

२२५९. लुम्मनुष्ये ॥ ९८ ॥ (२०५३)

'संज्ञायाम्' इत्येव । संज्ञायाम् विहितस्य कनो मनुष्येऽभिधेये लुब् भवति। चञ्चेव मनुष्यः चञ्च । दासी । खरकुटी (म. भा.) ।

मनुष्य इति किम्? अश्वकः । उष्ट्रकः । गर्दभकः ।

देवपथादेराकृतिगणत्वात्तस्यैवायं प्रपञ्चो वेदितव्यः ॥

२२६०. जीविकार्थे चापण्ये ॥ ९९ ॥ (२०५४)

जीविकार्थं यदपण्यं तस्मिन्नभिधेये कनो लुब् भवति । विक्रीयते यत्तत्=पण्यम्। वासुदेवः । शिवः । स्कन्दः । विष्णुः । आदित्यः ।

देवलकादीनां जीविकार्था देवप्रतिकृतय उच्यन्ते ।

अपण्य इति किम्? हस्तिकान्विक्रीणीते । अश्वकान् । रथकान् ।

देवपथादेरेवायं प्रपञ्चः ॥

२२६१. देवपथादिभ्यश्च ॥ १०० ॥ (२०५५)

'इवे प्रतिकृतौ' (५.३.९६) संज्ञायां च (५.३.९७) विहितस्य कनो देवपथादिभ्य उत्तरस्य लुब् भवति । आदिशब्दः प्रकारे । आकृतिगणश्चायम् । देवपथः । हंसपथः।

अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।
इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥

अर्चासु तावत् - शिवः, विष्णुः । चित्रकर्मणि - अर्जुनः दुर्योधनः । ध्वजेषु - कपिः, गरुडः, सिंहः ।

देवपथ । हंसपथ । वारिपथ । जलपथ । राजपथ । शतपथ । सिंहगति । उष्ट्रग्रीवा । चामरज्जु । रज्जु । हस्त । इन्द्र । दण्ड । पुष्प । मत्स्य । देवपथादिः ॥

२२६२. वस्तेर्ढञ् ॥ १०१ ॥ (२०५६)

'इव' इत्यनुवर्तते । इतः प्रभृति प्रत्ययाः सामान्येन भवन्ति, प्रतिकृतौ च, अप्रतिकृतौ च । वस्तिशब्दादिवार्थे द्योत्ये ढञ्प्रत्ययो भवति । वस्तिरिव वास्तेयः.। वास्तेयी ॥

२२६३. शिलाया ढः ॥ १०२ ॥ (२०५७)

शिलाशब्दादिवार्थे ढः प्रत्ययो भवति । शिलेव शिलेयं दधि ।

केचिदत्र ढञमपीच्छन्ति, तदर्थं योगविभागः कर्त्तव्यः । 'शिलायाः' ढञ्प्रत्ययो भवति - शैलेयम् । ततः 'ढः' - शिलेयम् ॥

२२६४. शाखादिभ्यो यत् ॥ १०३ ॥ (२०५८)

'शाखा' इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत्प्रत्ययो भवति इवार्थे । शाखेव शाख्यः । मुख्यः । जघन्यः ।

शाखा । मुख । जघन । शृङ्ग । मेघ । चरण । स्कन्ध । शिरस । उरस् । अग्र। शरण । शाखादिः ।

२२६५. द्रव्यं च भव्ये ॥ १०४ ॥ (२०५९)

द्रव्यशब्दो निपात्यते भव्येऽभिधेये । द्रुशब्दादिवार्थे यत्प्रत्ययो निपात्यते । द्रव्यम् = भव्यः, आत्मवान्; अभिप्रेतानामर्थानां पात्रभूत उच्यते । द्रव्योऽयं राजपुत्रः । द्रव्योऽयं माणवकः॥

२२६६. कुशाग्राच्छः ॥ १०५ ॥ (२०६०)

कुशाग्रशब्दादिवार्थे छः प्रत्ययो भवति । कुशाग्रमिव सूक्ष्मत्वात् कुशाग्रीया बुद्धिः । कुशाग्रीयं वस्त्रम् ॥

२२६७. समासाच्च तद्विषयात् ॥ १०६ ॥ (२०६१)

तदित्यनेन प्रकृत इवार्थो निर्दिश्यते । इवार्थविषयात्समासादपरस्मिन्निवार्थे एव छः प्रत्ययो भवति । काकतालीयम् । अजाकृपाणीयम् । अन्धकवर्त्तकीयम् ।

अतर्कितोपनतं चित्रीकरणमुच्यते । तत्कथम्? काकस्यागमनं यादृच्छिकम्, तालस्य पतनं च, तेन तालेन पतता काकस्य वधः कृतः एवमेव देवदत्तस्य तत्रागमनम्, दस्यूनां चोपनिपातः, तैश्च तस्य वधः कृतः । तत्र यो देवदत्तस्य दस्यूनां च समागमः, स काकतालसमागमसदृश इत्येक उपमार्थः । अतश्च देवदत्तस्य वधः, स काकतालवधसदृश इति द्वितीय उपमार्थः । तत्र प्रथमे समासः, द्वितीये प्रत्ययः ।

समासश्चायमस्मादेव ज्ञापकात् । न ह्यस्यापरं लक्षणमस्ति ।

'सुप्सुपा' इति वा समासः । स चैवंविषय एव ॥

२२६८. शर्करादिभ्योऽण् ॥ १०७ ॥ (२०६२)

'शर्करा' -इत्येवमादिभ्यः प्रातिपदिकेभ्य इवार्थेऽण्प्रत्ययो भवति । शर्करेव शार्करम् । कापालिकम् ।

शर्करा । कपालिका । पिष्टिक । पुण्डरीक । शतपत्त्र । गोलोमन् । गोपुच्छ। नरालि । नकुला । सिकता । शर्करादिः ॥

२२६९. अङ्गुल्यादिभ्यष्ठक् ॥ १०८ ॥ (२०६३)

अङ्गुल्यादिभ्य इवार्थे ठक् प्रत्ययो भवति । अङ्गुलीवाङ्गुलिकः । भारुजिकः।

अङ्गुलि । भरुज । बभ्रु । वल्गु । मण्डर । मण्डल । शष्कुल । कपि । उदश्वित्। गोणी । उरस् । शिखा । कुलिश । अङ्गुल्यादिः ॥

२२७०. एकशालायाष्ठजन्यतरस्याम् ॥ १०९ ॥ (२०६४)

एकशालाशब्दादिवार्थेऽन्यतरस्यां ठच्प्रत्ययो भवति । अन्यतरस्यांग्रहणेनानन्तरष्ठक् प्राप्यते । एकशालेव एकशालिकः, ऐकशालिकः॥

२२७१. कर्कलोहितादीकक् ॥ ११० ॥ (२०३५)

कर्कलोहितशब्दाभ्यामिवार्थे ईकक् प्रत्ययो भवति । कर्कः = शुक्लोऽश्वः, तेन सदृशः कार्कीकः । लौहितीकः स्फटिकः । स्वयमलोहितोऽप्युपाश्रयवशात्तथा प्रतीयते ॥

२२७२. प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ॥ १११ ॥ (३५०२)

प्रत्न, पूर्व, विश्व, इम-इत्येतेभ्य इवार्थे थाल् प्रत्ययो भवति छन्दसि विषये। 'तं प्रत्नथा पूर्वथा विश्वथेमथा' (ऋ. ५.४४.१) ।

२२७३. पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥ ११२ ॥ (२०६६)

'इवार्थे' इति निवृत्तम् । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः = पूगाः, पूगवाचिनः प्रातिपदिकादग्रामणीपूर्वात्स्वार्थे ञ्यः प्रत्ययो भवति । लौहध्वज्यः, लौहध्वज्यौ, लौहध्वजाः । शैब्यः, शैब्यौ, शिबयः । चातक्यः, चातक्यौ, चातकाः ।

अग्रामणीपूर्वादिति किम्? देवदत्तो ग्रामणीरेषां त इमे देवदत्तकाः । यज्ञदत्तकाः॥

२२७४. व्रातच्फञोरस्त्रियाम् ॥ ११३ ॥ (११००)

नानजातीया अनियतवृत्तय उत्सेधजीविनः सङ्घाः = व्राताः । व्रातवाचिभ्यः प्रातिपदिकेभ्यश्च स्वार्थे ञ्यः प्रत्ययो भवत्यस्त्रियाम् । कापोतपाक्यः, कापोतपाक्यौ,

कपोतपाकाः। व्रैहिमत्यः, वैहिमत्यौ, व्रीहिमताः च्फञः खल्वपि कौञ्जायन्यः - कौञ्जायन्यौ, कौञ्जायानाः । ब्राध्नायन्यः, ब्राध्नायन्यौ, ब्राध्नायनाः ।

अस्त्रियामिति किम्? कपोतपाकी । व्रीहिमती । कौञ्जायनी । ब्राध्नायनी ॥

२२७५. आयुधजीविसङ्घाञ् ञ्यङ् वाहीकेष्वब्राह्मणराजन्यात् ॥ ११४ ॥ (२०६७)

अयुधजीविनां सङ्घः आयुधजीविसङ्घः, स वाहीकैर्विशेष्यते । वाहीकेषु य आयुधजीविसङ्घः, तद्वाचिनः प्रातिपदिकाद् ब्राह्मणराजन्यवर्जितात्स्वार्थे ञ्यट् प्रत्ययो भवति ।

ब्राह्मणे तद्विशेषग्रहणम् । राजन्ये तु स्वरूपग्रहणमेव । टकारो ङीबर्थः, तेन 'अस्त्रियाम्' इति नानुवर्तते ।

कौण्डीबृस्यः, कौण्डीबृस्यौ, कौण्डीबृसाः । क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः। मालव्यः, मालव्यौ, मालवाः । स्त्रियाम् - कौण्डीबृसी । क्षौद्रकी । मालवी ।

आयुधजीविग्रहणं किम्? मल्लाः, शयण्डाः । सङ्घग्रहणं किम्? सम्राट् । वाहीकेष्विति किम्? शाबराः, पुलिन्दाः । अब्राह्मणराजन्यादिति किम्? गोपालका ब्राह्मणाः, शालङ्कायना राजन्याः ॥

२२७६. वृकाट्टेण्यण् ॥ ११५ ॥ (२०६८)

'आयुधजीविसङ्घात्' इति वर्तते । वृकशब्दादायुधजीविनः स्वार्थे टेण्यण् प्रत्ययो भवति। टकारो ङीबर्थः । णकारो वृद्ध्यर्थः । वार्केण्यः, वार्केण्यौ, वृकाः ।

आयुधजीविसङ्घविशेषणम् - जातिशब्दान्मा भूत्ः -

'कामक्रोधौ मनुष्याणां खादितारौ वृकाविव' ॥

२२७७. दामन्यादित्रिगर्तषष्ठाच्छः ॥ ११६ ॥ (२०६९)

'आयुधजीविसङ्घात्' इति वर्तते । दामन्यादिभ्यः प्रातिपदिकेभ्यस्त्रिगर्त-षष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः प्रत्ययो भवति । येषामायुधजीविनां सङ्घानां षडन्तर्वर्गाः, तत्र च त्रिगर्तः षष्ठः, त्रिगर्तः षष्ठो येषां ते त्रिगर्तषष्ठा इत्युच्यन्ते। तेषु चेयं स्मृतिः-

आहुस्त्रिगर्तषष्ठाँस्तु कौण्डोपरथदाण्डकी ।

कौष्टकिज्र्जालमानिश्च ब्राह्मगुप्तोऽथ जानकिः ॥ इति ।

दामन्यादिभ्यस्तावत्- दामनीयः, दामनीयौ, दामनयः । औलपीयः, औलपीयौ, उलपयः । त्रिगर्तषष्ठेभ्यः खल्वपि - कौण्डोपरथीयः, कौण्डोपरथीयौ, कौण्डोपरथाः।

दाण्डकीयः, दाण्डकीयौ, दाण्डकयः । कौष्टकीयः । जालमानीयः । ब्रह्मगुप्तीयः। जानकीयः ।

दामनी । औलपि । आकिदन्ती । काकरन्ति । काकदन्ति । शत्रुन्तपि । सार्वसेनि । बिन्दु । मौञ्जायन । उलभ । सावित्रीपुत्र । दामन्यादिः ॥

२२७८. पश्वादियौधेयादिभ्यामणञौ ॥ ११७ ॥ (२०७०)

'आयुधजीविसङ्घात्' इत्येव । पश्वादिभ्यो यौधेयादिभ्यश्च प्रातिपदिकेभ्य आयुधजीविसङ्घवाचिभ्यः स्वार्थेऽणञौ प्रत्ययौ भवतः । पार्शवः, पार्शवौ, पर्शवः। आसुरः, आसुरौ, असुराः । यौधेयः । शौक्रेयः ।

पर्शु । असुर । रक्षस् । बाल्हीक । वयस् । मरुत् । दशार्ह । पिशाच । विशाल । अशनि । कार्षापण । सत्वत् । वसु । पश्वादिः ।

यौधेय । कौशेय । क्रोशेय । शौक्रेय । शौभ्रेय । धार्तेय । वार्तेय । जाबालेय। त्रिगर्त । भरत । उसीनर । यौधेयादिः ॥

२२७९. अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णाव-च्छ्रुमदणो यञ् ॥ ११८ ॥ (२०७१)

'आयुधजीविसङ्घात्' इति निवृत्तम् । अभिजिदादिभ्योऽणन्तेभ्यः प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति । अभिजितोऽपत्यमित्यण्, तदन्ताद्यञ् । आभिजित्यः, आभिजित्यौ, आभिजिताः । वैदभृत्यः, वैदभृत्यौ, वैदभृताः । शालावत्यः, शालावत्यौ, शालावताः । शैखावत्यः। शामीवत्यः । और्णावत्यः । श्रौमत्यः ।

गोत्रप्रत्ययस्यात्राणो ग्रहणमिष्यते (म. भा. ५.३.११८ वा.१) । आभिजितो मुहूर्तः, आभिजितः स्थालीपाक इत्यत्र न भवति ॥

२२८०. ञ्यादयस्तद्राजाः ॥ ११९ ॥ (२०७२)

'पूगाञ्ञ्योऽग्रामणीपूर्वात्' (५.३.११२) इत्यतः प्रभृति ये प्रत्ययाः ते तद्राजसंज्ञा भवन्ति । तथा चैवोदाहृतम् ।

तद्राजप्रदेशाः - 'तद्राजस्य बहुषु' (२.४.६२) इत्येवमादयः ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ

पञ्चमस्याध्यायस्य तृतीयः पादः ॥

अथ पञ्चमाध्याये

चतुर्थः पादः

२२८१. पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ॥ १ ॥ (२०७३)

पादशतान्तस्य संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् प्रत्ययो भवति। तत्सन्नियोगेन चान्तस्य लोपो भवति ।

यस्येति (६.४.१४८) लोपेनैव सिद्धे पुनर्वचनमनैमित्तिकार्थम् । यस्येतिलोपः परनिमित्तकः, तस्य स्थानिवद्भावात् 'पादः पत्' (६.४.१३०) इति पद्भावो न स्यात्। अस्य त्वनैमित्तिकत्वान्न स्थानिवत्त्वम् ।

द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति । द्वे द्वे शते ददाति, द्विशतिकां ददाति.। 'तद्धितार्थ' (२.१.५१) इति समासः, ततः प्रत्ययः ।

स्वभावाच्च वुन्प्रत्ययान्तं स्त्रियामेव वर्तते ।

पादशतस्येति किम्? द्वौ द्वौ माषौ ददाति । संख्यादेरिति किम्? पादं पादं ददाति । वीप्सायामिति किम्? द्वौ पादौ ददाति । द्वे शते ददाति ।

पादशतग्रहणमनर्थकम्; अन्यत्रापि दर्शनात् (म. भा. ५.४.१ वा.१) । द्विमोदकिकां ददाति, त्रिमोदकिकां ददाति ॥

२२८२. दण्डव्यवसर्गयोश्च ॥ २ ॥ (२०७४)

दमनम्=दण्डः, दानम् = व्यवसर्गः । दण्डव्यवसर्गयोर्गम्यमानयोः पादशतान्तस्य प्रातिपदिकस्य संख्यादेर्वुन् प्रत्ययो भवति, अन्तलोपश्च । अवीप्सार्थोऽयमारम्भः । द्वौ पादौ दण्डितः द्विपदिकां दण्डितः । द्वौ पादौ व्यवसृजति द्विपदिकां व्यवसृजति । द्विशतिकां दण्डितः । त्रिशतिकाम् । द्विशतिकां व्यवसृजति। त्रिशतिकाम् ॥

२२८३. स्थूलादिभ्यः प्रकारवचने कन् ॥ ३ ॥ (२०७५)

स्थूलादिभ्यः प्रकारवचने द्योत्ये कन् प्रत्ययो भवति । जातीयरः (५.३.६९) अपवादः । प्रकारः = विशेषः । स्थूलप्रकारः स्थूलकः । अणुकः । माषकः ।

कन्प्रकरणे चञ्चद् - बृहतोरुपसंख्यानम् (म. मा. ५.४.३ वा.१) चञ्चत्प्रकारः चञ्चत्कः। बृहत्कः ।

'चञ्चबृहयोः' इति केचित्पठन्ति, तेषाम् - चञ्चकः, बृहक इति उदाहरणं द्रष्टव्यम् ।

स्थूल । अणु । माष । इषु । कृष्ण तिलेषु (ग. सू. १३७) । यव व्रीहिषु (ग. सू. १३८)। पाद्यकालावदाताः सुरायाम् (ग. सू. १३९) । गोमूत्र आच्छादने (ग्. सू. १४०) । सुराया अहौ (ग. सू. १४१) । जीर्ण शालिषु (ग. सू. १४२) । पत्रमूले समस्तव्यस्ते (ग. सू. १४३) । कुमारीपुत्र । कुमार । श्वशुर । मणि । इति स्थूलादिः॥

२२८४. अनत्यन्तगतौ क्तात् ॥ ४ ॥ (२०७६)

अत्यन्तगतिः = अशेषसम्बन्धः, तदभावोऽनत्यन्तगतिः । अनत्यन्तगतौ गम्यमानायां क्तान्तात्कन्प्रत्ययो भवति । भिन्नकः । छिन्नकः ।

अनत्यन्तगताविति किम्? भिन्नम् । छिन्नम् ॥

२२८५. न सामिवचने ॥ ५ ॥ (२०७७)

सामिवचने उपपदे क्तान्तात्कन्प्रत्ययो न भवति । सामिकृतम् । सामिभुक्तम्।

वचनग्रहणं पर्यायार्थम् । अर्धकृतम् । नेमकृतम् ।

सामिवचने प्रतिषेधानर्थक्यम्; प्रकृत्याभिहितत्वात् (म. भा. ५.४.५ वा. १)। एवं तर्हि नैवायमनत्यन्तगतौ विहितस्य कनः प्रतिषेधः, किं तर्हि? स्वार्थिकस्य।

केन पुनः स्वार्थिकः कन्विहितः? एतदेव ज्ञापकमनुमास्यते - भवति स्वार्थे कन्निति । तत्र यदेतदुच्यते - 'एवम् हि सूत्रमभिन्नतरकं भवति' , 'एतैर्हि' बहुतरकं व्याप्यते' इत्येवमादि, तदुपपन्नं भवति ॥

२२८६. बृहत्या आच्छादने ॥ ६ ॥ (२०७८)

कन्ननुवर्त्तते, न प्रतिषेधः । बृहतीशब्दादाच्छादने वर्तमानात् स्वार्थे कन्प्रत्ययो भवति । बृहतिका ।

आच्छादने इति किम्? बृहती छन्दः ॥

२२८७. अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः ॥ ७ ॥ (२०७९)

अषडक्ष, आशितङ्गु, अलङ्कर्म, अलम्पुरुष - इत्येतेभ्योऽध्युत्तरपदाच्च स्वार्थे खः प्रत्ययो भवति । अविद्यमानानि षडक्षीण्यस्येति बहुव्रीहिः, 'बहुव्रीहौ सक्थ्यक्ष्णोः' (५.४.११३) इति षच्, ततः खप्रत्ययः । अषडक्षीणो मन्त्रः । यो द्वाभ्यामेव क्रियते न बहुभिः । आशिता गावोऽस्मिन्नरण्ये आशितङ्गवीनमरण्यम् । निपातनात्पूर्वपदस्य मुमागमः ।

अलङ्कर्मन्, अलम्पुरुष इति 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा. ९३) इति समासः । अलङ्कर्मणे अलङ्कर्मीणः । अलम्पुरुषाय अलम्पुरुषीणः ।

अध्युत्तरपदस्तत्पुरुषः । अधिशब्दः शौण्डादिषु पठ्यते । राजाधीनः । नित्यश्चायं प्रत्ययः, उत्तरत्र विभाषाग्रहणात् ।

अन्येपि स्वार्थिका नित्याः प्रत्ययाः स्मर्यन्ते - तमबादयः (५.३.५५) प्राक्कनः (५.३.६४), ञ्यादयः (५.३.११२) प्राग्वुनः (५.४.१), आमादयः (५.४.११) प्राङ् मयटः (५.४.२१) बृहतीजात्यन्ताः (५.४.९) समासान्ताश्चेति (५.४.६) ॥

२२८८. विभाषाञ्चेरदिक्स्त्रियाम् ॥ ८ ॥ (२०८०)

अञ्चत्यन्तात्प्रातिपदिकाददिक्स्त्रियाम् वर्त्तमानात्स्वार्थे विभाषा खः प्रत्ययो भवति । प्राक्, प्राचीनम् । अर्वाक्, अर्वाचीनम् ।

अदिक्स्त्रियामिति किम्? प्राची दिक् । प्रतीची दिक् । दिग्ग्रहणं किम्? प्राचीना ब्राह्मणी। अर्वाचीना शिखा । स्त्रीग्रहणं किम्? प्राचीनं दिग्रमणीयम् । उदीचीनं दिग्रमणीयम् ॥

२२८९. जात्यन्ताच्छ बन्धुनि ॥ ९ ॥ (२०८१)

जात्यन्तात्प्रातिपदिकाद् बन्धुनि वर्त्तमानात्स्वार्थे छः प्रत्ययो भवति । बध्यतेऽस्मिञ्जातिरिति बन्धुशब्देन द्रव्यमुच्यते । येन ब्राह्मणत्वादिजातिर्व्यज्यते तद् बन्धु = द्रव्यमुच्यते । ब्राह्मणजातीयः, क्षत्रियजातीयः, वैश्यजातीयः - इति ब्राह्मणादिरेवोच्यते । बन्धुनीति किम्? ब्राह्मणजातिः शोभना ॥

२२९०. स्थानान्ताद् विभाषा सस्थानेनेति चेत् ॥ १० ॥ (२०८२)

स्थानान्तात्प्रातिपदिकाद्विभाषा छः प्रत्ययो भवति सस्थानेन चेत् स्थानान्तमर्थवद्भवति। सस्थान इति तुल्य उच्यते, समानं स्थानमस्येति कृत्वा । पित्रा तुल्यः पितृस्थानीयः, पितृस्थानः । मातृस्थानीयः, मातृस्थानः । राजस्थानीयः, राजस्थानः ।

सस्थानेनेति किम्? गोस्थानम् । अश्वस्थानम् ।

इतिकरणो विवक्षार्थः । तेन बहुव्रीहिः सस्थानशब्दोऽर्थमुपस्थापयति, न तत्पुरुषः।

चेच्छब्दः सम्बन्धार्थः । द्वयोर्विभाषयोर्मध्ये नित्यविधय इति पूर्वत्र नित्यविधयः।

२२९१. किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥ ११ ॥ (२००४)

किम एकारान्तात्तिङन्तादव्ययेभ्यश्च यो विहितो घः स किमेत्तिङव्ययघः, तदन्तात्प्रातिपदिकादद्रव्यप्रकर्षे आमु प्रत्ययो भवति । यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति, तथापि क्रियागुणस्थः प्रकर्षो यदा द्रव्ये उपचर्यते तदाऽयं प्रतिषेधः। क्रियागुणयोरेवायं प्रकर्षे प्रत्ययः । किंतराम् । किंतमाम् । पूर्वाह्णेतराम् । पूर्वाह्णेतमाम्। पचतितराम् । पचतितमाम् । उच्चैस्तराम् । उच्चैस्तमाम् ।

अद्रव्यप्रकर्ष इति किम्? उच्चैस्तरः पर्वतः । उच्चैस्तमः ॥

२२९२. अमु च-च्छन्दसि ॥ १२ ॥ (३५०३)

किमेत्तिङव्ययघादद्रव्यप्रकर्षे अमु प्रत्ययो भवति छन्दसि विषये । चकारादामु च । 'प्रतरं न आयुः' (ऋ. ४.१२.६) । 'प्रतरां नय' (वा. सं. १७.५१) । स्वरादिषु अम्, आम् इति पठ्यते, तस्मात्तदन्तस्याव्ययत्वम् ॥

२२९३. अनुगादिनष्ठक् ॥ १३ ॥ (२०८३)

अनुगदतीत्यनुगादी । अनुगादिन्शब्दात्स्वार्थे ठक् प्रत्ययो भवति । आनुगादिकः॥

२२९४. णच स्त्रियामञ् ॥ १४ ॥ (३२१६)

'कर्मव्यतिहारे णच् स्त्रियाम्' (३.३.४३) इति णज्विहितः, तदन्तात्स्वार्थेऽञ् प्रत्ययो भवति स्त्रियां विषये । व्यावक्रोशी । व्यावहासी वर्त्तते ।

स्त्रीग्रहणं किमर्थम्, यावता णच् स्त्रियामेव विहितः, ततः स्वार्थिकस्तत्रैव भविष्यति? एवं तर्ह्येतज् ज्ञापयति - 'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपीति' (म. भा.) । तेन गुडकल्पा द्राक्षा, तैलकल्पा प्रसन्ना, देव एव देवतेत्येवमादि उपपन्नं भवति ॥

२२९५. अणिनुणः ॥ १५ ॥ (३२१९)

'अभिविधौ भावे इनुण्' (३.३.४४) विहितः, तदन्तात्स्वार्थेऽण् प्रत्ययो भवति। सांराविणं वर्तते । सांकूटिनम् ॥

२२९६. विसारिणो मत्स्ये ॥ १६ ॥ २०८४)

विसरतीति विसारी । विसारिन्-शब्दात्स्वार्थेऽण् प्रत्ययो भवति मत्स्येऽभिधेये। वैसारिणो मत्स्यः ।

मत्स्य इति किम्? विसारी देवदत्तः ॥

२२९७. संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ १७ ॥ (२०८५)

संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्त्तमानेभ्यः स्वार्थे कृत्वसुच् mत्ययो भवति । पौनःपुन्यम्=अभ्यावृत्तिः । एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनं तत्र प्रत्ययः । पञ्चवारान् भुङ्क्ते पञ्चकृत्वः । सप्तकृत्वः ।

संख्याया इति किम्? भूरीन्वारान् भुङ्क्ते ।

क्रियाग्रहणं किमर्थम्, यावताभ्यावृत्तिः क्रियाया एव सम्भवति, न द्रव्यगुणयोः? उत्तरार्थं क्रियाग्रहणम् ।

'एकस्य सकृच्च' (५.४.१९) इत्यत्रापि क्रियैव गण्यते, नाभ्यावृत्तिः, असम्भवात्।

अभ्यावृत्तिग्रहणं किम्? क्रियामात्रगणने मा भूत् - पञ्चपाकाः, दशपाकाः।

गणनग्रहणं किमर्थम्, यावता गणनात्मिकैव संख्या? अक्रियमाणे गणनग्रहणे क्रियाभ्यावृत्तौ वर्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात् - शतवारान्भुङ्क्ते शतकृत्व इति। इह न स्यात् - शतं वाराणां भुङ्क्ते इति, न ह्यत्राभ्यावृत्तौ शतशब्दः, संख्यानमात्रवृत्तित्वात् । गणनग्रहणात्तु सर्वत्र सिद्धं भवति ।

२२९८. द्वित्रिचतुर्भ्यः सुच् ॥ १८ ॥ (२०८६)

द्वि, त्रि, चतुर् - इत्येतेभ्यः संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः सुच् प्रत्ययो भवति । कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिर्भुङ्क्ते । चतुर्भुक्तम् । चकारः स्वरार्थः ।

२२९९. एकस्य सकृच्च ॥ १९ ॥ (२०८७)

एकशब्दस्य सकृदित्ययमादेशो भवति सुच्च प्रत्ययः क्रियागणने । कृत्वसुचोऽपवादः । अभ्यावृत्तिस्त्विह न सम्भवति । सकृद् भुङ्क्ते । सकृदधीते।

एकः पाकः - इत्यत्र न भवति; अनभिधानात् ॥

२३००. विभाषा बहोर्धाऽविप्रकृष्टकाले ॥ २० ॥ (२०८८)

बहुशब्दात् क्रियाभ्यावृत्तिगणने वर्त्तमानात् विभाषा धा प्रत्ययो भवति । कृत्वसुचोऽपवादः। पक्षे सोऽपि भवति । अविप्रकृष्टग्रहणं क्रियाभ्यावृत्तिविशेषणम्। क्रियाणामुत्पत्तयश्चेदासन्नकालाः भवन्ति, न विप्रकृष्टकालाः । बहुधा दिवसस्य भुङ्क्ते। बहुकृत्वो दिवसस्य भुङ्क्ते ।

अविप्रकृष्टकाल इति किम्? बहुकृत्वो मासस्य भुङ्क्ते ॥

२३०१. तत्प्रकृतवचने मयट् ॥ २१ ॥ (२०८९)

'तत्' इति प्रथमा समर्थविभक्तिः, प्राचुर्येण प्रस्तुतम्=प्रकृतम् । प्रथमासमर्थात् प्रकृतोपाधिकेऽर्थे वर्तमानात्स्वार्थे मयट् प्रत्ययो भवति । टकारो ङीबर्थः । अन्नं प्रकृतम् अन्नमयम् । अपूपमयम् ।

अपरे तु पुनरेवं सूत्रार्थमाहुः - प्रकृतमित्युच्यतेऽस्मिन्निति प्रकृतवचनम् । तदिति प्रथमासमर्थात् प्रकृतवचनेऽभिधेये मयट् प्रत्ययो भवति । अन्नं प्रकृतमस्मिन्नन्नमयो यज्ञः । अपूपमयं पर्व । वटकमयी यात्रा ।

द्वयमपि प्रमाणम्; उभयथा सूत्रप्रणयनात् ॥

२३०२. समूहवच्च बहुषु ॥ २२ ॥ (२०९०)

'तत्प्रकृतवचने' इत्येव । बहुषु प्रकृतेषूच्यमानेषु समूहवत्प्रत्यया भवन्ति । चकारान्मयट् च । मोदकाः प्रकृताः = प्राचुर्येण प्रस्तुताः मौदकिकम् (४.२.४७), मोदकमयम् । शाष्कुलिकम्, शष्कुलीमयम् ।

अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनानि ।

द्वितीये सूत्रार्थे - मोदकाः प्रकृता अस्मिन्यज्ञे मौदकिको यज्ञः, मोदकमयः। शाष्कुलिकः, शष्कुलीमयः ॥

२३०३. अनन्तावसथेतिहभेषजाञ् ञ्यः ॥ २३ ॥ (२०९०)

अनन्तादिभ्यः स्वार्थे ञ्यः प्रत्ययो भवति । अनन्त एव आनन्त्यम् । आवसथ एवावसथ्यम् । इति ह एव ऐतिह्यम् । निपातसमुदायोयमुपदेशपारम्पर्ये वर्तते । भेषजमेव भैषज्यम् ।

महाविभाषया विकल्पते प्रत्ययः ॥

२३०४. देवतान्तात्तादर्थ्ये यत् ॥ २४ ॥ (२०९२)

देवताशब्दान्तात् प्रातिपदिकाच्चतुर्थीसमर्थात् तादर्थ्ये यत् प्रत्ययो भवति । तदर्थ एव तादर्थ्यम् । चातुर्वर्ण्यादित्वात्ष्यञ् । तदिति प्रकृत्यर्थो निर्दिश्यते । अग्निदेवतायै इदम् अग्निदेवत्यम् । पितृदेवत्यम् । वायुदेवत्यम् ॥

२३०५. पादार्घाभ्यां च ॥ २५ ॥ (२०९३)

'तादर्थ्ये' इत्येव । पादार्घशब्दाभ्यां चतुर्थीसमर्थाभ्यां तादर्थ्येऽभिधेये यत्प्रत्ययो भवति । पादार्थमुदकं पाद्यम् । अर्घ्यम् । अनुक्तसमुच्चयार्थश्चकारः । यथादर्शनमन्यत्रापि प्रत्ययो भवति - एष वै (सप्तदशाक्षरश्) छन्दस्यः प्रजापतिः (तै. सं. १.६.११.४)।

वसु, अयस्, ओक, कवि, क्षेम, उदक, वर्चस्, निष्केवल, उक्थ, जन, पूर्व, नव, सूर, मर्त, यविष्ठ - इत्येतेभ्यश्छन्दसि स्वार्थे यत्प्रत्ययो भवति । 'अग्निरीशे वसव्यस्य' (ऋ. ४.५.८८) । 'अयस्यो वसानाः' (मै. सं. २.६.८) । द्वितीयाबहुवचनस्यालुक् । अयो वसाना इत्यर्थः । 'स्व (ऋ. १.९१.१३) ओक्ये । कव्योऽसि काव्यवाहनः' (मै. सं. १.३.१३) । क्षेम्यमध्य वस्यति (तै. सं. ५.२.१.७)। वायुर्वर्चस्यः । निष्केवल्यं शंसति (काठ. सं. २८.१०) । उक्थ्यं शंसति (ऐ.ब्रा.)। जन्यं ताभिः । 'पूर्व्या विदुः' (अ. १९.३४.६) । स्तोमैर्जनयामि नव्यम् (ऋ. १.१०९.२)। सूर्यः (ऋ. १.२३.१७) । मर्त्यः (ऋ. १.१९.२) । यविष्ठ्यः (ऋ. १.३६.६) ॥

आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम् (?) ।

समशब्दादावतुप्रत्ययो वक्तव्यः । समावद् वसति (म. सं. २.२.७.७) [हसति]।

नवस्य नू आदेशः, त्नप्तप्खाश्च प्रत्ययाः (म. भा. ५.४.३० वा. ६) । नूत्नम्। नूतनम् । नवीनम् ।

नश्च पुराणे प्रात् (म. भा. वा. ७) । पुराणे वर्त्तमानात् प्रशब्दान्न प्रत्ययो भवति। चकारात् त्नप्तनप्खाश्च । प्रणम् । प्रत्नम् (ऋ. १.३६.४) । प्रतनम् । प्रीणम्।

भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः म. भा. ५.४.३६ वा. २) । भागधेयम्। रूपधेयम्। नामधेयम् ।

मित्त्राच्छन्दसि (म. भा. वा. ३) । मित्त्रधेये यतस्व (तै. सं. ४.२.७.२) ।

आग्नीध्रसाधारणादञ् (म. भा. वा. ५) । आग्नीध्रम् (तै. सं. ३.१.६.१) । साधारणम् (तै. सं. २.६.१.६) । स्त्रियां ङीप् - आग्नीध्री, साधारणी (ऋ. १.१६०.४)।

वाप्रकरणाच्च विकल्पन्ते एतान्युपसंख्यानानि, तेन यथाप्राप्तमपि भवति - आग्नीध्रा शाला, साधारणा भूरिति ।

अयवसमरुद्भ्यां छन्दस्यञ्वक्तव्यः (म. भा. वा. ६) । आयवसे रमन्ते (तै. सं. ५.२.८.३) । मारुतं शर्धाः (ऋ. १.१०५.१) ॥

२३०६. अतिथेर्ञ्यः ॥ २६ ॥ (२०९४)

'तादर्थ्ये' इत्येव । अतिथिशब्दाच्चतुर्थीसमर्थात् तादर्थ्येऽभिधेये ञ्यः प्रत्ययो भवति । अतिथये इदम् आतिथ्यम् ॥

२३०७. देवात्तल् ॥ २७ ॥ (२०९५)

'तादर्थ्ये' इति निवृत्तम् । देवशब्दात् स्वार्थे तल् प्रत्ययो भवति । देव एव देवता ॥

२३०८. अवेः कः ॥ २८ ॥ (२०९६)

अविशब्दात् स्वार्थे कः प्रत्ययो भवति । अविरेवाविकः ॥

२३०९. यावादिभ्यः कन् ॥ २९ ॥ (२०९७)

'याव' -इत्येवमादिभ्यः स्वार्थे कन् प्रत्ययो मवति । याव एव यावकः । मणिकः ।

याव । मणि । अस्थि । चण्ड । पीतस्तम्ब । ऋतावुष्णशीते (ग. सू. १४४)। पशौ लूनवियाते (ग. सू. १४५) । अणु निपुणे (ग. सू. १४६) । पुत्र कृत्रिमे (ग. सू. १४७) । स्नात वेदसमाप्तौ (ग. सू. १४८) । शून्य रिक्ते (ग. सू. १४९) । दान कुत्सिते (ग. सू. १५०) । तनु सूत्रे (ग. सू. १५१) । ईयसश्च (ग. सू. १५२)। श्रेयस्कः । ज्ञात । कुमारीक्रीडनकानि च (ग. सू. १५३) । यावादिः ॥

२३१०. लोहितान्मणौ ॥ ३० ॥ (२०९८)

लोहितशब्दान्मणौ वर्त्तमानात्स्वार्थे कन् प्रत्ययो भवति । लोहितो मणिः लोहितकः।

मणाविति किम्? लोहितः ॥

२३११. वर्णे चानित्ये ॥ ३१ ॥ (२०९९)

अनित्ये वर्णे वर्त्तमानाल्लोहितशब्दात्स्वार्थे कन्प्रत्ययो भवति । लोहितकः कोपेन । लोहितकः पीडनेन ।

अनित्य इति किम्? लोहितो गौः । लोहितं रुधिरम् ।

लोहितात्लिङ्गबाधनं वा वाक्तव्यम् (म. भा. ५.४.३० वा. १) । लोहितिका कोपेन । लोहिनिका कोपेन ॥

२३१२. रक्ते ॥ ३२ ॥ (२१००)

लाक्षादिना रक्ते यो लोहितशब्दः, तस्मात् कन्प्रत्ययो भवति । लोहितकः कम्बलः । लोहितकः पटः ।

लिङ्गबाधनं वेत्येव - लोहितिका, लोहिनिका शाटी ॥

२३१३. कालाच्च ॥ ३३ ॥ (२१०१)

'वर्णे चानित्ये' (५.४.३१), 'रक्ते' (५.४.३२) इति द्वयमप्यनुवर्तते । कालशब्दादनित्ये वर्त्तमानाद्रक्ते च कन् प्रत्ययो भवति । कालकं मुखम् वैलक्ष्येण। रक्ते - कालकः पटः । कालिका शाटी ॥

२३१४. विनयादिभ्यष्ठक् ॥ ३४ ॥ (२१०२)

'विनय' - इत्येवमादिभ्यः स्वार्थे ठक् प्रत्ययो भवति । विनय एव वैनयिकः। सामयिकः। औपयिकः । विभाषाग्रहणेन विकल्प्यते प्रत्ययः ।

विनय । समय । उपायाद् ह्रस्वत्वं च (ग. सू. १५४) । सङ्गति । कथञ्चित्। अकस्माद्। समयाचार । उपचार । समाचार । व्यवहार । सम्प्रदान। समुत्कर्ष । समूह । विशेष। अत्यय । विनयादिः ॥

२३१५. वाचो व्याहृतार्थायाम् ॥ ३५ ॥ (२१०३)

व्याहृतः = प्रकाशितोऽर्थो यस्यास्तस्यां वाचि वर्तमानाद्वाच् - शब्दात्स्वार्थे ठक् प्रत्ययो भवति । पूर्वमन्येनोक्तार्थत्वात् सन्देशवाग् = व्याहृतार्थेत्युच्यते । वाचिकं कथयति । वाचिकं श्रद्दधे ।

व्याहृतार्थायामिति किम्? मधुरा वाक् देवदत्तस्य ॥

२३१६. तद्युक्तात्कर्मणोऽण् ॥ ३६ ॥ (२१०४)

व्याहृतार्थया वाचा यत्कर्म युक्तं तदभिधायिनः कर्मशब्दात् स्वार्थेऽण् प्रत्ययो भवति । कर्मैव कार्मणम् । वाचिकं श्रुत्वा तथैव यत्कर्म क्रियते तत्कार्मणमित्युच्यते।

अण्प्रकरणे कुलालवरुडनिषादकर्मारचण्दालमित्त्रामित्रेभ्यश्छन्दस्युपसंख्यानम् (म. भा. ५.२.३६ वा. १) । कुलाल एव कौलालः (का. ३४.१.७) । वारुडः । नैषादः (वा. स. ३०.८) । कार्मारः (ऋ. १.११२.२) । चाण्डालः (वा. सं. ३०.११)। मैत्त्रः (वा. सं. ३९.५) । आमित्रः (ऋ. ६.२८.२) ।

सान्नाय्यानुजावरानुषूकाष्टुभचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्राय - णाग्रहायणसान्तपनाः (म. म.) । एतेऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्यन्ते।

['सान्नायम्' (तै. सं. २.५.३७.) । 'आनुजावरः' (तै. सं २.३.४.२) । 'आनुषूकः' (तै. सं. २.३.४.३) । 'आष्टुभः' । 'चरुष्प्राश्यः' (काठ. सं. ८.१०) । 'राक्षोघ्नम्' (तै. सं ५.१.१०.३) ।

वैयातः । वैकृतः । वारिवस्कृतः (तै. सं. ४.५.२.२) । आग्रायणः (मै. सं. २.७.१९) । आग्रहायणः सान्तपनः (वा. सं. १७.८५) ।]

२३१७. ओषधेरजातौ ॥ ३७ ॥ (२०१५)

ओषधिशब्दादजातौ वर्तमानात्स्वार्थेऽण् प्रत्ययो भवति । औषधं पिबति । औषधं ददाति। अजाताविति किम्? ओषधयः क्षेत्रे रूढा भवन्ति ॥

२३१८. प्रज्ञादिभ्यश्च ॥ ३८ ॥ (२१०६)

प्रजानातीति प्रज्ञः । 'प्रज्ञ' - इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्वार्थेऽण् प्रत्ययो भवति । प्रज्ञ एव प्राज्ञः । स्त्री-प्राज्ञी । यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा भवति । 'प्रज्ञाश्रद्धार्चावृत्तिभ्योऽणः' (५.२.१०१) इति ।

विदन्निित्यत्र पठ्यते, विदेः शत्रन्तस्य ग्रहणम्, 'विदेः शतुर्वसुः' (७.१.३६)। इत्यत एव ज्ञापकात् पाक्षिको वस्वादेशः ।

अन्यतरस्यांग्रहणं वा तत्रानुवर्तते - 'तुह्योस्तातङाशिष्यन्यतरस्याम्' (७.१.३५) इति ।

प्रज्ञ । वणिक् । उशिक् । उष्णिक् । प्रत्यक्ष । विद्वस् । विदन् । षोडन् । षोडश । विद्या । मनस् । श्रोत्र शरीरे (ग. सू. १५५) । श्रौत्रम् । जुह्वत् कृष्णमृगे (ग. सू. १५६) । चिकीर्षत् । चोर । शक । योध । वक्षस् । धूर्त्त । वस् । एत् । मरुत् । क्रुङ्। राजा । सत्वन्तु। दशार्ह । वयस् । आतुर । रक्षस् । पिशाच । अशनि । कार्षापण । देवता । बन्धु । प्राज्ञादिः ॥

२३१९. मृदस्तिकन् ॥ ३९ ॥ (२१०७)

मृच्छब्दात्स्वार्थे तिकन् प्रत्ययो भवति । विकल्पः सर्वत्रानुवर्तते । मृदेव मृत्तिका ॥

२३२०. सस्नौ प्रशंसायाम् ॥ ४० ॥ (२१०८)

प्रशंसोपाधिकेऽर्थे वर्त्तमानाद् मृच्छब्दात् स, स्न - इत्येतौ प्रत्ययौ भवतः। रूपपः (५.३.६५) अपवादः । प्रशस्ता मृद् मृत्सा । मृत्स्ना ।

नित्यश्चायं प्रत्ययः, उत्तरसूत्रेऽन्यतरस्यांग्रहणात् ॥

२३२१. वृकज्येष्ठाभ्यां तिल्तातिलौ चच्छन्दसि ॥ ४१ ॥ (३५०४)

'प्रशंसायाम्' इत्येव । वृकज्येष्ठाभ्यां प्रशंसोपाधिकेऽर्थे वर्तमानाभ्यां यथासंख्यं तिल् - तातिलौ प्रत्ययौ भवतश्छन्दसि विषये । रूपपोऽपवादः । वृकतिः (ऋ. ४.३१.४) । ज्येष्ठतातिः (ऋ. ५.४४.१) ॥

२३२२. बहवल्पार्थाच्छस्कारकादन्यतरस्याम् ॥ ४२ ॥ (२१०९)

बहवर्थादल्पार्थाच्च कारकाभिधायिनः शब्दाच् शस् प्रत्ययो भवति अन्यतरस्याम्। विशेषानभिधानाच्च सर्वं कर्मादिकारकं गृह्यते । बहूनि ददाति - बहुशो ददाति। अल्पम् ददाति - अल्पशो ददाति । बहुभिर्ददाति-बहुशो ददाति । अल्पेन - अल्पशः । बहुभ्यः - बहुशः । अल्पाय - अल्पशः । इत्येवमाद्युदाहार्यम् ।

बहवल्पार्थादिति किम्? गां ददाति । अश्वं ददाति । कारकादिति किम्? बहूनां स्वामी । अल्पानां स्वामी ।

अर्थग्रहणात् पर्यायेभ्योऽपि भवति - भूरिशो ददाति । स्तोकशो ददाति ।

बहवल्पार्थान्मङ्गलामङ्गलवचनम् (म. भा.५.४.४२ वा.१) । यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते । बहुशो ददातीत्याभ्युदयिकेषु कर्मसु । अल्पशो ददातीत्यनिष्टेषु कर्मसु ॥

२३२३. संख्यैकवचनाच्च वीप्सायाम् ॥ ४३ ॥ (२११०)

संख्यावाचिभ्यः प्रातिपदिकेभ्य एकवचनाच्च वीप्सायाम् द्योत्यायां शस् प्रत्ययो भवति अन्यतरस्याम् । द्वौ द्वौ मोदकौ ददाति द्विशः । त्रिशः । एकवचनात्खल्वपि - कार्षापणं ददाति कार्षापणशः । माषशः । पादशो ददाति ।

एकोऽर्थ उच्यते येन तदेकवचनम् । कार्षापणादयश्च परिमाणशब्दा वृत्तावेकार्था एव भवन्ति ।

संख्यैकवचनादिति किम्? घटं घटं ददाति । वीप्सायामिति किम्? द्वौ ददाति। कार्षापणं ददाति ।

'कारकात्' इत्येव - द्वयोर्द्वयोः स्वामी । कार्षापणस्य कार्षापणस्य स्वामी ॥

२३२४. प्रतियोगे पञ्चम्यास्तसिः ॥ ४४ ॥ (२१११)

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः प्रत्ययो भवति। प्रद्युम्नो वासुदेवतः प्रति । अभिमन्युरर्जुनतः प्रति ।

वाग्रहणानुवृत्तेर्विकल्पेन भवति - वासुदेवात्, अर्जुनादित्यपि भवति ।

तसिप्रकरणे आद्यादिभ्य उपसंख्यानम् (म. भा. ५.४.४४ वा. १) । आदौ आदितः । मध्यतः । पार्श्वतः । पृष्ठतः । आकृतिगणश्चायम् ॥

२३२५. अपादाने चाहीयरुहोः ॥ ४५ ॥ (२११२)

अपादाने या पञ्चमी तस्याः पञ्चम्या वा तसिः प्रत्ययो भवति । तच्चेदपादानं हीयरुहोः सम्बन्धि न भवति । ग्रामत आगच्छति, ग्रामात् । चोरतो बिभेति, चोरात्। अध्ययनतः पराजयते, अध्ययनात् ।

अहीयरुहोरिति किम्? सार्थाद्धीयते । पर्वतादवरोहति ।

हीयते इति विकारनिर्द्देशो जहातेः प्रतिपत्त्यर्थः, जिहीतेर्मा भूत् - भूमित उज्जिहीते, भूमेरुज्जिहीते ।

कथम् 'मन्त्रो हीनः स्वरतो वर्णतो वा' (पा. शि. ५२) इति ? नैषा पञ्चमी; किं तर्हि? तृतीया । स्वरेण वर्णेन वा हीन इत्यर्थः ॥

२३२६. अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः ॥ ४६ ॥ (२११३)

अतिक्रम्य ग्रहः = अतिग्रहः । अचलनम् = अव्यथनम् । क्षेपः निन्दा । अतिग्रहादिविषये या तृतीया तदन्ताद्वा तसिः प्रत्ययो भवति, सा चेत् कर्तरि न भवति । वृत्तेनातिगृह्यते वृत्ततोऽतिगृह्यते । चारित्रेणातिगृह्यते चारित्रतोऽतिगृह्यते । सुष्ठु वृत्तवानन्यानतिक्रम्य वृत्तेन गृह्यत इत्यर्थः ।

अव्यथने - वृत्तेन न व्यथते वृत्ततो न व्यथते । चारित्रेण न व्यथते चारित्रतो व्यथते। वृत्तेन न चलतीत्यर्थः ।

क्षेपे - वृत्तेन क्षिप्तो वृत्ततः क्षिप्तः । चारित्रेण क्षिप्तः न चारित्रतः क्षिप्तः.। वृत्तेन निन्दित इत्यर्थः ।

अकर्तरीति किम्? देवदत्तेन क्षिप्तः ॥

२३२७. हीयमानपापयोगाच्च ॥ ४७ ॥ (२११४)

'अकर्तरि तृतीयायाः' (५.४.४६) इत्येव । हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात्परा या तृतीया विभक्तिरकर्तरि तदन्ताद्वा तसिः प्रत्ययो भवति । वृत्तेन हीयते वृत्ततो हीयते । चारित्रेण हीयते चारित्रतो हीयते । पापयोगात् - वृत्तेन पापः वृत्ततः पापः । चारित्रेण पापः चारित्रतः पापः ।

क्षेपस्य चाविवक्षायां तत्त्वाख्यायामिदमुदाहरणम् । क्षेपे हि पूर्वेणैव सिद्धम्।

अकर्तरीत्येव - देवदत्तेन हीयते ॥

२३२८. षष्ठ्या व्याश्रये ॥ ४८ ॥ (२११५)

नानापक्षसमाश्रयः = व्याश्रयः । व्याश्रये गम्यमाने षष्ठ्यन्ताद् वा तसिः प्रत्ययो भवति। देवा अर्जुनतोऽभवन् । आदित्याः कर्णतोऽभवन् । षष्ठी चात्र पक्षापेक्षैव । अर्जुनस्य पक्षे, कर्णस्य पक्ष इत्यर्थः ।

व्याश्रय इति किम्? वृक्षस्य शाखा ॥

२३२९. रोगाच्चापनयने ॥ ४९ ॥ (२११६)

रोगः = व्याधिः । तद्वाचिनः शब्दाद्या षष्ठी विभक्तिः तदन्ताद्वा तसिः प्रत्ययो भवति अपनयने गम्यमाने । अपनयनम् = प्रतीकारः, चिकित्सेत्यर्थः । प्रवाहिकातः कुरु । कासतः कुरु । छर्दिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः ।

अपनयन इति किम्? प्रवाहिकायाः प्रकोपनं कुरु ।

२३३०. अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ॥ ५० ॥ (२११७)

कारणस्य विकाररूपेणाभूतस्य तदात्मना भावः = अभूततद्भावः । सम्पद्यतेः कर्त्ता सम्पद्य कर्ता वर्तमानात् सम्पद्यकर्तरि । प्रातिपदिकादभूततद्भावे गम्यमाने कृभ्वस्तिभिर्धातुभिर्योगे च्विः प्रत्ययो भवति । अशुक्लः शुक्लः सम्पद्यते, तं करोति शुक्लीकरोति । मलिनं शुक्लीकरोति । शुक्लीभवति । शुक्लीस्यात् । घटीकरोति मृदम् । घटीभवति । घटीस्यात् ।

अभूततद्भाव इति किम्? शुक्लं करोति । नात्र प्रकृतिर्विवक्षिता । कृभ्वस्तियोग इति किम्? अशुक्लः शुक्लो जायते ।

सम्पद्यकर्तरीति किम्, यावता अभूततद्भावसामर्थ्यात्लब्धमेव सम्पद्यकर्तृत्वम्? कारकान्तरसम्पत्तौ मा भूत् - अदेवगृहे देवगृहे सम्पद्यते । देवगृहस्याधेय-विशेषसम्बन्धेन अभूततद्भावः सत्त्वाधिकरणस्य, न कर्तुरिति ॥

२३३१. अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥ ५१ ॥ (२१२१)

अरुःप्रभृतीनामन्तस्य लोपो भवति च्विश्च प्रत्ययः । अत्र सर्वविशेषण-सम्बन्धात्पूर्वेणैव प्रत्ययः सिद्धः, लोपमात्रार्थम् आरम्भः । अनरुररुः सम्पद्यते, तं करोति अरूकरोति । अरूभवति। अरूस्यात् । मनस्-उन्मनीकरोति । उन्मनीभवति। उन्मनीस्यात् । चक्षुष्-

उच्चक्षूकरोति । उच्चक्षूभवति । उच्चक्षूस्यात् । चेतस् - विचेतीकरोति । विचेतीभवति । विचेतीस्यात् । रहस् - विरहीकरोति । विरहीभवति। विरहीस्यात् । रजस् - विरजीकरोति । विरजीभवति । विरजीस्यात् ।

२३३२. विभाषा साति कात्स्न्र्ये ॥ ५२ ॥ (२१२२)

'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि' इति सर्वमनुवर्तते । अस्मिन्विषये विभाषा सातिः प्रत्ययो भवति कात्स्न्र्ये गम्यमाने । यदि प्रकृतिः कृत्स्नां विकारात्मतामापद्यते इत्यर्थः। अग्निसाद्भवति शस्त्रम् । अग्नीभवति शस्त्रम् । उदकसाद्भवति लवणम्। उदकीभवति लवणम् । कात्स्न्र्ये इति किम्? एकदेशेन पटः शुक्लीभवति । विभाषाग्रहणं च्वेः प्रापकम् । प्रत्ययविकल्पस्तु महाविभाषयैव सिद्धः ।

२३३३. अभिविधौ सम्पदा च ॥ ५३ ॥ (२१२४)

अभिविधिः = अभिव्याप्तिः । अभिविभौ गम्यमाने च्विविषये सातिः प्रत्ययो भवति सम्पदायोगे, चकारात् कृभ्वस्तिभिश्च ।

विभाषाग्रहणानुवृत्तेश्च्विवरप्यभ्यनुज्ञायते । स तु कृभ्वस्तियोग एव भवति, न सम्पदा । अग्निसात्सम्पद्यते शस्त्रम् । अग्निसाद्भवति । उदकसात्सम्पद्यते । उदकसाद्भवति लवणम् । अग्नीभवति । उदकीभवति । अथाभिविधेः कात्स्न्र्यस्य च को विशेषः? यत्रैकदेशेनापि सर्वा प्रकृतिर्विकारमापद्यते सोऽभिविधिः । यथा-अस्यां सेनायामुत्पातेन सर्वं शस्त्रमग्निसात्सम्पद्यते, वर्षासु सर्वं लवण-मुदकसात्सम्पद्यत इति । कात्स्न्र्यं तु सर्वात्मना द्रव्यस्य विकाररूपापत्तौ भवति ।

२३३४. तदधीनवचने ॥ ५४ ॥ (२१२५)

'अभूततद्भावे' इति निवृत्तम्; अर्थान्तरोपादानात् । 'कृभ्वस्तियोगे' ,'सम्पदा च' इति वर्तते । तदधीनम् = तदायत्तम्, तत्स्वामिकमित्यर्थः । स्वामिसामान्यम्, ईशितव्यसामान्यं च तदधीनशब्देन निर्दिश्यते । स्वामिविशेषवाचिनः प्रातिपदिकादीशितव्येऽभिधेये सातिः प्रत्ययो भवति कृभ्वस्तिभिः सम्पदा च योग । राजाधीनं करोति राजसात्करोति । राजसाद्भवति । राजसात्स्यात् । राजसात्सम्पद्यते। ब्राह्मणसात्करोति । ब्राह्मणसाद्भवति । ब्राह्मणसात्स्यात् । ब्राह्मणसात्सम्पद्यते ॥

२३३५. देये त्रा च ॥ ५५ ॥ (२१२६)

'तदधीनवचने' इत्यनुवर्तते, तस्य विशेषणं देयग्रहणम् । दातव्यम् = देयम्, तदधीने देये त्रा प्रत्ययो भवति, चकारात्सातिश्च कृभ्वस्तिभिः सम्पदा च योगे । ब्राह्मणेभ्यो देयमिति यद्विज्ञातम्, तद्यदा तेषां समर्पणेन तदधीनं क्रियते तदा 'त्रा' प्रत्ययः । ब्राह्मणाधीनं देयं करोति ब्राह्मणसात्करोति । ब्राह्मणत्राकरोति । ब्राह्मणत्राभवति। ब्राह्मणत्रास्यात् । ब्राह्मणत्रासम्पद्यते ।

देये इति किम्? राजसाद्भवति राष्ट्रम् ॥

२३३६. देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥ ५६ ॥ (२१२७)

'सातिः' निवृत्तः, त्राप्रत्ययोऽनुवर्तते । देवादिभ्यः प्रातिपदिकेभ्यो द्वितीयासप्तम्यन्तेभ्यः त्रा प्रत्ययो भवति बहुलम् । 'कृभ्वस्तिभिः' इति नात्र सम्बध्यते। सामान्येन विधानम् । देवान् गच्छति देवत्रागच्छति । देवेषु वसति देवत्रावसति । मनुष्यान् गच्छति मनुष्यत्रागच्छति । मनुष्येषु वसति मनुष्यत्रावसति। एवमन्येऽप्युदाहार्याः - पुरुषान्गच्छति पुरुषत्रागच्छति । पुरुषेषु वसति पुरुषत्रावसति। पुरून्गच्छति पुरुत्रागच्छति । पुरुषु वसति पुरुत्रावसति । मर्त्यान् गच्छति मर्त्यत्रागच्छति। मर्त्येषु वसति मर्त्यत्रावसति ।

बहुलवचनादन्यत्रापि भवति - 'बहुत्रा जीवतो मनः' (पै.सं. १९.३४.४) इति ।

२३३७. अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच् ॥ ५७ ॥ (२१२८)

यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सोऽव्यक्तः । तस्यानुकरणमव्यक्तानुकरणम् । द्व्यच् अवरार्द्ध यस्य द्व्यजवरार्धम् । अवरशब्दोऽपकर्षे। यस्यापकर्षे क्रियमाणे सुष्ठु न्यूनमर्द्ध द्व्यच्कं सम्पद्यते, तस्मादव्यक्तनुकरणादनितिपराड्डाच्प्रत्ययो भवति । 'कृभ्वस्तियोगे' इत्यनुवर्तते । तस्य च द्विर्वचने कृते द्व्यजवरार्धम्, ततः प्रत्ययः ।

'डाचि बहुलं द्वे भवतः' (६.१.९९) इति विषयसप्तमी । डाचि विवक्षिते द्विर्वचनमेव पूर्वं क्रियते, पाश्चात्प्रत्ययः । पटपटाकरोति । पटपटाभवति । पटपटास्यात् । दमदमाकरोति। दमदमाभवति। दमदमास्यात् ।

अव्यक्तानुकरणादिति किम्? दृषत्करोति । द्व्यजवरार्द्धादिति किम्? श्रत्करोति। अवरग्रहणं किम्? खरटखरटाकरोति । त्रपटत्रपटाकरोति । अनिताविति किम्? पटिति करोति ।

चकारः स्वरार्थः - स्वरितबाधनार्थः । पटपटासि - अत्र 'स्वरितो वानुदात्तेऽपदादौ' (८.२.६) इति स्वरितो न भवति ।

'केचित् - 'द्व्यजवराध्र्यात्' इति यकारं पठन्ति, स स्वार्थिको विज्ञेयः ॥

२३३८. कृञो द्वितीयतृतीयशम्बबीजात्कृषौ ॥ ५८ ॥ (२१२९)

'द्वितीयतृतीयादिभ्यः शब्देभ्यः कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे, नान्यत्र। पुनः कृञ्ग्रहणं भ्वस्त्योर्निवृत्त्यर्थम् । द्वितीयाकरोति । द्वितीयं कर्षणं विलेखनं करोतीत्यर्थः । तृतीयाकरोति । शम्बाकरोति । अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कृषतीत्यर्थः । बीजाकरोति । सह बीजेन विलेखनं करोतीत्यर्थः ।

कृषाविति किम्? द्वितीयं करोति पदम् ॥

२३३९. संख्यायाश्च गुणान्तायाः ॥ ५९ ॥ (२१३०)

'कृञः' इत्यनुवर्तते, 'कृषौ' इति च । संख्यावाचिनः शब्दस्य गुणशब्दोऽन्ते=समीपे यत्र सम्भवति सा संख्या गुणान्तेत्युच्यते । तादृशात्प्रातिपदिकात्कृषावभिधेयायां डाच्प्रत्ययो भवति कृञो योगे । द्विगुणं विलेखनं करोति क्षेत्रस्य द्विगुणाकरोति क्षेत्रम् । त्रिगुणाकरोति ।

कृषाविति किम्? द्विगुणां करोति रज्जुम् ॥

२३४०. समयाच्च यापनायाम् ॥ ६० ॥ (२१३१)

'कृञः' इत्येव । 'कृषौ' इति निवृत्तम् । कर्तव्यस्यावसरप्राप्तिः = समयः, तस्यातिक्रमणम् = यापना । समयशब्दाद्यापनायां डाच् प्रत्ययो भवति कृञो योगे। समयाकरोति। समयं यापयति, कालक्षेपं करोतीत्यर्थः । यापनायामिति किम्? समयं करोति ॥

२३४१. सपत्त्रानिष्पत्त्रादतिव्यथने ॥ ६१ ॥ (२१३२)

'कृञः' इत्येव । सपत्त्रनिष्पत्त्रशब्दाभ्यामतिव्यथने डाच् प्रत्ययो भवति कृञो योगे सति। अतिव्यथनम् = अतिपीडनम् । सपत्राकरोति मृगं व्याधः । सपत्त्रं शरमस्य शरीरे प्रवेशयतीत्यर्थः । निष्पत्त्राकरोति । शरीराच्छरमपरपार्श्वे निष्क्रामयतीत्यर्थः।

अतिव्यथन इति किम्? सपत्त्रं वृक्षं करोति जलसेचकः । निष्पत्त्रं वृक्षतलं करोति भूमिशोधकः ॥

२३४२. निष्कुलान्निष्कोषणे ॥ ६२ ॥ २१३३)

'कृञः' इत्येव । निष्कुलशब्दान्निष्कोषणे वर्तमानात्कृञो योगे डाच् प्रत्ययो भवति । निष्कोषणम् = अन्तरवयवानां बहिर्निष्कासनम् । निष्कुलाकरोति पशून्। निष्कुष्णातीत्यर्थः ।

निष्कोषण इति किम्? निष्कुलान् करोति शत्रून् ।

२३४३. सुखप्रियादानुलोम्ये ॥ ६३ ॥ (२१३४)

सुख - प्रिय-शब्दभ्यामानुलोम्ये वर्तमानाभ्यां कृञो योगे डाच् प्रत्ययो भवति । आनुलोम्यम् = अनुकूलता, आराध्यचित्तानुवर्तनम् । सुखाकरोति । प्रियाकरोति। स्वाम्यादेश्चित्तमाराधयतीत्यर्थः । सुखं प्रियं वा कुर्वन्नप्यानुलोम्येऽवस्थित एवमुच्यते।

आनुलोम्य इति किम्? सुखं करोति, प्रियम् करोत्यौषधपानम् ॥

२३४४. दुःखात्प्रातिलोम्ये ॥ ६४ ॥ (२१३५)

'कृञः' इत्येव । दुःखशब्दात्प्रातिपदिकात् प्रातिलोम्ये गम्यमाने डाच् प्रत्ययो भवति कृञो योगे । प्रातिलोम्यम्=प्रतिकूलता, स्वाम्यादेश्चित्तपीडनम् । दुःखाकरोति भृत्यः ।

प्रातिलोम्य इति किम्? दुःखं करोति कदन्नम् ॥

२३४५. शूलात्पाके ॥ ६५ ॥ (२१६३)

'कृञः' इत्येव । शूलशब्दात्पाकविषये डाच् प्रत्ययो भवति कृञो योगे । शूले पचति शूलाकरोति मांसम् ।

पाक इति किम्? शूलं करोति कदन्नम् ॥

२३४६. सत्यादशपथे ॥ ६६ ॥ (२१३७)

'कृञः' इत्येव । सत्यशब्दादशपथे डाच् प्रत्ययो भवति कृञो योगे । सत्यशब्दोऽनृतप्रतिपक्षवचनः । क्वचित्तु शपथे च वर्तते - सत्येन शापयेद्विप्रमिति, तस्यायं प्रतिषेधः । सत्याकरोति वणिक् भाण्डम् । 'मयैतत्क्रेतव्यम्' - इति तथ्यं करोति ।

अशपथ इति किम्? सत्यं करोति ब्राह्मणः ॥

२३४७. मद्रात्परिवापणे ॥ ६७ ॥ (२१६८)

'कृञः' इत्येव । मद्रशब्दत्परिवापणे डाच् प्रत्ययो भवति कृञो योगे । परिवापणम् = मुण्डनम् । मद्रशब्दो मङ्गलार्थः । मङ्गलं मुण्डनं करोति, मद्राकरोति।

भद्राच्चेति वक्तव्यम् (म. भा.) । भद्राकरोति नापितः कुमारम् ।

परिवापण इति किम्? भद्रं करोति ॥

२३४८. समासान्ताः ॥ ६८ ॥ (६७६)

अधिकारोऽयम् । आ पादपरिसमाप्तेर्ये प्रत्यया विहितास्ते समासस्यान्तावयवा एकदेशा भवन्तितद्ग्रहणेन गृह्यन्त इति वेदितव्यम् । प्रयोजनमव्ययीभवद्विगु-द्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः । अधिराजम्, उपराजम् । 'नाव्ययीभावाद्' (२.४.८३) इत्येष विधेर्भवति, 'अनश्च' (५.४.१०८) इति टच् ।

द्विपुरी, त्रिपुरीति । 'द्विगोः' (४.१.२१) इति ङीब्भवति । कटकवलयिनी । शङ्खनूपुरिणी । कोशनिषदिनी । स्रक्त्वचिनी । 'द्वन्द्वोपतापगर्ह्यात्' (५.२.१२८) । इतीनिर्भवति ।

विधुरः । प्रधुरः । 'तत्पुरुषे तुल्यार्थ' (६.२.२) इत्येष स्वरो भवति । उच्चैर्धुरः। नीचैर्धुरः। 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (६.२.१) इत्येतद्भवति ॥

२३४९. न पूजनात् ॥ ६९ ॥ (९५४)

यान् शब्दानुपादाय समासान्ता विधीयन्ते 'राजाहः सखिभ्यष्टच्' (५.४.९१) इत्येवमादीन्, यदा ते पूजनात् = पूजनवचनात्परे भवन्ति तदा समासान्तो न भवति। सुराजा । अतिराजा । सुगौः। अतिगौः ।

पूजायां स्वतिग्रहणं कर्तव्यम् (म. भा. ५.४.६९ वा.१) । इह मा भूत् - परमराजः परमगव इति ।

प्राग्बहुव्रीहिग्रहणं च कर्तव्यम् (म. भा. वा.२) । 'बहुव्रीहौ सक्थ्यक्ष्णोः' (५.४.११३) इत्येवमादौ प्रतिषेधो न भवति - सुसक्थः, अतिसक्थः । स्वक्षः, अत्यक्षः (म. भा.) ॥

२३५०. किमः क्षेपे ॥ ७० ॥ (९५५)

क्षेपे यः किंशब्दस्ततः परस्य समासान्तो न भवति । किंराजः यो न रक्षति.। किंसखा योऽभिद्रुह्यति । किंगौर्यो न वहति । 'किं क्षेपे' (२.१.६४) इति समासः ।

क्षेप इति किम्? कस्य राजा किंराजः । किंसखः । किंगवः ॥

२३५१. नञस्तत्पुरुषात् ॥ ७१ ॥ (९५६)

नञः परे वक्ष्यमाणा ये राजादयस्तदन्तात् तत्पुरुषात् समासान्तो न भवति। अराजा । असखा । अगौः ।

तत्पुरुषादिति किम्? अनृचो माणवकः । अधुरं शकटम् ॥

२३५२. पथो विभाषा ॥ ७२ ॥ (९५७)

'नञस्तत्पुरुषात्' इति वर्तते । नञः परो यः पथिन्-शब्दस्तदन्तात्तत्पुरुषात् समासान्तो विभाषा न भवति । पूर्वेण नित्यः प्रतिषेधः प्राप्तो विकल्प्यते । अपथम्, अपन्थाः ॥

२३५३. बहुव्रीहौ संख्येये डजबहुगणात् ॥ ७३ ॥ (८५१)

संख्येये यो बहुव्रीहिर्वर्तते तस्मादबहुगणान्ताड्डच् प्रत्ययो भवति । 'संख्ययाव्ययासन्न' (२.२.२५) इति यो बहुर्वीहिस्तस्येदं ग्रहणम् । उपदशाः । उपविंशाः । उपत्रिंशाः । आसन्नदशाः। अदूरदशाः । अधिकदशाः । द्वित्राः । पञ्चषाः । पञ्चदशाः ।

संख्येये इति किम्? चित्रगुः । शबलगुः ।

अबहुगणादिति किम्? उपबहवः । उपगणाः । अत्र स्वरे विशेषः ।

डच्प्रकरणे सम्ख्यायास्तत्पुरुषस्योपसंख्यानं कर्तव्यं निस्त्रिंशाद्यर्थम् (म. भा. ५.४.७३ वा.१) । निर्गतानि त्रिंशतः निस्त्रिशानि वर्षाणि देवदत्तस्य । निश्चत्वारिंशानि यज्ञदत्तस्य । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः ॥

२३५४. ऋक्पूरब्धूःपथामानक्षे ॥ ७४ ॥ (९४०)

'बहुवीहौ' इति न स्वर्य्यते, सामान्येन विधानम् । ऋक्, पुर्, अप्, धुर्, पथिन् - इत्येवमन्तानाम् समासानामकारः प्रत्ययो भवति समासान्तोऽक्षे न । सामर्थ्याद्धुर एतद्विशेषणम्, ऋगादीनां न भवति । अक्षसम्बन्धिनी या धूस्तदन्तस्य न भवति । अनृचः । बह्वृचः । अर्धर्चः । पुर् - ललाटपुरम् । नान्दीपुरम् । अप् - द्वीपम् । अन्तरीपम् । समीपम्। धुर्-राजधुरा । महाधुरः । पथिन्-स्थलपथः। जलपथः (म. भा.) ।

अनक्षे इति किम्? अक्षस्य धूः अक्षधूः । दृढधूरक्षः ।

अनृचो माणवको ज्ञेयो, बह्वृचश्चरणाख्यायाम् । अनृचो माणवकः । बह्वृचो ब्राह्मणः । अनृक्कं साम, बह्वृक्कं सूक्तमित्यत्र न भवति ॥

२३५५. अच् प्रत्यन्ववपूर्वात्सामलोम्नः ॥ ७५ ॥ (९४३)

प्रति, अनु, अव-इत्येवम्पूर्वात्सामान्ताल्लोमान्ताच्च समासादच् प्रत्ययो भवति। प्रतिसामम्, अनुसामम्, अवसामम् । प्रतिलोमम्, अनुलोमम्, अवलोमम्।

कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः ।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि ॥

कृष्णभूमः । पाण्डुभूमः । उदग्भूमः । पञ्चनदम् । पञ्चगोदावरम् । 'नदीभिश्च' (२.२.४०) इत्यव्ययीभावः ।

भूमेरपि संख्यापूर्वाया अच् प्रत्यय इष्यते । द्विभूमः प्रासादः, त्रिभूमः । दशभूमकं सूत्रम्।

अन्यत्रापि च दृश्यते । पद्मनाभः । ऊर्णनाभः । दीर्घरात्रः । समरात्रः । अरात्रः।

तदेतत्सर्वमिह 'अच्' इति योगविभागं कृत्वा साधयन्ति ॥

२३५६. अक्ष्णोऽदर्शनात् ॥ ७६ ॥ (९४४)

'अच्' इत्यनुवर्तते । दर्शनादन्यत्र योऽक्षिशब्दस्तदन्तादच् प्रत्ययो भवति । लक्षणाक्षम्। पुष्कराक्षम् । 'उपमितं व्याघ्रादिभिः' (२.१.५६) इति समासः ।

अदर्शनादिति किम्? ब्राह्मणाक्षि ।

कथं कबराक्षम्, गवाक्षमिति; अश्वादीनां मुखप्रच्छादनार्थं बहुच्छिद्रं कबराक्षम्, तेनापि हि दृश्यते, गवाक्षेण च? नैष दोषः; चक्षुः पर्यायवचनो दर्शनशब्दः प्राण्यङ्गवचन इहाश्रीयते ॥

२३५७.अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहक्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवा-हर्दिवसरजसनिश्श्रेयसपुरुषायुषद्व्यायुषग्र्यजुषजातोक्षमहोक्ष-वृद्धोक्षोपशुनगोष्ठश्वाः ॥ ७७ ॥ (९४५)

अच्प्रत्ययान्ता एते शब्दा निपात्यन्ते । समासे व्यवस्थाऽपि निपातनादेव प्रतिपत्तव्या ।

आद्यास्त्रयो बहुव्रीहयः । अदृश्यान्यविद्यमानानि वा चत्वारि यस्य सोऽचतुरः। विगतानि चत्वारि यस्य स विचतुरः । शोभनानि चत्वारि यस्य स सुचतुरः ।

ततः परे एकादश द्वन्द्वाः । स्त्री च पुमांश्च स्त्रीपुंसौ । इह न भवति - स्त्रियाः पुमान् स्त्रीपुमानिति । धेनुश्च आनड्वांश्च धेन्वनडुहौ । ऋक्च साम च ऋक्सामे । वाक्च मनश्च वाङ्मनसे । अक्षि च भ्रुवौ च अक्षिभ्रुवम् । दाराश्च गावश्च = दारगवम् । ऊरू च अष्ठीवन्तौ च उर्वष्ठीवम् । टिलोपो निपात्यते । पादौ च अष्ठीवन्तौ च पदष्ठीवम् । पादस्य पद्भावो निपात्यते । नक्तं च दिवा च नक्तन्दिवम् । सप्तम्यर्थवृत्तयोरव्ययययोः समासोऽपि निपातनादेव । रात्रौ च दिवा च रात्रिन्दिवम् । पूर्वपादस्य मान्तत्वं निपात्यते । अहनि च दिवा च अहर्दिवम् । ननु च पर्यायावेतौ, कथमनयोर्द्वन्द्वः? वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः । एकोऽव्ययीभावः ।

साकल्ये-सरजसमभ्यवहरति । बहुर्वीहौ न भवति - सह रजसा सरजः=पङ्कजमिति, ततस्तत्पुरुषः ।

निश्चितं श्रेयो निःश्रेयसम् । निःश्रेयस्कः पुरुष इत्यत्र न भवति । ततः षष्ठीसमासः -

पुरुषस्यायुः पुरुषायुषम् । द्वन्द्वे न भवति - पुरुषश्च आयुश्च पुरुषायुषी । ततो द्विगू-

द्वे आयुषी समाहृते द्व्यायुषम् । त्र्यायुषम् । इह न भवति - द्वयोरायुः द्व्यायु, त्र्यायुरिति । ततो द्वन्द्वः -

ऋक्च यजुश्च ऋग्यजुषम् । इह न भवति - ऋग्यजुरस्योन्मुग्धस्य ऋग्यजुरुन्मुग्धः।

जातादिपूर्वपदा उक्षशब्दान्तास्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः। बहुव्रीहौ न भवति जातोक्षा ब्राह्मणः । महोक्षा, वृद्धोक्षेति । ततोऽव्ययीभावः-

शुनः समीपमुपशुनम् । टिलोपाभावः, सम्प्रसारणं च निपातनादेव । ततः सप्तमीसमासः-

गोष्ठे श्वा गोष्ठश्वः ।

चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानम् (म. भा. ५.४.७७ वा.१) त्रिचतुराः। उपचतुराः ॥

२३५८. ब्रह्महस्तिभ्यां वर्चसः ॥ ७८ ॥ (९४६)

ब्रह्महस्तिभ्यां परो यो वर्चः शब्दः तदन्तात् समासादच् प्रत्ययो भवति । ब्रह्मवर्चसम्। हस्तिवर्चसम् । पल्यराजभ्यां चेति वक्तव्यम् (म. भा.) । पल्यवर्चसम्। राजवर्चसम् (म.भा.) ॥

२३५९. अवसमन्धेभ्यस्तमसः ॥ ७९ ॥ (९४७)

अव, सम्, अन्ध-इत्येतेभ्यो यः परस्तमः शब्दस्तदन्तात्समासाद् अच् प्रत्ययो भवति । अवतमसम् । सन्तमसम् । अन्धतमसम् ॥

२३६०. श्वसो वसीयः श्रेयसः ॥ ८० ॥ (९४८)

श्वसः परौ यौ वसीयस्-श्रेयःशब्दौ तदन्तात्समासादच् प्रत्ययो भवति । श्वोवसीयसम् । श्वःश्रेयसम् । मयूरव्यंसकादित्वात्समासः । स्वभावाच्चेह श्वःशब्द उत्तरपदार्थस्य प्रशंसामाशीर्विषयामाचष्टे । श्वःश्रेयसं ते भूयात् । शोभनं श्रेयस्ते भूयादित्यर्थः । श्वोवसीयसमित्यस्यैवायं पर्यायः ॥

२३६१. अन्ववतप्ताद्रहसः ॥ ८१ ॥ (९४९)

अनु, अव, तप्त - इत्येतेभ्यः परो यो रहश्शब्दस्तदन्तात् समासाद् अच्प्रत्ययो भवति । अनुरहसम् । अवरहसम् । तप्तरहसम् ॥

२३६२. प्रतेरुरसः सप्तमीस्थात् ॥ ८२ ॥ (९५०)

प्रतेः परो य उरःशब्दस्तदन्तात् समासादच् प्रत्ययो भवति, स चेदुरःशब्दः सप्तमीस्थो भवति । सप्तम्यर्थे वर्त्तत इत्यर्थः । उरसि वर्त्तते । विभक्त्यर्थे 'अव्ययम्' (२.१.६) इति समासः। प्रत्युरसम् ।

सप्तमीस्थादिति किम्? प्रतिगतमुरः प्रत्युरः ॥

२३६३. अनुगवमायामे ॥ ८३ ॥ (९५१)

'अनुगवम्' इत्यच्प्रत्ययान्तं निपात्यते आयामेऽभिधेये । अनुगवम् यानम् । 'यस्य चायामः' (२.१.१६) इति समासः ।

आयाम इति किम्? गवां पश्चादनुगु ॥

२३६४. द्विस्तावा त्रिस्तावा वेदिः ॥ ८४ ॥ (९५२)

'द्विस्तावा' , 'त्रिस्तावा' इति निपात्यते वेदिश्चेद् अभिधेया भवति । अच्प्रत्ययः, टिलोपः, समासश्च निपात्यते । यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्याञ्चिद्विकृतौ तत्रेदं निपातनम् । द्विस्तावा वेदिः । त्रिस्तावा वेदिः ।

वेदिरिति किम्? द्विस्तावती, त्रिस्तावती, रज्जुः ॥

२३६५. उपसर्गादध्वनः ॥ ८५ ॥ (९५३)

उपसर्गात्परो योऽध्वन् - शब्दस्तदन्तात् समासाद् अच् प्रत्ययो भवति । प्रगतोऽध्वानं प्राध्वो रथः । प्राध्वं शकटम् । निरध्वम् । प्रत्यध्वम् ।

उपसर्गादिति किम्? परमाध्वा । उत्तमाध्वा ॥

२३६६. तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ ८६ ॥ (७८६)

अङ्गुलिशब्दान्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् प्रत्ययो भवति । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् । त्र्यङ्गुलम् । 'तद्धितार्थ' (२.१.५१) इति समासः। प्रमाणे लो द्विगोर्नित्यम्' (६.२.१२) इति मात्रचो लोपः । अव्ययादेः - निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अत्यङ्गुलम् ।

तत्पुरुषस्येति किम्? पञ्चाङ्गुलिः । अत्यङ्गुलिः पुरुषः ।

तत्पुरुषाधिकारश्च 'द्वन्द्वाच्चुदषहान्तात्' (५.४.१०६) इति यावत् ॥

२३६७. अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ ८७ ॥ (७८३)

अहरादिभ्यः परो यो रात्रिशब्दस्तदन्तस्य तत्पुरुषस्याच् प्रत्ययो भवति, चकारात्संख्यादेरव्ययादेश्च ।

अहर्ग्रहणं द्वन्द्वार्थम् (म. भा. ५.४.७८ वा.१) । अहश्च रात्रिश्च अहोरात्रः । सर्वरात्रः । एकदेशे - पूर्वं रात्रे पूर्वरात्रः । अपररात्रः । 'पूर्वपरावर' (१.१.३४) इति समासः । संख्याता रात्रिः संख्यातरात्रः । 'विशेषणं विशेष्येण' (२.१.५७) इति समासः । एवं पुण्या रात्रिः पुण्यरात्रः । संख्याव्ययादेः खल्वपि-द्वे रात्री समाहृते द्विरात्रः । त्रिरात्रः । अतिक्रान्तो रात्रिमतिरात्रः । नीरात्रः॥

२३६८. अह्नोऽह्न एतेभ्यः ॥ ८८ ॥ (७९०)

'राजाहःसखिभ्यष्टच्' (५.४.९१) इति वक्ष्यति, तस्मिन् परभूते अहन्नित्येतस्य 'अह्न' इत्ययमादेशो भवति एतेभ्य उत्तरस्य । संख्याव्ययादयः प्रकान्ताः सर्वनाम्ना प्रत्यवमृश्यन्ते । सामर्थ्याच्चाहःशब्दः पूर्वत्वेन नाश्रीयते । परिशिष्टानां ग्रहणम् । न ह्यहःशब्दात् परोऽहःशब्दः सम्भवति । संख्यायास्तावत् - द्वयोरह्नोर्भवः द्व्यह्नः। त्र्यह्नः । अव्ययात् - अहरतिक्रान्तः अत्यह्नः । निरह्नः । सर्वाह्णः । पूर्वाह्णः । अपराह्णः । संख्याताह्नः ।

पुण्यशब्दात्प्रतिषेधं वक्ष्यति (५.४.९०) ॥

२३६९. न संख्यादेः समाहारे ॥ ८९ ॥ (७९३)

संख्यादेस्तत्पुरुषस्य समाहारे वर्त्तमानस्याहःशब्दस्याह्नादेशो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । द्वे अहनी समाहृते द्व्यहः त्र्यहः ।

समाहार इति किम्? द्वयोरह्नोर्भवो द्व्यह्नः । त्र्यह्नः । 'तद्धितार्थ' (२.१.५१) इति समासे कृतेऽण (४.२.५४) आगतस्य 'द्विगोर्लुगनपत्ये' (४.१.८८) इति लुक् ॥

२३७०. उत्तमैकाभ्यां च ॥ ९० ॥ (७९४)

उत्तमैकशब्दाभ्यां च परस्याह्न इत्ययमादेशो न भवति । उत्तमशब्दोऽन्त्यवचनः पुण्यशब्दमाचष्टे; पुण्यग्रहणमेव न कृतं वैचित्र्यार्थम् । पुण्याहः । एकाहः ।

केचित् उपोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति । तेन संख्यातशब्दादपि परस्य न भवति - संख्याताह इति ॥

२३७१. राजाहस्सखिभ्यष्टच् ॥ ९१ ॥ (७८८)

राजन्, अहन्, सखि - इत्येवमन्तात्प्रातिपदिकात् टच् प्रत्ययो भवति । महाराजः । मद्रराजः । परमाहः । उत्तमाहः । राज्ञः सखा राजसखः । ब्राह्मणसखः।

इह कस्मान्न भवति - मद्राणां राज्ञी मद्रराज्ञी, लिङ्गविशिष्टपरिभाषया प्राप्नोति? लघ्वक्षरस्य पूर्वनिपाते प्राप्ते राजन्-शब्दस्य सवर्णदीर्घार्थं प्रथमप्रयोगं कुर्वन्नेतद् ज्ञापयति - यस्याकारेण सवर्णदीर्घत्वं सम्भवति तस्येदं ग्रहणमिति ॥

२३७२. गोरतद्धितलुकि ॥ ९२ ॥ (७२९)

गोशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति स चेत्तत्पुरुषस्तद्धितलुग्विषयो न भवति। परमगवः । उत्तमगवः । पञ्चगवम् । दशगवम् ।

अतद्धितलुकीति किम्? पञ्चभिर्गोभिः क्रीतः पञ्चगुः । दशगुः । 'तेन क्रीतम्' (५.१.३७) इत्यागतस्यार्हीयस्य ठकः 'अध्यर्द्धपूर्वद्विगोः' (५.१.२८) इति लुक् ।

तद्धितग्रहणं किम्? सुब्लुकि प्रतिषेधो मा भूत् - राजगवमिच्छति राजगवीयति। लुग्ग्रहणं किम्? तद्धित एव मा भूत् - पञ्चभ्यो गोभ्य आगतम् पञ्चगवरूप्यम्, पञ्चगवमयम्, । दशगवरूप्यम्, दशगवमयम् ॥

२३७३. अग्राख्यायामुरसः ॥ ९३ ॥ (७९५)

उरःशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति, स चेदुरःशब्दोऽग्राख्यायां भवति । अग्रम्=प्रधानमुच्यते । यथा शरीरावयवानामुच्यते उरः प्रधानम्, एवमन्योऽपि प्रधानभूत उरश्शब्देनोच्यते । अश्वानामुरः अश्वोरसम् । हस्त्युरसम् । रथोरसम् ।

अग्राख्यायामिति किम्? देवदत्तस्योरः देवदत्तोरः ॥

२३७४. अनोऽश्मायस्सरसां जातिसंज्ञयोः ॥ ९४ ॥ (७९६)

अनस् अश्मन्, अयस्, सरस्=इत्येवमन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति जातौ संज्ञायां च विषये । उपानसमिति जातिः । महानसमिति संज्ञा । अमृताश्म इति जातिः । पिण्डाश्म इति संज्ञा । कालायसमिति जातिः । लोहितायसमिति संज्ञा । मण्डूकसरसमिति जातिः । जलसरसमिति संज्ञा ।

'जातिसंज्ञयोः' इति किम्? सदनः । सदश्मा । सत्सरः ॥

२३७५. ग्रामकौटाभ्यां च तक्ष्णः ॥ ९५ ॥ (७९७)

'जातिसंज्ञयोः' इति नानुवर्त्तते । ग्रामकौटाभ्यां परो यस्तक्षन्शब्द-स्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । ग्रामस्य तक्षा ग्रामतक्षः । बहूनां साधारण इत्यर्थः । कुट्यां भवः कौटः, तस्य तक्षा कौटतक्षः । स्वतन्त्रः कर्मजीवी, न कस्यचित्प्रतिबद्ध इत्यर्थः ।

ग्रामकौटभ्यामिति किम्? राज्ञस्तक्षा राजतक्षा ॥

२३७६. अतेः शुनः ॥ ९६ ॥ (७९८)

अतिशब्दात्परो यः श्वन् - शब्दः तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । अतिक्रान्तः श्वानमतिश्वो वराहः । जववानित्यर्थः । अतिश्वः सेवकः । सुष्ठु स्वामिभक्त इत्यर्थः । अतिश्वी सेवा । अतिनीचेत्यर्थः ॥

२३७७. उपमानादप्राणिषु ॥ ९७ ॥ (७९९)

उपमानवाची यः श्वन् - शब्दोऽप्राणिषु वर्त्तते तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । आकर्षः श्वेव आकर्षश्वः । फलकश्वः । 'उपमितं व्याघ्रादिभिः' (२.१.५६) इति समासः । उपमानादिति किम्? न श्वा अश्वा लोष्टः । अप्राणिष्विति किम्? वानरः श्वेव वानरश्वा ॥

२३७८. उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ९८ ॥ (८००)

उत्तर, मृग, पूर्व-इत्येतेभ्यः परो यः सक्थिशब्दश्चकारादुपमानं च, तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति समासान्तः । उत्तरसक्थम् । मृगसक्थम् । उपमानात्खल्वपि -फलकमिव सक्थि फलकसक्थम् ॥

२३७९. नावो द्विगोः ॥ ९९ ॥ (८०१)

नौशब्दान्ताद् द्विगोष्टच्प्रत्ययो भवति समासान्तः । द्वे नावौ समाहृते द्विनावम्। त्रिनावम्। द्विनावधनः । पञ्चनावप्रियः । द्वाभ्यां नौभ्यामागतं द्विनावरूप्यम् । द्विनावमयम्।

द्विगोरिति किम्? राजनौः ।

अतद्धितलुकीत्येव - पञ्चभिर्नौभिः क्रीतः पञ्चनौः । दशनौः ॥

२३८०. अर्धाच्च ॥ १०० ॥ (८०२)

अर्द्धशब्दात्परो यो नौशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति । अर्द्ध नावः अर्द्धनवम्। 'अर्द्धं नपुंसकम्' (२.२.२) इति समासः । परवल्लिङ्गं न भवति; लोकाश्रयत्वाल्लिङ्गस्य ॥

२३८१. खार्याः प्राचाम् ॥ १०१ ॥ (८०३)

'द्विगोः' ,'अर्द्धाच्च' इति द्वयमप्यनुवर्त्तते । खारीशब्दान्ताद् द्विगोरर्द्धाच्च परो यः खारीशब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति प्राचामाचार्याणां मतेन । द्वे खार्यौ समाहृते द्विखारम्, द्विखारि । त्रिखारम्, त्रिखारि । अर्द्धं खार्या अर्द्धखारम्, अर्धखारी ॥

२३८२. द्वित्रिभ्यामञ्जलेः ॥ १०२ ॥ (८०४)

द्वित्रिभ्यां परो योऽञ्जलिशब्दः तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति । द्वावञ्जली समाहृतौ द्व्यञ्जलम् । त्र्यञ्जलम् ।

द्विगोरित्येव - द्वयोरञ्जलिः द्व्यञ्जलिः ।

अतद्धितलुकीत्येव - द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः । त्र्यञ्जलिः । प्राचामित्येव - द्व्यञ्जलिप्रियः ॥

२३८३. अनसन्तान्नपुंसकाच्छन्दसि ॥ १०३ ॥ (३२०५)

अन्नन्ताद्, असन्ताच्च नपुंस्कलिङ्गात्तत्पुरुषाट्टच् प्रत्ययो भवति छन्दसि विषये। हस्तिचर्मे जुहोति । 'ऋषभचर्मेऽभिषिञ्चति' (काठ. सं. ३७.३) । असन्तात् - देवच्छन्दसानि (मै. सं. ३.२.९) मनुष्यच्छन्दसानि (तै. सं. ५.४.८.६) ।

अनसन्तादिति किम्? बिल्वदारु जुहोति । नपुंसकादिति किम्? 'सुत्रामाणं पृथिवीं द्यामनेहसम्' (ऋ. १०.६३.१०)।

अनसन्तान्नपुंसकाच्छन्दसि वावचनम् (म. भा.) । 'ब्रह्मसाम' (तां. ब्रां ४.३.१)। 'देवच्छन्दः' (शां ब्रां १.५) । 'ब्रह्मसामम्' (तै. सं. १.८.१८.१) । 'देवच्छन्दसम्' (तै. सं. ५.४.८.५)॥

२३८४. ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥ (८०५)

ब्रह्मन् शब्दान्तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायते। जनपदेषु भवो जानपदः । यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मादेतत्प्रत्ययविधानम् । सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः । अवन्तिब्रह्मः । योगविभागात्सप्तमीसमासः ।

जानपदाख्यायामिति किम्? देवब्रह्मा नारदः ॥

२३८५. कुमहद्भ्यामन्यतरस्याम् ॥ १०५ ॥ (८०६)

कुमहद्भ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवत्यन्यतरस्याम् । कुब्रह्मः, कुब्रह्मा । महाब्रह्मः, महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन्शब्दः ।

२३८६. द्वन्द्वाच्चुदषहान्तात्समाहारे ॥ १०६ ॥ (९०४)

तत्पुरुषाधिकारो निवृत्तः । द्वन्द्वाच्चवर्गान्ताद्, दकारान्तात्, षकारान्तात्, हकारान्ताच्च टच् प्रत्ययो भवति, स चेद् द्वन्द्वः समाहारे वर्त्तते, नेतरेतरयोगे । वाक्च त्वक्च वाक्त्वचम् । स्रक्च त्वक्च स्रक्त्वचम् । श्रीस्रजम् । इडूर्जम् । वागूर्जम् । समिद्दृषदम्। सम्पद्विपदम् । वाग्विप्रुषम् । छत्त्रोपानहम् । धेनुगोदुहम्।

द्वन्द्वादिति किम्? तत्पुरुषान्मा भूत् - पञ्च वाचः समाहृताः पञ्चवाक् । चुदषहान्तादिति किम्? वाक्समित् । समाहार इति किम्? प्रावृट्शरदौ ॥

२३८७. अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥ (६७७)

'शरद्' इत्येवमादिभ्यः प्रातिपदिकेभ्यष्टच् प्रत्ययो भवत्यव्ययीभावे । शरदः समीपम् उपशरदम् । प्रतिशरदम् । उपविपाशम् । प्रतिविपाशम् ।

अव्ययीभाव इति किम्? परमशरत् ।

येऽत्र झयन्ताः पठ्यन्ते, तेषां नित्यार्थं ग्रहणम् । स्वर्यते चेदमव्ययीभावग्रहणं प्राग्बहुव्रीहेः ।

शरत् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनड्वह् । दिश्। दृश् । चतुर् । यद् । तद् । जराया जरश्च (ग. सू. १५७) । सदृश् । प्रतिपरसमनुभ्योऽक्ष्णः (ग. सू. १५८) । प्रत्यक्षम् । परोक्षम् । समक्षम् । अन्वक्षम्। पथिन् । प्रतिपथम् । सम्पथम् । अनुपथम् । शरदादिः ॥

२३८८. अनश्च ॥ १०८ ॥ (६७८)

अन्नन्तादव्ययीभावाट्टच् प्रत्ययो भवति समासान्तः । उपराजम् । प्रतिराजम्। अध्यात्मम् । प्रत्यात्मम् ॥

२३८९. नपुंसकादन्यतरस्याम् ॥ १०९ ॥ (६८०)

'अनः' इत्येव नपुंसकग्रहणमुत्तरपदविशेषणम् । अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः । पूर्वेण नित्ये प्राप्ते विकल्प्यते। प्रतिचर्मम्, प्रतिचर्म । उपचर्मम्, उपचर्म ॥

२३९०. नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥ (६८१)

नदी, पौर्णमासी, आग्रहायणी - इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति । नद्याः समीपम् उपनदम्, उपनदि । उपपौर्णमासम्, उपपौर्णमासि। उपाग्रहायणम्, उपाग्रहायणि॥

२३९१. झयः ॥ १११ ॥ (६८२)

'झयः' इति प्रत्याहारग्रहणम् । झयन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति । उपसमिधम्, उपसमित् । उपदृषदम्, उपदृषत् ॥

२३९२. गिरेश्च सेनकस्य ॥ ११२ ॥ (६८३)

गिरिशब्दान्तादव्ययीभावाट्टच् प्रत्ययो भवति सेनकस्याचार्यस्य मतेन । अन्तर्गिरम्, अन्तर्गिरि । उपगिरम्, उपगिरि ।

सेनकग्रहणं पूजार्थम्, विकल्पोऽनुवर्तत एव ॥

२३९३. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ॥ ११३ ॥ (८५२)

स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहेः षच् प्रत्ययो भवति समासान्तः । अयमर्थोऽभिप्रेतः । सूत्रे तु दुःश्लिष्टविभक्तीनि पदानि । दीर्घं सक्थि यस्य दीर्घसक्थः । कल्याणाक्षः । लोहिताक्षः । विशालाक्षः ।

बहुव्रीहाविति किम्? परमसक्थिः । परमाक्षिः । सक्थ्यक्ष्णोरिति किम्? दीर्घजानुः । सुबाहुः ।

स्वाङ्गादिति किम्? दीर्घसक्थि शकटम् । स्थूलाक्षिरिक्षुः ।

टचि प्रकृते षज्ग्रहणं स्वरार्थम् - चक्रसक्थी स्त्री, दीर्घसक्थी स्त्री । 'सक्थं चाक्रान्तात्' (६.२.१९८) इति विभाषयोत्तरपदस्यान्तोदात्तता विधीयते । तत्र यस्मिन्पक्षे नास्त्युदात्तत्वं तत्र ङीपि सत्युदात्तनिवृत्तिस्वरस्याभावादनुदात्तः श्रूयेत। ङीषि तु सर्वत्रोदात्तः सिद्धो भवति ।

बहुव्रीहिग्रहणमापादपरिसमाप्तेरनुवर्तते ॥

२३९४. अङ्गुलेर्दारुणि ॥ ११४ ॥ (८५३)

अङ्गुलिशब्दान्ताद्बहुव्रीहेः षच्प्रत्ययो भवति समासान्तो दारुणि समासार्थे। द्व्यङ्गुलम् दारु । त्र्यङ्गुलं दारु । पञ्चाङ्गुलम् । अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते ।

यस्य तु द्वे अङ्गुली प्रमाणं दारुणस्तत्र 'तद्धितार्थ' (२.१.५१) इति समासे कृते 'तत्पुरुषस्याङ्गुलेः' (५.४.८६) इत्यचा भवितव्यम् ।

दारुणीति किम्? पञ्चाङ्गुलिर्हस्तः ॥

२३९५. द्वित्रिभ्यां ष मूर्ध्नः ॥ ११५ ॥ (८५४)

द्वित्रिभ्यां परो यो मूर्द्धन् - शब्दस्तदन्ताद्बहुव्रीहेः षः प्रत्ययो भवति समासान्तः। द्विमूर्द्धः। त्रिमूर्द्धः ।

द्वित्रिभ्यामिति किम्? उच्चैर्मूर्द्धा ॥

२३९६. अप्पूरणीप्रमाण्योः ॥ ११६ ॥ (८३२)

पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते । 'प्रमाणी' इति स्वरूपग्रहणम्। पूरण्यन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् प्रत्ययो भवति समासान्तः । कल्याणी पञ्चमी आसां रात्रीणां ताः कल्यणीपञ्चमा रात्रयः । कल्याणीदशमा रात्रयः । स्त्री प्रमाणी एषां स्त्रीप्रमाणाः कुटुम्बिनः । भार्याप्रधाना इत्यर्थः ।

अपि प्रधानपूरणीग्रहणं कर्त्तव्यम् (म. भा. ५.४.११६ वा. १) । यत्रान्यपदार्थे पूरण्यनुप्रविशति न केवलं वर्त्तिपदार्थ एव, तत्र पूरण्याः प्राधान्यम् । पुंवद्भावप्रतिषेधेऽपि प्रधानपूरण्येव गृह्यते । इह न भवति - कल्याणी पञ्चमी अस्मिन्पक्षे कल्याणपञ्चमीकः पक्ष इति ॥

नेतुर्नक्षत्रे उपसंख्यानम् (म. भा. वा. २) । मृगो नेता आसां रात्रीणां मृगनेत्रा रात्रयः । पुष्यनेत्राः । नक्षत्र इति किम्? देवदत्तनेतृकाः ॥

छन्दसि च नेतुरुपसंख्यानम् (म. भा. वा. ३) । 'बृहस्पतिनेत्रा देवः' (तै. सं. १.८.२०.१)। सोमनेत्राः (मै. सं. २.६.३) ।

मासाद् भृतिप्रत्ययपूर्वपदाद्वुञ्विधिः (म. भा. वा. ४) । पञ्चको मासोऽस्य पञ्चकमासिकः कर्मकरः । दशकमासिकः । 'सोऽस्यांशवस्नभृतयः' (५.१.५६) इति 'संख्याया अतिशदन्तायाः कन्' (५.१.५२) ॥

२३९७. अन्तर्बहिर्भ्यां च लोम्नः ॥ ११७ ॥ (८५५)

अन्तर् बहिस्-इत्येताभ्यां परो यो लोमन्शब्दः तदन्ताद्बहुव्रीहेरप्प्रत्ययो भवति। अन्तर्गतानि लोमान्यस्यान्तर्लोमः प्रावारः । बहिर्लोमः पटः ॥

२३९८. अञ्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ ११८ ॥ (८५६)

नासिकान्ताब्दहुव्रीहेरच्प्रत्ययो भवति नासिकाशब्दश्च नसमादेशमापद्यते । 'अस्थूलात्' इति नासिकाविशेषणम् - न चेत्स्थूलशब्दात्परा नासिका भवतीति। 'संज्ञायाम्' इति समुदायोपाधिः । द्रुरिव नासिकाऽस्य द्रुणसः । वाध्रीणसः। 'पूर्वपदात्संज्ञायामगः' (८.४.३) इति णत्वम् । गोनसः ।

संज्ञायामिति किम्? तुङ्गनासिकः । अस्थूलादिति किम्? स्थूलनासिको वराहः ।

खुरखराभ्यां नस् वक्तव्यः (म. भा.) । खुरणाः । खरणाः ।

पक्षेऽच्प्रत्ययोऽपीष्यते । खुरणसः । खरणसः ॥

शितिनाः, अहिनाः, अर्चनाः - इति निगम इष्यते ॥

२३९९. उपसर्गाच्च ॥ ११९ ॥ (८५८)

उपसर्गात्परो यो नासिकाशब्दस्तदन्ताब्दहुव्रीहेरच् प्रत्ययो भवति नासिकाशब्दश्च नसमापद्यते । असंज्ञार्थं वचनम् । उन्नता नासिकाऽस्य उन्नसः प्रणसः । 'उपसर्गाद् बहुलम्' (८.४.२८) इति णत्वम् ।

वेर्ग्रो वक्तव्यः (म. भा.) । विगता नासिकाऽस्य विग्रः ॥

२४००. सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपद-प्रोष्ठपदाः ॥ १२० ॥ (८६०)

सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् । शोभनं प्रातरस्य 'सुप्रातः' (शौ. १९.८.३) । शोभनं श्वोऽस्य 'सुश्वः' । शोभनं दिवाऽस्य 'सुदिवः' (ऋ. १०.३.५) । शारेरिव कुक्षिरस्य 'शारिकुक्षः'। चतस्रोऽश्रयोऽस्य 'चतुरश्रः' । एण्या इव पादवास्य 'एणीपदः' । अजस्येव पादावस्य 'अजपदः' । प्रोष्ठः =तस्येव पादावस्य 'प्रोष्ठपदः' (तै.सं. ४.४.१०.७) ॥

२४०१. नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥ (८६१)

नञ्, दुस्, सु-इत्येतेभ्यः परौ यौ हलिसक्थिशब्दौ तदन्ताद्बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः । अविद्यमाना हलिरस्य अहलः, अहलिः । दुर्हलः, दुर्हलिः । सुहलः,

सुहलिः। अविद्यमानं सक्थ्यस्य असक्थः, असक्थिः । दुःसक्थः दुःसक्थिः । सुसक्थः, सुसक्थिः ।

'हलिशक्त्योः' इति केचित्पठन्ति । अविद्यमाना शक्तिरस्य अशक्तः, अशक्तिः। विरूपा शक्तिरस्य दुःशक्तः, दुःशक्तिः । शोभना शक्तिरस्य सुशक्तः । सुशक्तिः ॥

२४०२. नित्यमसिच् प्रजामेधयोः ॥ १२२ ॥ (८६२)

'नञ्दुस्सुभ्यः' इत्येव । नञ्, दुस्, सु-इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद् बहुव्रीहेर्नित्यमसिच् प्रत्ययो भवति समासान्तः । अविद्यमाना प्रजाऽस्य अप्रजाः । दुष्प्रजाः । सुप्रजाः । अविद्यमाना मेधाऽस्य अमेधाः । दुर्मेधाः । सुमेधाः ।

नित्यग्रहणं किम्; यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं नैव स्वर्यते? एवम् तर्हि नित्यग्रहणेनान्यत्रापि भवतीति सूच्यते ।

श्रोत्रियस्येव ते राजन्मन्दकस्याल्पमेधसः ।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥

२४०३.बहुप्रजाश्छन्दसि ॥ १२३ ॥ (३५०५)

'बहुप्रजाः' इति छन्दसि निपात्यते । 'बहुप्रजा निर्ऋतिमाविवेश' (ऋ. १.१६४.३२)।

छन्दसीति किम्? बहुप्रजो ब्राह्मणः ॥

२४०४. धर्मादनिच् केवलात् ॥ १२४ ॥ (८६३)

केवलाद् यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्प्रत्ययो भवति समासान्तः । कल्याणो धर्मोऽस्य कल्याणधर्मा । प्रियधर्मा ।

केवलादिति किम्? परमःस्वो धर्मोऽस्य परमस्वधर्मः । यद्येवम्, त्रिपदे बहुव्रीहौ प्राप्नोति - परमः स्वो धर्मोऽस्येति? एवं तर्हि केवलादिति पूर्वपदं निर्दिश्यते - केवलात्पदाद्यो धर्मशब्दः न पदसमुदायात् । तदन्ताद्बहुव्रीहेः प्रत्ययः॥

२४०५. जम्भा सुहरिततृणसोमेभ्यः ॥ १२५ ॥ (८६४)

बहुव्रीहौ समासे स्वादिभ्यः परं 'जम्भा' इति कृतसमासान्तमुत्तरपदं निपात्यते। जम्भशब्दोऽभ्यवहार्यवाची, दन्तविशेषवाची च । शोभनो जम्भोऽस्य सुजम्भा देवदत्तः । शोभानाभ्यवहार्यः, शोभनदन्तो वा । एवं हरितजम्भा । तृणजम्भा । सोमजम्भा । दन्तवचने - तृणमिव जम्भोऽस्य, सोम इव जम्भोऽस्येति विग्रहीतव्यम्।

सुहरिततृणसोमेभ्य इति किम्? पतितजम्भः ॥

२४०६. दक्षिणेर्मा लुब्धयोगे ॥ १२६ ॥ (८६५)

'दक्षिणेर्मा' इति कृतसमासान्तो निपात्यते बहुव्रीहौ समासे लुब्धयोगे । लुब्धः = व्याधः। दक्षिणमीर्ममस्य दक्षिणेर्मा मृगः । ईर्मम् = व्रणमुच्यते । दक्षिणमङ्गं व्रणितमस्य व्याधेनेत्यर्थः । लुब्धयोग इति किम्? दक्षिणेर्म शकटम्॥

२४०७. इच् कर्मव्यतिहारे ॥ १२७ ॥ (८६६)

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति । 'तत्र तेनेदमिति सरूपे' (२.२.२७) इत्ययं बहुव्रीहिर्गृह्यते । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। कचाकचि । मुसलैश्च मुसलैश्च प्रहृत्य इदं युद्धम् प्रवृत्तम् मुसलामुसलि । दण्डादण्डि । 'तिष्ठद्गुप्रभृतिषु' (२.१.१७) अयमिच्प्रत्ययः पठ्यते॥

२४०८. द्विदण्ड्यादिभ्यश्च ॥ १२८ ॥ (८६७)

द्विदण्ड्यादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति । 'द्विदण्ड्यादिभ्यः' इति तादर्थ्ये एषा चतुर्थी, न पञ्चमी । द्विदण्ड्यादर्थमिच् प्रत्ययो भवति । तथा भवति यथा द्विदण्ड्यादयः सिध्यन्तीत्यर्थः । समुदायनिपातनाच्चार्थविशेषेऽवरुध्यन्ते । द्विदण्डि प्रहरति । द्विमुसलि प्रहरति। द्विदण्डि प्रहरति । द्विमुसलि प्रहरति । इह न भवति - द्विदण्डा शालेति।

बहुव्रीह्यधिकारेऽपि तत्पुरुषात् क्वचिद्विधानमिच्छन्ति । निकुच्य कर्णौ धावति। प्रोह्य पादौ हस्तिनं वाहयति प्रोह्यपादि हस्तिनं वाहयति । मयूरव्यंसकादित्वात्समासः।

द्विदण्डि । द्विमुसलि । उभाञ्जलि । उभयाञ्जलि । उभाकर्णि । उभयाकर्णि। उभादन्ति। उभयादन्ति । उभाहस्ति । उभयाहस्ति । उभापाणि । उभयापाणि । उभाबाहु। उभयाबाहु । एकपदि । प्रोह्यपदि । आढ्यपदि । सपदि । निकुच्यकर्णि। संहतपुच्छि । उभाबाहु उभयाबाह्विति निपातनादिच्प्रत्ययलोपः । प्रत्ययलक्षणेनाव्ययीभावसंज्ञा । द्विदण्ड्यादिः ॥

२४०९. प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥ (८६८)

प्र, सम्-इत्येताभ्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवति समासान्तो बहुव्रीहौ। प्रकृष्टे जानुनी अस्य प्रज्ञुः । संज्ञुः ॥

२४१०. ऊर्ध्वाद्विभाषा ॥ १३० ॥ (८६९)

ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा 'ञुः' इत्ययमादेशो भवति । ऊर्ध्वे जानुनी अस्य ऊर्ध्वजानुः । ऊर्ध्वञुः ॥

२४११. ऊधसोऽनङ् ॥ १३१ ॥ (४८३)

ऊधःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः । कुण्डमिव ऊधोऽस्याः सा कुण्डोध्नी । घटोध्नी ।

ऊधसोऽनङि स्त्रीग्रहणं कर्तव्यम् (म. भा. ५.४.१३१ वा.१) । इह मा भूत् - महोधाः पर्जन्यः । घटोधो धैनुकम् ॥

२४१२. धनुषश्च ॥ १३२ ॥ (८७०)

धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । गाण्डीवधन्वा। पुष्पधन्वा । अधिज्यधन्वा ॥

२४१३. वा संज्ञायाम् ॥ १३३ ॥ (८७१)

धनुःशब्दान्ताद्बहुव्रीहेरनङादेशो वा भवति संज्ञायां विषये । पूर्वेण नित्यः प्राप्तो विकल्प्यते। शतधनुः, शतधन्वा । दृढधनुः, दृढधन्वा ॥

२४१४. जायाया निङ् ॥ १३४ ॥ (८७२)

जायाशब्दान्तस्य बहुव्रीहेर्निङादेशो भवति । युवतिर्जाया यस्य युवजानिः । वृद्धजानिः ॥

२४१५. गन्धस्येदुत्पूतसुसुरभिभ्यः ॥ १३५ ॥ (८७४)

उत्, पूति, सु, सुरभि-इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तो बहुव्रीहौ समासे । तकार उच्चारणार्थः । उद्गतो गन्धोऽस्य उद्गन्धिः। पूतिगन्धिः । सुगन्धिः। सुरभिगन्धिः ।

एतेभ्य इति किम्? तीव्रगन्धो वातः ।

गन्धस्येत्त्वे तदेकान्तग्रहणम् (म. भा. ५.४.१३५ वा. १) । तेन शोभनो गन्धोऽस्य सुगन्ध आपणिकः ॥

२४१६. अल्पाख्यायाम् ॥ १३६ ॥ (८७५)

अल्पाख्यायां यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे। सूपोऽल्पोऽस्मिन् सूपगन्धि भोजनम् । अल्पमस्मिन् भोजने घृतम् - घृतगन्धि । क्षीरगन्धि । अल्पपर्यायो गन्धशब्दः ॥

२४१७. उपमानाच्च ॥ १३७ ॥ (८७६)

उपमानात्परो यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे। पद्मस्येव गन्धोऽस्य पद्मगन्धिः । उत्पलगन्धिः । करीषगन्धिः ॥

२४१८. पादस्य लोपोऽहस्त्यादिभ्यः ॥ १३८ ॥ (८७७)

'उपमानात्' इत्येव । उपमानाद्धस्त्यादिवर्जितात्परस्य पादशब्दस्य लोपो भवति समासान्तो बहुव्रीहौ समासे । स्थानिद्वारेण लोपस्य समासान्तता विज्ञायते। व्याघ्रस्येव पादावस्य व्याघ्रपात् । सिंहपात् ।

अहस्त्यादिभ्य इति किम्? हस्तिपादः । कटोलपादः ।

हस्तिन् । कटोल । गण्डोल । गण्डोलक । महिला । दासी । गणिका । कुसूल। हस्त्यादिः ॥

२४१९. कुम्भपदीषु च ॥ १३९ ॥ (८७८)

कुम्भपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यन्ते, तत्रैवं सूत्रं ज्ञेयम् । पादस्य लोपो भवति कुम्भपद्यादिविषये यथा, कुम्भपद्यादयः सिद्ध्यन्ति । समुदायपाठस्य च प्रयोजनं विषयनियमः - स्त्रियामेव, तत्र ङीष्प्रत्यये एव, नान्यदा । कुम्भपदी । शतपदी ।

यच्चेहोपमानपूर्वम्, संख्यापूर्वं च पठ्यते, यस्य सिद्धे लोपे नित्यङीबर्थं वचनम्। 'पादोऽन्यतरस्याम्' (४.१.८) इति विकल्पो न भवति ।

कुम्भपदी । शतपदी । अष्टापदी । जालपदी । एकपदी । मालापदी । मुनिपदी । गोधापदी । गोपदी । कलशीपदी । घृतपदी । दासीपदी । निष्पदी । आर्द्रपदी । कुणपदी । कृष्णपदी । द्रोणपदी । द्रुपदी । शकृत्पदी । सूपपदी । पञ्चपदी । अर्वपदी । स्तनपदी । कुम्भपद्यादिः ॥

२४२०. संख्यासुपूर्वस्य ॥ १४० ॥ (८७९)

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः। द्वौ पादावस्य द्विपात् । त्रिपात् । शोभनौ पादावस्य सुपात् ॥

२४२१. वयसि दन्तस्य दतृ ॥ १४१ ॥ (८८०)

संख्यापूर्वस्य सुपूर्वस्य च बहुर्वीहेर्यो दन्तशब्दस्तस्य 'दतृ' इत्ययमादेशो भवति समासान्तो वयसि गम्यमाने । ऋकार उगित्कार्यार्थः । द्वौ दन्तावस्य द्विदन्। त्रिदन् । चतुर्दन्। शोभना दन्ता अस्य समस्ता जाताः सुदन् कुमारः ।

वयसीति किम्? द्विदन्तः कुञ्जरः । सुदन्तो दाक्षिणात्यः ॥

२४२२. छन्दसि च ॥ १४२ ॥ (३५०)

छन्दसि च दन्तशब्दस्य 'दतृ' इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे। पत्त्रदतमालभेत । 'उभयदत आलभते' (ऋ. १०.९०.१०) ॥

२४२३. स्त्रियां संज्ञायाम् ॥ १४३ ॥ (८८१)

स्त्रियामन्यपदार्थे संज्ञायां विषये दन्तशब्दस्य 'दतृ' इत्ययमादेशो भवति । अयोदती । फालदती ।

संज्ञायामिति किम्? समदन्ती । स्निग्धदन्ती ॥

२४२४. विभाषा श्यावारोकाभ्याम् ॥ १४४ ॥ (८८२)

श्याव, अरोक-इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशो भवति विभाषा समासान्तो बहुव्रीहौ । श्यावदन्, श्यावदन्तः । अरोकदन्, अरोकदन्तः । अरोकः=निर्दीप्तिः ।

संज्ञायामित्येव - श्यावदन्तः । अरोकदन्तः ॥

२४२५. अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥ (८८३)

'विभाषा' इत्येव । अग्रान्ताच्छब्दात्, शुद्ध, शुभ्र, वृष, वराह - इत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा 'दतृ' इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे। कुड्मलाग्रदन्, कुड्मलाग्रदन्तः । शुद्धदन्, शुद्धदन्तः । शुभ्रदन्, शुभ्रदन्तः । वृषदन्, वृषदन्तः । वराहदन्, वराहदन्तः ।

अनुक्तसमुच्चयार्थश्चकारः । अहिदन्, अहिदन्तः । मूषिकदन्, मूषिकदन्तः। गर्दभदन्, गर्दभदन्तः । शिखरदन्, शिखरदन्तः ॥

२४२६. ककुदस्यावस्थायां लोपः ॥ १४६ ॥ (८८४)

ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तोऽवस्थायां गम्यमानायाम्। कालादिकृता वस्तुधर्मा वयः प्रभृतयः = अवस्था इत्युच्यते । असञ्जातं ककुदमस्य असञ्जातककुत् । बाल इत्यर्थः । पूर्णककुत् । मध्यमवया इत्यर्थः । उन्नतककुत्। वृद्धवया इत्यर्थः । स्थूलककुत् । बलवानित्यर्थः । यष्टिककुत् । नातिस्थूलो नातिकृश इत्यर्थः । अवस्थायामिति किम्? श्वेतककुदः ॥

२४२७. त्रिककुत्पर्वते ॥ १४७ ॥ (८८५)

त्रिककुदि बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते पर्वतेऽभिधेये। त्रीणि ककुदान्यस्य त्रिककुत्पर्वतः । ककुदाकारं पर्वतस्य शृङ्गम्=ककुदमित्युच्यते। न च सर्वस्त्रिशिखरः पर्वतस्त्रिककुत् । किं तर्हि? संज्ञैषा पर्वतविशेषस्य ।

पर्वत इति किम्? त्रिककुदोऽन्यः ॥

२४२८. उद्विभ्यां काकुदस्य ॥ १४८ ॥ (८८६)

उत्, वि - इत्येताभ्यां परस्य काकुदशब्दस्य लोपो भवति बहुव्रीहौ समासे। उद्गतं काकुदमस्य उत्काकुत् । विकाकुत् । तालु = काकुदमुच्यते ॥

२४२९. पूर्णाद्विभाषा ॥ १४९ ॥ (८८७)

पूर्णात्परस्य काकुदशब्दस्य विभाषा लोपो भवति बहुव्रीहौ समासे । पूर्णं काकुदमस्य पूर्णकाकुत्, पूर्णकाकुदः ॥

२४३०. सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥ (८८८)

सुहृत्, दुर्हृत्-इति निपात्यते यथासंख्यं मित्रामित्रयोरभिधेययोः । सुशब्दात्परस्य हृदयशब्दस्य हृद्भावो निपात्यते बहुव्रीहौ, तथा दुःशब्दात्परस्य । शोभनं हृदयमस्य सुहृत् मित्रम् । दुष्टं हृदयमस्य दुर्हृदमित्रम् ।

मित्रामित्रयोरिति किम्? सुहृदयः कारुणिकः । दुर्हृदयश्चोरः ॥

२४३१. उरःप्रभृतिभ्यः कप् ॥ १५१ ॥ (८८९)

उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति । व्यूढमुरोऽस्य व्यूढोरस्कः । प्रियसर्पिष्कः । अवमुक्तोपानत्कः ।

पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीरिति विभक्त्यन्ताः पठ्यन्ते, न प्रातिपदिकानि। तत्रेदं प्रयोजनम्-एकवचनान्तानामेव ग्रहणमिह विज्ञायेत, द्विवचनबहुवचनान्तानां मा भूदिति । तत्र 'शेषाद्विभाषा' (५.४.१५४) इति विकल्प एव भवतीति । द्विपुमान्, द्विपुंस्कः । बहुपुमान्, बहुपुंस्कः ।

उरस् । सर्पिस् । उपनाह् । पुमान् । अनड्वान् । नौः । पयः । लक्ष्मीः । दधि। मधु । शालिः । अर्थान्नञः । अनर्थकः । उरःप्रभृति ॥

२४३२. इनः स्त्रियाम् ॥ १५२ ॥ (८९०)

इन्नन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति स्त्रियां विषये । बहवो दण्डिनोऽस्यां शालायां बहुदण्डिका शाला । बहुच्छत्रिका । बहुस्वामिका नगरी । बहुवाग्मिका सभा ।

स्त्रियामिति किम्? बहुदण्डी राजा । बहुदण्डिकः । 'शेषाद्विभाषा' इत्येतद्भवति॥

२४३३. नद्यृतश्च ॥ १५३ ॥ (८३३)

नद्यन्ताद्बहुव्रीहेऋकारान्ताच्च कप् प्रत्ययो भवति । बह्व्यः कुमार्योऽस्मिन्देशे बहुकुमारिको देशः । बहुब्रह्मबन्धूकः । ऋतः खल्वपि - बहुकर्तृकः ।

तकारः मुखसुखोच्चारणार्थः ॥

२४३४. शेषाद्विभाषा ॥ १५४ ॥ (८९१)

यस्माद्बहुव्रीहेः समासान्तो न विहितः स शेषः, तस्माद्विभाषा कप्प्रत्ययो भवति । बह्व्यः खट्वा अस्मिन् बहुखट्वकः बहुमालकः, बहुवीणकः । बहुखट्वाकः, बहुमालाकः, बहुवीणाकः । बहुखट्वः, बहुमालः, बहुवीणः ।

कथमनृक्कं साम, बह्वृक्कं सूक्तमिति, यावता विहितोऽत्र सामान्येन समासान्तः 'ऋक्पूः' (५.४.७४) इति? नैतदस्ति; विशेषे स इष्यते - 'अनृचो माणवको ज्ञेयो बह् वृचश्चरणाख्याम्' इति । शेषादिति किम्? प्रियपथः । प्रियधुरः ॥

२४३५. न संज्ञायाम् ॥ १५५ ॥ (८९३)

संज्ञायां विषये बहुव्रीहौ समासे कप् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिद्ध्यते । विश्वे देवा अस्य विश्वदेवः । विश्वयशाः ॥

२४३६. ईयसश्च ॥ १५६ ॥ (८९४)

ईयसन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति । सर्वा प्राप्तिः प्रतिषिध्यते । बहवः श्रेयांसोऽस्य बहुश्रेयान् । 'शेषाद्विभाषा' (५.४.१५४) इत्यस्य प्रतिषेधः । बहव्यः श्रेयस्यः अस्य बहुश्रेयसी । 'नद्यृतश्च' (५.४.१५३) इत्यस्य प्रतिषेधः । ह्रस्वत्वमपि न भवति; 'ईयसो बहुव्रीहौ पुंवत्' इति वचनात् ॥

२४३७. वन्दिते भ्रातुः ॥ १५७ ॥ (७९५)

वन्दितेऽर्थे यो भ्रातृशब्दो वर्तते तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवती । वन्दितः = स्तुतः, पूजित इत्युच्यते । शोभनो भ्राताऽस्य सुभ्राता ।

वन्दित इति किम्? मूर्खभ्रातृकः । दुष्टभ्रातृकः ॥

२४३८. ऋतश्छन्दसि ॥ १५८ ॥ (३५०८)

ऋवर्णान्ताद् बहुव्रीहेश्छन्दसि विषये कप् प्रत्ययो न भवति । हता माताऽस्य 'हतमाता' (अथर्व. २.३२.४) । हतपिता । 'हतस्वसा' (अथर्व. २.६७.३) । सुहोता (ऋ. ७.६७.३) ॥

२४३९. नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥ (८९६)

स्वाङ्गे यौ नाडी-तन्त्रीशब्दौ तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति । बह्व्यो नाड्योऽस्य बहुनाडिः कायः । बहुतन्त्रीर्ग्रीवा । धमनीवचनस्तन्त्रीशब्दः ।

स्वाङ्गे इति किम्? बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ॥

२४४०. निष्प्रवाणिश्च ॥ १६० ॥ (८९७)

'निष्प्रवाणिः' इति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते । प्रोयतेऽऽस्यामिति प्रवाणी। प्रवयन्ति तयेति वा प्रवाणी । करणसाधनोऽयं ल्युट् । तन्तुवायशलाका भण्यते । निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः । निष्प्रवाणिः कम्बलः = अपनीतशलाकः समाप्तवानः प्रत्यग्रो नवक उच्यते ॥

॥ इति श्रीवामनविरचितायां काशिकावृत्तौ
पञ्चमाध्यायस्य चतुर्थः पादः ॥ ४ ॥

॥ समाप्तश्चायं पञ्चमाध्यायः ॥

अथ षष्ठाध्याये

प्रथमः पादः

२४४१. एकाचो द्वे प्रथमस्य ॥ १ ॥ (२१७५)

अधिकारोऽयम् । 'एकाचः' इति च, 'द्वे' इति च, प्रथमस्य' इति च त्रितयमधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः प्राक्सम्प्रसारणविधानात् (६/१/१२) तत्र, 'एकाचः प्रथमस्य द्वे भवतः' इत्येवं तद्वेदितव्यम् ।

वक्ष्यति - 'लिटि धातोरनभ्यासस्य' (६.१.८) इति । तत्र धातोरवयवस्यानभ्यासस्य प्रथमस्यैकाचो द्वे भवतः । जजागार । पपाच । इयाय। आर । 'एकाचः' इति बहुव्रीहिनिर्देशः।

एकोऽच् यस्य सोऽयमेकाच्-इत्यवयवेन विग्रहः ।

तत्र समुदायः समासार्थः । आभ्यन्तरश्च समुदायेऽवयवो भवतीति साच्कस्यैव द्विर्वचनं भवति ।

एवं च - पच् इत्यत्र येनैवाचा समुदाय एकाच्, तेनैव तदवयवोऽच्छब्दः पशब्दश्च । तत्र पृथगवयवैकाचो न द्विरुच्यन्ते, किं तर्हि? समुदायैकाजेव ।

तथा हि - सकृच्छास्त्रप्रवृत्त्या सावयवः समुदायोऽनुगृह्यते । पपाचेत्यत्र प्रथमत्वं व्यपदेशिवद्भावात् । इयाय, आर-इत्यत्रैकाच्त्वमपि व्यपदेशिवद्भावादेव ।

द्विःप्रयोगश्च द्विर्वचनमिदम् । आवृत्तिसंख्या हि 'द्वे' इति विधीयते । तेन स एव शब्दो द्विरुच्चार्यते, न च शब्दान्तरं तस्य स्थाने विधीयते ॥

२४४२. अजादेर्द्वितीयस्य ॥ २ ॥ (२१७६)

प्रथमद्विर्वचनापवादोऽयम् । अजादेर्द्वितीयस्यैकाचो द्विर्वचनमधिक्रियते । अच् आदिर्यस्य धातोस्तदवयवस्य द्वितीयस्यैकाचो द्वे भवतः । अटिटिषति । अशिशिषति। अर्त्तेः 'स्मिपूङ्ञ्ज्वशां सनि' (७.२.७४) इति इट् क्रियते, तस्मिन् कृते गुणे च रपरत्वे च 'द्विर्वचनेऽचि' (१.१.५९) इति स्थानिवद्भावः प्राप्नोति । तत्र प्रतिविधानम् - द्विर्वचननिमित्तेऽचीत्युच्यते । न चात्र द्विर्वचननिमित्तमिट्, किं तर्हि? कार्यी । न च कार्यी निमित्तत्वेनाश्रीयते । तथा हि - क्ङिन्निमित्तयोर्गुणवृद्ध्योः प्रतिषेधो विधीयमानः शयितेत्यत्र न भवति, न हि कार्यिणः शीङो गुणं प्रति निमित्तभाव इति ।

अत्र केचिदजादेरिति कर्मधारयात्पञ्चमीमिच्छन्ति - अच्चासावादिश्चेत्यजादिः, तस्मादजादेरुत्तरस्यैकाचो द्वे भवत इति । तेषाम् 'द्वितीयस्य' इति विस्पष्टार्थं द्रष्टव्यम् ॥

२४४३. न न्द्राः संयोगादयः ॥ ३ ॥ (२४४६)

'द्वितीयस्य' इति वर्त्तते । द्वितीयस्यैकाचोऽवयवभूतानां न्द्राणां तदन्तर्भावात् प्राप्तं द्विर्वचनं प्रतिषिध्यते । नकारदकाररेफा द्वितीयैकाचोऽवयवभूताः संयोगादयो न द्विरुच्यन्ते । उन्दिदिषति । अड्डिडिषति । अर्चिचिषति ।

न्द्रा इति किम्? ईचिक्षिषते । संयोगादय इति किम्? प्राणिणिषति । 'अनितेः' (८.४.१९) 'उभौ साभ्यासस्य' (८.४.२१) इति णत्वम् ।

अजादेरित्येव - दिद्रासति ।

केचिदजादेरित्यपि पञ्चम्यन्तं कर्मधारयमनुवर्त्तयन्ति । तस्य प्रयोजनम्- इन्दिद्रीयिषतीति । अजादेरनन्तरत्वाभावाद् दकारो द्विरुच्यत एव, नकारो न द्विरुच्यते। इन्द्रमिच्छति, क्यच्, तदन्तात् इन्द्रीयितुमिच्छतीति सन् ॥

बकारस्याप्ययं प्रतिषेधो वक्तव्यः । उब्जिजिषति । यदा बकारोपध उब्जिरुपदिश्यते तदायं प्रतिषेधः । दकारोपधोपदेशे तु न वक्तव्यः । बत्वं तु तदा दकारस्य विधातव्यम् ।

यकारपरस्य रेफस्य प्रतिषेधो न भवतीति वक्तव्यम् । अरार्यते । अर्तेः 'अट्यर्तिशूर्णोतीनामुपसंख्यानम्' (७.४.८२) इति यङ् । तत्र 'यङि च' (७.४.३०) इति गुणः, ततो द्विर्वचनम् ।

ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम् (म. भा. ६.१.३ वा २) । कस्य तृतीयस्य? केचिदाहुर्व्यञ्जनस्येति-ईर्ष्यियिषति । अपरे पुनः 'तृतीयस्यैकाचः' इति व्याचक्षते- ईर्ष्यिषिषति ।

कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् (म. भा. वा. ३) । कण्डूयियिषति । असूयियिषति ।

वा नामधातूनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् (म. भा. वा. ४) । अश्वीयियिषति । अशिश्वीयिषति ।

अपर आह- *यथेष्टं नामधातुष्विति वक्तव्यम्* (म. भा. वा.४) । पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुपुतित्रीयियिषति । पुत्रीयिषिषति ॥

२४४४. पूर्वोऽभ्यासः ॥ ४ ॥ (२१७८)

'द्वे' इति प्रथमान्तं यदनुवर्त्तते तदर्थादिह षष्ठ्यन्तं जायते । तत्र प्रत्यासत्तेरस्मिन्प्रकरणे ये द्वे विहिते तयोर्यः पूर्वोऽवयवः सोऽभ्याससंज्ञो भवति । पपाच । पिपक्षति । पापच्यते । जुहोति । अपीपचत् ।

अभ्यासप्रदेशास्तु - 'अत्र लोपोऽभ्यासस्य' (७.४.५८) इत्येवमादयः ॥

२४४५. उभे अभ्यस्तम् ॥ ५ ॥ (४२६)

'द्वे' इति वर्त्तमाने 'उभे' ग्रहणं समुदायसंज्ञाप्रतिपत्त्यर्थम् । ये द्वे विहिते ते उभे अपि समुदिते अभ्यस्तसंज्ञे भवतः । ददति । ददत् । दधतु ।

उभेग्रहणं किम्? नेनिजतीत्यत्र 'अभ्यस्तानामादिः' (पा. सू. ६/१/१६९) इति समुदाये उदात्तत्वं यथा स्यात्, प्रत्येकं पर्यायेण वा मा भूदिति ।

अभ्यस्तप्रदेशाः - 'अभ्यस्तानामादिः' (६.१.१८९) इत्येवमादयः ॥

२४४६. जक्षित्यादयः षट् ॥ ६ ॥ (४२८)

'अभ्यस्तम्' इति वर्त्तते । 'जक्ष' इत्ययं धातुरित्यादयश्चान्ये षट् धातवोऽभ्यस्तसंज्ञा भवन्ति । सेयं सप्तानां धातूनामभ्यस्तसंज्ञा विधीयते । 'जक्ष भक्षहसनयोः' (धा. पा. १०७२) इत्यतः प्रभृति 'वेवीङ् वेतिना तुल्ये' (धा. पा. १०७८) इति यावत् । जक्षति । जाग्रति । दरिद्रति । चकासति । शासति ।

दीध्यते, वेव्यते-इत्यत्र 'अभ्यस्तानामादिः' (६/१/१८९) इत्येष स्वरः प्रयोजनम्। दीध्यदिति च शतरि व्यत्ययेन सम्पादिते 'नाभ्यस्ताच्छतुः' (७.१.७८) इति नुमः प्रतिषेधः ॥

२४४७. तुजादीनां दीर्घोऽभ्यासस्य ॥ ७ ॥ (३५०९)

तुजादीनामिति प्रकारे आदिशब्दः । कश्च प्रकारः? तुजेर्दीर्घोऽभ्यासस्य न विहितः, दृश्यते च, ये तथाभूतास्ते तुजादयः, तेषामभ्यासस्य दीर्घः साधुर्भवति । तूतुजानः (ऋ. १.३.६)। मामहानः (तै. स. ४.६.३.२) । अनड्वान् दाधान (अथर्व. ४.११.१) । 'व्रतं मीमाय' (अथर्व. ५.११.३) । दाधार । स तूताव (ऋ. १.९४.२) ।

दीर्घश्चैषां छन्दसि प्रत्ययविशेषे एव दृश्यते, ततोऽन्यत्र न भवति - तुतोज शबलान् ॥

२४४८. लिटि धातोरनभ्यासस्य ॥ ८ ॥ (२१७७)

लिटि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। पपाच । पपाठ । प्रोर्णुनाव । 'वाच्य ऊर्णोर्णुवद्भावः' इति वचनाद् ऊर्णोतेः "इजादेः" (३.३.३९) इत्याम्न भवति ।

लिटिति किम्? कर्त्ता । हर्त्ता । धातोरिति किम्? 'ससृवांसो विशृण्विरे' (ऋ ४.८.६) । 'सोममिन्द्राय सुन्विरे' (ऋ ७.३२.४) । अनभ्यासस्येति किम्? 'कृष्णो नोनाव वृषभो यदीदम्' (ऋ १.७९.२) । नोनूयतेर्नोनाव । 'सम्मान्या मरुतः सम्मिमिक्षुः' (ऋ १.१६५.१) । लिटि उसन्तः।

द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् (म. भा.) । 'यो जागार तमृचः कामयन्ते' (ऋ. ५.४४.१४) । दाति प्रियाणीति (ऋ. ४.८.३) ॥

२४४९. सन्यङोः ॥ ९ ॥ (२३९५)

'धातोरनभ्यासस्य' इति वर्त्तते । 'सन्यङोः' इति च षष्ठ्यन्तमेतत् । सनन्तस्य यङन्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । पिपतिषति । अरिरिषति । उन्दिदिषति । यङन्तस्य - पापच्यते । अटाट्यते । यायज्यते । अरार्यते । प्रोर्णोनूयते । अनभ्यासस्येत्येव - जुगुप्सिषते । लोलूयिषते ॥

२४५०. श्लौ ॥ १० ॥ (२४९०)

श्लौ परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । जुहोति । बिभेति । जिह्रेति ॥

२४५१. चङि ॥ ११ ॥ (२३१५)

चङि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। अपीपचत् । अपीपठत् । आटिटत् । आशिशत् । आर्दिदत् ।

पचादीनां ण्यन्तानां चङिकृते णिलोप उपधाह्रस्वत्वं द्विर्वचनम्-इत्येषां कार्याणां प्रवृत्तिक्रमः । तथा च - 'सन्वल्लघुनि चङ्परे' (६.४.९३) इति सन्वद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यते । यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवति। न चास्मिन् कार्याणां क्रमेणानादिष्टादचः पूर्वोऽभ्यासो भवतीति । आटिटदिति 'द्विर्वचनेऽचि' (१.१.५९) इति स्थानिवद्भावाद् द्वितीयस्यैकाचो द्विर्वचनं भवति ॥

२४५२. दाश्वान् साह्वान् मीढ्वांश्च ॥ १२ ॥ (३६२९)

दाश्वान्, साह्वान्, मीढ्वान् - इत्येते शब्दाश्छन्दसि भाषायां चाविशेषेण निपात्यन्ते। दाश्वानिति 'दाशृ दाने' (धा.पा. ८८३) - इत्येतस्य धातोः क्वसावद्विर्वचनमनिट्त्वं च निपात्येते। 'दाश्वांसो दाशुषः सुतम्' (ऋ. १.३.५) इति ।

साह्वानिति 'षह मर्षणे' (धा.पा. ८५३) इत्येतस्य परस्मैपदम्, उपधादीर्घत्वम्, अद्विर्वचनम्, अनिट्त्वं च निपातनात् । साह्वान्बलाहकः ।

मीढ्वानिति 'मिह सेचने' (धा. पा. ९९३) - इत्येतस्याद्वित्वम्, अनिट्त्वम्, उपधादीर्घत्वं ढत्वं च निपातनात् । 'मीढ्वस्तोकाय तनयाय मृडय' (ऋ. २.३३.१४)। एकवचनमतन्त्रम् ।

कृञादीनाम् के द्वे भवत इति वक्तव्यम् (म. भा. ६.१.१२ वा. ५) । क्रियतेऽनेनेति चक्रम् । चिक्लिदम् । कृञः क्लिदेश्च 'घञर्थे कविधानम्' (वा.३०६) इति कप्रत्ययः।

चरिचलिपतिवदीनां द्वित्वमच्याक्चाभ्यासस्य (म. भा. वा. ६) । चरादीनां धातूनामचि प्रत्यये परतो द्वे भवतः । अभ्यासस्यागागमो भवति, आगागमविधानसामर्थ्याच्च हलादिशेषो न भवति । हलादिशेषे हि सत्यागमस्यादेशस्य च विशेषो नास्ति । चराचरः । चलाचलः । पतापतः । वदावदः ।

वेति वक्तव्यम् । तेन चरः पुरुषः, चलो रथः, पतं यानम्, वदो मनुष्यः - इत्येवमाद्यपि सिद्धं भवति ।

हन्तेर्घत्वं च (म. भा. वा.७) । हन्तेरचि प्रत्यये परतो द्वे भवतोऽभ्यासस्य च हकारत्य [च] घत्वमाक् चागमो भवति । परस्य 'अभ्यासाच्च' इति कुत्वम् । 'घनाघनः क्षोभणश्चर्षणीनाम्' (ऋ. १०.१०३.१) ।

पाटेर्णिलुक् चोक् च दीर्घश्चाभ्यासस्य (म. भा. वा. ८) । पाटेरचि परतो द्वे भवतः, णिलुक्च भवति । अभ्यासस्य चोगागमो दीर्घश्च भवति । पाटूपटः ॥

२४५३. ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ १३ ॥ (१००३)

पुत्र, पति-इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः सम्प्रसारणं भवति । यणः स्थाने इग्भवतीत्यर्थः । कारीषगन्धीपुत्रः, कारीषगन्धीपतिः । कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः । कारीषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्येति वहुव्रीहिः, तत्र 'उपमानाच्च' (५.४.१३७) इति गन्धस्येदन्तादेशः, करीषगन्धेरपत्यमित्यण् (४.१.९२), तदन्तात्स्त्रियाम् 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' (४.१.७८) इति ष्यङ्, ततश्चापि विहिते षष्ठीसमासः, 'सम्प्रसारणस्य' (६.३.१३९) इति दीर्घत्वम् ।

ष्यङ इति किम्? इभ्यापुत्रः । क्षत्त्रियापुत्रः । पुत्रपत्योरिति किम्? कारीषगन्ध्याकुलम्। कौमुदगन्ध्याकुलम् । तत्पुरुष इति किम्? कारीषगन्ध्यापतिरस्य ग्रामस्य कारीषगन्ध्यापतिरयं ग्रामः ।

ष्यङ इति स्त्रीप्रत्ययग्रहणम्, 'न' स्त्रीप्रत्यये चानुपसर्जने' (सीर. परि. २६) इति प्रत्ययग्रहणपरिभाषया 'यस्मात् स विहितस्तदादेः' (पुरु. परि. २४) इत्येष नियमो नास्ति, तेन परमकारीषगन्ध्यायाः पुत्रः परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिरित्यपि भवति ।

उपसर्जने तु ष्यङि न भवति - अतिक्रान्ता कारीषगन्ध्यामतिकारीषगन्ध्यः, तस्य पुत्रोऽतिकारीषगन्ध्यपुत्रः, अतिकारीषगन्ध्यपतिः ।

पुत्रपत्योः केवलयोरुत्तरपदयोरिदं सम्प्रसारणम्, तदादौ तदन्ते च न भवति - कारिषगन्ध्यापुत्रकुलम्, कारीषगन्ध्यापरमपुत्र इति ।

ष्यङन्ते च यद्यप्यन्ये यणः सन्ति; तथापि ष्यङ एव संप्रसारणम्, 'निर्दिश्यमानस्यादेशा' भवन्ति (व्या.परि. १०६) इति ।

सम्प्रसारणमिति चाधिक्रियते 'विभाषा परेः' (६.१.४४) इति यावत् ॥

२४५४. बन्धुनि बहुव्रीहौ ॥ १४ ॥ (१००५)

'ष्यङः सम्प्रसारणम्' इत्यनुवर्तते । बन्धुशब्द उत्तरपदे बहुव्रीहौ समासे ष्यङः सम्प्रसारणं भवति कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः । कौमुदगन्धीबन्धुः।

बहुव्रीहाविति किम्? कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । अत्रापि पूर्ववदेव परमकारीषगन्धीबन्धुरित्यत्र भवति । अतिकारीषगन्ध्यबन्धुरिति च न भवति, तथा कारीषगन्ध्याबन्धुधनः, कारीषगन्ध्यापरमबन्धुरित्यादौ न ।

बन्धुनीति नपुंसकलिङ्गनिर्द्देशः शब्दरूपापेक्षया, पुंल्लिङ्गाभिधेयोऽयं बन्धुशब्दः।

मातच्मातृकमातृषु (म. भा. ६.१.१४ वा. १) । ष्यङः सम्प्रसारणं भवति विभाषया बहुव्रीहावेव । कारीषगन्ध्या माताऽस्य - इत्येवं बहुव्रीहौ कृते एतस्मादेवोपसंख्यानात् पक्षे मातृशब्दस्य मातजादेशः, तत्र चित्करणसामर्थ्याद् बहुव्रीहिस्वरम् (६.२.१) अन्तोदात्तत्वं (६.१.१६३) बाधते ।

मातृमातृकशब्दयोश्च भेदेनोपादानाद् 'नद्यृतश्च' (५.४.१५३) इति कबपि विकल्प्यते कारीषगन्धीमातः, कारीषगन्ध्यामातः, कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः, कारीषगन्धीमाता, कारीषगन्ध्यामाता ॥

२४५५. वचिस्वपियजादीनां किति ॥ १५ ॥ (२४०९)

'सम्प्रसारणम्' इति वर्त्तते । 'ष्यङः' इति निवृत्तम् । वचि - 'वच परिभाषणे' (धा. पा. १०६४) 'ब्रुवो वचिः' (२.४.५३) इति च । स्वपि - 'ञिष्वप् शये' (धा.पा. १०६९) । यजादयः - 'यज देवपूजासङ्गतिकरणदानेषु' (धा. पा. १००३) इत्यतः प्रभृति आगणान्ताः (धा.पा. १०११), तेषां वचिस्वपियजादीनां किति प्रत्यये परतः सम्प्रसारणं भवति । वचि - उक्तः, उक्तवान् । स्वपि - सुप्तः, सुप्तवान् । यज - इष्टः, इष्टवान् । वप् - उप्तः, उप्तवान् । वह - ऊढः, ऊढवान् । वस - उषितः, उषितवान् । वेञ्-उतः, उतवान् । व्येञ् - संवीतः, संवीतवान् । ह्वेञ्-आहूतः, आहूतवान् । वद-उदितः, उदितवान् । टुओश्वि-शूनः, शूनवान् ।

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते । तेनेह न भवति - वाच्यति, वाचिक इति॥

२४५६. ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥ १६ ॥ (२४१२)

'ग्रह उपादाने' (धा. पा. १५३४), 'ज्या वयोहानौ' (धा.पा. १५००), 'वेञो वयिः (२.४.४१), 'व्यध ताडने' (धा.पा. ११८२), 'वश कान्तौ' , (धा.पा. १०८१), 'व्यच व्याजीकरणे, 'ओस्ज पाके' (धा पा १२८५) - इत्येतेषां धातूनां ङिति प्रत्यये परतश्चकारात् किति च सम्प्रसारणं भवति । ग्रह - गृहीतः । गृहीतवान् । ङिति - गृह्णाति, जरीगृह्यते । ज्या-जीनः, जीनवान् । 'ल्वादिभ्यः' (८.२.४४) निष्ठानत्वम् । ङिति-जिनाति, जेजीयते । 'हलः' (६.४.२) इति सम्प्रसारणदीर्घे कृते 'प्वादीनाम्' (७.३.८०) इति ह्रस्वः क्रियते ।

वयिः- लिटि परतो वेञो वयिः (२.४.४१) आदेशः, तस्य ङिदभावात् किदेवोदाह्रियते - ऊयतुः, ऊयुः । यद्येवम्, वयिग्रहणमनर्थकम्, यजादिषु वेञ् पठ्यते? नैवं शक्यम्, लिति तस्य 'वेञः' (६.१.४०) इति प्रतिषेधो वक्ष्यते, तत्र यथैव स्थानिवद्भावाद् वयेर्विधिः, एवं प्रतिषेधोऽपि प्राप्नोति? नैष दोषः, 'लिटि वयो यः' (६.१.३८) इति यकारस्य सम्प्रसारणप्रतिषेधाद् वयेर्विधौ ग्रहणं प्रतिषेधे चाग्रहणमनुमास्यते? सत्यमेतत्; एष एवार्थः साक्षान्निर्देशेन वयेः स्पष्टीक्रियते।

व्यध - विद्धवान् । ङिति - विध्यति, वेविध्यते ।

वश-उशितः, उशितवान् । ङिति - उष्टः उशन्ति ।

व्यच विचितः । विचितवान् । ङिति-विचति, वेविच्यते । 'व्यचेः कुटादित्वमनसि' (रा. १८) प्रतिपादितम्, तेन सर्वत्राञ्णिति प्रत्यये सम्प्रसारणं भवति - उद्विचिता, उद्विचितुम्, उद्विचितव्यमिति ।

व्रश्चेः-वृक्णः, वृक्णवान् । अथ कथमत्र कुत्वम्, 'व्रश्चभ्रस्ज' (८.२.३६) इति हि षत्वेन भवितव्यम् ?

निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः तत्र षत्त्वं प्रति नत्वस्य सिद्धत्वाद् झलादिर्निष्ठा न भवति । कुत्वे तु कर्तव्ये तदसिद्धमेवेति प्रवर्तते कुत्वम् । ङिति-वृश्चति वरीवृश्च्यते ।

प्रच्छ-पृष्टः, पृष्टवान् । ङिति - पृच्छति, परीपृच्छ्यते, प्रश्नः । नङि तु 'प्रश्ने चासन्नकाले' (३.२.११७) इति निपातनादसम्प्रसारणम् ।

भ्रस्ज-भृष्टः, भृष्टवान् । ङिति - भृज्जति, बरीभृज्ज्यते । सकारस्य 'झलां जश् झशि' (८.४५२) इति जश्त्वेन दकारः, स्तोः श्चुना श्चुः' (८.४.४०) इति श्चुत्वेन जकारः ॥

२४५७. लिट्यभ्यासस्योभयेषाम् ॥ १७ ॥ (२४०८)

उभयेषां वच्यादीनां ग्रह्यादीनां च लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति । वचि - उवाच, उवचिथ । स्वप् - सुष्वाप, सुष्वपिथ । यज - इयाज, इयजिथ। टुवप् - उवाप, उवपिथ।

ग्रह्यादीनाम् - तत्र ग्रहेरविशेषः । जग्राह, जग्राहिथ । ज्या - जिज्यौ, जिज्यिथ । वयि - उवाय, उवयिथ । व्यध-विव्याध, विव्यधिथ । वश - उवाश, उवशिथ । व्यच - विव्याच, विव्यचिथ ।

वृश्चतेः सत्यसति वा योगे नास्ति विशेषः । योगारम्भे तु सति यदि सम्प्रसारणमकृत्वा हलादिःशेषेण (७.४.६०) रेफो निवर्त्यते, तदा वकारस्य सम्प्रसारणं प्राप्नोति । अथ रेफस्य सम्प्रसारणं कृत्वा उरदत्वं रपरत्वं च क्रियते, तदानीमुरदत्वस्य स्थानिवद्भावात् 'न सम्प्रसारणे सम्प्रसारणम्' (६.१.३५) इति प्रतिषेधो भवतीत्यस्ति विशेषः । वव्रश्च, वव्रश्चिथ ।

पृच्छतिभृज्जत्योरविशेषः । अकिदर्थं चेदमभ्यासस्य सम्प्रसारणं विधीयते । किति हि परत्वाद्धातोः सम्प्रसारणे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम् - ऊचतुः, ऊचुरिति ।

अधिकारादेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषामिति वचनम् - हलादिःशेषम् (७.४.६०) अपि बाधित्वा सम्प्रसारणमेव यथा स्यादिति - विव्याध ॥

२४५८. स्वापेश्चङि ॥ १८ ॥ (२५८४)

स्वापेरिति स्वपेर्ण्यन्तस्य ग्रहणम्, तस्य चङि परतः सम्प्रसारणं भवति । असूषुपत्, असूषुपन् । द्विर्वचनात्पूर्वमत्र सम्प्रसारणम्, तत्र कृते लघूपधगुणः (७.३.८६), तस्य 'णौ चङ्युपधायाः' (७.४.१) ह्रस्वत्वम्, ततो द्विर्वचनम्, 'दीर्घो लघोः' (७.४.९४) इति दीर्घत्वम् ।

चङीति किम्? स्वाप्यते । स्वापितः ।

'किती' ति निवृत्तम्, ङितीति केवलमिहानुवर्त्तते' -इत्येतद् दुर्विज्ञानम् ॥

२४५९. स्वपिस्यमिव्येञां यङि ॥ १९ ॥ (२६४५)

'ञिष्वप् शये' (धा.पा. १०३९), 'स्यमु (धा.पा. ८२७) स्वन (८२८) ध्वन शब्दे' (८२९), 'व्येञ् संवरणे' (धा. पा. १००८)-इत्येतेषां धातूनां यङि परतः सम्प्रसारणं भवति । सोषुप्यते । सेसिम्यते । वेवीयते । यङीति किम्? स्वप्नक् (३.२.१७२) ॥

२४६०. न वशः ॥ २० ॥ (२६४६)

'यङि' इति वर्त्तते । वशेर्द्धातोर्यङि परतः सम्प्रसारणं न भवति । वावश्यते, वावश्यन्ते।

यङीति किम्? उष्टः । उशन्ति ॥

२४६१. चायः की ॥ २१ ॥ (२६४७)

'यङि' इति वर्त्तते । 'चायृ पूजानिशामनयोः' (धा.पा. ८८१) - इत्येतस्य धातोर्यङि परतः कीत्ययमादेशो भवति । चेकीयते, चेकीयेते, चेकीयन्ते ।

दीर्घोच्चारणं यङ्लुगर्थम् । चेकीतः ॥

२४६२. स्फायः स्फी निष्ठायाम् ॥ २२ ॥ (३०४४)

'स्फायी ओप्यायी वृद्धौ' (धा.पा. ४८७, ४८८) - धातोर्निष्ठायां परतः 'स्फी' इत्ययमादेशो भवति । स्फीतः । स्फीतवान् ।

निष्ठायामिति किम्? स्फातिः । स्फातीभवतीत्येदपि क्तिन्नन्तस्यैव रूपम्, न निष्ठान्तस्य।

'निष्ठायाम्' इत्येतदधिक्रियते 'लिड्यङोश्च' (६.१.२९) इति प्रागेतस्मात् सूत्रात् ॥

२४६३. स्त्यः प्रपूर्वस्य ॥ २३ ॥ (३०३३)

'निष्ठायाम्' इति वर्त्तते, 'सम्प्रसारणम्' इति च । 'स्फी' इत्येतन्न स्वर्यते । 'स्त्यै ष्ट्यै शब्दसङ्घातयोः' (धा. पा. ९११, ९१२) - द्वयोरप्येतयोर्द्धात्वोः स्त्यारूपमापन्नयोः सामान्येन ग्रहणम् । 'स्त्या' इत्येतस्य प्रपूर्वस्य धातोर्निष्ठायां परतः सम्प्रसारणं भवति । प्रस्तीतः । प्रस्तीतवान् । सम्प्रसारणे कृते यण्वत्त्वं विहितमिति निष्ठानत्वं न भवति । 'प्रस्त्योऽन्यतरस्याम्' (८.२.५४) इति तु पक्षे मकारः क्रियते-प्रस्तीमः, प्रस्तीमवान् ।

प्रपूर्वस्येति किम्? संस्त्यानः, संस्त्यानवान् ।

'प्रस्त्यः' इत्येव सिद्धे पूर्वग्रहणमिहापि यथा स्यात् - प्रसंस्तीतः, प्रसंस्तीतवान्।

तत्कथं प्रपूर्वस्येति षष्ठ्यर्थे बहुव्रीहिः? प्रः पूर्वो यस्य धातूपसर्गसमुदायस्य स प्रपूर्वस्तदवयवस्य स्त्यः-इति व्यधिकरणे षष्ठ्यौ । तत्र प्रसंस्तीत इत्यत्रापि प्रपूर्वसमुदायावयवः स्त्याशब्दो भवति ॥

२४६४. द्रवमूर्त्तिस्पर्शयोः श्यः ॥ २४ ॥ (३०२०)

द्रवमूर्त्तौ=द्रवकाठिन्ये, स्पर्शे च वर्त्तमानस्य 'श्यैङ् गतौ' (धा.पा.९६४) इत्यस्य धातोर्निष्ठायां परतः सम्प्रसारणं भवति । शीनं घृतम् । शीना वसा । शीनं मेदः । द्रवावस्थायाः काठिन्यं गतमित्यर्थः । 'श्योऽस्पर्शे' (८.२.४७) इति निष्ठानत्वम् ।

स्पर्शे च शीतं वर्त्तते । शीतो वायुः । शीतमुदकम् । गुणमात्रे तद्वति चास्य शीतशब्दस्य वृत्तिर्द्रष्टव्या ।

द्रवमूर्त्तिस्पर्शयोरिति किम्? संश्यानो वृश्चिकः ॥

२४६५. प्रतेश्च ॥ २५ ॥ (३०२२)

'श्यः' इति वर्त्तते । प्रतेरुत्तरस्य श्यायतेर्निष्ठायां परतः सम्प्रसारणं भवति । प्रतिशीनाः, प्रतिशीनवान् ।

द्रवमूर्त्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादिति सूत्रारम्भः ॥

२४६६. विभाषाऽभ्यवपूर्वस्य ॥ २६ ॥ (३०२३)

'श्यः' इति वर्त्तते । अभि, अव-इत्येवम्पूर्वस्य श्यायतेर्निष्ठायां विभाषा सम्प्रसारणं भवति। अभिशीनम्, अभिश्यानम् । अवशीनम्, अवश्यानम् । द्रवमूर्त्तिस्पर्शविवक्षायामपि विकल्पो भवति । अभिशीनं घृतम्, अभिश्यानं घृतम् । अवशीनं मेदः, अवश्यानं मेदः । अभिशीतो वायुः, अभिश्यानः । अवशीतमुदकम्, अवश्यानमुदकम् ।

सेयमुभयत्रविभाषा द्रष्टव्या । पूर्वग्रहणस्य च प्रयोजनम् - समभिश्यानम्, समवश्यानमित्यत्र मा भूदिति केचिद् व्याचक्षते । न किलायमभ्यवपूर्वः समुदाय इति । योऽत्राभ्यवपूर्वः समुदायस्तदाश्रयो विकल्पः कस्मान्न भवति? तस्मादत्र भवितव्यमेव । यदि तु नेष्यते, ततो यत्नान्तरमास्थेयमस्माद्विभाषाविज्ञानात् - व्यवस्थेयम्। पूर्वग्रहणस्य चान्यत् प्रयोजनं वक्तव्यम् ॥

२४६७. शृतं पाके ॥ २७ ॥ (३०६७)

'विभषा' इत्यनुवर्त्तते । 'श्रा पाके' (धा.पा. ८१०) - इत्येतस्य धातोर्ण्यन्तस्याण्यन्तस्य च पाकेऽभिधेये क्तप्रत्यये परतः शृभावो निपात्यते विभाषा। शृतं क्षीरम् । शृतं हविः ।

व्यवस्थितविभाषा चेयम्, तेन क्षीरहविषोर्नित्यं शृभावो भवति । अन्यत्र न भवति - श्राणा यवागूः, श्रपिता यवागूरिति ।

यदापि बाह्ये प्रयोजके द्वितीयो णिजुत्पद्यते, तदापि नेष्यते - श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति ।

श्रातिरयमकर्मकः कर्मकर्तृविषयस्य पचेरर्थे वर्त्तते, स ण्यन्तोऽपि प्राकृतं पच्यर्थमाह । तदत्र द्वयोरपि शृतमितीष्यते-शृतम् क्षीरं स्वयमेव, शृतं क्षीरं देवदत्तेन ।

पाकग्रहणं निपातनविषयप्रदर्शनार्थम्, तेन क्षीरहविषोरेव ॥

२४६८. प्यायः पी ॥ २८ ॥ (३०७२)

'विभाषा' इत्येव । 'ओप्यायी वृद्धौ' (धा.पा. ४८८) - इत्यस्य धातोर्निष्ठायां विभाषा पीत्ययमादेशो भवति । पीनं मुखम् । पीनौ बाहू । पीनमुरः ।

इयमपि व्यवस्थितविभाषैव, तेनानुपसर्गस्य नित्यं भवति । सोपसर्गस्य तु नैव भवति । आप्यानश्चन्द्रमाः ।

आङ्पूर्वस्यान्धूधसोर्भवत्येव-आपीनोऽधुः । आपीनमूध इति ॥

२४६९. लिड्यङोश्च ॥ २९ ॥ (२३२७)

'विभाषा' इति निवृत्तम् । 'प्यायः पी' (६.१.२८) इत्येतच्चशब्देनानुकृष्यते । लिटि यङि च परत प्यायः 'पी' इत्ययमादेशो भवति । आपिप्ये आपिप्यिरे । परत्वात् पीभावे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम्, 'एरनेकाच' (६.४.८२) इति यणादेशः।

यङि-आपेपीयते । आपेपीयन्ते ॥

२४७०. विभाषा श्वेः ॥ ३० ॥ (२४२०)

'लिड्यङोः' इति वर्त्तते, 'सम्प्रसारणम्' इति च । लिटि यङि च श्वयतेर्धातोर्विभाषा सम्प्रसारणं भवति । शुशाव, शिश्वाय । शुशुवतुः, शिश्वियतुः। यङि - शोशूयते, शेश्वीयते । तदत्र यङि सम्प्रसारणमप्राप्तविभाषा विधीयते । लिटि तु किति यजादित्वाद् नित्यं प्राप्तम्, तत्र सर्वत्र विकल्पो भवतीत्येषोभयत्र विभाषा ।

यदा च धातोर्न भवति, तदा 'लिट्यभ्यासस्योभयेषाम्' (६.१.१७) इत्यभ्यासस्यापि न भवति ॥

२४७१. णौ च संश्चङोः ॥ ३१ ॥ (२५७९)

'विभाषा श्वेः' (६.१.३०) इति वर्त्तते । सन्परे चङ्परे च णौ परतः श्वयतेर्धातोर्विभाषा सम्प्रसारणं भवति । शुशावयिषति । चङि-अशूशवत्, अशिश्वयत् । 'सम्प्रसारणं सम्प्रसारणाश्रयं च बलीयो भवति' (सीर.परि.५९) इति वचनादन्तरङ्गमपि वृद्ध्यादिकं सम्प्रसारणेन बाध्यते । कृते तु सम्प्रसारणे वृद्धिः, आवादेशश्च । ततः 'ओः पुयण्ज्यपरे' (७.४.८०) इत्येतद्वचनं ज्ञापकम् - णौ कृतस्थानिवद्भावस्य, इति स्थानिवद्भावात् शुशब्दो द्विरुच्यते ॥

२४७२. ह्वः सम्प्रसारणम् ॥ ३२ ॥ (२५८६)

'णौ च संश्चङोः' (६.१.३१) इति वर्त्तते । सन्परे चङ्परे च णौ परतो ह्वः सम्प्रसारणं भवति । जुहावयिषति, जुहावयिषतः, जुहावयिषन्ति । अजूहवत्, अजूहवताम्, अजूहवन् । सम्प्रसारणस्य बलीयस्त्वात् 'शाच्छासाह्वाव्यावेपां युक्' (७.३.३७) इति प्रागेव युग्न भवति ।

'सम्रसारणम्' इति वर्त्तमाने पुनः सम्प्रसारणमित्युक्तं विभाषेत्यस्य निवृत्त्यर्थम्।

'ह्वः सम्प्रसारणमभ्यस्तस्य' इत्येकयोगेन सिद्धे पृथग्योगकरणमनभ्यस्त-निमित्तप्रत्ययेन व्यवधाने सम्प्रसारणाभावज्ञापनार्थम् । ह्वायकमिच्छति ह्वायकीयति । ह्वायकीयतेः सन् - जिह्वायकीयिषति ॥

२४७३. अभ्यस्तस्य च ॥ ३३ ॥ (२४१७)

'ह्वः' इति वर्त्तते, तद् 'अभ्यस्तस्य' इत्यनेन व्यधिकरणम् - अभ्यस्तस्य यो ह्वयतिः। कश्चाभ्यस्तस्य ह्वयतिः? कारणम् । तेनाभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्सम्प्रसारणं भवति । जुहाव । जुहूयते । जुहूषति ॥

२४७४. बहुलं छन्दसि ॥ ३४ ॥ (३५१०)

'ह्वः' इति वर्त्तते । छन्दसि विषये ह्वयतेर्धातोर्बहुलं सम्प्रसारणं भवति । 'इन्द्राग्नी हुवे'। देवीं सरस्वतीं हुवे । (ऋ. ५.४६.३) ह्वेञो लट्यात्मनेपदोत्तमैकवचने 'बहुलं छन्दसि' (२.४.७६) इति शपो लुकि कृते सम्प्रसारणमुवङादेशश्च ।

न च भवति - 'ह्वयामि मरुतः शिवन्' । 'ह्वयामि विश्वान्देवान्' (ऋ. ७.३४.८) ॥

२४७५. चायः की ॥ ३५ ॥ (३५११)

'बहुलं छन्दसि' (६.१.३४) इति वर्त्तते । चायतेर्धातोश्छन्दसि विषये बहुलं कीत्ययमादेशो भवति । वियन्ता न्यन्यं चिक्युर्न निचिक्युरन्यम् (ऋ. १.१६४.३८)। लिट्युसि रूपम् ।

न भवति - 'अग्निर्ज्योतिर्निचायः' (वा. स. ११.१) ॥

२४७६. अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ॥ ३६ ॥ (३५१२)

'छन्दसि' इति वर्त्तते । अपस्पृधेथामिति 'स्पर्ध सङ्घर्षे' (धा.पा.३) इत्यस्य लङि आथामि द्विर्वचनं रेफस्य सम्प्रसारणमकारलोपश्च निपातनात् । 'बहुलं छन्दस्यमाङ्योगेऽपि' (६.४.७५) इत्यडागमाभावः । अत्र प्रत्युदाहरणमपास्पर्द्धेथामिति भाषायाम् ।

आनृचुः, आनृहुरिति । 'अर्च पूजायाम्' (धा. पा. २०४), 'अर्ह पूजायाम्' (धा.पा.७४०) इत्यनयोर्धात्वोर्लिट्युसि सम्प्रसारणमकारलोपश्च निपातनात् । ततो द्विर्वचनम्, उरदत्वम्, 'अत आदेः' (७.४.७०) इति दीर्घत्वम् । 'तस्मान्नुड् द्विहलः' (७.४.७१) इति नुडागमः । 'य उग्रा अर्कमानृचुः' (ऋ. १.१९.४) । 'न वसून्यानृहुः' (अथर्व. २.३५.१) । आनर्चुः, आनर्हुरिति भाषायाम्।

चिच्युषे । 'च्युङ् गतौ (धा.पा. ७३६) इत्यस्य धातोर्लिटि सेशब्देऽभ्यासस्य सम्प्रसारणमनिट् च निपातनात् । चिच्युषे (ऋ. ४.३०.२२) । चुच्युविष इति भाषायाम् ॥

तित्याज । 'त्यज हानौ' (धा.पा.९८७) - इत्यस्य धातोर्लिट्यभ्यासस्य सम्प्रसारणं निपात्यते । 'तित्याज' (ऋ. १०.७१.६) । तत्याजेति भाषायाम् ।

श्राता इति । 'श्रीञ् पाके' (धा.पा. १३७६) इत्येतस्य धातोर्निष्ठायां श्राभावः। 'श्रातास्त इन्द्रसोमाः' (मै. सं. १.९.१) ।

श्रितमिति । तस्यैव श्रीणातेर्ह्रस्वत्वम् । 'सोमो गौरी अधिश्रितः' (ऋ. ९.१२.३)। श्रिता नो गृहाः । अनयोः श्राभावश्रिभावयोर्विषयविभागमिच्छन्ति । सोमेषु बहुषु श्राभाव एव । अन्यत्र श्रिभाव इति । सोमादन्यत्र क्वचिदेकस्मिन्नपि श्राभावो दृश्यते । 'यदि श्रातो जुहोतन' (ऋ. १०.१७९.१) । तस्य श्राता इति बहुवचनस्याविवक्षितत्वादुपसंग्रहो द्रष्टव्यः ।

आशीराशीर्त्त इति । तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठयां च शीरादेशः, निष्ठायाश्च नत्वाभावो निपातनात् । 'तामाशीरा दुहन्ति' । 'क्षीरैर्मध्यत आशीर्त्तः' (ऋ. ८.२.९) ॥

२४७७. न सम्प्रसारणे सम्प्रसारणम् ॥ ३७ ॥ (३६३)

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति । व्यध - विद्धः । व्यच-विचितः। व्येञ्-संवीतः ।

एकयोगलक्षणमपि सम्प्रसारणमत एव वचनात्प्रथमं परस्य यणः क्रियते । पूर्वस्य च प्रसक्तं प्रतिषिध्यते ।

सम्प्रसारणमिति वर्त्तमाने पुनः सम्प्रसारणग्रहणं विदेशस्थस्यापि सम्प्रसारणस्य प्रतिषेधो यथा स्यादिति, 'श्वयुवमघोनामतद्धिते' (६.४.१३३) - यूनः यूना ।

सम्प्रसारणग्रहणसामर्थ्यादेव पूर्वस्य प्रतिषेधे वक्तव्ये सवर्णदीर्घत्वमेकादेशो न स्थानिवद्भवति । सति वा स्थानिवत्त्वे व्यवधानमेतावदाश्रयिष्यते ॥

ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि (म. भा. ६.१.३७ वा. ५) । ऋचि परतस्त्रेः सम्प्रसारणं भवति, उत्तरपदादिलोपश्च छन्दसि विषये । तिस्र ऋचो यस्मिन् तत् तृचं सूक्तम्, तृचं साम । 'ऋक्पूरब्धूः पथामानक्षे' (५.४.७४) इति समासान्तः । छन्दसीति किम्? त्यृचं कर्म॥

रयेर्मतौ बहुलम् (वा.६) । रयिशब्दस्य छन्दसि विषये मतौ परतो बहुलं सम्प्रसारणं भवति । आ रेवानेतु नो विशः । न च भवति - 'रयिमन्पुष्टिवर्धनः (वाह. सं. ३.४०) ॥

२४७८. लिटि वयो यः ॥ ३८ ॥ (२४१३)

'न सम्प्रसारणम्' इत्यनुवर्तते । लिटि परतो वयो यकारस्य सम्प्रसारणं न भवति । उवाय । ऊयतुः । ऊयुः । लिड्ग्रहमुत्तरार्थम् ॥

२४७९. वश्चास्यान्यतरस्यां किति ॥ ३९ ॥ (२४१४)

अस्य वयो यकारस्य किति लिटि परतो वकारादेशो भवत्यन्यतरस्याम् । ऊवतुः । ऊवुः। ऊयतुः । ऊयुः । कितीति किम्? उवाय । उवयिथ ॥

२४८०. वेञः ॥ ४० ॥ (२४१५)

'लिटि' इत्यनुवर्त्तते । 'वेञ् तन्तुसन्ताने' इत्यस्य धातोर्लिटि परतः सम्प्रसारणम् न भवति । ववौ ववतुः । ववुः । किति यजादित्वाद् धातोः प्राप्तमकित्यपि 'लिट्यभ्यासस्योभयेषाम्' (६.१.१७) इत्यभ्यासस्यात उभयं प्रतिषिध्यते ॥

२४८१. ल्यपि च ॥ ४१ ॥ (३३३९)

'वेञः' इत्यनुवर्तते । ल्यपि च परतो व्येञः सम्प्रसारणं न भवति । प्रवाय उपवाय । पृथग्योगकरणमुत्तरार्थम् ॥

२४८२. ज्यश्च ॥ ४२ ॥ (३३४०)

'ल्यपि' इत्येव । 'ज्या वयोहानौ' (धा.पा. १५००) इत्यस्य धातोर्ल्यपि परतः सन्प्रसारणं न भवति । प्रज्याय । उपज्याय ॥

२४८३. व्यश्च ॥ ४३ ॥ (३३४१)

'ल्यपि' इत्येव । 'व्येञ् संवरणे' (ध.पा. १००८) इत्येतस्य धातोर्ल्यपि परतः सम्प्रसारणं न भवति । प्रव्याय । उपव्याय । योगविभाग उत्तरार्थः ॥

२४८४. विभाषा परेः ॥ ४४ ॥ (३३४२)

'ल्यपि च' 'व्यश्च' इत्यनुवर्त्तते । परेरुत्तरस्य व्येञित्येतस्य धातोर्ल्यपि परतो विभाषा सम्प्रसारणं न भवति । परिवीय यूपम् । परिव्याय । सम्प्रसारणे कृते परपूर्वत्वे च 'ह्रस्वस्य' (६.१.७१) इति तुक् प्राप्नोति, स 'हलः' (६.४.२) इति
दीर्घत्वेन परत्वाद्वाध्यते ॥

२४८५. आदेच उपदेशेऽशिति ॥ ४५ ॥ (२३७०)

'धातोः' (६.१.८) इति वर्तते । एजन्तो यो धातुरुपदेशे तस्याकारादेशो भवति, शिति तु प्रत्यये न भवति । ग्लै-ग्लाता, ग्लातुम्, ग्लातव्यम् । शो - निशाता, निशातुम्, निशातव्यम् ।

एच इति किम्? कर्त्ता, हर्त्ता । उपदेश इति किम्? चेता, स्तोता । अशितीति किम्? ग्लायति, म्लायति ।

कथं जग्ले, मम्ले? नैवं विज्ञायते-शकार इद्यस्य सोऽयं शिदिति, किं तर्हि? श एव इत् शित् । तत्र 'यस्मिन्विधिस्तदादावल्ग्रहणे' (व्या. परि. १२७) इति शिदादौ प्रत्यये प्रतिषेधः । एश शकारान्तो भवति ।

अशितीति प्रसज्यप्रतिषेधोऽयम्, तेनैतदात्त्वमनैमित्तिकं प्रागेव प्रत्ययोत्पत्तेर्भवतीति । सुग्लः, सुम्ल इति - 'आतश्चोपसर्गे' (३.१.१३६) इति कप्रत्ययः । सुग्लानः, सुम्लान इति - 'आतो युच्' (३.३.१२८) इत्येवमादि सिद्धं भवतीति ।

आकाराधिकारस्त्वयं 'नित्यं स्मयतेः' (६.१.५७) इति यावत् ॥

२४८६. न व्यो लिटि ॥ ४६ ॥ (२४१६)

'व्येञ्' इत्येतस्य धातोर्लिटि परत आकारादेशो न भवति । संविव्याय । संविव्ययिथ । 'लिट्यभ्यासस्योभ्येषाम्' (६.१.१७) इत्यभ्यासस्य सम्प्रसारणम् । णलि 'अचो ञ्णिति' (७.२.११५) इति वृद्धिः ॥

२४८७. स्फुरतिस्फुलत्योर्घञि ॥ ४७ ॥ (३१८५)

'आदेचः' (६.१.४५) इति वर्तते । 'स्फुर स्फुल चलने' (धा. पा. १३९०, १३९१) - इत्येतयोर्धात्वोरेचः स्थाने घञि परत आकारादेशो भवति । विस्फारः। विस्फालः । विष्फालः । विष्फारः । विष्फालः । 'स्फुरतिस्फुलर्योर्निर्निविभ्यः' (८.३.७६) इति वा षत्वम् ॥

२४८८. क्रीङ्जीनां णौ ॥ ४८ ॥ (२६००)

'डुकीञ् द्रव्यविनिमये' (धा. पा. १४७४), 'इङ् अध्ययने' (धा. पा. १०४७), 'जि जये' (धा. पा. ९३७) - इत्येतेषां धातूनामेचः स्थाने णौ परत आकारादेशो भवति । क्रापयति । अध्यापयति । जापयति ॥

२४८९. सिध्यतेरपारलौकिके ॥ ४९ ॥ (२६०२)

'णौ' इति वर्तते । 'षिधु' हिंसासंराद्ध्योः' (धा.पा. ११९३) - इत्यस्य धातोरपारलौकिकेऽर्थे वर्तमानस्यैचः स्थाने णौ परत आकारदेशो भवति । अन्नं साधयति । ग्रामं साधयति ।

अपारलौकिक इति किम्? तपस्तापसं सेधयति । स्वान्येवैनं कर्माणि सेधयन्ति । अत्र हि सिध्यतिः पारलौकिके ज्ञानविशेषे वर्तते । तापसः सिध्यति=ज्ञानविशेषमासादयति, तं तपः प्रयुङ्क्ते । स च ज्ञानविशेष उत्पन्नः परलोके=जन्मान्तरे फलमभ्युदयलक्षणमुपसंहरन् परलोकप्रयोजनो भवति ।

इह कस्मान्न भवति? अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति । सिध्यतेरत्रार्थो निष्पत्तिः, तस्याः प्रयोजनमन्नम्, तस्य यद्दानं तत्पारलौकिकम्; न पुनः सिद्धिरेवेति न आत्वं पर्युदस्यते । साक्षात्परलोकप्रयोजने च सिद्ध्यर्थे कृतावकाशं वचनमेवं विषयं नावगाहते ।

सिध्यतेरिति श्यना निर्देशः 'षिधु गत्याम्' (धा.पा. ४७) इत्यस्य भौवादिकस्य निवृत्त्यर्थः ॥

२४९०. मीनातिमिनोतिदीङां ल्यपि च ॥ ५० ॥ (२५०८)

'आदेच उपदेशे' (६.१.४५) इति वर्तते । 'मीङ् हिंसायाम्' (धा.पा. १४७७), 'डुमिञ् प्रक्षेपणे' (धा.पा.१२५१), 'दीङ् क्षये' (धा.पा. ११३५)-इत्येतेषां धातूनां ल्यपि विषये चकारादेचश्च विषये उपदेश एव प्राक्प्रत्ययोत्पत्तेरलोऽन्त्यस्य (१.१.५२) स्थाने आकारादेशो भवति । प्रमाता, प्रमातव्यम्, प्रमातुम्, प्रमाय । निमाता, निमातुम्, निमातव्यम्, निमाय । उपदाता, उपदातव्यम्, उपदातुम्, उपदाय ।

उपदेश एवात्त्वविधानादिवर्णान्तलक्षणः प्रत्ययो न भवति, आकारान्तलक्षणश्च भवति - उपदायो वर्तते, ईषदुपदानमिति घञ्युचौ भवतः ॥

२४९१. विभाषा लीयतेः ॥ ५१ ॥ (२५०९)

'ल्यपि' (६.१.४१) इति वर्तते, 'आदेच उपदेशे' (६.१.४५) इति च । 'लीङ् श्लेषणे' - (धा.पा.) - इति दिवादिः, 'ली श्लेषणे' (धा.पा. १५०२)-इति क्र्यादिः; तयोरुभयोरपि यका निर्देशः स्मर्यते । लीयतेर्धातोर्ल्यपि च एचश्च विषये उपदेश एवालोऽन्त्यस्य स्थाने विभाषा आकारादेशो भवति । विलाता, विलातुम्, विलाय, विलातव्यम् । विलेता, विलेतुम्, विलेतव्यम्, विलीय ।

निमीमिलियां खलचोः प्रतिषेधो वक्तव्यः (म.भा. ६.१.५० वा.५२) । ईषत्प्रमयः। प्रमयो वर्तते । ईषन्निमयः, निमयो वर्तते । ईषद्विलयः, विलयो वर्तते । अत्र तु लियो व्यवस्थितविभाषाविज्ञानात्सिद्धम् ।

एवं च प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्वं भवति - कस्त्वामुल्लापयते, श्येनो वर्त्तिकामुल्लापयते ॥

२४९२. खिदेश्छन्दसि ॥ ५२ ॥ (३५१३)

'विभाषा' इति वर्त्तते । खिद दैन्ये' (धा.पा. ११७१) इत्यस्य धातोरेचः स्थाने छन्दसि विषये विभाषा आकार आदेशो भवति । चित्तं चिखाद । चित्तं चिखेद । छन्दसीति किम्? चित्तं खेदयति ॥

२४९३. अपगुरो णमुलि ॥ ५३ ॥ (३३७५)

'गुरी उद्यमने' (धा.पा. १३९७) - इत्यस्य धातोरपपूर्वस्य णमुलि परत एचः स्थाने विभाषा आकार आदेशो भवति । अपगारमपगारम् । अपगोरमपगोरम्। 'आभीक्ष्ण्ये णमुल्च' (३.४.२२) इति णमुल् । अस्यपगारं युध्यन्ते, अस्यपगोरं युध्यन्त इत्यत्र 'द्वितीयायां च' (३.४.५३) इति णमुल् ॥

२४९४. चिस्फुरोर्णौ ॥ ५४ ॥ (३५६९)

'चिञ्' (धा.पा. १२५२, 'स्फुर' (धा.पा. १३९०) - इत्येतयोर्धात्वोर्णौ परत एचः स्थाने विभाषा आकारादेशो भवति । चापयति, चाययति । स्फारयति, स्फोरयति ॥

२४९५. प्रजने वीयतेः ॥ ५५ ॥ (२६०३)

'णौ' इति वर्तते । 'वी गतिप्रजनकान्त्यसनखादनेषु' (धा.पा. १०४९) - इत्यस्य धातोः प्रजने वर्तमानस्य णौ परतो विभाषा आकारादेशो भवति । पुरोवातो गाः प्रवापयति । पुरोवातो गाः प्रवाययति । गर्भं ग्राहयतीत्यर्थः ।

प्रजनो हि जन्मन उपक्रमो गर्भग्रहणम् ॥

२४९६. बिभेतेर्हेतुभये ॥ ५६ ॥ (२५९३)

'णौ' इति वर्तते, 'विभाषा' इति च । हेतुरिह पारिभाषिकः स्वतन्त्रस्य प्रयोजकः, ततो यद्भयम्, स यस्य भयस्य साक्षाद्धेतुः, तद्भयं हेतुभयम् । तत्र वर्तमानस्य 'ञिभी भये' (धा.पा. १०८४) इत्यस्य धातोर्णौ परतो विभाषा आकारादेशो भवति । मुण्डो भापयते, मुण्डो भीषयते । जटिलो भापयते, जटिलो भीषयते । 'भीस्म्योर्हेतुभये' (१.३.३८) इत्यात्मनेपदम् 'भियो हेतुभये षुक्' (७.३.४०) । स चात्त्वपक्षे न भवति । लिभियोरीकारप्रश्लेषनिर्देशादीकारान्तस्य भियः षुग्विधीयते ।

हेतुभय इति किम्? कुञ्चिकयैनं भाययति (म. भा.) । अत्र हि कुञ्चिकातो भयं करणात्, न हेतोर्देवदत्तात् ॥

२४९७. नित्यं स्मयतेः ॥ ५७ ॥ (२५९६)

'णौ' इति वर्तते, 'हेतुभये' इति च । नित्यग्रहणात् 'विभाषा' इति निवृत्तम् । स्मिङ् ईषद्धसने' (धा. पा. ९४९) - इत्यस्य धातोर्हेतुभयेऽर्थे णौ परतो नित्यमाकारादेशो भवति । मुण्डो विस्मापयते । जटिलो विस्मापयते ।

भय इति किम्? कुञ्चिकयैनं विस्मापयति । भयशब्देन हेत्वर्थसामान्यादिह स्मयतेरर्थोऽभिधीयते । न हि मुख्ये भये स्मयतेर्वृत्तिरस्ति ॥

२५९८. सृजिदृशोर्झल्यमकिति ॥ ५८ ॥ (२४०५)

'सृज विसर्गे' (धा.पा. १४१५), 'दृशिर् प्रेक्षणे' (धा.पा. ९८९)-इत्येतयोर्द्धात्वोर्झलादावकिति प्रत्यये परतोऽमागमो भवति । स्रष्टा, स्रष्टुम्, स्रष्टव्यम्। द्रष्टा, द्रष्टुम्, द्रष्टव्यम् । लघूपधगुणापवादोऽयममागमः । अस्राक्षीत् । अद्राक्षीत् । सिचि वृद्धिः (७.२.३) अमि कृते भवति, पूर्वं तु बाध्यते ।

झलीति किम्? सर्जनम् । दर्शनम् । अकितीति किम्? सृष्टः । दृष्टः ।

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादिह न भवति - रज्जुसृड्भ्याम्, देवदृग्भ्यामिति ॥

२४९९. अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥ ५९ ॥ (२४०२)

'उपदेशे' इति वर्तते, 'झल्यमकिति' इति च । उपदेशेऽनुदात्तस्य धातोऋकारोपधस्य झलादावकिति प्रत्यये परतोऽन्यतरस्याममागमो भवति । त्रप्ता, तर्पिता, तर्प्ता । द्रप्ता, दर्पिता, दर्प्ता । 'तृप प्रीणने' (धा.पा. ११९६), 'दृप हर्षणमोचनयोः' (धा.पा. ११९७)-इत्येतौ रधादी धातू, तयोरिडागमः 'रधादिभ्यश्च' (७.२.४५) इति विकल्प्यते । अनुदात्तोपदेशः पुनरमर्थ एव ।

अनुदात्तस्येति किम्? वर्ढा, वर्ढुम्, वर्ढव्यम् । 'वृहू उद्यमने' (धा.पा.१३४८) इत्ययमुदात्तोपदेश ऊदित्वाच्चास्येड् विकल्प्यते । ऋदुपधस्येति किम्? भेत्ता । छेत्ता ।

झलीत्येव - तर्पणम् । दर्पणम् ।

अकितीत्येव - तृप्तः । दृप्तः ॥

२५००. शीर्षश्छन्दसि ॥ ६० ॥ (३५१४)

'शीर्षन्' इति शब्दान्तरं शिरःशब्देन समानार्थं छन्दसि विषये निपात्यते, न पुनरयमादेशः शिरःशब्दस्य । सोऽपि हि छन्दसि प्रयुज्यत एव । शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति । यत्ते शीर्ष्णो दौर्भाग्यम् ।

छन्दसीति किम्? शिरः ॥

२५०१. ये च तद्धिते ॥ ६१ ॥ (१६६७)

'शीर्षन्' इति वर्तते । आदेशोऽयमिष्यते, स कथम्? 'तद्धिते' इति हि परम् निमित्तमुपादीयते, स तदनुरूपां प्रकृतिं शिरःशब्दमाक्षिपति । यकारादौ तद्धिते परतः शिरःशब्दस्य शीर्षन्नादेशो भवति । शीर्षण्यो हि मुख्यो भवति । शीर्षण्यः स्वरः । शिरसि भव इति 'शरीरावयवाच्च' (४.३.५५)इति यत्, 'ये चाभावकर्मणोः' (६.४.१३८) इति प्रकृतिभावः ।

तद्धित इति किम्? शिर इच्छति शिरस्यति ॥

वा केशेषु (म. भा. ६.१.६१ वा. २) । शिरसः शीर्षन्नादेशो वक्तव्यः । शीर्षण्याः केशाः शिरस्याः केशाः ॥

२५०२. अचि शीर्षः ॥ ६२ ॥ (१६६७)

अजादौ तद्धिते शिरसः शीर्षशब्द आदेशो भवति । हस्तिशिरसोऽपत्यं हास्तिशीर्षिः। 'बाह्वादिभ्यश्च' (४.१.९६) - इति इञ् । स्थूलशिरस इदं स्थौलशीर्षम्। शीर्षन्भावे हि 'अन्' (६.४.१६७) इति प्रकृतिभावः स्यात् ।

हास्तिशीर्षिशब्दात् स्त्रियामिञः 'अणिञोरनार्षयोः' (४.१.७८) ष्यङादेशे कृते शीर्षस्य शिरःशब्दग्रहणेन ग्रहणात् शीर्षन्नादेशः प्राप्नोति, तत्र प्रकृतिभावे सति हास्तिशीर्षण्येत्यनिष्टं रूपं स्यात्, इष्यते तु हास्तिशीर्ष्येति, तत्कथम्? कर्त्तव्योऽत्र यत्नः । अणिञन्ताद् वा परः प्रत्ययः ष्यङाश्रयितव्यः, तत्र यस्येतिलोपस्य स्थानिवद्भावाद् व्यवधानम् ॥

२५०३. पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्ना-सञ्छस्प्रभृतिषु ॥ ६३ ॥ (२२८)

पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आसन-इत्येतेषां शब्दानां स्थाने शस्प्रभृतिप्रत्ययेषु परतः - पद्, दत्, नस्, मास्, हृत्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन्-इत्येते आदेशा यथासंख्यं भवन्ति । पद्-निपदश्चतुरो जहि । पदा वर्त्तय गोदुहम् । 'पादस्य पत्' । दत्-'या दतो धावति तस्यै श्यावदन्' (तै.सं. २.५.१.७) । नस्-सूकरस्त्वखनन्नसा' (अथर्व. २.२७.२) । मास्-'मासि त्वा पश्यामि चक्षुषा' (तै.सं.२.५.६.६) । हृद्-'हृदा पूतं मनसा जातवेदो' (अथर्व. ४.३९) । निश्-अमावास्यायां निशि यजेत' (वि.२.१.८) । असन्-'आसिक्तोऽस्नावरोहति' (मै. सं. ३.१५.८) । यूषन्-'या पात्राणि यूष्ण आसेचनानि' (ऋ. १.१६२.१३) । दोषन्-'यत्ते दोष्णो दौर्भाग्यम्' (मै.सं. ३.१०.३) । यकन्-यक्नोऽवद्यति । शकन्-शक्नोऽवद्यति (अथर्व १२.४.४) । उदन्-'उद्नो दिव्यस्य नोदेहि' (तै.सं. २.४.८.२)। आसन्-'आसनि किं लभे मधूनि'(ऋ १.७५.१) ।

शस्प्रभृतिष्विति किम्? पादौ ते प्रतिपीड्यौ, नासिके ते कृशे ।

केचिदत्र छन्दसीत्यनुवर्त्तयन्ति । अपरे पुनरविशेषेणेच्छन्ति । तथा हि - भाषायामपि पदादयः शब्दाः प्रयुज्यन्ते ।

'व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥' इत्येवमादयः ।

अन्यतरस्यामित्येतदनुवर्तयन्ति, तेन पादादयोऽपि प्रयुज्यन्ते ।

शस्प्रभृतिष्विति प्रकारार्थे प्रभृतिशब्द इति 'शला दोषणी' (काठ.सं. १६.२१) इत्यत्रापि दोषन्नादेशो भवति ।

पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् (म. भा. ६.१.३६ वा. १) । मांस, पृतना-सानु-इत्येतेषां स्थाने यथासंख्यं मांस्, पृत्, स्नु-इत्येते आदेशा भवन्ति। 'मांस्पचन्या उखायाः' (ऋ. १.१६२.१३) । मांसपचन्या इति प्राप्ते । 'पृत्सु मर्त्यम्' (ऋ १.२७.७)। पृतनासु मर्त्यमिति प्राप्ते। 'न ते दिवो न पृथिव्या अधिस्नुषु' (वाजा. सं १७.१४)। अधिसानुष्विति प्राप्ते ।

नस् नासिकाया यत्तस्क्षुद्रेषु (म. भा. ६.१.६४ वा.२) । नासिकाया नस्भावो वक्तव्यो यत्, तस्, क्षद्र - इत्येतेषु परतः । नस्यम् । 'नस्तः' (काठ. सं. १२.१२)। नःक्षुद्रः ।

यदि वर्णनगरयोर्नेति वक्तव्यम् (म. भा.) । नासिक्यो वर्णः । नासिक्यं नगरम् ॥

२५०४. धात्वादेः षः सः ॥ ६४ ॥ (२२६४)

धातोरादेः षकारस्य स्थाने सकारादेशो भवति । षह - सहते । षिच-सिञ्चति ।

धातुग्रहणं किम्? षोडश । षोडन् । षडिकः । षण्डः । आदेरिति किम्? कषति। लषति। कृषति ।

'आदेशप्रत्यययोः' (८.३.५.९) इत्यत्र षत्वव्यवस्थार्थं षादयो धातवः केचिदुपदिष्टाः। के पुनस्ते? ये तथा पठ्यन्ते । अथवा, लक्षणं क्रियते-'अज्दन्त्यपराः सादयः षोपदेशाः स्मिस्विदिस्वदिस्वञ्जिस्वपितयश्च', सृपिसृजिस्तृस्त्या -सेक्सृवर्जम् ॥

सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधो वक्तव्यः । (म. भा. ६.१.६४ वा. १) षोडीयति । षण्डीयति । ष्ठीवति । ष्वष्कते । 'ष्ठिवु' -इत्येतस्य द्वितीयस्थकारष्ठकारश्चेष्यते। तेन तेष्ठीव्यते, टेष्ठीव्यते इति चाभ्यासरूपं द्विधा भवति ॥

२५०५. णो नः ॥ ६५ ॥

'धातोरादेः' इत्यनुवर्तते । धातोरादेर्णकरस्य नकार आदेशो भवति । णीञ्-नयति । णम्-नमति । णह-नह्यति । धात्वादेरित्येव - अणति ।

सुब्धातोरयमपि नेष्यते - णकारमिच्छति णकारीयति ।

'उपसर्गादसमासेऽपि णोपदेशस्य' (८.४.१४) इत्यत्र णत्वविधेर्व्यवस्थार्थं णादयो धातवः केचिदुपदिश्यन्ते । के पुनस्ते? ये तथा पठ्यन्ते । अथ वा, लक्षणं क्रियते - 'सर्वे णादयो णोपदेशाः, नृतीनन्दिनर्दिनक्कनाटिनाथृनाधृनृवर्जम्' ॥

२५०६. लोपो व्योर्वलि ॥ ६६ ॥ (८७३)

धातोरिति प्रकृतं यत् तद् धात्वादेरिति पुनर्धातुग्रहणान्निवृत्तम् । तेन धातोरधातोश्च वकारयकारयोर्वलि परतो लोपो भवति । दिव्-दिदिवान्, दिदिवांसौ, दिदिवांसः । ऊयी ऊतम् । क्नूयी-क्नूतम् । 'गोधाया ढ्रक्' (४.१.१२९) गौधेरः । पचेरन् । यजेरन् । 'जीवेरदानुक् (द. उ. १.१६३) जीरदानुः । स्निवेः-आस्नेमाणम् । 'उणादयो बहुलम्' (३.३.१) इति बहुलवचनात् 'च्छ्वोः शूडनुनासिके च' (६.४.१९) इति ऊठ् न भवति ।

वलीति किम्? ऊय्यते । क्नूय्यते । पूर्वं लोपग्रहणं किम्? वेरपृक्तलोपात्पूर्वं वलि लोपो यथा स्यात्-कण्डूयतेः क्विप्-कण्डूः । लोलूयतेः - लोलूः ।

व्रश्चादीनामुपदेशसामर्थ्याद् वलि लोपो न भवति । वृश्चति, वव्रश्चेत्यत्रापि हि सम्प्रसारणहलादिःशेषयोर्बहिरङ्गत्वात्प्राप्नोति ॥

२५०७. वेरपृक्तस्य ॥ ६७ ॥ (३७५)

'लोपः' इति वर्तते । 'वेः' इति क्विबादयो विशेषाननुबन्धानुत्सृज्य सामान्येन गृह्यन्ते। वेरपृक्तस्य लोपो भवति । 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (३.२.८७) ब्रह्महा, भ्रूणहा । 'स्पृशोऽनुदके क्विन्' (२.२.५८) - घृतस्पृक्, तैलस्पृक् । 'भजो ण्विः' (३.२.६२) अर्धभाक्, पादभाक्, तुरीयभाक्।

अपृक्तस्येति किम्? 'वृदृभ्यां विन्' (उ. ५०२) - दर्विः । 'कृगृशृसृजागृभ्यः क्विः' - जागृविः ॥

२५०८. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ ६८ ॥ (२५२)

'लोपः' इति वर्तते । तदिह लौकिकेनार्थेनार्थवत् कर्मसाधनं द्रष्टव्यम् - लुप्यते इति लोपः । हलन्ताद्, ङ्यन्तादाबन्ताच्च दीर्घात् परं सु, ति, सि - इत्येतदपृक्तं हल् लुप्यते । हलन्तात् सुलोपः - राजा, तक्षा, उखास्रत्, पर्णध्वत्। ङ्यन्तात् - कुमारी, गौरी, शार्ङ्गरवी । आबन्तात् - खट्वा, बहुराजा, कारीषगन्ध्या।

हलन्तादेव तिलोपः, सिलोपश्च । तत्र तिलोपस्तावत्-अबिभर्भवान् । भृञो लङि तिपि 'श्लौ' 'भृञामित्' (७.४.७६) इत्यभ्यासस्येत्त्वम् । अजागर्भवान् । अभिनोऽत्र (म. भा.) । अच्छिनोऽत्र । दस्य रेफः ।

हल्ङ्याब्भ्य इति किम्? ग्रामणीः । सेनानीः । दीर्घादिति किम्? निष्कौशाम्बिः। अतिखट्वः । सुतिसीति किम्? अभैत्सीत् । तिपा सहचरितस्य सिशब्दस्य ग्रहणात्सिचो ग्रहणं नास्ति । अपृक्तमिति किम् । भिनत्ति, छिनत्ति ।

हलिति किम्? बिभेद । चिच्छेद ।

अथ किमर्थं हलन्तात्सुतिसीनां लोपो विधीयते, संयोगान्तलोपेनैव सिद्धम्? न सिद्ध्यति; राजा तक्षेत्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपो न स्यात् । उखास्रत्, पर्णध्वदित्यत्रापदान्तत्वाद्धत्वं च न स्यात् । अभिनोऽत्रेत्यत्र 'अतो रोरप्लुतादप्लुते' (६.१.११३) इत्युत्वं न स्यात् । अविभर्भवानित्यत्र तु 'रात्सस्य' (८.३.२४) इति नियमाल्लोप एव न स्यात्।

संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यति ।
रात्तु ते नैव लोपः स्याद्, हलस्तस्माद्विधीयते ॥

२५०९. एङ्ह्रस्वात्सम्बुद्धेः ॥ ६९ ॥ (१९३)

'लोपः' इति वर्त्तते, 'हल्' इति च । 'अपृक्तम्' इति नाधिक्रियते, तथा च पूर्वसूत्रे पुनरपृक्तग्रहणं कृतम् । एङन्तात्प्रातिपदिकाद् ह्रस्वान्ताच्च परो हल्लुप्यते स चेत्सम्बुद्धेर्भवति। एङन्तात्-हे अग्ने, हे वायो । ह्रस्वान्तात् - हे देवदत्त, हे नदि, हे वधु, हे कुण्ड । कुण्डशब्दाद् 'अतोऽम्' (७.१.२४) इत्यम्, 'अमि पूर्वः' (३.१.१०७) इति पूर्वत्वे कृते हल्मात्रस्य मकारस्य लोपः।

हे कतरदित्यत्र डिदयमद्डादेशः (७.१.२५), तत्र टिलोपे सति ह्रस्वाभावान्नास्ति सम्बुद्धिलोपः ।

एङ्ग्रहणं क्रियते सम्बुद्धिगुणबलीयस्त्वात् ॥

२५१०. शेश्छन्दसि बहुलम् ॥ ७० ॥ (३५१६)

'शि' इत्येतस्य बहुलं छन्दसि विषये लोपो भवति । या क्षेत्रा । 'या वना' (अथर्व. १४.२.७) । 'यानि क्षेत्राणि' (अथर्व. १४.२.७) । यानि वनानि ॥

२५११. ह्रस्वस्य पिति कृति तुक् ॥ ७१ ॥ (२८५८)

पिति कृति परतो ह्रस्वान्तस्य धातोः तुगागमो भवति । अग्निचित् । सोमसुत्। प्रकृत्य। प्रहृत्य । उपस्तुत्य ।

ह्रस्वस्येति किम्? आलूय । ग्रामणीः । पितीति किम्? कृतम् । हृतम् । कृतीति किम्? पटुतरः । पटुतमः ।

ग्रामणि ब्राह्मणकुलमित्यत्र ह्रस्वस्य बहिरङ्गस्यासिद्धत्वात् तुग्न भवति ॥

२५१२. संहितायाम् ॥ ७२ ॥ (१४५)

अधिकारोऽयम् 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८) इति यावत् । प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम् । वक्ष्यति - 'इको यणचि (६.१.७७), दध्यत्र'।

संहितायामिति किम्? दधि अत्र । मधु अत्र ॥

२५१३. छे च ॥ ७३ ॥ (१५६)

'ह्रस्वस्य तुक्' इति वर्तते । छकारे परतः संहितायां विषये ह्रस्वस्य तुगागमो भवति । इच्छति । गच्छति ।

ह्रस्व एवात्रागमी, न त्वदन्तः । तेन चिच्छिदतुः चिच्छिदुरित्यत्र तुगभ्यासस्य ग्रहणेन न गृह्यत इति हलादिःशेषेण न निवर्त्त्यते । नावयवावयवः समुदायावयवो भवतीति ॥

२५१४. आड्माङोश्च ॥ ७४ ॥ (१४७)

'तुक्' इत्यनुवर्तते, 'छे' इति च । आङो ङित ईषदादिषु चतुर्ष्वर्थेषु वर्तमानस्य माङश्च प्रतिषेधवचनस्य छकारे परतस्तुगागमो भवति । 'पदान्ताद्वा' (६.१.७६) इति विकल्पे प्राप्ते नित्यं तुगागमो भवति । ईषदर्थे - ईषच्छाया आच्छाया । क्रियायोगे - आच्छादयति । मर्यादाभिविध्योः-आच्छायायाः । आच्छायम् । माङः खल्वपि - माच्छैत्सीत् । माच्छिदत् ।

ङिद्विशिष्टग्रहणं किम्? आछाया, आच्छाया । प्रमाछन्दः, प्रमाच्छन्दः ॥

२५१५. दीर्घात् ॥ ७५ ॥ (१४८)

'छे तुक्' इति वर्तते । दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य तुगागमो भवति । ह्रीच्छति । म्लेच्छति । अपचाच्छायते । विचाच्छायते ॥

२५१६. पदान्ताद्वा ॥ ७६ ॥ (१४९)

'दीर्घाच्छे तुक्' इति वर्त्तते । पदान्ताद्दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य पूर्वेण नित्यं प्राप्तो वा तुगागमो भवति । कुटीच्छाया । कुटीछाया । कुवलीच्छाया । कुवलीछाया।

विश्वजनादीनां छन्दसि वा तुगागमो भवतीति वक्तव्यम् (म. भा. ६.१.७६ वा.१) । विश्वजनच्छत्रम् । विश्वजनछत्रम् । 'नच्छायां कुरवोऽपराम्' (अथर्व. १३.३.५६) नछायां कुरवोऽपरम् ॥

२५१७. इको यणचि ॥ ७७ ॥ (४७)

अचि परत इको यणादेशो भवति । दध्यत्र । मध्वत्र । कर्त्रर्थम् । हर्त्रर्थम् । लाकृतिः ।

इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थं यणादेशो वक्तव्यः (म. भा.) । भोऽ३ इ इन्द्रम् । भोऽ३ यिन्द्रम् । अचीति चायमधिकारः 'सम्प्रसारणाच्च' (६.१.१०८) इति यावत् ॥

२५१८. एचोऽयवायावः ॥ ७८ ॥ (३१)

एचःस्थानेऽचि परतोऽय्, अव्, आय्, आव्, - इत्येते आदेशा यथासंख्यं भवन्ति । चयनम् । लवनम् । चायकः । लावकः । कयेते । ययेते । वायाववरुणद्धि॥

२५१९. वान्तो यि प्रत्यये ॥ ७९ ॥ (३६)

योऽयमेचः स्थाने वान्तादेशः - ओकारस्य अव्, औकारस्यावु, स यकारादौ प्रत्यये परतो भवति । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । पिचव्यः कार्पासः । नाव्यो ह्रदः ।

वान्त इति किम्? रायमिच्छति रैयति । यीति किम्? गोभ्याम्, नौभ्याम् । प्रत्यय इति किम्? गोयानम्, नौयानम् ।

गोर्यूतौ छन्दसि (म. भा. ६.१.७९ वा.२) । गोशब्दस्य यूतौ परतश्छन्दसि विषये वान्तादेशो वक्रव्यः । 'आ नो मित्रवरुणा घृतैर्गव्यूतिमुक्षतम् (ऋ. ३.६२.१६)।

छन्दसीति किम्? गोयूतिः ।

अध्वपरिमाणे च (म. भा. व. ३) । गोर्यूतौ परतो वान्तादेशो वक्तव्यः । गव्यूतिमात्रमध्वानं गतः ॥

२५२०. धातोस्तन्निमितस्यैव ॥ ८० ॥ (६४)

'एचः' इति वर्त्तते । 'वान्तो यि प्रत्यये' इति च । धातोर्य एच् तन्निमित्तो यकारादिप्रत्ययनिमित्तस्तस्य यकारादौ प्रत्यये परतो वान्तादेशो भवति । लव्यम् । पव्यम् । अवश्यलाव्यम् । अवश्यपाव्यम् ।

धातोरिति किम्? प्रातिपदिकस्य नियमो मा भूत् । तत्र को दोषः? बाभ्रव्य इत्यत्रैव स्यात्, इह न स्याद् - गव्यम्, नाव्यमिति ।

तन्निमित्तस्येति किम्? अतन्निमित्तस्य मा भूत् - उपोयते । औयत । लौयमनिः। पौयमानिः । 'अत इञ्' (४.१.९५) ।

एवकारकरणं किम्? धात्ववधारणं यथा स्यात्, तन्निमित्तावधारणं मा भूदिति तन्निमित्तस्य हि धातोश्चाधातोश्च भवति - ब्राभ्रव्यः, अवश्यलाव्यम्, लव्यम् ॥

२५२१. क्षय्यजय्यौ शक्यार्थे ॥ ८१ ॥ (६५)

'क्षि' 'जि' -इत्येतयोर्धात्वोर्यति प्रत्यये परतः शक्यार्थे गम्यमाने एकारस्यायादेशो निपात्यते । शक्यः क्षेतुं क्षय्यः । शक्यो जेतुं जय्यः ।

शक्यार्थ इति किम्? क्षेयं पापम् । जेयो वृषलः ॥

२५२२. क्रय्यस्तदर्थे ॥ ८२ ॥ (६६)

क्रीणातेर्धातोस्तदर्थे क्रयार्थं यत्तस्मिन्नभिधेये यति प्रत्यये परतोऽयादेशो निपात्यते। क्रय्यो गौः । क्रय्यः कम्बलः । क्रयार्थं यः प्रसारितः स उच्यते ।

तदर्थं इति किम्? क्रेयं नो धान्यम्, न चास्ति क्रय्यम् ॥

२५२३. भय्यप्रवय्ये चच्छन्दसि ॥ ८३ ॥ (३५१७)

बिभेतेर्धातोः प्रपूर्वस्य च 'वी' इत्येतस्य यति प्रत्यये परतश्छन्दसि विषयेऽयादेशो निपात्यते । 'भय्यं किलासीत्' (काठ. सं. १३.४) । वत्सतरी प्रवय्या । भय्येति 'कृत्यल्युटो बहुलम्' (३.३.११३) इत्यपादाने यत्प्रत्ययः । बिभेत्यस्मादिति भय्यम् । 'प्रवय्या' इति स्त्रियामेव निपातनम् । अन्यत्र प्रवेयमित्येव भवति ।

छन्दसीति किम्? भेयम् । प्रवेयम् ।

ह्रदय्या आप उपसंख्यानम् (म. भा. ६.१.८३ वा. १) । ह्रदय्या आपः (म.भा.)। ह्रदे भवा-'भवे छन्दसि' (४.४.११०) इति यत्प्रत्ययः ॥

२५२४. एकः पूर्वपरयोः ॥ ८४ ॥ (६८)

अधिकारोऽयम् । 'ख्यत्यात्परस्य' (६.१.११२) इति प्रागेतस्मात्सूत्रादित उतरं यद्वक्ष्यामस्तत्र पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवतीत्येतत् वेदितव्यम् । वक्ष्यति - 'आद्गुणः' (६.१.८७) इति । तत्राचि पूर्वस्यावर्णाच्च परस्य स्थाने एको गुणो भवति - खट्वेन्द्रः, मालेन्द्रः ।

पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थम् । [अन्यथा] एकस्यैव हि स्यात्, नोभे सप्तमीपञ्चम्यौ युगपत्प्रकल्पिके भवत इति ।

एकग्रहणं पृथगादेशनिवृत्त्यर्थम्, स्थानिभेदाद्धि भिन्नादिषु नत्ववद् द्वावादेशौ स्याताम्॥

२५२५. अन्तादिवच्च ॥ ८५ ॥ (७५)

'एकः' इति वर्त्तते, 'पूर्वपरयोः' इति च । 'एकः पूर्वपरयोः' (६.१.८४) इति योऽयमेकादेशो विधीयते स पूर्वस्यान्तवद्भवति, परस्यादिवद्भवति । यथा तस्यान्त आदिर्वा तदन्तर्भूतस्तद्ग्रहणेन गृह्यते, तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यते - इत्येषोऽतिदेशस्यार्थः ।

ब्रह्मबन्धूरित्यत्र ब्रह्मबन्धिवति प्रातिपदिकम्, ऊङित्यप्रातिपदिकम्, तयोः प्रातिपदिकाप्रातिपदिकयोर्य एकादेशः स प्रातिपदिकस्यान्तवद् भवति । यथा शक्यते कर्त्तुम्- 'ङ्याप्प्रातिपदिकात्' (४.१.१) इति स्वादिविधिः ।

वृक्षावित्यत्र सुबौकारः असुबकारः, तयोः सुबसुपोरेकादेशः सुप आदिवद्भवति। यथा शक्यते वक्तुम् 'सुबन्तं पदम्' (१.४.१४) इति ।

वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते, तथा हि खट्वाभिरित्यत्रान्तवद्भावाभावाद् 'अतो भिस ऐस्' ,(७.१.९) इति न भवति । ह्वयतेः - जुहावेति सम्प्रसारणपूर्वत्वस्यादिवद्भावाभावाद् 'आत औ णलः' (७.१.३४) इति न भवति । अस्यै अश्वः, अस्या अश्व इति 'वृद्धिरेचि' (६.१.८८) इति वृद्धिः, 'एङः पदान्तादति' (६.१.१०९) इत्यत्र विधावादिवन्न भवति ।

पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते । तत्रावयवयोरानुमानिकं स्थानित्वम्मिति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तमित्यन्तादिवद्भावो विधीयते ॥

२५२६. षत्वतुकोरसिद्धः ॥ ८६ ॥ (३३३३)

षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धो भवति । सिद्धकार्यं न करोतीत्यर्थः। "असिद्धवचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च" (म.भा. ६.१.८६)। 'कोऽसिचद् इत्यत्र' 'एङः पदान्तादति' (६.१.१०९) इत्येकादेशस्य परं प्रत्यादिवद्भावादपदादेरिण उत्तरस्यादेशस्य सकारस्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति । कोऽस्य, योऽस्य, कोऽस्मै-इत्येकादेशस्यासिद्धत्वाद् 'इणः' (८.३.३९) इति षत्वं न भवति ।

तुग्विधौ - अधीत्य, प्रेत्येति । अत्रैकादेशस्यासिद्धत्वात् 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुग्भवति ।

सम्प्रसारणङीट्सु प्रतिषेधो वक्तव्यः (म. भा. वा. ६) । सम्प्रसारणे - ब्रह्महूषु । परिवीषु । सम्प्रसारणपूर्वत्वस्यासिद्धत्वात्षत्वं न प्राप्नोति । ङौ-वृक्षेच्छत्रम्, वृक्षे छत्रम् । इटि - अपचेच्छत्रम्, अपचे छत्रम् (म. भा.) आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणो (६.१४.७१) नित्योऽत्र तुक् प्राप्नोति, 'दीर्घात्' (६.१.७५) 'पदान्ताद्वा' (६.१.७६) इति तुग्विकल्प इष्यते ॥

२५२७. आद् गुणः ॥ ८७ ॥ (६९)

'अचि' इत्यनुवर्तते । अवर्णात्परो योऽच्, अचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णाचोः स्थाने एको गुण आदेशो भवति । तवेदम् । खट्वेन्द्रः, मालेन्द्रः। तवेहते, खट्वेहते । तवोदकम्, खट्वोदकम् । तवर्श्यः, खट्वर्श्यः । तवल्कारः, खट्वल्कारः । लृकारस्य स्थाने योऽण् तस्य लपरत्वमिष्यते ॥

२५२८. वृद्धिरेचि ॥ ८८ ॥ (७२)

'आत्' इति वर्तते । अवर्णात्परो य एच्, एचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णैचोः ने वृद्धिरेकादेशो भवति । आद्गुणस्यापवादः । ब्रह्मैडका, खट्वैडका । ब्रह्मैतिकायनः, खट्वैतिकायनः । ब्रह्मौदनः, खट्वौदनः । ब्रह्मौपगवः, खट्वौपगवः ॥

२५२९. एत्येधत्यूठ्सु ॥ ८९ ॥ (७३)

'वृद्धिरेचि' इति वर्तते, 'आत्' इति च । तदेतदेज्ग्रहणमेतेरेव विशेषणम्, न पुनरेधतेः, अव्यभिचाराद्, ऊठश्चासम्भवात् । 'इण् गतौ' (धा.पा. १०४६) इत्येतस्मिन् धातावेचि, 'एध वृद्धौ' (धा.पा. २) इत्येतस्मिन् ऊठि च पूर्वं यदवर्णं ततश्च परो योऽच्, तयोः पूर्वपरयोरवर्णाचोः स्थाने वृद्धिरेकादेशो भवति । उपैति, उपैषि, उपैमि । उपैधते, प्रैधते । प्रष्ठौहः, प्रष्ठौहा, प्रष्ठौहे। ऊठ्याद्गुणापवादो वृद्धिर्विधीयते । एत्येधत्योः - एङिपररूपापवादः ।

'ओमाङोश्च'(६.१.९५) इत्येतत्तु पररूपं न बाध्यते, 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' (व्या.परि. ४९) इति, 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते' (व्या.परि. ९) इति वा । तेनेह न भवति - उप+आ+इतः=उपेत इति ।

एचीत्येव-उप+इतः=उपेतः ।

अक्षादूहिन्यां वृद्धिर्वक्तव्या (म. भा. ६.१.८९ वा. ११) । अक्षौहिणी ।

स्वादीरेरिण्योर्वृद्धिर्वक्तव्या (म. भा. वा. १३) । स्वैरम् । स्वैरिणी ।

प्रादूढोढ्येषैष्येषु वृद्धिर्वक्तव्या (म. भा. वा. १२) [प्रौहः] । प्रौढः । प्रौढिः। प्रैषः । प्रैष्यः।

ऋते च तृतीयासमासेऽवर्णाद् वृद्धिर्वक्तव्या (म. भा. वा. १४) । सुखेन ऋतः सुखार्तः। दुःखेन ऋतो दुःखार्तः । ऋत इति किम्? सुखेन इतः सुखेतः । तृतीयेति किम्? परमर्तः । समास इति किम्? सुखेनर्तः ।

प्रवत्सतरकम्बलवसनानामृणे वृद्धिर्वक्तव्या (म. भा. वा. १५) । प्र - प्रार्णम् । वत्सतर-वत्सरार्णम् । कम्बल - कम्बलार्णम् । वसन-वसनार्णम् ।

ऋणदशाभ्यां वृद्धिर्वक्तव्या (म. भा. वा. १६) । ऋणार्णम् । दशार्णम् ॥

२५३०. आटश्च ॥ ९० ॥ (२६९)

'एचि' इति निवृत्तम् । 'अचि' इत्यनुर्त्तते । आटः परो योऽच्, अचि च पूर्वो य आट्-तयोः पूर्वपरयोराडचोः स्थाने वृद्धिरेकादेशो भवति । ऐक्षिष्ट । ऐक्षत । ऐक्षिष्यत । औभीत् । आर्ध्नोत् । औब्जीत् ।

चकारोऽधिकविधानार्थः - 'उसि' (६.१.९६) 'ओमाङोश्च' (६.१.९५) इति पररूपबाधनार्थः । औस्रीयत् । औड्कारीयत् । आ+ऊढा ओढा, तामैच्छत् औढीयत् ॥

२५३१. उपसर्गादृति धातौ ॥ ९१ ॥ (७४)

'आत्' इत्येव । अवर्णान्तादुपसर्गादृकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति । आद्गुणापवादः । उपार्च्छति । प्रार्च्छति । उपार्ध्नोति ।

उपसर्गादिति किम्? खट्वर्च्छति । मालर्च्छति । प्रगता ऋच्छका अस्मादृेशात् प्रर्च्छको देशः । 'यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञकाः' (जै.परि.९९) इति ।

ऋतीति किम्? उप+इत उपेतः । तपरकरणं किम्? उप+ऋकारीयति उपर्कारीयति । 'वा सुप्यापिशलेः' (६.१.९२) इति विकल्पः स्यात् ।

उपसर्गग्रहणादेव धातुग्रहणे सिद्धे धातुग्रहणं शाकल्यनिवृत्त्यर्थम् । 'ऋत्यकः' (६.१.१२८) इति हि शाकल्यस्य प्रकृतिभावः प्राप्नोति ॥

२५३२. वा सुप्यापिशलेः ॥ ९२ ॥ (७७)

'आत्' इत्येव, 'उपसर्गादृति धातौ' इति च । सुबन्तावयवे धातावृकरादौ परतोऽवर्णन्तादुपसर्गात् पूर्वपरयोरापिशलेराचार्यस्य मतेन वा वृद्धिरेकादेशो भवति । उपर्षभीयति, उपार्षभीयति । उपल्कारीयति, उपाल्कारीयति । 'ऋकारलृकारयोः सावर्ण्यविधिः' इति ऋतीति लृकारोऽपि गृह्यते ।

आपिशलिग्रहणं पूजार्थम्, वेति ह्युच्यत एव ॥

२५३३. औतोऽम्शसोः ॥ ९३ ॥ (२८५)

ओतोऽमि शसि च परतः पूर्वपरयोराकार आदेशो भवति । गां पश्य, गाः पश्य । द्यां पश्य, द्याः पश्य ।

द्योशब्दोऽप्योकारान्त एव विद्यते, ततोऽपि परं सर्वनामस्थानं णिदिष्यते, तेन नाप्राप्तायां वृद्धावयमकारो विधीयमानस्तां बाधते ।

अमिति द्वितीयैकवचनं गृह्यते शसा साहचर्यात्, 'सुपि' इति चाधिकारात् । तेनाचिनवम्, असुनवमित्यत्र न भवति ॥

२५३४. एङि पररूपम् ॥ ९४ ॥ (७८)

'आत्' इत्येव, 'उपसर्गाद्धातौ' इति च । अवर्णान्तादुपसर्गादेङादौ धातौ पूर्वपरयोः पररूपमेकादेशो भवति । 'वृद्धिरेचि' (६.१.८८) इत्यस्यापवादः । उपेलयति । प्रेलयति । उपोषति। प्रोखति ।

केचिद् 'वा सुप्यापिशलेः' इत्यनुवर्त्तयन्ति, तच्च वाक्यभेदेन सुब्धातौ विकल्पं करोति- उपेडकीयति, उपैडकीयति । उपोदनीयति, उपौदनीयति ।

शकन्ध्वादिषु पररूपं वक्तव्यम् (म. भा. ६.१.९४ वा. ४) । शक+अन्धुः=शकन्धुः। कुल+अटा=कुलटा ।

सीमन्तः केशेषु (म. भा.) । सीम्नोऽन्तः सीमन्तः । अन्यत्र सीमान्तः ।

एवे चानियोगे पररूपं वक्तव्यम् (म. भा. वा. ३) इह + एव=इहेव । अद्य+एव=अद्येव। अनियोगे इति किम्? इहैव भव मान्यत्र गाः ।

ओत्वोष्ठयोः समासे वा पररूपं वक्यव्यम् (म.भा.वा.५) स्थूल+ओतुः स्थूलौतुः, स्थूलोतुः । बिम्बौष्ठी, बिम्बोष्ठी । समास इति किम्? तिष्ठ देवदत्तौष्ठं पश्य ।

एमन्नादिषु छन्दसि पररूपं वक्तव्यम् (म. भा. वा. ६) । अपां त्वा एमन्, 'अपां त्वेमन्' (मै. सं.२.७.१८.१) । अपां त्वा ओह्मन्, 'अपां त्वोह्मन्' (मै.सं.२.७.१८.१) ॥

२५३५. ओमाङोश्च ॥ ९५ ॥ (८०)

'आत्' इत्येव । अवर्णान्तादोमि आङि च परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। का+ओमित्यवोचत्, कोमित्यवोचत् । योमित्यवोचत् । आङि खल्वपि आ+ऊढा । अद्य+ओढा अद्योढा । कदा+ओढा कदोढा । तदा + ओढा, तदोढा । 'वृद्धिरेचि' (६.१.८८) इत्यस्यापवादः ।

इह तु आ ऋश्यात् अर्श्यात्, अद्य अर्शात् अद्यर्श्यादिति 'अकः सवर्णे दीर्घत्वं' (६.१.१०१) बाधते ॥

२८३६. उस्यपदान्तात् ॥ ९६ ॥ (२२१४)

'आत्' इत्येव । अवर्णादपदान्तादुसि पूर्वपरयोराद्गुणापवादः पररूपमेकादेशो भवति । भिन्द्या+उस् भिन्द्युः । छिन्द्या+उस् छिन्द्युः । अदा+उस् अदुः । अया + उस् अयुः ।

अपदान्तादिति किम्? का+उस्रा कोस्रा (म. भा.) । का+उषिता कोषिता ।

आदित्येव - चक्रुः । अबिभयुः ॥

२५३७. अतो गुणे ॥ ९७ ॥ (१९१)

'अपदान्तात्' इति वर्त्तते । अकारादपदान्ताद् गुणे परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । पचन्ति । यजन्ति । अकः सवर्णे दीर्घस्यापवादः (६.१.१०१)।

पचे, यजे - इत्यत्र 'वृद्धिरेचि' (६.१.८८) इति वृद्धिः प्राप्नोति । अत इति किम्? यान्ति। वान्ति । गुण इति किम्? अपचे । अयजे । अपदान्तादित्येव - दण्डाग्रम् । यूपाग्रम् ॥

२५३८. अव्यक्तानुकरणस्यात इतौ ॥ ९८ ॥ (८१)

अव्यक्तम्=अपरिस्फुटवर्णम्, तदनुकरणं परिस्फुटवर्णमेव केनचित्सादृश्येन तदव्यक्तमनुकरोति तस्य योऽच्छब्दस्तस्मादितौ पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । पटत् इति पटिति । घटत् इति घटिति । झटत् इति झटिति । छमत् इति छमिति ।

अव्यक्तानुकरणस्येति किम्? जगत् इति जगदिति । अत इति किम्? मरट् इति मरडिति । इताविति किम्? पटत् अत्र पटदत्र ॥

अनेकाच इति वक्तव्यम् (म. भा. ६.१.९८ वा १) । इह मा भूत्-स्रत् इति स्रदिति ।

कथं घटदिति गम्भीरमम्बुदैर्नदितमिति? दकारान्तमेतदनुकरणं द्रष्टव्यम् ॥

२५३९. नाम्रेडितस्यान्त्यस्य तु वा ॥ ९९ ॥ (८२)

अव्यक्तानुकरणस्याम्रेडितस्य योऽच्छब्द इतौ तस्य पररूपं न भवति, तस्य योऽन्त्यस्तकारस्तस्य वा भवति । पटत्पटदिति, पटत्पटेति करोति । 'नित्यवीप्सयोः' (८.१.४) इति द्विर्वचनम् ।

यदा तु समुदायानुकरणं तदा भवत्येव पूर्वेण पररूपम्-पटत्पटेति करोति ॥

२५४०. नित्यमाम्रेडिते डाचि ॥ १०० ॥ (२१२८)

'अव्यक्तानुकरणस्य' , 'अतः' 'अन्त्यस्य' इति चानुवर्त्तते । डाच्परं यदाम्रेडितं तस्मिन्पूर्वस्याव्यक्तानुकरणस्याच्छब्दस्य योऽन्त्यस्तकारस्तस्य पूर्वस्य परस्य चाद्यस्य वर्णस्य नित्यं पररूपमेकादेशो भवति । पटपटाकरोति । दमादमाकरोति ।

पटदित्यस्माद् 'अव्यक्तानुकरणाद्' इति डाचि विहिते 'डाचि बहुलम्' (वा. ६९१) इति द्विर्वचनम्, अच्च टिलोपात् पूर्वमेवेष्यते ॥

२५४१. अकः सवर्णे दीर्घः ॥ १०१ ॥ (८५)

अकः सवर्णेऽचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति । दण्डाग्रम्। दधीन्द्रः । मधूदके । होतृश्यः ।

अक इति किम्? अग्नये । सवर्ण इति किम्? दध्यत्र ।

अचीत्येव-'कुमारी शेते । नाज्झलौ' (१.१.१०) इत्यत्र यदजिति प्रत्याहारग्रहणं तत्र ग्रहणकशास्त्रस्यानभिनिर्वृत्तत्वात्सवर्णा न गृह्यन्त इति सवर्णत्वमी-कारशकरयोरप्रतिषिद्धम् ।

सवर्णदीर्घत्वे ऋति ॠ वा वचनम् (म. भ. ६.१.१०१ वा १) । ऋति सवर्णे परभूते तत्र ॠ वा भवतीति वक्तव्यम् । होतृ+ऋकारः होतॄकारः । यदा न ॠ, तदा दीर्घ एव होतॄकारः ।

ऌति ल्ऌ वा वचनम् (म. भा. वा. २) । ऌति सवर्णे परतो ल्ऌ वा भवतीति वक्तव्यम् । होतृ + ऌकारः । होत्ल्ऌकारः । होतॄकारः । ऋकारऌकारयोः सवर्णसंज्ञाविधिरुक्तः। दीर्घपक्षे तु समुदायान्तरतमस्य ऌवर्णस्य दीर्घस्याभावात् ऋकारः क्रियते॥

२५४२. प्रथमयोः पूर्वसवर्णः ॥ १०२ ॥ (१६४)

'अकः' इति 'दीर्घः' इति वर्तते । प्रथमाशब्दो विभक्तिविशेषे रूढः, तत्साहचर्यात् द्वितीयापि प्रथमेत्युक्ता । तस्यां प्रथमायां द्वितीयायां च विभक्तावचि अकः पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशो भवति । अग्नी । वायू । वृक्षाः । प्लक्षाः । वृक्षान् । प्लक्षान् ।

'अतो गुणे' (६.१.९७) इति यदकारे पररूपं तदकः सवर्णे दीर्घत्वमेव (६.१.१०१) बाधते, न तु पूर्वसवर्णदीर्घत्वम्, 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' (व्या.परि.९) इति ।

अचीत्येव । वृक्षः, प्लक्षः । अक इत्येव - नावौ ।

पूर्वसवर्णग्रहणं किम्? अग्नी इत्यत्र पक्षे परसवर्णो मा भूत् । दीर्घग्रहणं किम्? त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थम् ॥

२५४३. तस्माच्छसो नः पुंसि ॥ १०३ ॥ (१९६)

तस्मात्पूर्वसवर्णदीर्घादुत्तरस्य शसोऽवयवस्य सकारस्य पुंसि नकारादेशो भवति । वृक्षान्। अग्नीन् । वायून् । कर्तॄन् । हर्तॄन् । षण्डकान् । पण्ढकान् । स्थूरकान् । अररकान्पश्य। सर्व एते पुंल्लिङ्गविशिष्टं स्वार्थं प्रतिपादयन्ति ।

इह तु चञ्चेव चञ्चा, 'लुम्मनुष्ये' (५.३.५८) इति कनो लुपि कृते 'लुपि युक्तवद् व्यक्तिवचने' (१.२.५) इति पुंसोऽपि स्त्रीलिङ्गता, तेन नत्वं न भवति - चञ्चाः पश्य, वध्रिकाः पश्येति ।

तस्मादिति किम्? एतांश्चरतो गाः पश्य । शस इति किम्? वृक्षाः । प्लक्षाः। पुंसीति किम्? धेनूः । बह्वीः । कुमारीः ॥

२५४४. नादिचि ॥ १०४ ॥ (१६५)

अवर्णादिचि पूर्वसवर्णदीर्घो न भवति । वृक्षौ । प्लक्षौ । खट्वे । कुण्डे ।

आदिति किम्? अग्नी । इचीति किम्? वृक्षाः ॥

२५४५. दीर्घाज्जसि च ॥१०५ ॥ (२३९)

दीर्घाज्जसि इचि च परतः पूर्वसवर्णदीर्घो न भवति । कुमार्यौ । कुमार्यः । ब्रह्मबन्ध्वौ। ब्रह्मबन्ध्वः ॥

२५४६. वा छन्दसि ॥ १०६ ॥

दीर्घाच्छन्दसि विषये जसि च इचि च परतो वा पूर्वसवर्णदीर्घो न भवति । मारुतीश्चतस्रः (काठ. सं. ११.१०) । पिण्डीः । मारुत्यश्चतस्रः (ऋ. सर्वा.) । पिण्ड्यः । वाराही (मै. सं. ४.४.५) । उपानही । वाराह्यौ । उपानह्यौ ॥

२५४७. अमि पूर्वः ॥ १०७ ॥ (१९४)

'अकः' इत्येव । अमि परतोऽकः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । वृक्षम् । प्लक्षम् । अग्निम् । वायुम् ।

पूर्वग्रहणम् किम्? पूर्व एव यथा स्यात्, पूर्वसवर्णोऽन्तरतमो मा भूदिति कुमारीमित्यत्र हि त्रिमात्रः स्यात् ।

'वा छन्दसि' (६.१.१०६) इत्येव - शमीं च (काठ.सं. ३६.६), शम्यम् च । गौरीं च, गौर्यं च (ऋ.. १०.१२६.८) ॥

२५४८. सम्प्रसारणाच्च ॥ १०८ ॥ (३३०)

'पूर्वः' इत्येव । सम्प्रसारणादचि परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । यजि - इष्टम् । वपि -उप्तम् । ग्रहि-गृहीतम् । सम्प्रसारणविधानसामर्थ्याद्विगृहीतस्य श्रवणे प्राप्ते पूर्वत्वं विधीयते ।

'वा छन्दसि' (६.१.१०६) इत्येव - 'मित्रो नो अत्र वरुणौ यज्यमानः' (अथर्व. १८.१.३९) ।

परपूर्वत्वविधाने सत्यर्थवत्सम्प्रसारणविधानमिति इष्ट इत्येवमादिषु पूर्वत्वाभावे यणादेशो भवत्येव ।

अन्तरङ्गे चाचि कृतार्थं वचनमिति बाह्ये पश्चात्सन्निपतिते पूर्वत्वं न भवति - शकह्वौ, शकह्वर्थम् ॥

२५४९. एङः पदान्तादति ॥ १०९ ॥ (८६)

एङ् यः पदान्तस्तस्मादति परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । अग्नेऽत्र । वायोऽत्र । अयवादेशयोरयमपवादः ।

एङ इति किम्? दध्यत्र । मध्वत्र । पदान्तादिति किम्? चयनम् । लवनम् । अतीति किम्? वायो इति । भानो इति । वायविति । भानविति । तपकरणं किम्? वायवायाहि ॥

२५५०. ङसिङसोश्च ॥ ११० ॥ (२४६)

'एङः' इति वर्त्तते, 'अति' इति च । एङ उत्तरयोर्ङसिङसोरति परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । अग्नेरागच्छति । अग्नेः स्वम् । वायोरागच्छति । वायोः स्वम् । अपदान्तार्थ आरम्भः ॥

२५५१. ऋत उत् ॥ १११ ॥ (२७९)

'ङसिङसोः' इत्येव । ऋकारान्तादुत्तरयोर्ङसिङसोरति परतः पूर्वपरयोरुकार एकादेशो भवति। होतुरागच्छति । होतुः स्वम् । द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यः स लभतेऽन्यतरव्यपदेशमिति 'उरण् रपरः' (१.१.५१) इति रपरत्वमत्र कृत्वा 'रात्सस्य' (८.२.२४) इति सलोपः कर्तव्यः ॥

२५५२. ख्यत्यात् परस्य ॥ ११२ ॥ (२५५)

'ङसिङसोः' इति वर्त्तते, 'उत्' इति च । ख्यत्यादिति खिशब्दखीशब्दयोस्तिशब्दतीशब्दयोश्च कृतयणादेशयोरिदं ग्रहणम्, ताभ्यां परस्य ङसिङसोरत उकारादेशो भवति । सख्युरागच्छति । सख्युः स्वम् । पत्युरागच्छति । पत्युः स्वम् ।

खीशब्दस्योदाहरणम् - सह खेन वर्त्तत इति सखस्तमिच्छतीति क्यच्-सखीयति, सखीयतेः क्विप् सखी, तस्य ङसिङसोः-सख्युरिति । तीशब्दस्यापि - लूनमिच्छति लूनीयति, लूनीयतेः क्विपि लुप्ते लून्युरागच्छति । लून्युः स्वम् । निष्ठानत्वम् (८.२.४४) 'पूर्वत्रासिद्धम्' (८.२.१) इत्यसिद्धम् ।

विकृतनिर्द्देशादेवेह न भवति - अतिसखेरागच्छति, सेनापतेरागच्छतीति । सखिशब्दस्य केवलस्य घिसंज्ञा प्रतिषिध्यते (१.४.७), न तदन्तस्य ॥

२५५३. अतो रोरप्लुतादप्लुते ॥ ११३ ॥ (१७३)

'अति' इति, 'उत्' इति वर्तते । अकारादप्लुतादुत्तरस्य रोः रेफस्य उकारानुबन्धविशिष्टस्य अकारेऽप्लुते परत उकारादेशो भवति । वृक्षोऽत्र । प्लक्षोऽत्र। 'भोभगोअघोअपूर्वस्य योऽशि' (८.३.१७) इत्यस्मिन्प्राप्ते उत्वं विधीयते । रुत्वस्याश्रयत्वात् 'पूर्वत्रासिद्धम् ' (८.२.१) इत्यसिद्धं न भवति ।

अत इति किम्? अग्निरत्र । तपरकरणं किम्? वृक्षा अत्र । सानुबन्धग्रहणं किम्? स्वरत्र । प्रातरत्र ।

अतीत्येव -वृक्ष इह । तस्यापि तपरत्वादत्र न भवति - वृक्ष आश्रितः । अप्लुतादिति किम्? सुस्त्रोताꣳ अत्र न्वसि । अप्लुत इति किम्? तिष्ठतु पय आꣳश्विन् । अत्र प्लुतस्यासिद्धत्वादुत्वं प्राप्नोतीति 'अप्लुतादप्लुते' इत्युच्यते ॥

२५५४. हशि च ॥ ११४ ॥ (१६६)

हशि च परतोऽत उत्तरस्य रोरुकारादेशो भवति । पुरुषो याति । पुरुषो हसति । पुरुषो ददाति ॥

२५५५. प्रकृत्याऽन्तः पादमव्यपरे ॥ ११५ ॥ (३५१८)

एङोऽति (६.१.१०९) इत्येव । 'एङः' इति यत्पञ्चम्यन्तमनुवर्त्तते तदर्थादिह प्रथमान्तं भवति । प्रकृतिरिति स्वभावः कारणं वाऽभिधीयते । अन्तरित्यव्ययमधिकरणभूतं मध्यमाचष्टे। पादशब्देन च ऋक्पादस्यैव ग्रहणमिष्यते, न तु श्लोकपादस्य । अवकारयकारपरेऽति परत एङ् प्रकृत्या भवति । स्वभावेनावतिष्ठते कारणात्मना वा भवति न विकारमापद्यते । तौ चेन्निमित्तकार्येणावन्तः पादम् = ऋक्पादमध्ये भवतः। 'ते अग्रे अश्वमायुञ्जन्' (वाज. सं. ९.७)। 'ते अस्मिन् जवमादधुः' (वाज. सं ९.७) । 'उपप्रयन्तो अध्वरम्' (ऋ १.७४.१) । 'शिरो अपश्यम्' (ऋ १.१६३.६) । 'सुजाते अश्वसूनृते' (ऋ ५.७९.१) । 'अध्वर्यो अद्रिभिः सुतम्' (ऋ. ९.५१.१) ।

अन्तःपादमिति किम्? 'कया मती कुत एतास एतेऽर्चयन्ति' (ऋ. १.१६५.१)। अव्यपर इति किम्? 'तेऽवदन्' (ऋ. १०.१०९.१) । तेजोऽयस्मयम्' (बाज. स. १२.६३) । एडिति किम्? 'अन्वग्निरुषसामग्रमख्यत्' (अथर्व. ७.८२.४) ।

केचिदिदं सूत्रम् 'नान्तः पादमव्यपरे' इति पठन्ति, ते संहितायामिह यदुच्यते तस्य सर्वस्य प्रतिषेधं वर्णयन्ति ॥

२५५६. अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ॥ ११६ ॥ (३५१९)

अव्यात्, अवद्यात्, अवक्रमुः, अव्रत, अयम्, अवन्तु, अवस्यु-इत्येतेषु यकारवकारपरेऽप्यति परतोऽन्तःपादमेङ् प्रकृत्या भवति । 'अग्निः प्रथमो वसुभिर्नो अव्यात्' (तै. सं २.१.११.२) । 'मित्रमहो अवद्यात्' (ऋ. ४.४.१५) 'मा शिवासो अवक्रमुः' (ऋ. ७.३२.२७) । ते नो अव्रताः । शतधारो अयं मणिः। 'ते नो अवन्तु पितरः' (ऋ. १०.१५.१) । 'कुशिकासो अवस्यवः' (ऋ ३.४२.९) ॥

२५५७. यजुष्युरः ॥ ११७ ॥ (३५२०)

उरःशब्द एङन्तो यजुषि विषयेऽति प्रकृत्या भवति । उरो अन्तरिक्षम् (वाज. सं. ४.७)।

अपरे यजुष्युरो इति सूत्रं पठन्ति, उकारान्तमुरुशब्दं सम्बुद्ध्यन्तमधीयते । त इदमुदाहरन्ति - उरो अन्तरिक्षं सजूरिति ।

यजुषि पादानामभावादनन्तः पादार्थं वचनम् ॥

२५५८. आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे ॥ ११८ ॥ (३५२१)

'यजुषि' इत्येव । आपो, जुषणो, वृष्णो, वर्षिष्ठे - इत्येते शब्दा अम्बे, अम्बाले, इत्येतौ च यावम्बिकेशब्दात्पूर्वौ यजुषि पठितौ ते अति परतः प्रकृत्या भवन्ति । 'आपो अस्मान्मातरः शुन्धयन्तु' (वाज. सं. ४.२) । 'जुषणो अप्तुराज्यस्य' (वाज. सं. ५.३५) । 'वृष्णो अंशुभ्यां गभस्तिपूतः' (वाज. सं. ७.१) । 'वर्षिष्ठे अधिनाके' (तै.सं. १.१.८.१) । 'अम्बे अम्बाल्यम्बिके' (तै.सं.७.४.१९.१) - यजुषीदमीदृशमेव पठ्यते । अस्मादेव निपातनाद् 'अम्बार्थनद्योर्ह्रस्वः' (७.४.१०७) इति ह्रस्वत्वं न भवति ॥

२५५९. अङ्ग इत्यादौ च ॥ ११९ ॥ (३५२२)

अङ्गशब्दे य एङ् तदादौ चाकारे यः पूर्वः स यजुषि विषयेऽति प्रकृत्या भवति । ऐन्द्रः प्राणो अङ्गे अङ्गे अदीध्यत् । ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यत्' (वाज. सं ६.२०) । ऐन्द्रः प्राणो अङ्गे अङ्गे अशोचिषम् ॥

२५६०. अनुदात्ते च कुधपरे ॥ १२० ॥ (३५२३)

'यजुषी' इत्येव । अनुदात्ते चाति कवर्गधकारपरे परतो यजुषि विषये एङ् प्रकृत्या भवति। अयं सो अग्निः' (वाज. सं. ५.३७) । अयं सो अध्वरः ।

अनुदात्ते इति किम्? अधोऽग्रे । अग्रशब्द आद्युदात्तो निपात्यते । कुधपरे इति किम्? 'सोऽयमग्निः सहस्रियः' (वाज. १५.५२) ॥

२५६१. अवपथासि च ॥ १२१ ॥ (३५२४)

'यजुषि' इत्येव । 'अनुदात्ते' इति चशब्देनानुकृष्यते । अवपथाः - शब्देऽनुदात्तेऽकारादौ परतो यजुषि विषय एङ् प्रकृत्या भवति । 'स्त्री रुद्रेभ्यो अवपथाः' (काठ स. ३०.६.३२) । वपेर्लङि थासि 'तिङ्ङतिङः' (८.१.२८) इति निघातेनानुदात्तत्वम् ।

अनुदात्त इत्येव - यद्रुद्रेभ्योऽवपथाः । 'निपातैर्यद्यदिहन्त' (८.१.३०) इति निघातः प्रतिषिध्यते ॥

२५६२. सर्वत्र विभाषा गोः ॥ १२२ ॥ (८७)

सर्वत्र=छन्दसि भाषायां च, अति परतो गोरेङ् प्रकृया भवति विभाषा । गोऽग्रम्, गो अग्रम् । छन्दसि - 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वान्' (तै. सं. ५.२.९.४) ॥

२५६३. अवङ् स्फोटायनस्य ॥ १२३ ॥ (८८)

'अति' इति निवृत्तम् । 'अचि' इत्येतत्पुनरनुवर्त्तत एव । अचि परतो गोः स्फोटायनस्याचार्यस्य मतेनावङादेशो भवति । गवाग्रम्, गोऽग्रम् । गवाजिनम्, गोऽजिनम् । गवोदनम्, गवौदनम् । गवोष्ट्रम्, गवुष्ट्रम् ।

आद्युदात्तश्चायमादेशो निपात्येते । स निपातनस्वरो बहुव्रीहौ प्रकृतिस्वरविधाने भवति - गावो अग्रमस्य गवाग्र इति । अन्यत्र तु समासान्तोदात्तत्वेन बाध्यते ।

स्फोटायनग्रहणं पूजार्थम्, 'विभाषा' इत्येव हि वर्त्तते ।

व्यवस्थितविभाषेयम् । तेन गवाक्ष इत्यत्र नित्यमवङ् भवति ॥

२५६४. इन्द्रे च नित्यम् ॥ १२४ ॥ (८९)

इन्द्रशब्दस्थेऽचि परतो गोर्नित्यमवङादेशो भवति । गवेन्द्रः । गवेन्द्रयज्ञस्वरः॥

२५६५. प्लुतप्रगृह्या अचि ॥ १२५ ॥ (९०)

प्लुताश्च प्रगृह्याश्चाचि प्रकृत्या भवन्ति । देवदत्ता३ अत्र न्वसि । यज्ञदत्ता३ इदमानय। आश्रयादत्र प्लुतः सिद्धः । प्रगृह्याः - अग्नी इति । वायू इति । खट्वे इति । माले इति ।

अचीत्यनुवर्त्तमाने पुनरज्ग्रहणमादेशनिमित्तस्याचः परिग्रहार्थम् । तेनेह न भवति - जानु उ अस्य रुजति=जान्वस्य रुजति (म. भा.) । प्रगृह्यादुकारात्परस्याकारस्य सवर्णदीर्घत्वं प्रत्यनिमित्तत्वादत्र प्रकृतिभावो न भवति।

नित्यग्रहणमिहानुवर्त्तते । प्लुतप्रगृह्याणां नित्यमयमेव प्रकृतिभावो यथा स्यात्, 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (६.१.१२७) इत्येतन्मा भूदिति ॥

२५६६. आङोऽनुनासिकश्छन्दसि ॥ १२६ ॥ (३५९५)

आङोऽचि परतः संहितायां छन्दसि विषयेऽनुनासिकादेशो भवति, स च प्रकृत्या भवति । 'अभ्रआँ अपः' (ऋ. ५.४८.१) । 'गभीरआँ अग्रपुत्रे जिघासत' (ऋ. ८.६७.११) ।

केचिद् 'आङोऽनुनासिकश्छन्दसि बहुलम्' इत्यधीयते । तेनेह न भवति - इन्द्रो बाहुभ्यामातरत् । आ अतरत् ॥

२५६७. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ १२७ ॥ (९१)

इकोऽसवर्णेऽचि परतः शाकल्यस्याचार्यस्य मतेन प्रकृत्या भवन्ति, ह्रस्वश्च तस्येकः स्थाने भवति । दधि अत्र, दध्यत्र । मधु अत्र, मध्वत्र । कुमारि अत्र, कुमार्यत्र । किशोरि अत्र, किशोर्यत्र ।

इक इति किम्? खट्वेन्द्रः । असवर्ण इति किम्? कुमारीन्द्रः ।

शाकल्यग्रहणं पूजार्थम्, आरम्भसामर्थ्यादेव हि यणादेशेन सह विकल्पः सिद्धः ।

सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्यः (म. भा. ६.१.१२७ वा. १) । सिति - 'अयं ते योनिऋत्वियः' (ऋ. ३.२९.१०) नित्यसमासे-व्याकरणम् । कुमार्यर्थम् ।

ईषाअक्षादिषु च्छन्दसि प्रकृतिभावमात्रं वक्तव्यम् (म. भा. वा. २) । 'ईषा अक्षो हिरण्ययः' (ऋ. ८.५.२९) । का ईम्रे पिशङ्गिला (वाज. सं. २३.५५) । पथा अगमन् ॥

२५६८. ऋत्यकः ॥ १२८ ॥ (९२)

'शाकल्यस्य ह्रस्वश्च' इत्येतदनुवर्त्तते । ऋकारे परतः शाकल्यस्याचार्यस्य मतेनाकः प्रकृत्या भवन्ति, ह्रस्वश्च तस्याकः स्थाने भवति । खट्व ऋश्यः । माल ऋश्यः । कुमारि ऋश्यः । होतृ ऋश्यः ।

ऋतीति किम्? खट्वेन्द्रः । अक इति किम्? वृक्षावृश्यः । सवर्णार्थमनिगर्थं च वचनम्॥

२५६९. अप्लुतवदुपस्थिते ॥ १२९ ॥ (९८)

उपस्थितं नामानार्ष इतिकरणः समुदायादवच्छिद्य पदं येन स्वरूपेऽवस्थाप्यते तस्मिन्परतः प्लुतोऽप्लुतवद्भवति । प्लुतकार्यं प्रकृतिभावं न करोति । सुश्लोका३ इति, सुश्लोकेति। सुमङ्गला३ इति, सुमङ्गलेति ।

वत्करणं किम्? अप्लुत इत्युच्यमाने प्लुत एव प्रतिषिध्येत । तत्र को दोषः? प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् - अग्नी३ इति । वायू३ इति ॥

२५७०. ई३ चाक्रवर्मणस्य ॥ १३० ॥ (९९)

ई३कारः प्लुतोऽचि परतश्चाक्रवर्मणस्याचार्यस्य मतेनाप्लुतवद्भवति । अस्तु हीत्यब्रूतम्, अस्तु ही३ इत्यब्रूताम् । चिनु हीदम्, चिनुही३ इदम् ।

चाक्रवर्मणग्रहणं विकल्पार्थम् - तदुपस्थिते निवृत्त्यर्थम्, अनुपस्थिते प्राप्त्यर्थमित्युभयत्रविभाषेयम् ।

ईकारादन्यत्राप्ययमप्लुतवद्भाव इष्यते । वशा३ इयम्, वशेयम् ॥

२५७१. दिव उत् ॥ १३१ ॥ (३३७)

'एङः पदान्तादति' (६.१.१०९) इत्यतः पदग्रहणमनुवर्तते । 'दिवः' इति प्रातिपदिकं गृह्यते, न धातुः, सानुबन्धकत्वात् । दिवः पदस्य उकारादेशो भवति । दिवि कामो यस्य द्युकामः । द्युमान् । विमलद्यु दिनम् । द्युभ्याम् । द्युभिः ।

निरनुबन्धकग्रहणादिह न भवति अक्षद्यूभ्याम्, अक्षद्यूभिरिति ।

तपरकरणमूठो निवृत्त्यर्थम् - द्युभ्याम्, द्युभिरिति । अत्र हि परत्वादूठ् प्राप्नोति ।

पदस्येति किम्? दिवौ । दिवः ।

२५७२. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ॥ १३२ ॥ (१७६)

एतत्तदौ यावककारौ नञ्समासे न वर्त्तेते तयोर्यः सुशब्दः, कश्च तयोः सुशब्दः? यस्तदर्थेन सम्बद्धः, तस्य संहितायां विषये हलि परतो लोपो भवति । एष ददाति । स ददाति। एष भुङ्क्ते । स भुङ्क्ते ।

एतत्तदोरिति किम्? यो ददाति । यो भुङ्क्ते । सुग्रहणं किम्? एतौ गावौ चरतः । अकोरीति किम्? एषको ददाति । सको ददाति । 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या. परि २१) इति रूपभेदेऽपि साकच्कावेतत्तदावेव भवतः ।

अनञ्समास इति किम्? अनेषो ददाति । असो ददाति । उत्तरपदार्थप्रधानत्वात् नञ्समासस्यैतत्तदोरेवात्र सम्बद्धः सुशब्दः ।

हलीति किम्? एषोऽत्र । सोऽत्र ॥

२५७३. स्यश्छन्दसि बहुलम् ॥ १३३ ॥ (३५२६)

'स्य' इत्येतस्य च्छन्दसि हलि परतो बहुलं सोर्लोपो भवति । 'उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि' (ऋ. ४.४०.४) । 'एष स्य ते पवत इन्द्र सोमः' (ऋ. ९.९७.४६) ।

न च भवति - यत्र स्यो निपतेत् ॥

२५७४. सोऽचि लोपे चेत्पादपूरणम् ॥ १३४ ॥ (१७७)

'सः' इत्येतस्याचि परतः सुलोपो भवति, लोपे सति चेत्पादः पूर्यते । 'सेदु राजा क्षयति चर्षणीनाम्' (ऋ. १.३२.१५) । 'सौषधीरनुरुध्यसे' (ऋ. ८.४३.९) ।

लोपे चेत्पादपूरणमिति किम् ? स इव व्याघ्रो भवेत् ।

अचीति विस्पष्टार्थम् ।

पादग्रहणेनात्र श्लोकपादस्यापि ग्रहणं केचिदिच्छति, तेनेदमपि सिद्धं भवति-

सैष दाशरथी रामः, सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी, सैष भीमो महाबलः ॥

२५७५. सुट् कात् पूर्वः ॥ १३५ ॥ (२५५३)

अधिकारोऽयम् 'पारस्करप्रभृतीनि च संज्ञायाम्' (६.१.१५७) इति यावत् । इत उत्तरं यद्वक्ष्यामस्तत्र 'सुट्' इति, 'कात्पूर्वः' इति चैतदधिकृतं वेदितव्यम् । वक्ष्यति - "सम्पर्युपेभ्यः करोतौ भूषणे' (६.१.१३७) । संस्कर्ता । संस्कर्तुम् । संस्कर्तव्यम्'' ।

कात्पूर्वग्रहणं सुटोऽभक्तत्वज्ञापनार्थम् । तथा हि - संस्कृषीष्ट, संस्क्रियते इति संयोगादिलक्षणाविड्गुणौ (७.२.४३) न भवतः । 'तिङ्ङतिङः' (८.१.१८) इति निघातोऽपि तर्हि न प्राप्नोति, सुटा व्यवहितत्वात्? 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या.परि. २७) इति वचनान्नास्ति व्यवधानम् ।

सञ्चस्करतुः, सञ्चस्करुः-इति गुणः कथम्? 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' (व्या. परि. २१) इति ।

संयोगोपधग्रहणं च 'ऋतश्च संयोगादेर्गुणः' (७.४.१०) इत्यत्र कर्तव्यम् ।

टित्करणम् - 'सुट्स्तुस्वञ्जाम्' (८.३.७०) इत्यत्र विशेषणार्थम् ॥

२५७६. अडभ्यासव्यवायेऽपि ॥ १३६ ॥ (२५३९)

अड्व्यवाये, अभ्यासव्यवायेऽपि सुट् कात्पूर्वो भवति । समस्करोत् । समस्कार्षीत् । सञ्चस्कार । परिचस्कार ।

किमर्थं पुनरिदमुच्यते, 'पूर्वं धातुरुपसर्गेण युज्यते' इति तत्र 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इति पूर्वं सुट् क्रियते, पश्चादडभ्यासौ? 'अभक्तश्च सुट्' इत्युक्तम्, ततः सकारादुत्तरावडभ्यासावनिष्टे देशे स्याताम् । एतस्मिंस्तु सत्यत एव वचनात् कृतयोरडभ्यासयोस्तद्व्यवायेऽपि सुट् कात्पूर्वः क्रियते इति सिद्धमिष्टं भवति ।

२५७७. सम्पर्युपेभ्यः करोतौ भूषणे ॥ १३७ ॥ (२५५०)

सम्, परि, उप - इत्येतेभ्यो भूषणार्थे करोतौ परतः सुट् कात्पूर्वो भवति । संस्स्कर्ता, संस्स्कर्तुम्, संस्स्कर्तव्यम् - अत्र 'सम्पुंकानां सत्वम्' (८.३.३४वा.) इति समो मकारस्य सकारः, पूर्वस्य चाकारस्यानुनासिकः । परिष्कर्ता, परिष्कर्तव्यम्-'सुट्स्तुस्वञ्जाम्' (८.३.७०) इति षत्वम्। उपस्कर्ता, उपस्कर्तुम्, उपस्कर्तव्यम्।

भूषण इति किम्? उपकरोति ।

सम्पूर्वस्य क्वचिदभूषणेऽपि सुडिष्यते - संस्कृतमन्नमिति ॥

२५७८. समवाये च ॥ १३८ ॥ (२५५१)

समवायः = समुदायः, तस्मिंश्चार्थे करोतौ सम्पर्युपेभ्यः कात्पूर्वः सुडागमो भवति । तत्र नः संस्कृतम् । तत्र नः परिष्कृतम् । तत्र नः उपस्कृतम् । समुदितमित्यर्थः ॥

२५७९. उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु ॥ १३९ ॥ (२५५२)

सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा=प्रतियत्नः । विकृतमेव वैकृतम्, प्रज्ञादित्वादण् (५.४.३८) । गम्यमानार्थस्य वाक्यस्य स्वरूपेणोपादानं वाक्यस्याध्याहारः। एतेष्वर्थेषु गम्यमानेषु करोतौ धातौ परत उपात् सुट् कात्पूर्वो भवति । प्रतियत्ने तावत् - एधो दकस्योपस्कुरुते । काण्डगुणस्योपस्कुरुते ।

वैकृते - उपस्कृतं भुङ्क्ते । उपस्कृतं गच्छति ।

वाक्याध्याहारे - उपस्कृतं जल्पति । उपस्कृतमधीते ।

एतेष्विति किम्? उपकरोति ॥

२५८०. किरतौ लवने ॥ १४० ॥ (२५३९)

'उपात्' इत्येव । उपादुत्तरस्मिन्किरतौ धातौ लवनविषये सुट् कात्पूर्वो भवति । उपस्कारं मद्रका लुनन्ति । उपस्कारं कश्मीरा लुनन्ति । विक्षिप्य लुनन्तीत्यर्थः ।

णमुलत्र वक्तव्यः । लवन इति किम्? उपकिरति देवदत्तः ॥

२५८१. हिंसायां प्रतेश्च ॥ १४१ ॥(२५४०)

'किरतौ इत्येव । उपात्प्रतेश्चोत्तरस्मिन्किरतौ विषये सुट् कात्पूर्वो भवति हिंसायां विषये। उपस्कीर्णं हं ते वृषल भूयात् । प्रतिस्कीर्णं हं ते वृषल भूयात् । तथा ते वृषल ! विक्षेपो भूयाद् यथा हिंसामनुबध्नातीत्यर्थः ।

हिंसायामिति किम्? प्रतिकीर्णम् ॥

२५८२. अपाच्चतुष्पाच्छकुनिष्वालेखने ॥ १४२ ॥ (३६८८)

'किरतौ' इत्येव । अपादुत्तरस्मिन्किरतौ चतुष्पाच्छकुनिषु यदालेखनं तस्मिन् विषये सुट् कात्पूर्वो भवति । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्ष्यार्थी (म. भा.) । आलिख्य विक्षिपतीत्यर्थः ।

चतुष्पाच्छकुनिष्विति किम्? अपकिरति देवदत्तः ।

हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् (म. भा. ६.१.१४२ वा.१) । इह मा भूत्-अपकिरति श्वा ओदनपिण्डमाशितः ।

हर्षजीविकाकुलायकरणेष्वेव किरतेरात्मनेपदस्योपसंख्यानम् ॥

२५८३. कुस्तुम्बुरूणि जातिः ॥ १४३ ॥ (१०५८)

'कुस्तुम्बुरूणि' इति सुट् निपात्यते जातिश्चेद्भवति । कुस्तुम्बुरुर्नामौषधिजातिः =धान्यकम् । तत्फलान्यपि कुस्तुम्बुरूणि ।

सूत्रनिर्देशे नपुंसकलिङ्गमविवक्षितम् ।

जातिरिति किम्? कुत्सितानि तुम्बुरूणि कुतुम्बुरूणि । तुम्बुरुशब्देनात्र तिन्दुकीफलान्युच्यन्ते, समासेन तेषां कुत्सा ॥

२५८४. अपरस्पराः क्रियासातत्ये ॥ १४४ ॥ (१०५९)

'अपरस्परा' इति सुट् निपात्यते क्रियासातत्ये गम्यमाने । अपरस्पराः सार्था गच्छन्ति। सन्ततमविच्छेदेन गच्छन्तीत्यर्थः ।

क्रियासातत्य इति किम्? अपरपराः सार्थाः गच्छन्ति । अपरे परे च सकृदेव गच्छन्तीत्यर्थः । नात्र गमनस्य सातत्य - प्रबन्धो विवक्षितः ।

किमिदं सातत्यमिति ? सततस्य भावः सातत्यम् ।

कथं सततम्? समस्तते विकल्पेन मकारलोपो विधीयते ।

लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि ।
समो वा हिततततयोर्मासस्य पचि युङ्घञोः ॥

२५८५. गोष्पदं सेवितासेवितप्रमाणेषु ॥ १४५ ॥ (१०६०)

गोष्पदमिति सुट् निपात्यते, तस्य च षत्वं सेवितेऽसेविते प्रमाणे च विषये। गोष्पदो देशः । गावः पद्यन्ते यस्मिन् देशे स गोभिः सेवितो देशो गोष्पद इत्युच्यते। असेविते - अगोष्पदान्यरण्यानि । असेविते गोष्पदशब्दे न सम्भवतीत्यगोष्पदशब्दार्थं निपातनम् । यद्येवम्, नार्थ एतेन, गोष्पदप्रतिषेधादगोष्पदं भविष्यति? सत्यमेतत्; यत्र तु सेवितप्रसङ्गोऽस्ति तत्रैव स्याद्-गोष्पदमिति । यत्र त्वत्यन्तासम्भव एव, तत्र न स्याद् - अगोष्पदान्यरण्यानीति; असेवितग्रहणात्तत्रापि भवति । यानि हि महान्त्यरण्यानि येषु गवामत्यन्तासम्भवः तान्येवमुच्यन्ते ।

प्रमाणे गोष्पदमात्रं क्षेत्रम्, गोष्पदपूरं वृष्टो देवः । नात्र गोष्पदं स्वार्थप्रतिपादनार्थमुपादीयते, किं तर्हि? क्षेत्रस्य वृष्टेश्च परिच्छेत्तुमियत्ताम् ।

सेवितासेवितप्रमाणेष्विति किम्? गोः पदं गोपदम् ॥

२५८६. आस्पदं प्रतिष्ठायाम् ॥ १४६ ॥ (१०६१)

आत्मयापनाय स्थानम्=प्रतिष्ठा, तस्यामास्पदमिति सुट् निपात्यते । आस्पदमनेन लब्धम् ।

प्रतिष्ठायामिति किम्? आ पदात्-आपदम् ॥

२५८७. आश्चर्यमनित्ये ॥ १४७ ॥ (१०३९)

अनित्यतया विषयभूतयाऽद्भुतत्वमिह लक्ष्यते, तस्मिन्नाश्चर्यं निपात्यते । 'चरेराङि चागुरौ' (वा. २१५) इति यत्प्रत्यये कृते निपातनात्सुट् । आश्चर्यं यदि स भुञ्जीत। आश्चर्यं यदि सोऽधीयीत । चित्रमद्भुतमित्यर्थः ।

अनित्य इति किम्? आश्चर्यं कर्म शोभनम् ॥

२५८८. वर्चस्केऽवस्करः ॥ १४८ ॥ (१०६३)

कुत्सितं वर्चो वर्चस्कम्=अन्नमलम्, तस्मिन्नभिधेयेऽवस्कर इति निपात्यते। अवपूर्वस्य किरतेः कर्मणि 'ऋदोरप्' (३.३.५७) इत्यप्, निपातनात्सुट् । अवकीर्यत इत्यवस्करः = अन्नमलम्, तत्सम्बन्धाद्देशोऽपि तथोच्यते । वर्चस्क इति किम्? अवकरः ॥

१५८९. अपस्करो रथाङ्गम् ॥ १४९ ॥ (१०६४)

'अपस्कर' इति निपात्यते रथाङ्गं चेद्भवति । अपपूर्वात्किरतेः 'ऋदोरप्' (३.३.५७) इत्यप्, निपातनात् सुट् । अपस्करो रथावयवः । रथाङ्गमिति किम्? अपकारः ॥

२५९०. विष्किरः शकुनिर्विकिरो वा ॥ १५० ॥ (१०६५)

'विकिर' इति किरतेर्विपूर्वस्य 'इगुपधज्ञाप्रीकिरः कः' (३.१.१३५) इति कप्रत्यये विहिते सुट् निपात्यते शकुनिश्चेद्भवति, विकिरशब्दाभिधेयो वा शकुनिर्भवति।

सर्वे शकुनयो भक्ष्या विष्किराः कुक्कुटादृते ।

'विष्किरो वा शकुनौ' इति वाग्रहणादेव सुड्विकल्पे सिद्धे विकिरग्रहणमिह - तस्यापि शकुनेरन्यत्र प्रयोगो मा भूत् ॥

२५९१. ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ॥ १५१ ॥ (३५२७)

चन्द्रशब्द उत्तरपदे ह्रस्वात्परः सुडागमो भवति मन्त्रविषये । 'सुश्चन्द्रो (तै. सं. ४.४.४.६) युष्मान्' ।

ह्रस्वादिति किम्? 'सूर्याचन्द्रमसाविव' (ऋ ४.४१.१५) । मन्त्र इति किम्? सुचन्द्रा पूर्णमासी । उत्तरपदं समास एव भवतीति प्रसिद्धम्, तत इह न भवति - शुक्रमसि, चन्द्रमसि॥

२५९२. प्रतिष्कशश्च कशेः ॥ १५२ ॥ (१०६६)

'कश गतिशासनयोः' (धा. पा. १०२५) इत्येतस्य धातोः प्रतिपूर्वस्य पचाद्यचि कृते सुट् निपात्यते, तस्यैव षत्वम् ।

'ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः' ।

वार्त्तापुरुषः, सहायः, पुरोयायी वा प्रतिष्कश इत्यभिधीयते ।

कशेरिति किम्? प्रतिगतः कशां प्रतिकशोऽश्वः ।

अत्र यद्यपि कशेरेव कशाशब्दः तथापि कशेरिति धातोरुपादानं तदुपसर्गस्य प्रतेः प्रतिपत्त्यर्थम् । तेन धात्वन्तरोपसर्गान्न भवति ॥

२५९३. प्रस्कण्वहरिश्चन्द्रावृषी ॥ १५३ ॥ (१०६७)

प्रस्कण्व, हरिश्चन्द्र इति सुट् निपात्यते, ऋषी चेदभिधेयौ भवतः । प्रस्कण्व ऋषिः । हरिश्चन्द्र ऋषिः ।

हरिश्चन्द्रग्रहणममन्त्रार्थम् ।

ऋषी इति किम्? प्रकण्वो देशः । हरिचन्द्रो माणवकः ॥

२५९४. मस्करमस्करिणौ वेणुपरिव्राजकयोः ॥ २५४ ॥ (१०६८)

मस्कर, मस्करिन्-इत्येतौ यथासंख्यं वेणौ परिव्राजके च निपात्येते । मकरशब्दो ह्यव्युत्पन्नं प्रातिपदिकम्, तस्य वेणावभिधेये सुट् निपात्यते, परिव्राजके त्विनिरपि । मस्करो वेणुः । मस्करी परिव्राजकः ।

वेणुपरिव्राजकयोरिति किम्? मकरो ग्राहः, मकरी समुद्रः ।

केचित्पुनरत्र माङ्युपपदे करोतेः करणेऽच्प्रत्ययमपि निपातयन्ति, माङश्च ह्रस्वत्वम्, सुट् च । मा क्रियते येन=प्रतिषिध्यते, स मस्करो वेणुः । वेणुग्रहणं च प्रदर्शनार्थम् । अन्यत्रापि भवति - मस्करो दण्ड इति । परिव्राजकेऽपि माङ्युपपदे करोतेस्ताच्छील्य इनिर्निपात्यते, माङो ह्रस्वत्वं सुट् च तथैव । मकरणशीलो मस्करी कर्मापवादित्वात्परिव्राजक उच्यते । स ह्येवमाह - मा कुरुत कर्माणि, शान्तिर्वः श्रेयसीति ॥

२५९५. कास्तीराजस्तुन्दे नगरे ॥ १५५ ॥ (१०६९)

कास्तीर, अजस्तुन्द-इत्येतौ शब्दौ निपात्येते नगरेऽभिधेये । ईषत्तीरमस्य, अजस्येव तुन्दमस्येति व्युत्पत्तिरेव क्रियते, नगरं तु वाच्यमेतयोः । कास्तीरं नाम नगरम् । अजस्तुन्दं नाम नगरम् ।

नगर इति किम्? कातीरम् । अजतुन्दम् ॥

२५९६. कारस्करो वृक्षः ॥ १५६ ॥ (१०७०)

'कारस्कर' इति सुट् निपात्यते, वृक्षश्चेद्भवति । कारं करोतीति 'दिवाविभानिशाप्रभाभास्कारान्त' (३.२.२१) इति टप्रत्ययः । कारस्करो वृक्षः ।

वृक्ष इति किम्? कारकरः ।

केचित् पारस्करप्रभृतिष्वेव कारस्करो वृक्ष इति पठन्ति ॥

२५९७. पारस्करप्रभृतीनि च संज्ञायाम् ॥ १५७ ॥ (१०७१)

पारस्करप्रभृतीनि च शब्दरूपाणि निपात्यन्ते संज्ञायां विषये । पारस्करो देशः। कारस्करो वृक्षः । रथस्पा नदी । किष्कुः प्रमाणम् । किष्किन्धा गुहा ।

तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च (ग. सू. १६०) । तस्करश्चोरः। बृहस्पतिर्देवता ।

चोरदेवतयोरिति किम्? तत्करः । बृहत्पतिः ।

संज्ञाग्रहणादुपाधिपरिग्रहे सिद्धे गणे चोरदेवताग्रहणं प्रपञ्चार्थम् ।

प्रात्तुम्पतौ गवि कर्तरि (ग. सू. १६१) । तुम्पतौ धातौ प्रशब्दात्परस्सुट् भवति गवि कर्तरि । प्रस्तुम्पति गौः ।

गवीति किम्? प्रतुम्पति वनस्पतिः ।

पारस्करप्रभृतिराकृतिगणः ।

अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः । प्रायश्चित्तम् । प्रायश्चित्तिः । यदुक्तम् - 'प्रायस्य चित्तिचित्तयोः सुडस्कारो वा' (म. भा.) इति, तत्संगृहीतं भवति ॥

२५९८. अनुदात्तं पदमेकवर्जम् ॥ १५८ ॥ (३६५०)

परिभाषेयं स्वरविधिविषया । यत्रान्यः स्वर उदात्तः स्वरितो वा विधीयते, तत्रानुदात्तं पदमेकं वर्जयित्वा भवतीत्येतदुपस्थितं द्रष्टव्यम् । अनुदात्ताच्कमनुदात्तम्। कः पुनरेको वर्ज्यते? यस्यासौ स्वरो विधीयते । वक्ष्यति - 'धातोः' (६.१.१६२) अन्त उदात्तो भवतीति; गोपायति, पयति । धातोरन्त्यमचं वर्जयित्वा परिशिष्टमनुदात्तं भवति । धातुस्वरं श्नास्वरो बाधते - लुनाति, पुनाति । श्नास्वरं तस्स्वरः - लुनतः, पुनतः । तस्स्वरमाम्स्वरः - लुनतस्तराम्, पुनतस्तराम् ॥

आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च ।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ॥ (म. भा., श्लोकभाष्यम्)

आगमस्य - 'चतुरनडुहोरामुदात्तः' (७.१.९८) चत्वारः, अनड्वाहः । आगमस्वरः प्रकृतिस्वरं बाधते । विकारस्य - अथनि, दधनि इत्यनङ्स्वरः (७.१.७५) प्रकृतिस्वरं बाधते । प्रकृतेः - गापयति, धूपयति । प्रकृतिस्वरः प्रत्ययस्वरं बाधते प्रत्ययस्य - कर्त्तव्यम्, हत्तव्यम्। प्रत्ययस्वरः प्रकृतेः स्वरस्य बाधकः ।

परनित्यान्तरङ्गापवादैः स्वरैर्व्यवस्था, सतिशिष्टेन च । यो हि यस्मिन् सति शिष्यते, स बाधको भवति । तथा हि - गोपायतीत्यत्र धातुस्वरापवादः प्रत्ययस्वरः, तेनैव धातुस्वरेण प्रत्ययान्तस्य धातो सतिशिष्टत्वाद् बाध्यते ।

काष्र्णोत्तरासङ्गपुर इत्यत्र च समासस्वरापवदो बहुव्रीहिस्वरः सतिशिष्टेन समासान्तोदात्तत्वेन बाध्यते । विकरणस्वरस्तु सतिशिष्टोऽपि सार्वधातुकस्वरं न बाधते । लुनीत इति तस एव स्वरो भवति ।

विभक्तिस्वरान्नञ्स्वरो बलीयानिति वक्तव्यम् (म. भा. ६.१.१५८ वा. १२) । अतिस्र इत्यत्र 'तिसृभ्यो जसः' (६.१.१६६) इति सतिशिष्टोऽपि विभक्तिस्वरो नञ्स्वरेण बाध्यते ।

विभक्तिनिमित्तस्वराच्च नञ्स्वरो बलीयानिति वक्तव्यम्(म. भा. वा. १३) । अचत्वारः, अनड्वाह इति । यस्य विभक्तिर्निमित्तमामस्तस्य यदुदात्तत्वं तन्नञ्स्वरेण बाध्यते ।

पदग्रहणं किम्? देवदत्त गामभ्याज शुक्लां दण्डेनेति वाक्ये हि प्रतिपदं स्वरः पृथग् भवति । परिमाणार्थं चेदं पदग्रहणं पदाधिकारस्य निवृत्तिं करोति । तेन प्रागेव पदव्यपदेशात् स्वरविधिसमकालमेव शिष्टस्यानुदात्तत्वं भवति । तथा च कुवल्या विकारः कौवलमित्यत्रानुदात्तादिलक्षणोऽञ् सिद्धो भवति । तथा गर्भिणिशब्दश्चानुदात्तादिलक्षणस्याञो बाधनार्थं भिक्षादिषु पठ्यते ।

कुवलगर्भशब्दावाद्युदात्तौ ॥

२५९९. कर्षात्वतो घञोऽन्त उदात्तः ॥ १५९ ॥ (३६८०)

कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तो भवति । कर्षः । पाकः । त्यागः। रागः । दायः । धायः । ञ्नित्यादिर्नित्यम्' (६.१.१९७) इत्यस्यापवादः ।

कर्ष इति विकृतनिर्देशः कृषतेर्निवृत्त्यर्थः । तौदादिकस्य घञन्तस्य कर्ष इत्याद्युदात्त एव भवति ॥

२६००. उञ्छादीनां च ॥ १६० ॥ (३६८१)

'उञ्छ' इत्येवमादीनामन्त उदात्तो भवति ।

उञ्छः, म्लेच्छः जञ्जः, जल्पः-एते घञन्ता इति, ञित्स्वरः प्राप्तः । जपः, व्यधः - इत्याबन्तौ, तयोर्धातुस्वरः प्राप्तः । केचित्तु वध इति पठन्ति । युगः। युजेर्घञन्तस्य निपातनादगुणत्वं विशिष्टविषये च निपातनमिदमिष्यते । कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगः, अन्यत्र हि योग एव भवति ।

गरो दूष्येऽबन्तः (ग. सू. १६२) गरशब्दोऽबन्तः, स दूष्य एवान्तोदात्तः । गरः = विषम् । अन्यत्राद्युदात्त एव ।

वेदवेगवेष्टबन्धाः करणे (ग. सू. १६३) । 'हलश्च' (३.३.१२१) इति घञन्ताः, एते करणेऽन्तोदात्ता भवन्ति । भावे आद्युदात्ता एव ।

स्तुयुद्रुवश्छन्दसि (ग. सू. १६४) उपसमस्तार्थमेतत् । परिष्टुत् । संयुत् । परिद्रुत् ।

वतनिः स्तोत्रे (ग. सू. १६५) । स्तोत्रम् = साम, तत्स्थो वर्त्तनिशब्दोऽन्तोदात्तो भवति, अन्यत्र मध्योदात्तः ।

श्वभ्रे दरः (ग. सू. १६६) । श्वभ्रेऽभिधेये दरशब्दोन्तोदात्तः । अन्यत्राबन्तत्वादाद्युदात्तः।

साम्बतापौ भावगर्हायाम् (ग. सू. १६७) । अन्तोदात्तौ, अन्यत्राद्युदात्तौ ।

उत्तमशश्वत्तमशब्दौ सर्वत्र (ग. सू. १६८) । केचित्तु 'भावगर्हायाम्' इति अत्राप्यनुवर्तयन्ति ।

भक्षमन्थभोगदेहाः (ग. सू. १६९) । एते घञन्ताः । भक्षिर्ण्यन्तोऽपि घञन्त एव; 'एरच्' (३.३५६) अण्यन्तानाम् इति वचनात् ॥

२६०१. अनुदात्तस्य च यत्रोदात्तलोपः ॥ १६१ ॥ (३६५१)

'उदात्त' इति वर्तते । यस्मिन्ननुदात्ते परत उदात्तो लुप्यते, तस्यानुदात्तस्यादिरुदात्तो भवति । कुमर ई कुमारी । कुमारशब्दोऽन्तोदात्तः, तस्य ङीप्यनुदात्ते उदात्तो लुप्यते । अनुदात्तो ङीब् उदात्तः, 'भस्य टेर्लोपः' (७.१.८८) । पथः । पथा । पथे । पथिन् शब्दोऽन्तोदात्तः । 'कुमुदनडवेतसेभ्यो ड्मतुप्' (४.२.८७) । कुमुद्वान्। नड्वान् । वतस्वान् । कुमुदादयोऽन्तोदात्ताः। ड्मतुबनुदात्तः ।

अनुदात्तस्येति किम्? प्रासङ्गं वहति प्रासङ्ग्यः । प्रासङ्गशब्दः थाथादिस्वरेण (६.२.१४४) अन्तोदात्तः । तस्य यति 'तित्स्वरितम्' (६.१.१८५) इति स्वरिते उदात्तो लुप्यते? नैतदस्ति; स्वरिते हि विधीयमाने परिशिष्टमनुदात्तम्, तत् कुत उदात्तलोपः? तदेतदनुदात्तग्रहणमादेरनुदात्तस्योदात्तार्थम् ।

'अन्तः' इति हि प्रकृतत्वादन्तस्य स्यात्-मा हि धुक्षातम्, मा हि धुक्षाथम्

यत्रेति किम्? भार्गवः, भार्गवौ, भृगवः । प्राक् सुबुत्तेर्गोत्रप्रत्ययस्य लुक्।

उदात्तग्रहणं किम् ? बैदी । और्वी ॥

२६०२. धातोः ॥ १६२ ॥ (३६७१)

'अन्तः' इत्येव । धातोरन्त उदात्तो भवति । पचति । पठति । ऊर्णोत । गपायति। याति ॥

२६०३. चितः ॥ १६३ ॥ (३७१०)

चितोऽन्त उदात्तो भवति । 'भञ्जभासमिदो घुरच्' (३.२.१६१) भ॒ङ्ग॒रम् । भ॒सु॒रम् । मे॒दु॒रम् । 'आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्' (२.४.७०), कु॒ण्डि॒नाः।

चिति प्रत्यये प्रकृतिप्रत्ययसमुदायस्यान्त उदात्त इष्यते । ब॒हु॒प॒टु॒वः । उ॒च्च॒कैः॥

२६०४. तद्धितस्य ॥ १६४ ॥ (३७११)

'चितः' इत्येव । चितस्तद्धितस्यान्त उदात्तो भवति । 'गोत्रे कुञ्जादिभ्यश्च्फञ्' (४.१.१८) कौञ्जषनाः ।

किमर्थमिदम्? परमपि ञित्स्वरं बाधित्वाऽन्तोदात्तत्वमेव यथा स्यादिति ॥

२६०५. कितः ॥ १६५ ॥ (३७१२)

'तद्धितस्य कितोऽन्त उदात्तो भवति । 'नडादिभ्यः फक्' (४.१.९९), न॒डा॒य॒नः। चाराय॒णः। 'प्राग्वहतेष्ठक्' (४.४.१) आक्षिकः । शाल॒कि॒कः ॥

२६०६. तिसृभ्यो जसः ॥ १६६ ॥ (३७१३)

तिसृभ्य उत्तरस्य जसोऽन्त उदात्तो भवति । तिस्रस्तिष्ठन्ति । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इत्यस्यापवादः ।

शसि 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इति सिद्धे, अन्यत्र बहुवचने 'षट्त्रिचतुर्भ्यो हलादिः' (६.१.१७९) इति विधानाज्जसेव लभ्यत इति जस्ग्रहणमुपसमस्तार्थमेक इच्छन्ति, अतितिस्रावित्यत्र स्वरो मा भूदिति ॥

२६०७. चतुरः शसि ॥ १६७ ॥ (३६८२)

चतुरः शसि परतोऽन्त उदात्तो भवति । चतु॒रः पश्य ।

चतस्रादेशे आद्युदात्तनिपातनाद् यणादेशस्य च पूर्वविधौ स्थानिवत्वादयं स्वरो न भवति - चत॑स्रः पश्येति ॥

२६०८. सावेकाचस्तृतीयादिर्विभक्तिः ॥ १६८ ॥ (३७१४)

'सौ' इति सप्तमीबहुवचनस्य सुशब्दस्य ग्रहणम् । तत्र सौ य एकाच् तस्मात्परा तृतीयादिर्विभक्तिरुदात्ता भवति । वा॒चा, व॒ग्भ्याम्, वा॒ग्भिः । वा॒ग्भ्यः । य॒ता, या॒द्भ्याम्, या॒द्भिः।

सावितिं किम्? रां । रां । एकाच् इति किम्? हरिणा । गिरिणा । राजसु । तृतीयादिरिति किम्? वाचौ । वाचः । विभक्तिरिति किम्? वाक्तरा । वाक्तमा ।

सप्तमीबहुवचनस्य ग्रहणादिह न भवति - त्वयां, त्वयीति ॥

२६०९. अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥ १६९ ॥ (३७१५)

'एकाचः' इति वर्तते, 'तृतीयादिर्विभक्तिः' इति च । नित्यशब्दः स्वर्यते, तेन नित्याधिकारविहितः समासः पर्युदस्यते । नित्यसमासादन्यत्रानित्यसमासे यदुत्तरपदमन्तोदात्तमेकाच्च तस्मात्परा तृतीयादिर्विभक्तिरन्यतरस्यामुदात्ता भवति । परमवाचा, परमवाचे । परमत्वचा, परमत्वचे । यदा विभक्तिरुदात्ता न भवति तदा समासान्तोदात्तत्वमेव । परमवाचं । परमवाचे । परमत्वचं । परमत्वचे ।

अन्तोदात्तादिति किम्? अवंचा । सुवंचा । सुत्वंचा तत्पुरुषोऽयम् । तत्र 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्यय' (६.२.२) इति पूर्वपदप्रकृतिस्वरः ।

उत्तरपदग्रहणमेकाच्त्वेनोत्तरपदं विशेषयितुम्, अन्यथा हि समासविशेषणमेतत्स्यात्। तत्र शुनः ऊर्क्श्वोर्ज्जा - इत्यत्रैवायं विधिः स्यात् ।

अनित्यसमास इति किम्? अग्निचितां । सोमसुतां । 'उपपदमतिङ्' (२.२.१९) इत्ययं नित्याधिकारे समासो विधीयते, तत्र 'गतिकारकोपपदात् कृत्' (६.२.१३९) इत्युत्तरपदप्रकृतिस्वरेण चित्-शब्द उदात्तः ।

यस्तु विग्रहाभावेन नित्यसमासस्तत्र भवत्येव विकल्पः - अवाचां ब्राह्मणेन अवाचा ब्राह्मणेनेति । 'बहुव्रीहौ नञ्सुभ्याम्' (६.२.१७२) इत्युत्तरपदान्तोदात्तत्वं भवति ॥

२६१०. अञ्चेश्छन्दस्यसर्वनामस्थानम् ॥ १७० ॥ (३७१६)

अञ्चेः परासर्वनामस्थानविभक्तिरुदात्ता भवति छन्दसि विषये । 'इन्द्रो दधीचो अस्थभिः' (ऋ. १.८४.१३) 'चौ' (६.१.२२२) इति पूर्वपदान्तोदात्तत्वं प्राप्तम् । 'तृतीयादिः' इति वर्तमाने शसोऽपि परिग्रहार्थमसर्वनामस्थानग्रहणम् । इहापि यथा स्यात्-प्रतीचो बाहून्प्रतिभङ्ग्ध्येषामिति ॥

२६११. ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ॥ १७१ ॥ (३७१७)

ऊठ्, इदम्, पदादि, अप्, पुम्, रै, दिव्-इत्येतेभ्योऽसर्वनामस्थानविभक्तिरुदात्ता भवति । ऊठ्-प्रष्ठौहः, प्रष्ठौहा ।

ऊठ्युपधाग्रहणं कर्तव्यम् । इह मा भूत्-अद्युवां । अद्युवां ।

इदम् - अ॒भ्याम्, ए॒भिः । 'अन्तोदात्तात्' इत्यधिकारादन्वादेशे न भवति - अथो आभ्यां॑' निपुणमधीतमिति ।

पदादयः - 'पद्दन्नोमास्' (६.१.६३) इत्येवमादयो निश्पर्यन्ता इह गृह्यन्ते । 'नि॒प॒दश्चतु॑रो जहि' (खि. २.१६.१) । 'या द्रु॒तो धाव॑ति' (तै. सं. २.५.१.७) । असन्प्रभृतिभ्यो विभक्तिरनुदात्तैव भवति । 'ग्रीवा॑यां ब॒द्धो अ॑पि क॒क्ष अ॒सनि॑' (ऋ. ४.४०.४) । 'मत्स्य न द॒न उ॒दनि॑ क्षियन्त॑म्' (ऋ. १०.६८.८) ।

अप्-अ॒पः पश्य । अ॒द्भिः । अ॒द्भ्यः ।

पुम्-पुं॒सः, पु॒म्भ्याम्, पु॒म्भ्यः । पुंसा, पुंसे ।

रै-र॒यः पश्य । र॒भ्याम् । र॒भिः ।

दिव्-दिवः पश्य । दिवा । दिवे ॥

२६१२. अष्टनो दीर्घात् ॥ १७२ ॥ (३७१८)

अष्टनो दीर्घान्तादसर्वनामस्थानविभक्तिरुदात्ता भवति । अ॒ष्ट॒भिः । अ॒ष्टा॒भ्यः। अ॒ष्टा॒सु। घृतादिपाठादष्टन्-शब्दोऽन्तोदात्तः, तत्र 'झल्युपोत्तमम्' (६.१.१८०) इत्येतस्यापवादो विभक्तेरेवोदात्तत्वं विधीयते ।

दीर्घादिति किम्? अ॒ष्टस॑ प्रक्रमेषु ब्राह्मणोऽग्नीनादधीत (म. भा.) ।

इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति, कृतात्वस्य च षट्संज्ञां ज्ञापयति; अन्यथा ह्यात्वपक्षे सावकाशोऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यत इति किं दीर्घग्रहणेन ॥

२६१३. शतुरनुमो नद्यजादी ॥ १७३ ॥ (३७१९)

'अन्तोदात्तात्' इति वर्तते । अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिविभक्तिरसर्वनामस्थानमुदात्ता भवति । त॒द॒ती, न॒द॒ती । लु॒न॒ती, पु॒न॒ती । तु॒द॒ता, नु॒द॒ता। लु॒न॒ता, पु॒न॒ता ।

अनुम इति किम्? तु॒दन्ती॑, नु॒द॑न्ती । अत्राप्यदुपदेशादिति लसार्वधातुकानुदात्तत्वे (६.१.१८६) एकादेशः, तस्य 'एकादेश उदात्तेनोदात्तः' (८.२.५) इत्युदात्तत्वम्, तस्य पूर्वत्रासिद्धत्वं (८.२.१) नेष्यत इति शत्रन्तमन्तोदात्तं भवति ।

नद्यजादी इति किम्? तु॒दद्भ्य॑म्, नु॒दद्भ्या॑म् । तु॒दद्भिः, नु॒दद्भिः ।

अन्तोदात्तादित्येव - दद॑ती । दध॑तः । 'अभ्यस्तानामादिः' (६.१.१८९) इत्याद्युदात्तावेतौ।

बृहन्महतोरुपसंख्यानम् (म. भा.) । बृहती, महती । बृहता, महता ॥

२६१४. उदात्तयणो हल्पूर्वात् ॥ १७४ ॥ (३७२०)

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी अजादिर्यासर्वनामस्थान-विभक्तिरुदात्ता [सा] भवति । कर्त्री, हर्त्री । प्रलवित्री, प्रसवित्री । कर्त्रा, हर्त्रा, प्रलवित्रा, प्रसवित्रा। तृजन्ता एतेऽन्तोदात्ताः ।

उदात्तग्रहणं किम्? कं, हं । कं, हं । तृन्नन्तोऽयमाद्युदात्तः । हल्पूर्वादिति किम्? बहुतित्वा ब्राह्मण्या ।

नकारग्रहणं कर्तव्यम् (म. भा.) । वाक्पत्नीयं कन्या ॥

२६१५. नोङ्धात्वोः ॥ १७५ ॥ (३७२१)

ऊङो धातोश्च य उदात्तयण् हल्पूर्वः, तस्मात्परा तृतीयादिर्विभक्तिर्नोदात्ता भवति । ब्रह्मबन्ध्वा, ब्रह्मबन्ध्वे । विरबन्ध्वा, बीरबन्ध्वे । ऊङ् प्रत्ययस्वरेणोदात्तः। तेन सह य एकादेशः सोऽप्युदात्त इति उदात्तयण्वकारः, तस्मादुदात्तत्वे प्रतिषिद्धे 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इति विभक्तिः स्वर्यते ।

धातुयणः खल्वपि-सकृल्ल्वा । सकृल्ल्वे । खलप्वे । क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य 'ओःसुपि' (६.४.८३) इति यणादेशः ॥

२६१६. ह्रस्वनुड्भ्यां मतुप् ॥ १७६ ॥ (३७२२)

'अन्तोदात्तात्' इतेव । ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुब् उदात्तो भवति । अग्निमान्। वायुमान् । कर्तृमान् । हर्तृमान् । नुटः खल्वपि - अक्षण्वता । शीर्षण्वता ।

'अन्तोदात्तात्' इत्येव - वसुमान् (तै.सं. १.६.६.२) । वसुशब्द आद्युदात्तः, तस्मान्मतुप् अनुदात्त एव भवति ।

अत्र च 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या.परि. ३७), इत्येषा परिभाषा नाश्रीयते; नुड्ग्रहणात् । तेन मरुत्वानित्यत्र न भवति ।

रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् (म. भा.) । अरेवान् ।

त्रेश्च प्रतिषेधो वक्तव्यः (म. भा. ६.१.१७६) ।

'त्रिवतीर्याज्यानुवाक्या भवति' (काठ. सं. ११.१) इति ।

२६१७. नामन्यतरस्याम् ॥ १७७ ॥ (३७२३)

ह्रस्वग्रहणमनुवर्तते, मतुब्ग्रहणं च, तेन मतुपा ह्रस्वो विशेष्यते । मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तादन्यतरस्यां नाम् उदात्तो भवति । अ॒ग्नी॒नाम् । अ॒ग्नी॑नाम् । वायु॒नाम्। वायू॒नाम् । कर्तृ॒णाम् । कतृ॑णाम् ।

मतुपा ह्यस्वविशेषणं किम्? भूतपूर्वेऽपि ह्रस्वे यथा स्यात्, अन्यथा हि साम्प्रतिक एव स्यात् ति॒सृ॒णाम्, च॒त॒सृ॒णामिति । सनु॒ट्कस्य ग्रहणं किम्? धे॒न्वाम् । श॒क॒ट्याम् । 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इत्ययमन्तोदात्तः ।

ह्रस्वादित्येव - कु॒मा॒रीणाम् । अन्तोदात्तादित्येव - त्रप॑णाम् । वस्॑नाम् ॥

२६१८. ङ्याश्छन्दसि बहुलम् ॥ १७८ ॥ (३७२४)

ङ्यन्ताच्छन्दसि विषये नामुदात्तो भवति बहुलम् । 'दे॒व॒से॒नाना॑मभिभञ्जतीनाम्' (ऋ. १०.१०३.८) । 'बह्वीनां पि॒ता' (ऋ ६.७५.५) । न च भवति - न॒दीना॑ पारे। 'जय॑न्तीनां म॒रुत॑:' (ऋ. १०.१०३.८) ।

२६१९. षट्त्रिचतुर्भ्यो हलादिः ॥ १७९ ॥ (३७२५)

'अन्तोदात्तात्' इत्येतन्निवृत्तम् । षट्संज्ञकेभ्यः, त्रि, चतुर्-इत्येताभ्यां च परा हलादिर्विभक्तिरुदात्ता भवति । ष॒ड्भिः, ष॒ड्भ्यः, ष॒ण्णाम् । 'पञ्चा॒नाम्' (तै.सं. १.६.१.२)। स॒प्त॒नाम् (ऋ. ८.२८.५) । त्रि-' त्रि॒भिः' (ऋ. १.३४.२१), त्रि॒भ्यः, 'त्र॒या॒णाम्' (तै. सं. ३.४.३.८) । चतुर्-च॒तु॒र्भ्यः (तै. सं. ७.२.११.१), च॒तु॒र्णाम्(ऋ. ८.७४.१३) ।

हलादिरिति किम्? चत॑स्रः (ऋ. १.६२.६) पश्य ॥

२६२०. झल्युपोत्तमम् ॥ १८० ॥ (३६८३)

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवति । त्रिप्रभृतीनामन्त्यमुत्तमम्, तत्समीपे च यत्तदुपोत्तमम् । 'प॒ञ्चभि॑स्तपति'(तै.सं. ५.२.७.५)। स॒प्तभि॑: परान् जयति । ति॒सृभि॑श्च वह॑से त्रिं॒शता॑ (अथर्व, ७.४.१) । चतु॒र्भिः (वाज. सं. २३.१३)।

झलीति किम्? प॒ञ्च॒नाम् (तै.सं. १.६.१.२) । स॒प्ता॒तानाम् (ऋ. ८.२८.५)। उपोत्तममिति किम्? ष॒ड्भिः (ऋ. २.१८.४) । ष॒ड्भ्यः (तै.सं. ७.२.१३.१) ॥

२६२१. विभाषा भाषायाम् ॥ १८१ ॥ (३६८४)

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवति विभाषा भाषायां विषये। पञ्चभिः । पञ्चभिः । सप्तभिः । सप्तभिः । तिसृभिः । तिसृभिः। चतुर्भिः । चतुर्भः ।

२६२२. न गोश्वन्सावर्वर्णराडङ्क्रुङ्कृदभ्यः ॥ १८२ ॥ (३७२६)

गो, श्वन्, सावर्वर्णः=सौ प्रथमैकवचने यदवर्णान्तम्, राड्, अङ्, क्रुङ्, कृद्-इत्येतेभ्यो यदुक्तं तन्न भवति । गवा । गवे । गोभ्यामिति । 'सावेकाचस्तृतीयादिर्विभक्तिः' (१.१६८) इति प्राप्तिः प्रतिषिध्यते । सुगुना । सगवे । सगुभ्याम् । 'अन्तोदात्तादुत्तरपदात्' (६.१.१६९) । इति प्राप्तिः ।

श्वन्-शुना । शुने । श्वभ्याम् । परमशुना । परमशुने । परमश्वभ्यम् । पूर्ववत्प्राप्तिः ।

सावर्वर्णः=सौ प्रथमैकवचने यदवर्णान्तं तस्य ग्रहणम्-येभ्यः । तेभ्यः । केभ्यः ।

राट्-राजतिः क्विबन्तः । राज । परमराजः ।

अङ्-अञ्चतिः क्विबन्तः, तस्य सनकारस्य ग्रहणं विषयावधारणार्थम्, यत्रास्य नलोपो नास्ति तत्र प्रतिषेधो यथा स्यात् । 'नाञ्चेः पूजायाम्' (६.४.६०) इति प्रतिषिध्यते नलोपः । प्राञ्चा । प्राङ्भ्याम् । नलोपविषये तु भवत्येव विभक्तेरुदात्तत्वम् । प्राचा । प्रचे । प्राग्भ्याम्।

क्रुङ् क्विन्नन्त एव - क्रुञ्च । परमक्रुञ्चा ।

कृत् - करोतिः कृतिर्वा क्विबन्तः । कृता । परमकृता ॥

२६२३. दिवो झल् ॥ १८३ ॥ (३७२७)

दिवः परा झलदिर्विभक्तिर्नोदात्ता भवति । द्युभ्याम् । द्युभिः । 'सावेकाचः' (६.१.१६८) इति 'ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' (६.१.१७१) इति वा प्राप्तिः प्रतिषिध्यते।

झलिति किम्? दिवा ॥

२६२४. नृ चान्यतरस्याम् ॥ १८४ ॥ (३७२८)

'नृ' इत्येतस्मात्परा झलादिर्विभक्तिरन्यतरस्यां नोदात्ता भवति । नृभ्याम् । 'नृभिः' (ऋ. १०.१९.७.४) । 'नृभ्यः' (ऋ. १.४३.२) । 'नृषु' (ऋ. १.१८०.८) ।

झलित्येव-न्रा । न्रे ॥

२६२५. तित्स्वरितम् ॥ १८५ ॥ (३७९९)

तित्स्वरितं भवति । सन्नन्ताद्यत् - चुकुर्ष्यम् ,जुहीर्ष्यम् । 'ऋहलोर्ण्यत्' (३.१.११४)- कुर्यम्, हुर्यम् । प्रत्ययाद्युदात्तस्यापवादः ॥

२६२६. तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमङित्त्वङोः ॥ १८६ ॥ (३७३०)

तासेरनुदात्तेतो ङितोऽकारान्तोपदेशाच्च शब्दात्परं लसार्वधातुकमनुदात्तं च भवति हनुङ्, इङ्-इत्येताभ्यां परं वर्जयित्वा । तासेस्तावत् - कर्ता, कर्त्तारौ, कर्त्तारः । प्रत्ययस्वरापवादोऽयम्।

अनुदात्तेतः -आस-आस्ते । वस-वस्ते ।

ङित्-षूङ्-सूते । शीङ्-शेते ।

अदुपदेशात् - तुदतः । नुदतः । पचतः । पठतः । अनुबन्धस्यानैकान्तिकत्वादकारान्तोपदेश एव शप् । पचमानः । यजमानः । यद्यत्र मुक् अकारमात्रस्य स्यात्, तदा लसार्वधातुकमदुपदेशादनन्तरमिति सिद्धो निघातः । अथाकारान्तस्याङ्गस्य, तथापि लसार्वधातुकानुदात्तत्वे कर्तव्ये बहिरङ्गत्वादसिद्ध इति सिद्धम् । चित्स्वरोऽप्यनेन लसार्वधातुकानुदात्तत्वेन परत्वाद् बाध्यते ।

तास्यादिभ्य इति किम्? चिनुतः । चिन्वन्ति । ङिदयं श्नुः पूर्वस्य कार्यं प्रति न तु परस्य । उपदेशग्रहणं किम्? इह च यथा स्यात् - पचावः, पचाम इति । इह च मा भूत्-हतः, हथ इति । लग्रहणं किम्? कतीह पचमानाः । सार्वधातुकमिति किम्? शिश्ये । शिश्याते । शिश्यिरे । अहन्विङोरिति किम्? हनते । यदधते ॥

२६२७. आदिः सिचोऽन्यतरस्याम् ॥ १८७ ॥ (३७३१)

'उदात्तः' इति वर्तते । सिजन्तस्यान्यतरस्यामादिरुदात्तो भवति । मा हि कुर्ष्टाम् । मा हि कुर्ष्टाम् । एकोऽत्राद्युदात्तः, अपरो मध्योदात्तः । मा हि लाविष्टाम्, मा हि लविष्टम् । एकोऽत्राद्युदात्तः, अपरो मध्योदात्तः । सिचश्चित्करणादागमानुदात्तत्वं हि बाध्यते ।

सिच आद्युदात्तत्वेऽनिटः पितः पक्षे उदात्तत्वं वक्तव्यम्(म. भा. ६.१.१८७ वा.) । मा हि कुर्षम्, मा हि कुर्षम् । अनिट इति किम्? मा हि लाविषम् । मध्योदात्त एवाद्युदात्ताभावपक्षे भवति ॥

२६२८. स्वपादिहिंसामच्यनिटि ॥ १८८ ॥ (३६७२)

लसार्वधातुकग्रहणं यदनुवर्तते, तद् 'अच्यनिटि' इति सम्बन्धादिह सप्तम्यन्तमुपजायते। स्वपादिरावृत्करणात् । स्वपादीनां हिंसेश्चाजादावनिटि लसार्वधातुके परतोऽन्यतरस्यामादिरुदात्तो

भवति । स्वपन्ति । श्वव॒पन्ति । श्वस॑न्ति श्व॒सन्ति । हिंसेः खल्वपि-हिंसन्ति । हिंसन्ति । प्रत्ययस्वरेण पक्षे मध्योदात्तः ।

अचीति किम्? स्व॒वप्यात् । हिं॒स्यात् । अनिटीति किम्? स्व॒पि॒तः । श्व॒सि॒तः॥

ङित्यजादावयं विधिरिष्यते । इह न भवति - स्वपानि । हिनसानि ॥

२६२९. अभ्यस्तानामादिः ॥ १८९ ॥ (३६७३)

अभ्यस्तानामजादावनिटि लसार्वधातुके परत आदिरुदात्तो भवति । ददति, ददतु । दधति, दधतु । जति, जक्षतु । जाग्रति, जाग्रतु ।

अचीत्येव - द॒द्यात् । अनिटीत्येव - जु॒क्षि॒तः । 'आदिः' इति वर्तमाने पुनरादिग्रहणं नित्यार्थम् ॥

२६३०. अनुदात्ते च ॥ १९० ॥ (३६७४)

अविद्यमानोदात्ते च लसार्वधातुके परतोऽभ्यस्तानामादिरुदात्तो भवति । अनजाद्यर्थ आरम्भः । ददाति । जहाति । दधाति । जिहीते । मिमीते (तै. सं. ७.१.९.६) ।

अनुदात्त इति बहुव्रीहिनिर्देशो लोपयणादेशार्थः (म. भा.) । मा हि स्म दधात् । दधत्यत्र॥

२६३१. सर्वस्य सुपि ॥ १९१ ॥ (३६८५)

सर्वशब्दस्य सुपि परत आदिरुदात्तो भवति । सर्वैः, सर्वे, सर्वे। सुपीति किम्? स॒र्वतरः । स॒र्वतमः ।

प्रत्ययलक्षणेनाप्ययं स्वर इष्यते सर्वस्तोमः (तै. सं. ५.४.१२.३) इति ।

सर्वस्वरोऽनच्कस्येति वक्तव्यम् (म. भा. ६.१.१९१ वा.१) । स॒र्व॒कः । चित्स्वरेणान्तोदात्तो भवति ॥

२६६२. भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥ १९२ ॥ (३६७५)

भी, ह्री, भृ, हु, मद, जन, धन, दरिद्रा, जागृ-इत्येतेषामभ्यस्तानां लसार्वधातुके पिति प्रत्ययात्पूर्वमुदात्तं भवति । बि॒भेति । जि॒ह्रेति । 'बि॒भर्ति ' (तै.आ. ३.११.४) । 'जु॒होति' (तै.ब्रा. २.१.८.३) । ममत्तु नः परिज्मा (तै. सं. २.१.११.१) । मदेः 'बहुलं छन्दसि' इति विकरणस्य ण्लुः । जु॒ज॒नदिन्द्रम् (तै. आ. ३.२.१) । 'जन जनने' (धा.पा. ११०६) इत्यस्य पञ्चमे लकारे

रूपम् । धन धान्ये (धा. पा. ११०५) इत्यस्य पञ्चमे लकारे - दधनत् (तै. ब्रा. २.८.२५) । दरिद्राति । जागर्ति।

भ्यादीनामिति किम्? ददाति । पितीति किम्? दरिद्रति ॥

२६३३. लिति ॥ १९३ ॥ (३५८३)

लिति [=लकारेत्संज्ञके] प्रत्ययात्पूर्वमुदात्तं भवति । चिकीर्षकः । जिहीर्षकः। भौरिकिविधम् । भौलिलकिविधम् । ऐषुकारिभक्तम् ॥

२६३४. आदिर्णमुल्यन्यतरस्याम् ॥ १९४ ॥ (३६७७)

णमुलि परतोऽन्यतरस्यामादिरुदात्तो भवति । लोलूयं लोलूयम् । लोलूयं लोलूयम् । पोपूयं पोपूयम् । पापूयं पोपूयम् । आम्रेडितानुदात्तत्वे कृते पूर्वो लोलूयंशब्द एकत्राद्युदात्तः, अपरत्र लित्स्वरेण मध्योदात्तः ॥

२६३५. अचः कर्तृयकि ॥ १९५ ॥ (३६७८)

'उपदेशे' इति वर्तते । अजन्ता ये उपदेशे धातवस्तेषां कर्तृयकि अन्यतरस्यामादिरुदात्तो भवति । लूयते केदारः स्वयमेव, लूयते केदारः स्वयमेव । स्तर्यते केदारः स्वयमेव, स्तीर्यते केदारः स्वयमेव । यदाऽऽद्युदात्तत्वं न भवति, तदा लसार्वधातुकनिघाते कृते अदुपदेशभक्तयक एव स्वरो भवति ।

जनादीनामुपदेश एवात्वं द्रष्टव्यम्, तत्राप्ययं स्वर इष्यते । जायते स्वयमेव। सायते स्वयमेव । श्वायते स्वयमेव ।

अच इति किम्? भिद्यत स्वयमेव । कर्तृग्रहणं किम्? लूयते केदरो देवदत्तेन ॥

२६३६. थलि च सेटीडन्तो वा ॥ १९६ ॥ (३७२२)

सेटि थलि इट् वा उदात्तो भवति अन्तो वा आदिर्वाऽन्यतरस्याम् । लुलविथ, लुलविथ, लुलविथ । यदा नैते त्रयः स्वराः, तदा 'लिति' (६.१.१९३) प्रत्ययात्पूर्वमुदात्तं भवति । तेनैते चत्वारः स्वराः पर्यायेण भवन्ति ।

सेटीति किम्? ययाथ । 'लिति' प्रत्ययात्पूर्वमुदात्तम्-इत्ययमेवात्र स्वरो भवति ।

२६३७. ञ्नित्यादिर्नित्यम् ॥ १९७ ॥ (३६८६)

ञिति निति च नित्यमादिरुदात्तो भवति । 'गर्गादिभ्यो यञ्' ,(६.१.१०५) गार्ग्यः । वात्स्यः । 'वासुदेवार्जुनाभ्यां वुन्' (६.३.९८) वासुदेवकः, अर्जुनकः । प्रत्ययस्वरापवादोऽयं योगः।

प्रत्ययलक्षणमत्र नेष्यते, तेन गर्गाः, बिदाः, चञ्चाः - इत्यत्र यञि कनि च लुप्ते न भवति ॥

३६३८. आमन्त्रितस्य च ॥ १९८ ॥ (३६५३)

आमन्त्रितस्यादिरुदात्तो भवति । देवदत्त । देवदत्तौ, देवदत्ताः । अत्र 'कारकाद्दत्तश्रुतयोरेवाशिषि' (६.२.१४८) इति प्राप्तिर्बाध्यते ।

लुमतापि लुप्ते प्रत्ययलक्षणमत्रेष्यते । सर्पिरागच्छ, सप्तगच्छतेति ॥

२६३९. पथिमथोः सर्वनामस्थाने ॥ १९९ ॥ (३६८७)

पथिमथिशब्दावौणादिकाविनिप्रत्ययान्तौ प्रत्ययस्वरेणान्तोदात्तौ, तयोः सर्वनामस्थाने परत आदिरुदात्तो भवति । पन्थाः, पन्थानौ, पन्थनः । मन्थाः, मन्थनौ, मन्थनः ।

सर्वनामस्थान इति किम्? पथः पश्य । मथः पश्य । उदात्तनिवृत्तिस्वरेणान्तोदात्तो भवति। प्रत्ययलक्षणमत्रापि नेष्यते ।

पृथिप्रियः - इत्यत्र पूर्वपदप्रकृतिस्वरेणान्तोदात्तः पथिशब्दः ॥

२६४०. अन्तश्च तवै युगपत् ॥ २०० ॥ (३६८८)

तवैप्रत्ययान्तस्यान्तः, चशब्दादादिश्च युगपदुदात्तौ भवतः । कृवै । हत्तवै । प्रत्ययाद्युदात्तत्वापवादः ।

युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् । 'एकवर्जम्' इति वचनाद्यौगपद्यं न स्यात्॥

२६४१. क्षयो निवासे ॥ २०१ ॥ (३६८९)

क्षयशब्दो निवासेऽभिधेये आद्युदात्तो भवति । क्षियन्ति=निवसन्त्यस्मिन्निति क्षयः, 'पुंसि संज्ञायां घः प्रायेण' (३.३.११८) इति घप्रत्ययान्तस्य प्रत्ययस्वरः प्राप्तः। क्षये जागृहि प्रपश्यन् । (ऋ. १०.११८.१)

निवास इति किम्? क्षयो वर्तते दस्यूनाम् । 'एरच्' (३.३.५६) इत्ययमजन्तः॥

२६४२. जयः करणम् ॥ २०२ ॥ (३६९०)

जयशब्दः करणवाची आद्युदात्तो भवति । जयन्ति तेनेति जयः । 'पुंसि संज्ञायां घः प्रायेण' (३.३.११८) इति घः, तस्य प्रत्ययस्वरः प्राप्तः । जयोऽश्वः ।

करणमिति किम्? जयो वर्तते ब्राह्मणानाम् । अत्रापि 'एरच्' (३.३.५६) इत्ययमजन्तः ॥

२६४३. वृषादीनां च ॥ २०३ ॥ (३६९१)

'वृष' इत्येवमादीनामादिरुदात्तो भवति । वृषः । जनः । ज्वरः । ग्रहः । हयः। गयः । सर्वे एते पचाद्यच्प्रत्ययान्ताः । गय इत्यत्र गायतेर्निपातनादेत्वम् ।

नयः । तयः । अयः । अंशः । वेदः । अशः । दवः । एतेऽपि तथैवाच्प्रत्ययान्ताः । सूदः - इगुपधात् (३.१.१३५) इति कप्रत्ययान्तः । गुहा - भिदादिः, अङ्प्रत्ययान्तः (३.३.१०४)॥

शमरणौ संज्ञायां सम्मतौ भावकर्मणोः (ग. सू. १७०) शमौ भावे । रणः कर्मणि । अजन्तावेतौ निपातनाद् भावकर्मणोर्भवतः । मन्त्रः पचाद्यजन्तः । शान्तिः - इति क्तिजन्तः । कामः, यामः- घञन्तावेतौ ।

आरा, धार, कारा-भिदादयः । वहः - गोचरादिषु घप्रत्ययान्तः । कल्पः-अजन्तः । पादः - घञन्तः । तत्र क्वचित्प्रत्ययस्वरः प्राप्तः क्वचित् 'कर्षात्वतो घञोऽन्त उदात्तः (६.१.१५९) इति। वृषादिराकृतिगणः । अविहितमाद्युदात्तत्वं वृषादिषु द्रष्टव्यम् ॥

२६४४. संज्ञायामुपमानम् ॥ २०४ ॥ (३६९२)

उपमानशब्दः संज्ञायामाद्युदात्तो भवति । चञ्चा । वर्धिका । खरकुटी । दासी । उपमानशब्दा एते उपमेयस्य संज्ञाः । तत्र 'इवे प्रतिकृतौ' (५.३.९६) इति यः कन् तस्य 'लुम्मनुष्ये' (५.३.९८) इति लुप् ।

यद्येवम्, किमर्थमिदमुच्यते, प्रत्ययलक्षणेन सिद्धमाद्युदात्तत्वम्? एतदेव ज्ञापयति - क्वचिदिह स्वरविधौ प्रत्ययलक्षणं न भवतीति । तथा च पूर्वत्रोदाहृतम् ।

संज्ञयामिति किम्? अग्निर्माणवकः । उपमानमिति किम्? देवदत्तः ॥

२६४५. निष्ठा च द्व्यजनात् ॥ २०५ ॥ (३६९३)

निष्ठान्तं च द्व्यच् संज्ञायां विषये आद्युदात्तं भवति स चेदादिराकारो न भवति । दत्तः। गुप्तः । बुद्धः । प्रत्ययस्वरापवादः ।

निष्ठेति किम्? द्रवः । भीमः । द्व्यजिति किम्? चिन्तितः । रक्षितः । अनादिति किम्? त्रातः । आप्तः । संज्ञायामिति किम्? कृतम् । हृतम् ॥

२६४६. शुष्कधृष्टौ ॥ २०६ ॥ (३६९४)

'आदिरुदात्तः' इति वर्तते । शुष्क, धृष्ट-इत्येतावाद्युदात्तौ भवतः । शुष्कः । धृष्टः । असंज्ञार्थ आरम्भः ॥

२६४७. आशितः कर्ता ॥ २०७ ॥ (३६९५)

आशितशब्दः कर्तृवाची आद्युदात्तो भवति । आशितौ देवदत्तः । अशेरयमाङ्-पूर्वादविवक्षिते कर्मणि कर्तरि क्तः, तत्र 'थाथघञ्' (६-२-१४४) इति प्राप्तः स्वरो बाध्यते । कर्तरीति किम्? आशितमन्नम् । आशितं देवदत्तेन । पूर्वत्र कर्मणि क्तः, उत्तरत्र भावे ॥

२६४८. रिक्ते विभाषा ॥ २०८ ॥ (३६९६)

रिक्तशब्दे विभाषा आदिरुदात्तो भवति । रिक्तः रिक्तः 'संज्ञायाम् (६.१.२०४) 'निष्ठा च द्व्यजनात्' (६.१.२०५) इत्यनेन पूर्वविप्रतिषेधेन नित्यमाद्युदात्तः ॥

२६४९. जुष्टार्पिते चच्छन्दसि ॥ २०९ ॥ (३६९७)

जुष्ट, अर्पित-इत्येते शब्दरूपे छन्दसि विषये विभाषा आद्युदात्ते भवतः । जुष्टः । जुष्टः । अर्पितः । अर्पितः ।

छन्दसीति किम्? भाषायां प्रत्ययस्वरेणान्तोदात्तावेतौ ॥

२६५०. नित्यं मन्त्रे ॥ २१० ॥ (६३९८)

जुष्ट, अर्पित इत्येते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते भवतः । जुष्टं देवानाम् । अर्पितं पितृणाम् । पूर्वेणात्र विकल्पः प्राप्तः ।

केचिदत्र 'जुष्ट' -इत्येतदेवानुवर्तयन्ति । अर्पितशब्दस्य विभाषा मन्त्रेऽपीच्छन्ति। अन्तोदात्तोऽपि हययं मन्त्रे पठ्यते - 'तस्मिन्साकं त्रिंशता न शङ्कवोऽर्पिता' (ऋ. १.१६४.४८) इति ॥

२६५१. युष्मदस्मदोर्ङसि ॥ २११ ॥ (३६९९)

युष्मदस्मदी मदिक्प्रत्ययान्तेऽन्तोदात्ते, तयोर्ङसि परत आदिरुदात्तो भवति । तव स्वम्। मम स्वम् ॥

२६५२. ङयि च ॥ २१२ ॥ (३७००)

'युष्मदस्मदोः' इति वर्तते, 'आदिरुदात्तः' इति च । 'ङे' इत्येतस्मिंश्च परतो युष्मदस्मदोरादिरुदात्तो भवति । 'तुभ्यम्' (तै. सं. १.३.१४.३) । मह्यम् ।

पृथग्योगकरणं यथासंख्यशङ्कानिवृत्त्यर्थम् ॥

२६५३. यतोऽनावः ॥ २१३ ॥ (३७०१)

'निष्ठा च द्व्यजनात्' (६.१.२१५) इत्यतो द्व्यज्ग्रहणमनुवर्त्तते । यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो भवति, न चेन्नौशब्दात्परो भवति । 'अचो यत्' (३.१.९७) - चेयम्, जेयम्। 'शरीरावयवाद्यत्' (५.१.६) - कण्ठ्यम्, ओष्ठ्यम् । 'तित्स्वरितम्' (६.१.१८५) इत्यस्यापवादः ।

अनाव इति किम्? नाव्यम् । द्व्यच इत्येव - चिकीर्ष्यम् । ललाट्यम् ॥

२६५४. ईडवन्दवृशंसदुहां ण्यतः ॥ २१४ ॥ (३७०२)

इड, वन्द, वृ, शंस, दुह्-इत्येतेषां यो ण्यत् तदन्तस्यादिरुदात्तो भवति । ईड्यम् । वन्द्यम् । वार्यम् । शंस्यम् । दोह्य धेनुः । द्व्यनुबन्धकत्वाद् ण्यतो यद्ग्रहणेन ग्रहणं नास्तीति 'तित्स्वरितम्' (६.१.१८५) इत्येतत् प्राप्तम् । वार्यमति - वृङ् सम्भक्तौ' इत्यस्यायं ण्यत् । क्यब्विधौ हि वृञ एव ग्रहणमिष्यते ॥

२६५५. विभाषा वेण्विन्धानयोः । २१५ ॥ (३७०३)

वेणु, इन्धान-इत्येतयोर्विभाषा आदिरुदात्तो भवति । वेणुः, वेणुः । इन्धानः, इन्धनः । इन्धानः ।

वेणुशब्दोऽयम् 'अजिवृरीभ्यो नित्' (उ.सू. ३२५) इति णुप्रत्ययान्तो नित्त्वान्नित्यमाद्युदात्तः प्राप्तः ।

इन्धानशब्दोऽपि यदा चानशन्तस्तदा चित्त्वादन्तोदात्तः । अथ शानजन्तस्तदा लसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः । तदेवमिन्धाने सर्वथाऽप्राप्तमाद्युदात्तत्वं पक्षे विधीयते ।

वेणुरिव वेणुरित्युपमानं यदा संज्ञा भवति, तदा 'संज्ञायामुपमानम्' (६.१.२०४) इति नित्यमाद्युदात्तत्वमिष्यते ॥

२६५६. त्यागरागहासकुहश्वठक्रथानाम् ॥ २१६ ॥ (३७०४)

त्याग, राग, हास, कुह, श्वठ, क्रथ - इयेतेषां विभाषा आदिरुदात्तो भवति । त्यागः, त्यागः । रागः, रागः । हासः - हासः-एते घञन्ताः, तेषां पक्षे 'कर्षात्वतो घञोऽन्त उदात्तः' (७.१.१५९) इत्युदात्तत्वमेव भवति । कुहः, कुहः । श्वठः, श्वठः । क्रथः, क्रथः - एते पचाद्यजन्ताः ॥

२६५७. उपोत्तमं रिति ॥ २१७ ॥ (३७३३)

रिदन्तस्योपोत्तममुदात्तं भवति । त्रिप्रभृतीनामन्त्यमुत्तमं तस्य समीपे यत्तदुपोत्तमम्। करणीयम् । हरणीयम् । पटुजातीयः । मृदुजातीयः । प्रत्ययस्वरापवादोऽयम् ॥

२६५८. चङ्यन्यतरस्याम् ॥ २१८ ॥ (३६७९)

चङन्तेऽन्यतरस्यामुपोत्तममुदात्तं भवति । मा हि चुकरताम् । मा हि चीकरताम्। 'न माङ्योगे' (६.४.७४) इत्यटि प्रतिषिद्धे 'हि च' (८.१.३४) इति निघातेऽदुपदेशादिति लसार्वधातुकानुदात्तत्वे (६.१.१८६) कृते चङ एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तो भवति ।

उपोत्तमग्रहणाद् द्व्यचोर्न भवति - 'मा हि दधत्' ॥

२६५९. मतोः पूर्वमात्संज्ञायां स्त्रियाम् ॥ २१९ ॥ (३७०५)

मतोः पूर्व आकार उदात्तो भवति तच्चेन्मत्वन्तं स्त्रीलिङ्गे संज्ञा भवति । उदुम्बरावती। पुष्करावती । वरणावती । शरावती । 'शरादीनां च' (६.३.१२०) इति दीर्घः ।

आदिति किम्? इक्षुमती । द्रुमवती । संज्ञायामिति किम्? खट्वावती । स्त्रियामिति किम्? शरावान् । मतोरिति किम्? गवादिनी ॥

२६६०. अन्तोऽवत्याः ॥ २२० ॥ (३७०६)

'संज्ञायाम्' इत्येव । अवतीशब्दान्तस्य संज्ञायामन्त उदात्तो भवति । अजिरवती। खदिरवती । हंसवती । करण्डवती । ङीपः पित्त्वादनुदात्तत्त्वं प्राप्तम् ।

'अवत्या' इति किमुच्यते, न वत्या इत्येवमुच्येत? नैवं शक्यम्; इहापि स्यात्-राजवती। स्वरविधौ नलोपस्यासिद्धत्वान्नायमवतीशब्दः, वत्वं पुनराश्रयात्सिद्धम् ॥

२६६१. ईवत्याः ॥ २२१ ॥ (३७०७)

ईवतीशब्दान्तस्यान्त उदात्तो भवति स्त्रियां संज्ञायां विषये । अ॒हीव॒ती । कृ॒षीव॒ती । म॒न॒व॒ती ।

२६६२. चौ ॥ २२२ ॥ (३६५२)

'चौ' इत्यञ्चतिर्लुप्तनकारो गृह्यते । तस्मिन्परतः पूर्वस्यान्त उदात्तो भवति। द्र॒धीचः॑ पश्य। द्र॒धीचा॑ । द्र॒धीचे॑ । म॒धूचः॑ पश्य । म॒धूचा॑ । म॒धूचे॑ । उदात्तनिवृत्तिस्वरापवादोऽयम् ।

चावतद्धित इति वक्तव्यम् (म. भा. ६.१.२२२ वा. १) दाध्र॒चः । म॒धृ॒चः । प्रत्ययस्वर एवात्र भवति ।

२६६३. समासस्य ॥ २२३ ॥ (३७३४)

समासस्यान्त उदात्तो भवति । रा॒ज॒पुरुषः । ब्रा॒ह्म॒ण॒क॒म्ब॒लः । क॒न्या॒स्व॒नः । प॒ट॒ह॒श॒ब्दः । न॒दी॒घो॒षः । रा॒ज॒पृ॒षत् । ब्रा॒ह्म॒ण॒स॒मित् ।

'स्वरविधौ व्यञ्जनमविद्यमानवत्' (व्या.प. ३७) इति हलन्तेष्वन्तोदात्तत्वं भवति । नानापदस्वरस्यापवादः ॥

॥ इति श्रीवामनविरचितायां कशिकावृत्तौ
षष्ठस्याध्यायस्य प्रथमः पादः ॥

अथ षष्ठाध्याये
द्वितीयः पादः

२६६४. बहुव्रीहौ प्रकृत्या पूर्वपदम् ॥ १ ॥ (३७३५)

पूर्वपदग्रहणमत्र पूर्वपदस्थे स्वरे उदात्ते स्वरिते वा वर्तते । बहुव्रीहौ समासे पूर्वपदस्य यः स्वरः स प्रकृत्या भवति = स्वभावेनावतिष्ठते, न विकारमनुदात्तत्वमापद्यते। समासान्तोदात्तत्वे हि सति 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८) इति सोऽनुदात्तः स्यादिति समासान्तोदात्तत्वापवादोऽयमारभ्यते ।

काष्र्णोत्तरासङ्गाः । कृष्णो मृगः, तस्य विकारः काष्र्णः, 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४) इत्यञ्प्रत्ययान्तो ञित्स्वरेणाद्युदात्तः ।

यूपवलजः । यूपशब्द उणादिषु 'कुसुयुश्च' (उणादि ३१३) इति पप्रत्ययान्तः। तत्र च 'दीर्घः' इति, 'नित्' इति च वर्त्तते, तेनाद्युदात्तः ।

ब्रह्मचरिपरिस्कन्दः । ब्रह्मचारिन्शब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ।

स्नातकपुत्रः । स्नातशब्द कन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः ।

अध्यापकपुत्रः लित्स्वरेणाध्यापकशब्दो मध्योदात्तः ।

श्रोत्रियपुत्रः । श्रोत्रियशब्दो नित्त्वादाद्युदात्तः ।

मनुष्यनानाथः । मनुष्यशब्दः 'तित्स्वरितम्' (६.१.१८५) इति स्वरितान्तः । उदात्तग्रहणं स्वरितग्रहणं चात्रानुवर्त्तते, तेन सर्वानुदात्ते पूर्वपदे विधिरेव नास्तीति समासान्तोदात्तत्वम् भवति।

समभग इति समशब्दो हि सर्वानुदात्तः ॥

२६६५. तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥ २ ॥ ३७३६)

तत्पुरुषे समासे तुल्यार्थं तृतीयान्तं सप्तम्यन्तमुपमानवाचि अव्ययं द्वितीयान्तं कृत्यान्तं च यत्पूर्वपदं तत्प्रकृतिस्वरं भवति । तुल्यार्थ-तुल्यश्वेतः । तुल्यलोहितः । तुल्यमहान्। सदृक्च्छवेतः । सदृग्लोहितः । सदृग्महान् । सदृशश्वेतः । सदृशलोहितः। सदृशमहान् । एते 'कृत्यतुल्याख्या अजात्या' ((२.१.६८) इति कर्मधारयाः । तत्र तुल्यशब्दः 'यतोऽनावः' (६.१.२१३) इत्याद्युदात्तः । सदृक्शब्दः 'समानान्ययोश्च'। (का.वा.) इति किवन्प्रत्ययान्तः, कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । सदृशशब्दोऽपि कञन्तो मध्योदात्तः । तुल्यार्थः ।

तृतीया-शङ्कुलया खण्डः शङ्कुलाखण्डः । किरिणा काणः किरिकाणः। शङ्कुपूर्वाल्लातेः 'घञर्थे कविधानम्' (का.वा.) इति वा कप्रत्ययान्तः शङ्कुलाशब्दोऽन्तोदात्तः । किरिशब्दोऽपि किरतेः 'कृगृशृपृकुटिभिदिच्छिदिभ्यश्च' (उणादि ५९२) इतीकारप्रत्ययः, किदौणादिकः, तेनासावन्तोदात्तः । तृतीया ।

सप्तमी-अक्षेषु शौण्डः अक्षशौण्डः । पानशौण्डः । 'अशेर्देवने' (उणादि. ६४०) इति सप्रत्ययान्तोऽक्षशब्दोऽन्तोदात्तः । पानशब्दो ल्युण्हन्तो लित्स्वरेणाद्युदात्तः। सप्तमी ।

उपमान-शस्त्रीश्यमा । कुमुदश्येनी । हंसगद्गदा । न्यग्रोधपरिमण्डला । दूर्वाकाण्डश्यामा। शरकाण्डगौरी । 'उपमानानि समान्यवचनैः' (२.१.५५) इति समासः । शस्त्रीशब्दो ङीष्प्रत्ययान्तोऽन्तोदात्तः । कुमुशब्दोऽपि कौ मोदते इति मूलविभुजादित्वात् (का.वा.) कप्रत्ययान्तः 'नब्विषयस्यानिसन्तस्य' (फि.सू.२६) इति वाऽऽद्युदात्तः । हंसशब्दः 'वृतृवदिहनिकमिकषिभ्यः सः (उणादि. ३४९) इति सप्रत्ययान्तः। न्यग्रोहतीति न्यग्रोधः,

पचादित्वाद् अच्प्रत्ययान्तः, तस्य 'न्यगोधस्य च केवलस्य' (७.३५) इति निपातनाद् हकारस्य धकारः, मध्योदात्तत्वं च । दूर्वाकाण्डशरकाण्डशब्दौ षष्ठीतत्पुरुषावुत्तरपदाद्युदात्तौ । उपमान।

अव्यय-अब्रह्मणः । अवृषलः । कुब्रह्मणः । कुवृषलः । निष्कौशाम्बिः । निवराणसिः । अतिखट्वः । अतिमालः । एतान्यव्ययान्याद्युदात्तानि ।

अव्यये नञ्कुनिपातानामिति वक्तव्यम् (का. वा. ६.२.२.३) । इह मा भूत्-स्नात्वाकुलक इति । अव्ययम् ।

द्वितीया-मुहूर्त्तसुखम् । मुहूर्त्तारमणीयम् । सर्वरत्रकल्याणी । सर्वरात्रशौभना। 'अत्यन्तसंयोगे च' (२.२.२९) इति द्वितीयासमासः । मुहूर्त्तशब्दः पृषोदरादिरन्तोदात्तः। सर्वत्रात्रशब्दोऽप्यच्प्रत्ययान्तः । द्वितीया ।

कृत्य - भज्यौष्णम् । भज्यलवणम् । पानीयशीतम् । हरणीयचूर्णम् । भोज्यशब्दो ण्यदन्तोऽन्तस्वरितः । पानीयहरणीयशब्दयोः 'उपोत्तमं रिति' (६.१.२१७) इति ईकार उदात्तः ॥

३६६६. वर्णो वर्णेष्वनेते ॥ ३ ॥ (३७३७)

'प्रकृत्या पूर्वपदम्' 'तत्पुरुषे' इति च वर्त्तते । वर्ण=वर्णवाचि पूर्वपदं वर्णवाचिष्वेवोत्तरपदेषु एतशब्दवर्जितेषु समासे प्रकृतिस्वरं भवति । कृष्णसारङ्गः, लोहितसारङ्गः। कृष्णकल्माषः, लोहितकल्माषः । 'कृषेर्वर्णे' (उणादि. २९१) इति कृष्णशब्दो नक्प्रत्ययान्तोऽन्तोदात्तः । लोहितशब्दोऽपि 'रुहे रश्च लो वा' (उणादि. ३८१) इतितन्प्रत्ययान्त आद्युदात्तः ।

वर्ण इति किम्? परमकृष्णः ।

वर्णेष्विति किम्? कृष्णतिलाः । अनेत इति किम्? कृष्णैतः । लोहितैतः ।

२६६७. गाधलवणयोः प्रमाणे ॥ ४ ॥ (३७३८)

प्रमाणवाचिनि तत्पुरुषे समासे गाध, लवण-इत्येतयोरुत्तरपदयोः पूर्वपदं प्रकृतिस्वरं भवति । शम्बगाधमुदकम् । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । अश्वलवणम्। यावद् गवे दीयते तावदित्यर्थः । षष्ठीसमासा एते । तत्र 'शमेर्बन्' (उणादि. ५४३) इति बन्प्रत्ययान्तत्वाच्छम्बशब्दः आद्युदात्तः । अरित्रशब्दः 'अर्त्तिलूधूसू' (३.२.१८४) इतीत्रप्रत्ययान्तो मध्योदात्तः । गोशब्दो डोप्रत्ययान्तः(उणादि. २३५) अन्तोदात्तः । अश्वशब्दः 'अशूप्रुषि' (उणादि. ११७) इति क्वन्प्रत्ययान्त आद्युदात्तः । प्रमाणम्=इयत्तापरिच्छेदमात्रमिह द्रष्टव्यम्, न पुनरायाम एव । स्वरव्यङ्ग्यं च प्रमाणविशेषविषयत्वमेतेषाम् ।

प्रमाण इति किम्? परमगधम् । परमलवणम् ॥

३६६८. दायाद्यं दायादे ॥ ५ ॥ (३७३९)

तत्पुरुषे समासे दायादशब्द उत्तरपदे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं भवति । विद्यादायादः । धनदायादः । 'संज्ञायां समजनिषद' (३.३.९९) इति विद्याशब्दः क्यप्प्रत्ययान्तः। 'उदात्तः' इति च तत्र वर्त्तते, तेनायमन्तोदात्तः 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उणादि. २४८) इति बहुलवचनात् केवलादपि धाञः क्युप्रत्ययः, तेन धनशब्दः प्रत्ययस्वरेणाद्युदात्तः ।

अथ विद्यादायाद इति केन षष्ठी? 'स्वामीश्वराधिपतिदायाद' (२.३.३९) इति । यद्येवम्, प्रतिपदविधाना च षष्ठी न समस्यते' (का.वा.) इति समासप्रतिषेधः प्राप्नोति? एवं तर्हि शेषलक्षणा (२.३.५०) एवात्र षष्ठी, तस्यास्तु सप्तमी विधीयमाना बाधिका मा विज्ञायीति पुनरभ्यनुज्ञायते ।

दायाद्यतिमति किम्? परमदायादः । अत्र समासान्तोदात्तत्वमेव भवति ॥

२६६९. प्रतिबन्धि चिरकृच्छ्रयोः ॥ ६ ॥ (३७४०)

तत्पुरुषे समासे चिरकृच्छ्रयोरुत्तरपदयोः प्रतिबन्धिवाचि पूर्वपदं प्रकृतिस्वरं भवति । गमनचिरम् । गमनकृच्छ्रम् । व्याहरणचिरम् । व्याहरणकृच्छ्रम् । गमनव्याहरणशब्दौ ल्युडन्तौ, तयोर्लित्स्वरः । गमनं च यच्चिरं चेति विशेषणसमासोऽयम् (२.१.५७), मयूरव्यंसकादिः (२.१.७२) वैष द्रष्टव्यः । गमनं हि कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते ।

प्रतिबन्धीति किम्? मूत्रकृच्छ्रम् ।

२६७०. पदेऽपदेशे ॥ ७ ॥ (३७४१)

अपदेहः=व्याजः, तद्वाचिनि तत्पुरुषे समासे पदशब्द उत्तरपदे पूर्वपदं प्रकृतिस्वरं भवति। मूपदेन प्रस्थितः । उच्चरपदेन प्रस्थितः । मूत्रशब्दः 'सिचिमुच्योष्टेरूच' (उणादि. ६१२) इति ष्ट्रन्प्रत्ययान्तः, मूत्रयतेर्वा घञन्त आद्युदात्तः । उच्चारशब्दोऽपि घञन्तः 'थाथघञ्क्ताजबित्रकाणाम्' (६.२.१४४) इत्यन्तोदात्तः । विशेषणसमासोऽयम्, मयूरव्यंसकादिर्वा ।

अपदेश इति किम् ? विष्णोः पदम् विष्णुपदम् ॥

२६७१. निवाते वातत्राणे ॥ ८ ॥ (९७४२)

निवातशब्दे उत्तरपदे वातत्राणवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । कुट्येव निवातं कुटीनिuतम् । zमीनिवातम् । कुड्यनिवातम् । वातस्याभावो निवातम्,

'अर्थाभाव' (२.१.६) इत्यव्ययीभावः[१] । निरुद्धो वातोऽस्मिन्निति वा निवातमिति बहुव्रीहिः । तत्र कुड्यादिहेतुके निवाते कुड्यादयो वर्तमानाः समानाधिकारणेन निवातशब्देन सह समस्यन्ते । कुटी-शमीशब्दौ गौरादिङीषन्तावन्तोदात्तौ । कुड्यशब्दोऽपि 'कवतेर्यत् डक्किच्च' (उणादि-सूत्रम्) इति यत्प्रत्ययान्त आद्युदात्त इत्येके । ड्यक्प्रत्ययान्तोऽन्तोदात्त इत्यपरे ।

वातत्राण इति किम् ? र॒e॒ा॒वते वसति । सुखं q॒ि॒ा॒व॒तम् । निवातशब्दोऽयं पार्श्ववाची रूढिशब्दः, तत्रोभयत्र षष्ठीसमासः ॥

२६७२. शारदेऽनार्तवे ॥ ९ ॥ (३७४९)

ऋतौ भवमार्तवम् । अनार्तववाचिनि शारदशब्दे उत्तरपदे तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । रज्जःशारदमुदकम् । दृषत्शरदाः सक्तवः । शारदशब्दोऽयं प्रत्यग्रवाची, तस्य नित्यसमासः । अस्वपदविग्रह इष्यते । सद्यो रज्जूद्धृतमुदकं प्रत्यग्रमनुपहतं रज्जुशारदमुच्यते । रज्जुशब्दः 'सृजेरसुम् च' (उणादि १५) इति उप्रत्ययान्त आदिलोपश्च । 'धान्ये नित्' इति च तत्र वर्त्तते, तेनाद्युदात्तः । दृषत्-शब्दः 'दृणातेः षुग्ह्रस्वश्च' (उणादि १३६) इति अदिक्प्रत्ययान्तोऽन्तोदात्तः।

अनार्त्तव इति किम् ? प॒र॒म॒श॒र॒दम् । उ॒त्त॒म॒श॒र॒दम् । शरदि ऋतुविशेषे भवं यत्तदिह शारदम् ॥

२६७३ अध्वर्युकषाययोर्जातौ ॥ १० ॥ (३७४४)

अध्वर्यु, कषाय-इत्येतयोर्जातिवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । प्राच्यःध्वर्युः । क॒ठाःध्वर्युः। क॒ला॒पाःध्वर्युः ।

एते समानाधिकरणसमासा जातिवाचिनो नियतविषयाः । तत्र प्राच्यशब्दो यत्प्रत्ययान्त आद्युदात्तः । कठशब्दः पचाद्यचि व्युत्पादितः, ततः कठेन प्रोक्तमिति 'वैशम्पायनान्तेवासिभ्यश्च' (४.३.१०४) इति णिनिः, तस्य'कठचरकाल्लुक्' (४.३.१०७) इति लुक् । कलापिना प्रोक्तमिति 'कलापिनोऽण्' (४.३.१०८) तस्मिन् 'इनण्यनपत्ये' (६.४.१६४) इति प्रकृतिभावे प्राप्ते 'नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डि-सूकरसद्मसुपर्वणामुपसंख्यानम्' (का. वा.) इति टिलोपः । तदेवं कलापशब्दोऽन्तोदात्तः। स॒र्पि॒म॒ण्डकषायम् । उमापुष्पकषायम् । द॒वा॒रि॒ककषायम् । षष्ठीसमासव्युत्पादिता रूढिशब्दा

एते। तत्र सर्पिर्मण्डशब्दः, उमापुष्पशब्दश्च षष्ठीसमासावन्तोदात्तौ । दौवारिकशब्दोऽपि 'द्वारे नियुक्तः' इति ठकि सत्यन्तोदात्त एव ।

जाताविति किम् ? परमाध्वर्युः परमकषयः॥

२६७४. सदृशप्रतिरूपयोः सादृश्ये ॥ ११ ॥ (३६४५)

सदृश, प्रतिरूप-इत्येतयोरुत्तरपदयोः सादृश्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । पितृसदृशः । मतृसदृशः । पितृमातृशब्दावुणादिष्वन्तोदात्तौ निपातितौ ।

षष्ठीसमासार्थं च सदृशग्रहणमिह तदलुकि षष्ठ्याः प्रयोजयति - दास्याः सदृशः, वृषल्याः सदृश इति । अत्र दासी-वृषलीशब्दयोरन्तोदात्तत्वाद् 'उदात्तयणो हल्पूर्वात्' (६.१.१७४) इति विभक्तिरन्तोदात्ता । प्रितृप्रतिरूपः । मतृपतिरूपः ।

सादृश्ये इति किम्? परमसदृशः । उत्तमसदृशः । समासार्थोऽत्र पूज्यमानता, न सादृश्यम्॥

२६७५. द्विगौ प्रमाणे ॥ १२ ॥ (३७४६)

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । प्राच्यसप्तशमः। गान्धरिसप्तशमः । सप्त शमाः प्रमाणमस्येति मात्रच उत्पन्नस्य 'प्रमाणे लो' (का. वा.) 'द्विगोर्नित्यम्' (का.वा.) इति लुक् । प्राच्यश्चासौ सप्तशमश्चेति प्राच्यसप्तशमः । प्राच्यशब्द आद्युदात्तः, गान्धारिशब्दः कर्दमादित्वादाद्युदात्तः, मध्योदात्तो वा ।

द्विगाविति किम्? व्रीहिप्रस्थः । प्रमाण इति किम्? परमसशमः ॥

२६७६. गन्तव्यपण्यं वाणिजे ॥ १३ ॥ (३७४७)

वाणिजशब्द उत्तरपदे तत्पुरुषे समासे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरं भवति । मद्रवणिजः । कश्मीरवाणिजः । गान्धारिवाणिजः । मद्रादिषु गत्वा व्यवहरन्तीत्यर्थः । सप्तमीसमासा एते । तत्र मद्रशब्दो रक्प्रत्ययान्तत्वादन्तोदात्तः। काश्मीरशब्दोऽपि पृषोदरादिषु मध्योदात्तः । गान्धारिशब्दः कर्दमादिषु पठ्यते, तत्र 'कर्दमादीनां वा' इति पक्षे आद्युदात्तो भवति, द्वितीयो वा ।

पण्य-गोवाणिजः । अश्ववाणिजः । गोशब्दोऽन्तोदात्तः । अश्वशब्द आद्युदात्तः।

गन्तव्यपण्यमिति किम्? परमवाणिजः । उत्तमवाणिजः ॥

२६७७. मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥ १४ ॥ (३७४८)

मात्रा, उपज्ञा, उपक्रम, छाया-एतेषूत्तरपदेषु नपुंसकवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । भिक्षामात्रं न ददाति याचितः । समुद्रमात्रं न सरोऽस्ति किञ्चन ।

मात्रशब्दोऽयं वृत्तिविषय एव तुल्यप्रमाणे वर्त्तते । तत्र भिक्षायास्तुल्य-प्रमाणमित्यस्वपदविग्रहः षष्ठीसमासः । तत्र भिक्षाशब्दः 'गुरोश्च हलः' (३.३.१०३) इत्यप्रत्ययान्तोऽन्तोदात्तः । समुद्रशब्दोऽपि फिषि 'पाटलापालङ्काम्बासागरार्थानाम्' (फि.सू.२) इत्यन्तोदात्त एव ।

उपज्ञा-पाणिनोपज्ञम् अकालकं व्याकरणम् । व्याड्युपज्ञं दुष्करणम् । आपिशल्युपज्ञं गुरुलाघवम् । षष्ठीसमासा एते । तत्र पणिनोऽपत्यमित्यणन्तः पाणिनशब्दः प्रत्ययस्वरेणान्तोदात्तः । व्याडिरिञन्तत्वादाद्युदात्तः । तद्वदापिशलिः ।

उपक्रम-आढ्यापक्रमं प्रासादः । दर्शनीयोपक्रमम् । सुकुमारोपक्रमम् । नन्दोपक्रमाणि मानानि । एतेऽपि षष्ठीसमासा एव । तत्रैत्यैनं ध्यायन्तीत्याढ्यः । 'घञर्थे कविधानम्' (का.वा.) इति कप्रत्ययः । आङ्पूर्वाद् ध्यायतेः पृषोदरादित्वाद् हस्य ढत्वम् । तदयमाढ्यशब्दस्थाथादिस्वरेण (६.२.१४४) अन्तोदात्तः । दर्शनीयशब्दो रित्त्वादुपोत्तमोदात्तः । सुकुमारशब्दो 'नञ्सुभ्याम्' (६.२.१७२) इत्यन्तोदात्तः । नन्दशब्दः पचाद्यचि व्युत्पादितः । उपज्ञोपक्रमान्तस्य तत्पुरुषस्य नपुंसकलिङ्गता 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (२.४.२१) इति ।

छाया - इषुच्छायम् । धनुश्छायम् । इषुशब्दः 'इषेः किच्च' (उणादि. १३) इत्युप्रत्ययान्तः, तत्र च 'धान्ये नित्' (उणादि ९) इति वर्त्तते, तेनाद्युदात्तः । धनुशब्दोऽपि 'नब्विषयस्यानिसन्तस्य' (फि.सू.२६) इत्याद्युदात्त एव । इषूणां छायेति षष्ठीसमाप्तः। 'छाया बाहुल्ये' (२.४.२२) इति नपुंसकलिङ्गता ।

नपुंसक इति किम्? कुड्यच्छया ॥

२६७८. सुखप्रिययोर्हिते ॥ १५ ॥ (३७८९)

सुख, प्रिय - इत्येतयोरुत्तरपदयोर्हितवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। गमनसुखम् । वचनसुखम् । व्याहरणसुखम् । सुख ।

प्रिय-गमनप्रियम् । वचनप्रियम् । व्यहरणप्रियम् ।

समानाधिकरणसमासा एते । तत्र सुखप्रियशब्दौ तद्धेतावायत्यां प्रीतिकरे वर्तेते । तद्धि हितं यदायत्यां प्रीतिं करोति । गमनादिषु ल्युडन्तेषु लित्स्वरः ।

हित इति किम्? परमसुखम् । परमप्रियम् ॥

२६७९. प्रीतौ च ॥ १६ ॥ (३७५०)

प्रीतौ गम्यमानायां सुख, प्रिय-इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । ब्राह्मणसखं पायसम् । छात्त्रप्रियोऽनध्यायः । कन्याप्रियो मृदङ्गः।

सुखप्रिययोः प्रीत्यव्यभिचारादिह प्रीतिग्रहणं तदतिशयप्रतिपत्त्यर्थम् । ब्राह्मणच्छात्त्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । कन्याशब्दः स्वरितान्तः ।

प्रीताविति किम्? रज॒स॒खम् । रा॒ज॒प॒यिम् ॥

२६८०. स्वं स्वामिनि ॥ १७ ॥ (३७५१)

स्वामिन्शब्द उत्तरपदे तत्पुरुषे समासे स्ववाचि पूर्वपदं प्रकृतिस्वरं भवति । गोस्वमी । अश्वस्वामी । धनस्वामी । अश्वधनगवां कथित एव स्वरः । स्वमिति किम्? प॒र॒मस्व॒मी ॥

२३८१. पत्यावैश्वर्ये ॥ १८ ॥ (३७५२)

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं भवति । गृहपतिः। सेनापतिः । नरपतिः । धा॒न्यपतिः । 'गेहे कः' (३.१.१४४) इति प्रकृतिस्वरेणान्तोदात्तो गृहशब्दः। सह इनेन वर्त्तते इति 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (६.२.१) इति सेनाशब्द आद्युदात्तः । 'नॄ नये' (धा.पा.१९४६) एतस्माद् 'ऋदोरप् (३.३.५७) इति अप्प्रत्ययान्त आद्युदात्तो नरशब्दः । धान्यमन्तः स्वरितम् ।

ऐश्वर्यमिति किम्? ब्राह्मणो वृ॒ष॒ल॒प॒तिः । वृषल्या भर्तेत्यर्थः ॥

२६८२. न भूवाक्चिद्दिधिषु ॥ १९ ॥ (३७५३)

पत्यावैश्वर्ये । धान्यमन्तःस्वरित इति । ण्यदन्तत्वात् तित्स्वरेण ।

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे समासे भू, वाक्, चित्, दिधिषू-इत्येतानि पूर्वपदानि प्रकृतिस्वराणि न भवन्ति । पूर्वेण प्राप्तः स्वरः प्रतिषिध्यते । भ॒पतिः । वा॒क्प॒तिः । चि॒त्प॒तिः । दि॒धि॒षू॒पतिः । षष्ठीसमासा एते समासस्वरेणान्तोदात्ता भवन्ति ॥

२६८३. वा भुवनम् ॥ २० ॥ (३७५४)

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे समासे भुवनशब्दः पूर्वपदं वा प्रकृतिस्वरं भवति। भुवनपतिः (तै.ब्रा. ३.७.६.१) भु॒व॒न॒प॒तिः । पूर्वपदप्रकृतिस्वरपक्षे आदिरुदात्तः। 'रञ्जेः क्युन्' (उणादि २४६) इति वर्त्तमाने 'भूसूधूभ्रस्जिभ्यश्छन्दसि' (उणादि. २४७) इति क्युन्प्रत्ययान्तो भुवनशब्द आद्युदात्तो व्युत्पादितः ।

कथं भुवनपतिरादित्य इति? 'उणादयो बहुलम्(३.२.१) इति बहुलवचनाद्भाषायामपि प्रयुज्यते ॥

२६८४. आशङ्काबाधनेदीयस्सु संभावने ॥ २१ ॥ (३७५५)

'प्रकृत्या पूर्वपदम्', 'तत्पुरुषे' इति वर्त्तते । आशाङ्क, आबाध, नेदीयस् इत्येतेषूत्तरपदेषु सम्भावनवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । अस्तित्वाध्यवसायः=सम्भावनम्। गमनाशङ्कं वर्त्तते । गमनमाशङ्क्यते इति सम्भाव्यते। वचनाशङ्कम् । व्याहरणाशङ्कम् ।

आबाध-गमनाबाधम् । वचनाबाधम् । व्यहरणाबाधम् । गमनं बाध्यत इति सम्भाव्यते।

नेदीयस्-गमननेदीयः । व्याहरणनेदीयः । गमनमतिनिकटतरमिति सम्भाव्यते।

सम्भावन इति किम्? परमनेदीयः । पूर्वपदानि ल्युडन्तान्युक्तस्वराणि ॥

२६८५. पूर्वे भूतपूर्वे ॥ २२ ॥ (३७५६)

पूर्वशब्दे उत्तरपदे भूतपूर्ववाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। आढ्यो भूतपूर्व आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्त्तते तत्र, 'विशेषणं विशेष्येण' (२.१.५७) इति समासः । मयूरव्यंसकादि (२.१.७२) र्वा द्रष्टव्यः । दशनीयपूर्वः । सुकुमारपूर्वः ।

भूतपूर्व इति किम्? परमपूर्वः । उत्तमपूर्वः । अत्र परमश्चासौ पूर्वश्चेति समासः, न तु परमो भूतपूर्व इति । तथा च सत्युदाहरणमेव भवति ॥

२६८६. सविधसनीडसमर्यादसवेशसदेशेषु समीप्ये ॥ २३ ॥ (३७५७)

सविध, सनीड, समर्याद, सवेश, सदेश-इत्येतेषूत्तरपदेषु सामीप्यवचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति । मद्रसविधम् । गान्धारिसविधम् । कश्मीरसविधम् । मद्रसनीडम् । गान्धारिसनीडम् । काश्मीरसनीडनम् । मद्रसमर्यादम्। गान्धारिसमर्यादम् । काश्मीरसमर्यादम् । मद्रसवेशम् । गान्धारिसवेशम् । कश्मीरवेसशम्। मद्रसदेशम् । गन्धारिसदेशम् । कश्मीरसदेशम्। पूर्वपदान्युक्तस्वराणि ।

सविधादीनां सह विधयेत्येवमादिका व्युत्पत्तिरेव केवलम् । समीपवाचिनस्त्वेते समुदायः। मद्राणां सविधम् = समीपमित्यर्थः ।

सामीप्य इति किम्? सह मर्यादया वर्तते समर्यादं क्षेत्रम् । देवदत्तस्य समर्यादं देवदत्तसर्यादम् । देवदत्तसभया ॥

२६८७. विस्पष्टादीनि गुणवचनेषु ॥ २४ ॥ (३६५८)

विस्पष्टादीनि पूर्वपदानि गुणवचनेषूत्तरपदेषु प्रकृतिस्वराणि भवन्ति । विस्पष्टकटुकम्। विचित्रकटुकम् । व्यक्तकटुकम् । विस्पष्टलवणम् । विचित्रलवणम्। व्यक्तलवणम् । विस्पष्टं कटुकमिति विगृह्य 'सुप्सुपा' (१.१.४) इति समासः ।

विस्पष्टादयो ह्यत्र प्रवृत्तिनिमित्तस्य विशेषणम् । कटुकादिभिश्च शब्दैर्गुणवद् द्रव्यमभिधीयते इत्यसामानाधिकरण्यम्, अतो नास्ति कर्मधारयः ।

विस्पष्टशब्दो 'गतिरनन्तरः' (५.१.४९) इत्याद्युदात्तः, विचित्रशब्दोऽप्यव्ययस्वरेण । विचित्तशब्दमन्ये पठन्ति, सोऽपि बहुव्रीहिस्वरेणाद्युदात्त एव । व्यक्तशब्दः 'उदात्तस्वरितयोर्यणः 'स्वरितोऽनुदात्तस्य (८.६.४) इत्यादिस्वरितः ।

ये चात्रापरे पठ्यन्ते, तत्र सम्प्रन्नशब्दस्थादिस्वरेणान्तोदात्तः । पटु-पण्डितशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । कुशलशब्दः कृत्स्वरेणान्तोदान्तः । चपलशब्दश्चित्स्वरेणान्तोदात्तः 'चुपेरच्चोपधायाः (उणादि. ११६) इत्यत्र हि चिदिति वर्तते । निपुणशब्दस्थाथादिस्वरेणान्तोदात्तः, पुणेरिगुपधलक्षणः कप्रत्ययोऽयम् ।

विस्पष्टादीनीति किम्? परमलवणम् । उत्तमलवणम् । गुणवचनेष्विति किम्? विस्पष्टब्रह्मणः ।

विस्पष्ट । विचित्र । व्यक्त । सम्पन्न । कटु । पण्डित । कुशल । चपल । निपुण। विस्पष्टादि ॥

२६८८. श्रज्यावमकन्पापवत्सु भावे कर्मधारये ॥ २५ ॥ (३७५९)

श्र, ज्य, अवम, कन्-इत्येतेषु पापशब्दवति चोत्तरपदे कर्मधारये समासे भाववाचि पूर्वपदं प्रकृतिस्वरं भवति । गमनश्रेष्ठम् । गमनश्रेयः । ज्य-वचनज्येष्ठम्, वचनज्यायः । अवम-गमनावमम्, वचनावमम् । कन्-गमनकनिष्ठम्, गमनकनीयः। पापवत् - गमनपापिष्ठम्, गमनपापीयः । ल्युडन्तान्येतानि पूर्वपदानि लित्स्वरेणाद्युदात्तानि । श्रज्यकनामादेशानां ग्रहणमिति सामर्थ्यात्तद्वदुत्तरपदं गृह्यते ।

श्रादिष्विति किम्? गमनशभनम् । भाव इति किम्? गम्यतेऽनेति गमनम्, तत् श्रेयो गमनश्रयः । कर्मधारये इति किम्? गमनस्य श्रेयो गमनश्रयः ॥

२६८९. कुमारश्च ॥ २६ ॥ (३७६०)

कुमारशब्दः पूर्वपदं कर्मधारये समासे प्रकृतिस्वरं भवति । कमरश्रमणा । कमरकुलटा । कमरतापसी । कुमारशब्दोऽन्तोदात्तः ।

अत्र केचिल्लक्षणप्रतिपदोक्तपरिभाषया (व्या. प. ३) 'कुमारः श्रमणादिभिः' (२.१.७०) इत्यत्रैव समासे स्वरमेतमिच्छन्ति । केचित्पुनरविशेषेण सर्वत्रैव कर्मधारये ॥

२६९०. आदिः प्रत्येनसि ॥ २७ ॥ (३७६१)

'कर्मधारये' इति वर्त्तते । प्रतिगत एनसा, प्रतिगतमेनो वा यस्य स प्रयेनाः। तस्मिन्नुत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो भवति । कुमारप्रत्येनाः ।

'उदात्तः' इत्येतदत्र सामर्थ्याद्वेदितव्यम् । पूर्वपदप्रकृतिस्वर एव ह्ययमादेरुपदिश्यते ॥

२६९१. पूगेष्वन्यतरस्याम् ॥ २८ ॥ (३७६२)

पूगाः=गणाः, तद्वाचिन्युत्तरपदे कर्मधारये समासे कुमारस्यान्यतरस्यामादिरुदात्तो भवति । कुमा́रचातकाः । कुम́रचा́तकाः । कुम́रलोहध्वजाः । कुम́रलो́हध्वजाः। कुम́रबलाहकाः । कुमा́रब́लाहकाः । कुमा́रजीमूताः । कुम́रजी́मूताः ।

[कुमरचातकाः । कुमरलोहध्वजाः । कमरबलाहकाः । कुमरजीमूताः ।]

चातकादयः पूगशब्दाः तेभ्यः 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' (५.३.११२) इति ञ्यः प्रत्ययः तस्य 'तद्राजस्य बहुषु' (२.४.६२) इति लुक् । अत्र यदाऽऽद्युदात्तत्वं न भवति, तदा 'कुमारश्च' (६.२.२६) इति पूर्वपदप्रकृतिस्वरत्वमेके कुर्वन्ति । ये तु तत्र प्रतिपदोक्तस्य ग्रहणमिच्छन्ति तेषां समासान्तोदात्तत्वमेव भवति ॥

२६९२. इगन्तकालकपालभगालशरावेषु द्विगौ ॥ २९ ॥ (३७६३)

इगन्त उत्तरपदे कालवाचिनि, कपाल, भगाल, शराव-इत्येतेषु च द्विगौ समासे पूर्वपदं प्रकृतिस्वरं भवति । इगन्त-पञ्चा́रत्निः । दशा́रत्निः । पञ्चारत्नयः प्रमणमस्य, दशारत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः 'प्रमाणे लो' (का.वा.) 'द्विगोर्नित्यम्' (का.वा.) इति मात्रचो लोपः इगन्त ।

काल-पञ्च́मास्यः । दश́मास्यः । पञ्च मासान्भृतो भूतो भावी वा (५.१.८०) इति तद्धितार्थे द्विगोर्यप् (५.१.८२) । पञ्च́वर्षः । दश́वर्षः । 'वर्षाल्लुक् च' (५.१.८८) इति ठञो लुक्। काल ।

कपाल – पञ्च́कपालः । दश́कपालः । कपाल ।

भगाल - पञ्च́भगालः । दश́भगालः । भगाल ।

शराव - पञ्च́शरावः । दश́शरावः ।

'संस्कृतं भक्षाः' (४.२.१६) इति तद्धितार्थ एते समासाः 'द्विगोर्लुगनपत्ये' (४.१.८८) इति कृताण्प्रत्ययलोपा द्रष्टव्याः ।

इगन्तादिष्विति किम्? पञ्चभिरश्वैः क्रितः पञ्चाश्वः दशाश्वः । द्विगाविति किम्? परमरत्निः । परमशरावः ।

पञ्चारत्न्यो दशारत्न्य इति पञ्चारत्नयो दशारत्नय इति च यण्गुणयोर्बहिरङ्ग-लक्षणयोरसिद्धत्वात् (म. भा.) स्थानिवद्भावाद्वा द्विगुस्वर इगन्तलक्षणः प्रवर्त्तते ॥

२६९३. बहवन्यतरस्याम् ॥ ३० ॥ (३७६४)

बहुशब्दः पूर्वपदमिगन्तादिषूत्तरपदेषु द्विगौ समासेऽन्यतरस्यां प्रकृतिस्वरं भवति । पूर्वेण नित्ये प्राप्ते विकल्पः । बहवरत्निः । बहवरत्निः । बहुमास्यः । बहुमास्यः। बहुकपालः । बहुकपालः। बहुभगालः । बहुभगालः । बहुशरावः । बहुशरावः । बहुशब्दोऽन्तोदात्तः, तस्य प्रकृतिस्वरे कृते यत्र यणादेशस्तत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इत्येष स्वरो भवति ॥

२६९४. दिष्टिवितस्त्योश्च ॥ ३१ ॥ (३७६५)

दिष्टि वितस्ति-इत्येतयोरुत्तरपदयोर्द्विगौ समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति। पञ्चदिष्टिः पञ्चदिष्टः । पञ्चवितस्तिः पञ्चवितस्तिः । दिष्टिवितस्त्योः प्रमाणे, तेनात्र मात्रचो लुक् ॥

१६९५. सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् ॥ ३२ ॥ (३७६६)

सप्तम्यन्तं पूर्वपदं सिद्ध, शुष्क, पक्व, बन्ध-इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति, सा चेत्सप्तमी कालान्न भवति । संकश्यसिद्धः संकाश्यसिद्धः । काम्पिल्यसिद्धः कम्पिल्यसिद्धः । सांकाश्य-काम्पिल्यशब्दौ ण्यप्रत्ययान्तावन्तोदात्तौ । फिषि तु 'सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानामन्तः पूर्व वा' (फि.सू.६५) इति पठ्यते, तत्र पक्षे मध्योदात्तावपि भवतः ।

शुष्क-ऊकशुष्कः । निधनशुष्कः । ऊकशब्दो बहुलवचनादवतेः कक्प्रत्ययान्तोदात्तः । निधनशब्दो निधात्रः क्युप्रत्यये मध्योदात्तः ।

पक्व-कुम्भीपक्वः । कलशीपक्वः । भ्राष्ट्रपक्वः । कुम्भीकलशीशब्दौ ङीषन्तावान्तोदात्तौ। भ्राष्ट्रशब्दः ष्ट्रन्प्रत्ययान्त आद्युदात्तः ।

बन्ध-चक्रबन्धः । चारकबन्धः । चक्रशब्दोऽन्तोदात्तः । चारकशब्दो ण्वुलन्त आद्युदात्तः ।

अकालादिति किम्? पूर्वाह्णसिद्धः । अपराह्णसिद्धः ।

सप्तमीस्वरः कृत्स्वरेण बाधितः पुनरयं विधीयते ॥

२६९६. परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥ ३३ ॥ (३७६७)

परि, प्रति, उप, अप-इत्येते पूर्वपदभूता वर्ज्यमानवाचिनि अहरवयववाचिनि रात्र्यवयववाचिनि चोत्तरपदे प्रकृतिस्वरा भवन्ति । परित्रिगर्तं वृष्टो देवः । परिसौविरम् । परिसार्वसेनि ।

प्रति - प्रतिपूर्वाह्णम् । प्रत्ययपराह्णम् । प्रतिपूर्वरात्रम् । प्रत्यपररात्रम् ।

उप-उपपूर्वाह्णम् । उपापराह्णम् । उपपूर्वरात्रम् । उपापररात्रम् ।

अप-अपत्रिगर्तं वृष्टो देवः । अपसौवीरम् । अपसार्वसेनि ।

'निपाता आद्युदात्ताः' (फि.सू. ८०) 'उपसर्गाश्चाभिवर्जम्' (फि.सू.८१) इति आद्युदात्तानि पूर्वपदानि ।

तत्पुरुषे बहुव्रीहौ च सिद्धत्वादव्ययीभावार्थोऽयमारम्भः तत्र 'अपपरी वर्जने' (१.४.८८) वर्तते इति तयोरेव वर्ज्यमानमुत्तरपदम्, नेतरयोः अहोरात्रावयवा अपि वर्ज्यमाना एव तयोर्भवन्तीति न पृथगुदाह्रियते ।

वर्ज्यमानाहोरात्रावयवेष्विति किम्? प्रत्यग्नि शलभाः पतन्ति । परिवनमित्यत्र 'वनं समासे' (६.२.१७८) इत्येतद्भवति ॥

२६९७. राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ॥ ३४ ॥ (३७६८)

राजन्यवाचिनां बहुवचनान्तानां यो द्वन्द्वोऽन्धकवृष्णिषु वर्त्तते तत्र पूर्वपदं प्रकृतिस्वरं भवति । श्वफल्क चैत्रकाः । चैत्रकतोधकाः । शिनिवासुदेवः । श्वाफल्कशब्दः चैत्रकशब्दश्च 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (४.१.११४) इति अणन्तावन्तोदात्तौ । शिनिशब्द आद्युदात्तः, स तदपत्येष्वभेदेन वर्त्तते ।

राजन्य इति किम्? द्वैप्यहमयनाः । द्वीपे भवा इति 'द्वीपादनुसमुद्रं यञ्' (४.३.१०) । हैमेरपत्यं युवा हैमायनः । अन्धकवृष्णय एते, न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्त्रियाणां ग्रहणार्थम् । एते च नाभिषिक्तवंश्याः।

बहुवचनग्रहणं किम्? सङ्कर्षणवसुदेवौ । द्वन्द्व इति किम्? वृष्णीनां कुमारा वृष्णिकुमराः। अन्धकवृष्णिष्विति किम्? कुरुपञ्चलाः (तै. ब्रा. १.८.४.२) ॥

२६९८. संख्या ॥ ३५ ॥ (३७६९)

द्वन्द्वसमासे संख्यावाचि पूर्वपदं प्रकृतिस्वरं भवति । एकदश (तै. सं. ४.७.११.१)। द्वाद्वश। त्रयोदश । 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' (उणादि. ३३०) इति नित्त्वादाद्युदात्त एकशब्दः । त्रेस्त्रयस् आदेशोऽन्तोदात्तो निपात्यते - त्रयोदश ॥

२६९९. आचार्योपसर्जनश्चान्तेवासी ॥ ३६ ॥ (३७७०)

आचार्योपसर्जनान्तेवासिनां यो द्वन्द्वस्तत्र पूर्वपदं प्रकृतिस्वरं भवति । आपिशलपाणिनीयाः । पाणिनीयरौढीयाः । रढीयकाशकृत्स्नाः । अपिशलस्यापत्यमापिशलिराचार्यः, 'अत इञ्', (४.१.९५) 'तेन प्रोक्तम्' (४.३.१०१) आपिशलम्, 'इञश्च' (४.२.११२) इत्यण्, तदधीयते येऽन्तेवासिनस्तेऽप्यापिशलाः, 'प्रोक्ताल्लुक्' (४.२.६४) इति तस्य तद्धितस्याध्येतरि विहितस्य लुक् क्रियते । आपिशलेर्वा छात्त्रा आपिशला इत्युभयथाप्याचार्योपसर्जनश्चान्तेवासी भवति ।

आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणार्थम् - सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायेत, इह मा भूत् पाणिनीयदेवदत्तौ ।

आचार्योपसर्जन इति किम्? छन्दसवैयाकरणाः । अन्तेवासीति किम्? आपिशलपाणिनीये शास्त्रे ॥

२७००. कार्तकौजपादयश्च ॥ ३७ ॥ (३७७१)

कार्तकौजपादयो ये द्वन्द्वास्तेषु पूर्वपदं प्रकृतिस्वरं भवति । प्रकृतिस्वरपूर्वपदाः कार्तकौजपादयो भवन्ति । विभक्त्यन्तानां पाठो वचनविवक्षार्थः । चकारो द्वन्द्वाधिकारानुवृत्यर्थः। कार्तकौजपौ । कृतस्यापत्यम्, कुजपस्यापत्यम् - इत्यणन्तावेतौ ।

सावर्णिमाण्डूकेयौ । सावर्णिरिञन्तः ।

अवन्त्यश्मकाः । अवन्तेरपत्यानि बहूनि तन्निवासो जनपदोऽवन्तयः । तथा अश्मकाः।

पलश्यापर्णेयाः । युवद्वन्द्वोऽयम् । पीलाया अपत्यं पैलः, तस्यापत्यं युवा (४.१.९२) इति 'अणो द्व्यचः' (४.१.१५६) इति विहितस्य फिञः 'पैलादिभ्यश्च' (२.४.५९) इति लुक् । श्यापर्णशब्दो बिदादिः, तस्यापत्यं स्त्री श्यापर्णी, तदपत्यं युवा श्यापर्णेयः । बहुवचनमतन्त्रम्, तेन पैलश्यापर्णेयावित्यत्रापि भवति ।

कपिश्यपर्णेयाः । कपिरन्तोदात्तः तस्यापत्यं बहुत्वे 'कपिबोधादाङ्गिरसे' (४.१.१०७) इत्युत्पन्नस्य यञः ' यञञोश्च' (२.४.६४) इति लुक्, तेनात्र बहुत्वमाश्रीयत एव ।

शितिकाक्षपञ्चालेयाः । शितिकाक्षो नाम ऋषिः, तस्यापत्यमिति ऋष्यण्, तदपत्ये यूनि य इञ् तस्य 'ण्यक्षत्रियार्षञितो यूनि' (२.४.५८) इति लुक् । पाञ्चलस्यापत्यं स्त्री पाञ्चाली, तदपत्यं युवा पाञ्चालेयः । अत्रापि बहुवचनमविवक्षितमिति शैतिकाक्षपाञ्चालेयावित्यत्रापि भवति ।

कटुकवार्चलेयाः कटुकस्यापत्यमिति 'अत इञ्' (४.१.९५), तस्य 'बहवच इञः प्राच्यभरतेषु' (२.४.६६) इति बहुषु लुक् । वर्चलाया अपत्यं वार्चलेयः ।

शकुलशुनकाः । शकलस्यापत्यं शाकल्यः, तस्य छात्राः शाकलाः । 'कण्वादिभ्यो गोत्रे' (२.४.१११) इत्यण् । शुनकस्यापत्यमिति 'बिदादिभ्योऽञ्' (४.१.१०४) तस्य बहुषु लुक् । शाकलशणका इति केचित्पठन्ति । तेषां शणकशब्दादुत्पन्नस्येञः 'बहवच इञः प्राच्यभरतेषु' (२.४.६६) इति बहुषु लुक् ।

शुनकधात्रेयाः । धत्र्या अपत्यं धात्रेयः । शणकबाभ्रावाः । बभ्रोरपत्यं बाभ्रवः।

आचाभिमौद्गलाः । ऋचाभेन प्रोक्तमधीयते आर्चाभिनः । वैशम्पायनान्तेवासित्वाद् णिनिः। मुद्गलः कण्वादिः, तदपत्यस्य छात्त्रा मौद्गलाः।

कुन्तिसुराष्ट्राः । कुन्तेः सुराष्ट्रस्य चापत्येषु बहुषु तन्निवासे वा जनपदे द्वन्द्वोऽयम् । कुन्तिचिन्तिशब्दावन्तोदात्तौ । चिन्तिसुराष्ट्राः । कुन्तिसुराष्ट्रवत् ।

तण्डवंतण्डाः । पचाद्यच्प्रत्ययान्तावन्तोदात्तावेतौ गर्गादिषु पठ्येते । तत्रापत्यबहुत्वे यञो लुक् क्रियते ।

गर्गवत्साः । अत्रापि अपत्यबहुत्वे यञो लुक् ।

अविमत्तकामविद्धाः । अविमत्तशब्दो नञ्स्वरेणाद्युदात्तः । द्वयोरप्येतयोरपत्येषु बहुषु इञः 'बहवच इञः प्राच्यभरतेषु' (२.४.६६) इति लुक् क्रियते ।

बभ्रवशालङ्कायनाः । बभ्रोपरत्यं बाभ्रवः 'शलङ्कु शलङ्कं च' (ग. सू. ९४.१.९) इति शालङ्कायनः । बाभ्रवदानच्युताः । दानच्युतशब्दादिञः 'बहवचः' (२.४.६६) इति लुक् ।

कठकालापाः । कठेन प्रोक्तमधीयते कठाः वैशम्पायनान्तेवासित्वाद् णिनिः तस्य 'कठचरकाल्लुक्' (४.३.१०७) । कलापिना प्रोक्तमधीयते कलापाः, 'कलापिनोऽण्' (४.३.१०८) इत्यण्प्रत्ययः, तस्मिन् 'इनण्यनपत्ये' (६.२.१६४) इति प्रकृतिभावे प्राप्ते 'नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पि' (का.वा.) इत्यादिनोपसंख्यानेन टिलोपः ।

कठकौथुमाः । कुथुमिना प्रोक्तमधीयते इति 'प्राग्दीव्यतोऽण्' (४.१.८३), तस्य पूर्ववत् टिलोपः ।

कथमलौकाक्षाः । लोकाक्षेण प्रोक्तमधीयते लौकाक्षाः, लोकाक्षस्य वाऽपत्यं लौकाक्षिः, तस्य छात्त्रा लौकाक्षाः ।

स्त्रीकुमारम् । स्त्रीशब्दोऽन्तोदात्तः ।

मौदपैप्पलादाः । मुदस्यापत्यं मौदिः, तस्य छात्त्रा मौदाः । तथा पैप्पलादाः। मौदपैप्पलादा इति द्विः पठ्यते, तस्य प्रयोजनम्-पक्षे समसान्तोदात्तत्वमेव यथा स्यादिति ।

वत्सजरत्त् । वत्सश्च जरच्च, वत्सशब्दोऽन्तोदात्तः ।

सौश्रुतपार्थवाः । सुश्रुतस्य पृथोश्च छात्त्राः । 'प्राग्दीव्यतोऽण्' (४.१.८२) ।

जरामृत्यू । यज्यनुवाक्ये । यजेर्ण्यत् । 'यजयाच' (४.३.६६) इति कुत्वाभावः। 'तित्स्वरितम्' (६.१.१८५) इत्यन्तस्वरितः । अनुवाक्येति वचेरनुपूर्वाद् ण्यत् ।

आचार्योपसर्जनान्तेवासिनामिह पाठः प्रपञ्चार्थः ॥

२७०१. महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहै-लिहिलरौरवप्रवृद्धेषु ॥ ३८ ॥ (३७७२)

'प्रकृत्या पूर्वपदम्' इति वर्त्तते, 'द्वन्द्वे' ,इति निवृत्तम् । महानित्येतत्पूर्वपदं व्रीहि, अपराह्ण, गृष्टि, इष्वास, जाबाल, भार, भारत, हैलिहिल, रौरव, प्रवृद्ध-इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति । महाव्रीहः । महापराह्णः । महागर्ष्टिः । महेष्वासः । महाजबालः । महाभरः । महाभरतः। महाहैलिहिलः । महारौरवः। महाप्रवृद्धः ।

महच्छब्दोऽन्तोदात्तः तस्य प्रतिपदोक्तो यः समासः 'सन्महत्परमोत्तमोत्कृष्टाः' (२.१.६१) इति, तत्रैव स्वरः । तेनैषां षष्ठीसमासोऽन्तोदात्त एव भवति - महतो व्रीहिः महद्व्रीहिरिति ।

'कर्मधारयेऽनिष्ठा' (६.२.४६) इत्ययमपि श्रेण्यादिसमासे विधिरिति प्रवृद्धशब्द इह पठ्यते॥

२७०२. क्षुल्लकश्च वैश्वदेवे ॥ ३९ ॥ (३७७३)

'क्षुल्लक' इत्येतत्पूर्वपदम्, महांश्च, वैश्वदेव उत्तरपदे प्रकृतिस्वरं भवति । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु प्रागिवात्केऽन्तोदात्तः क्षुल्लकशब्दः ॥

२७०३. उष्ट्रः सादिवाम्योः ॥ ४० ॥ (३७७४)

उष्ट्रशब्दः पूर्वपदं सादिवाम्योरुत्तरपदयोः प्रकृतिस्वरं भवति । उष्ट्रसादि । उष्ट्रवामि । उष्ट्रशब्द 'उषेः ष्ट्रन्' (उणादि. ४.१६२) प्रत्ययान्त आद्युदात्तः । कर्मधारयोऽयम्, षष्ठीसमासो वा ॥

२७०४. गौः सादसादिसारथिषु ॥ ४१ ॥ (३७७५)

गोशब्दः पूर्वपदं, साद, सादि, सारथि-इत्येतेषूत्तरपदेषु प्रकृतिस्वरं भवति । गोः सादः गोसदः । गां सादयतीति वा गोसदः । गोः सादिः गोसदिः । गोसारथिः ॥

२७०५. कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ॥ ४२ ॥ (३७७६)

कुरुगार्हपत, रिक्तगुरु, असूतजरती, अश्लीलदृढरूपा, पारेवडवा, तैतिलकद्रू, पण्यकम्बल-इत्येते समासास्तेषां दासीभारादीनां च पूर्वपदं प्रकृतिस्वरं भवति । कुरूणां गार्हपतं करुगार्हपतम्। 'कृग्रोरुच्च' (उणादि. २४) इति कुरुशब्दः कुप्रत्ययान्तोऽन्तोदात्तः ।

कुरुवृज्योर्गार्हपत इति वक्तव्यम् (म. भा. वा. ६.२.४.१.१) । वृजीनां गार्हपतं वृजिगार्हपतम् । वृजिशब्द आद्युदात्तः ।

रिक्तो गुरुः रिक्तगुरुः रिक्तगुरुः । 'रिक्ते विभाषा' (६.१.२०८) इति पूर्वपदमाद्युदात्तम्, अन्तोदात्तं वा ।

असूता जरती असूतजरती । अश्लीला दृढरूपा अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्यास्ति तत् श्लीलम्, सिध्मादेराकृतीगणत्वाल्लच् । कपिलकादित्वाच्च लत्वम् । अश्लीलदृढरूपेति हि संस्थानमात्रेण शोभना निःश्रीका लावण्यविरहितोच्यते ।

पारे वडवेव परेवडवा । निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूः ततिलकद्रूः । तितिलिनोऽपत्यं छात्त्रो वा तैतिल इत्यणन्तः ।

पण्यकम्बलः संज्ञायामिति वक्तव्यम् (का.वा.२) । अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव । प्रतिपदोक्ते हि कृत्यानां समासे 'द्वितीया कृत्या' (६.२.२) इत्येष विहितः स्वरितः ।

दास्या भारो दासीभरः । दवहतिः । देवजूतिः । दवसतिः । दवनीतिः । अन्तोदात्तं पूर्वपदम् । वसुनीतिः । वसुशब्द आद्युदात्तः । 'शॄस्वृस्निहित्रप्यसिवसि' (उणादि. १०) इत्यत्र हि 'धान्ये नित्' (उणादि. ९) इति वर्तते । ओषधिः । ओषो धीयतेऽस्यामिति 'कर्मण्यधिकरणे च' (३.३.९३) इति किप्रत्ययः । ओषशब्दो घञन्तत्वादाद्युदात्तः । चन्द्रमा-चन्द्रे मोऽसिः' (उणादि. ६७७) इत्यसिप्रत्ययान्तोऽयम् । चन्द्रशब्दस्तु रक्प्रत्ययान्तत्वादन्तोदात्तः ।

यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते, न च विहितम्, स सर्वो दासीभारादिषु द्रष्टव्यः ॥

२७०६. चतुर्थी तदर्थे ॥ ४३ ॥ (३७७७)

चतुर्थ्यन्तं पूर्वपदं तदर्थे उत्तरपदे तदभिधेयार्थं यत्तद्वाचिन्युत्तरपदे प्रकृतिस्वरं भवति। तदिति चतुर्थ्यन्तस्यार्थः परामृश्यते । यूपदारु । कुण्डलहिरण्यम् । यूपशब्द आद्युदात्तः । 'कुसुयुभ्यश्च' (उणादि. ३१४) इत्यत्र निदिति वर्तते । कुण्डलशब्दोऽपि 'वृषादिभ्यश्चित्' (उणादि. ११२) इति कलप्रत्ययान्तोऽन्तोदात्तः । रथदारु । वल्लीहिरण्यम् । रथशब्द आद्युदात्तः । 'हनिकुषि' (उणादि. १६७) इत्यादिना क्थन्प्रत्ययः । वल्लीशब्दो ङीषः स्वरेणान्तोदात्तः ।

तदर्थ इति किम्? कुवेरबलिः । प्रकृतिविकारभावे स्वरोऽयमिष्यते ॥

२७०७. अर्थे ॥ ४४ ॥ (३७७८)

'चतुर्थी' इति वर्तते । अर्थशब्द उत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति । मात्रे इदं मत्रर्थम् । पित्रर्थम् । देवतार्थम् । अतिथ्यर्थम् । मातृपितृशब्दावन्तोदात्तावुणादिषु निपातितौ । देवताशब्दो लित्स्वरेण मध्योदात्तः । अतिथिरिति 'अतेरिथिन्' इतीथिन्प्रत्ययान्तः।

तदर्थविशेषा एव दारुहिरण्यादयो भवन्ति, न त्वर्थशब्दवाच्यं सामान्यमित्यतदर्थार्थोऽयमारम्भः ।

केचित्पुनराहुः-ज्ञापकार्थमिदम्, एतदनेन ज्ञाप्यते-पूर्वो विधिः प्रकृतिविकृत्योः समासे भवति । अश्वघासः श्वश्रूसुरमित्र सत्यपि तादर्थ्ये न भवति ॥

२७०८. क्ते च ॥ ४५ ॥ (३७७९)

क्तान्ते चोत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति । गोहितम् । अश्वहितम्। मनुष्यहितम् । गोरक्षितम् । अश्वरक्षितम् । वनं तापसरक्षतम् । अश्वशब्द आद्युदात्तः, मनुष्यशब्दोऽन्तस्वरितः, परिशिष्टपूर्वपदमन्तोदात्तम् । गोभ्यो रक्षितमिति 'सम्प्रदाने' चतुर्थी॥

२७०९. कर्मधारयेऽनिष्ठा ॥ ४६ ॥ (३७८०)

कर्मधारये समासे क्तान्त उत्तरपदेऽनिष्ठान्तं पूर्वपदं प्रकृतिस्वरं भवति । श्रेणिकृताः। ऊककृताः । पूगकृताः । निधनकृताः । श्रेणिशब्द आद्युदात्तः । ऊकपूगशब्दावन्तोदात्तौ । निधनशब्दोऽयं मध्योदात्तः ।

कर्मधारय इति किम्? श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठेति किम्? कृताकृतम्॥

२७१०. अहीने द्वितीया ॥ ४७ ॥ (३७८१)

अहीनवाचिनि समासे क्तान्त उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं भवति। कष्टश्रि॑तः । त्रिश॑कलपतितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । त्रीणि शकलान्यस्येति त्रिशकलः, बहुव्रीहिस्वरेणाद्युदात्तः । ग्रामशब्दो नित्स्वरेणाद्युदात्तः ।

अहीन इति किम्? क॒न्त॒र॒ती॒तः । योजनातीतः ।

द्वितीयानुपसर्ग इति वक्तव्यम् (का.वा.१) इह मा भूत्-स॒ख॒प्र॒प्तः, दुःख॒प्रा॒प्तः । स॒ख॒प॒न्नः, दुःखा॒प॒न्नः ।

'अन्तः' (६.२.१४३) 'थाथ' (४.२.१४४) इत्यस्यापवादोऽयम् ॥

२७११. तृतीया कर्मणि ॥ ४८ ॥ (३७८२)

कर्मवाचिनि क्तान्त उत्तरपदे तृतीयान्तं पूर्वपदं प्रकृतिस्वरं भवति । अ॒हि॑ह॑तः । व॒ज्र॑ह॑तः। म॒हि॒र॒ज॑ह॑तः । न॒ख॑नि॑र्भ॑न्ना । दात्र॑लूना । आङि श्रिहनिभ्यां ह्रस्वश्च' (उणादि ५८७) इति अहिरन्तोदात्तो व्युत्पादितः । केचिदाद्युदात्तमिच्छन्ति [अहिहतः]। वज्रो रक्प्रत्ययान्तः । महाराजष्टच्प्रत्ययान्तः । नास्य खमस्तीति 'बहुव्रीहौ नकुलनख' इति निपातितः । तेन 'नञ्सुभ्याम्' (६.२.१७२) इत्यन्तोदात्तः । दात्रशब्दः 'दाम्नीशस' (३.२.१८२) इति ष्ट्रन्प्रत्ययान्तः।

कर्मणीति किम्? रथेन यातो र॒थ॒यातः । गत्यर्थत्वात्कर्तरि क्तः ॥

२७१२. गतिरनन्तरः ॥ ४९ ॥ (३७८३)

'क्ते', 'कर्मणि' इति वर्त्तते । कर्मवाचिनि क्तान्त उत्तरपदे गतिरनन्तरः पूर्वपदं प्रकृतिस्वरं भवति । प्र॑कृ॒तः । प्र॑ह्॒तः ।

अनन्तर इति किम्? अ॒भ्यु॒द्ध॒तः । स॒मु॒द्ध॒तः । स॒मु॒दा॑ह्॒तः । व्यवहितस्य गतेरयं स्वरो न भवति अनन्तरे पुनरिष्यते ।

कारकपूर्वस्य तु सति शिष्टत्वात् थाथादिस्वर एव भवति - दूरादागत इति।

अनन्तरग्रहणसामर्थ्यादेव 'कृद्ग्रहणे गतिकारकपूर्वस्यपि' (व्या.परि. १२६) इत्येतन्नाश्रीयते ।

कर्मणीत्येव - प॒कृ॒तः कटं देवदत्तः । थाथादिस्वरापवादो योगः ॥

२७१३. तादौ च निति कृत्यतौ ॥ ५० ॥ (२७८४)

तकारादौ च तुशब्दवर्जिते निति कृति परतो गतिरनन्तरः प्रकृतिस्वरो भवति । प्र॑कर्॒ता । प्र॑कर्॒तुम् । प्र॑कृ॒तिः । 'प्रकर्ता' इति तृन्नन्तः । कृत्स्वरबाधनार्थं वचनम् ।

तादाविति किम्? प्रजल्पाकः । नितीति किम्? पक्र्ता । तृजन्तः ।

कृद्ग्रहणमुपदेशे ताद्यर्थम् (का.वा.२) इहापि यथा स्यात्-प्रलपिता, प्रलपितुमिति ।

अताविति किम्? आगन्तः ॥

२७१४. तवै चान्तश्च युगपत् ॥ ५१ ॥ (३७८५)

तवैप्रत्ययस्यान्त उदात्तो भवति गतिश्चानन्तरः प्रकृतिस्वर इति एतदुभयं युगपद्भवति। अन्वेतवै (तै.सं. १.४.४५.१) । परिस्तरितवै । परिपातवै । तस्मादग्निचिन्नाभिचरितवै (तै.सं. ५.६.३.१) । उपसर्गा आद्युदात्ता अभिवर्जम् (फि.सू. ८०-८१) इत्यभिरन्तोदात्तः।

कृत्स्वरापवादो योगः ॥

२७१५. अनिगन्तोऽञ्चतौ वप्रत्यये ॥ ५२ ॥ (३७८६)

अनिगन्तो गतिः प्रकृतिस्वरो भवत्यञ्चतौ वप्रत्यये परतः । प्राङ्, प्राञ्चौ, प्राञ्चः । प्राङ्, प्राञ्चौ, प्राञ्चः । 'स्वरितो वानुदात्तेऽपदादौ' (८.२.६) इत्ययमेकादेश उदात्तः स्वरितो वा । परङ्, परांञ्चौ, परांञ्चः (तै.सं. ३.१.१०.३) ।

अनिगन्त इति किम्? पत्यङ्, पत्यञ्चा, पत्यञ्चः । कृदुत्तरपदप्रकृतिस्वर इह भवति । वप्रत्यय इति किम्? उदञ्चनः ।

'चोरनिगन्तोऽञ्चतौ वप्रत्यय' (म. भा.) इत्येष स्वरो भवति विप्रतिषेधेन । परांचः । परांचा ॥

२७१६. न्यधी च ॥ ५३ ॥ (३७८७)

नि, अधि-इत्येतौ चाञ्चतौ वप्रत्यये परतः प्रकृतिस्वरौ भवतः । न्यङ्, न्यञ्चौ, न्यञ्चः। 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इत्यञ्चतेरकारः स्वरितः। अध्यङ्, अध्यञ्चौ, अध्यञ्चः । अधीचः । अधीचा ॥

२७१७. ईषदन्यतरस्याम् ॥ ५४ ॥ (३७८८)

'ईषत्' इत्येतत्पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति । ईषत्कंडारः । ईषत्कुडरः। ईषत्पिङ्गलः ईषत्पिंङ्गलः । ईषदित्ययमन्तोदात्तः ।

ईषदभेद इत्येवमादौ कृत्स्वर एव भवति ॥

२७१८. हिरण्यपरिमाणं धने ॥ ५५ ॥ (३७८९)

हिरण्यपरिमाणवाचि पूर्वपदं धनशब्द उत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति। द्विसुवर्णधनम् द्विसुवर्णधनम् । द्वौ सुवर्णौ परिमाणमस्य द्विसुवर्णं तदेव धनमिति कर्मधारयः । बहुव्रीहावपि परत्वाद्विकल्प एव भवति । द्विसुवर्णधनः, द्विसुवर्णधनः।

हिरण्यग्रहणं किम्? प्रस्थधनम् । परिमाणग्रहणं किम्? कञ्चनधनम् । धन इति किम्? निष्कमाला ।

२७१९. प्रथमोऽचिरोपसम्पत्तौ ॥ ५६ ॥ (३७९०)

प्रथमशब्दः पूवपदमचिरोपसम्पत्तौ गम्यमानायामन्यतरस्यां प्रकृतिस्वरं भवति। अचिरोपसम्पतिः = अचिरोपश्लेषः, अभिनवत्वम् । प्रथमवैयाकरणः, प्रथमवैयाकरणः। अभिनववैयाकरणः । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः 'प्रहेरमच्' (उणादि. ७५७) इति चित्त्वादन्तोदात्तः ।

अचिरोपसंपत्ताविति किम्? प्रथमवैयाकरणः । वैयाकरणानामाद्यो मुख्यो वा यः स नित्यमन्तोदात्त एव ॥

२७२०. कतरकतमौ कर्मधारये ॥ ५७ ॥ (३७९१)

कतरशब्दः कतमशब्दश्च पूर्वपदं कर्मधारये समासेऽन्यतरस्यां प्रकृतिस्वरं भवति । कतरकठः । कतरकठः । कतमकठः । कतमकठः । कर्मधारयग्रहणमुत्तरार्थम्, इह तु प्रतिपदोक्तवादेव सिद्धम् ॥

२७२१. आर्यो ब्राह्मणकुमारयोः ॥ ५८ ॥ (३७९२)

आर्यशब्दः पूर्वपदं ब्राह्मणकुमारशब्दयोरुत्तरपदयोः कर्मधारये समासेऽन्यतरस्यां प्रकृतिस्वरं भवति । आर्यब्रह्मणः आर्यब्राह्मणः । आर्यकुमारः अयकुमारः । आर्यशब्दो ण्यदन्तोऽन्तस्वरितः ।

आर्य इति किम्? परमब्राह्मणः । परमकुमरः । ब्राह्मणकुमारयोरिति किम्? आर्यत्रियः। कर्मधारये इत्येव-आर्यस्य ब्राह्मणः अर्यब्रह्मणः ॥

२७२२. रजा च ॥ ५९ ॥ (३७९३)

राजा च पूर्वपदं ब्राह्मणकुमारयोरुत्तरपदयोः कर्मधारये समासेऽन्यतरस्यां प्रकृतिस्वरं भवति । राजब्राह्मणः । राजब्रह्मणः । राजकुमारः । राजकुमारः ।

कर्मधारय इत्येव - राज्ञो ब्राह्मणो राजब्राह्मणः । राजकुमारः ।

पृथग्योगकरणमुत्तरार्थम् ॥

२७२३. षष्ठी प्रत्येनसि ॥ ६० ॥ (३७९४)

'राजा' इति वर्त्तते, 'अन्यतरस्याम्' इति च । षष्ठ्यन्तो राजशब्दः पूर्वपदं प्रत्येनस्युत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति । राज्ञः प्रत्येनाः राजप्रत्येनाः राजप्रत्येनाः।

षष्ठीति किम्? राजा चासौ प्रत्येनाश्च राजप्रत्येनाः ॥

२७२४. क्ते नित्यार्थे ॥ ६१ ॥ (३७९५)

क्तान्त उत्तरपदे नित्यार्थे समासे पूर्वपदमन्यतरस्यां प्रकृतिस्वरं भवति । नित्यप्रहसितः, नित्यप्रहसितः । सततप्रहसितः, सततप्रहसितः । 'कालाः' (२.१.२८) इति द्वितीयासमासोऽयम् । नित्यशब्दः 'त्यब्नेर्ध्रुवे' (क. वा.) इति त्यबन्त आद्युदात्तः। सततम् इति - यदा भावे क्तस्तदा थाथादिस्वरेणान्तोदात्तः ।

नित्यार्थ इति किम्? मुहूर्त्तप्रहसितः ॥

२७२५. ग्रामः शिल्पिनि । ६२ ॥ (३७९६)

ग्रामशब्दः पूर्वपदं शिल्पिवाचिन्युत्तरपदेऽन्यतरस्यां प्रकृतिस्वरं भवति । ग्रामनापितः, ग्रामनापितः । ग्रामकुलालः ग्रामकुलालः । ग्रामशब्द आद्युदात्तः ।

ग्राम इति किम्? परमनापितः । शिल्पिनीति किम्? ग्रामरथ्या ॥

२७२६. राजा च प्रशंसायाम् ॥ ६३ ॥ (६७९७)

राजशब्दः पूर्वपदं शिल्पिवाचिन्युत्तरपदे प्रशंसायां गम्यमानायामन्यतरस्यां प्रकृतिस्वरं भवति । राजनापितः, राजनापितः । राजकुलालः, राजकुलालः । कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा । षष्ठीसमासे च राजयोग्यतया तस्य ।

राजेति किम्? परमनापितः । प्रशंसायामिति किम्? राजनापितः ।

शिल्पिनीत्येव - राजहस्ती ॥

२७२७. आदिरुदात्तः ॥ ६४ ॥ (३७९८)

'आदिरुदात्तः' इत्येतदधिकृतम्, इत उत्तरं यद्वक्ष्यामः, तत्र पूर्वपदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति - 'सप्तमीहारिणौ धर्म्येऽहरणे' (६.२.६५) इति । स्तूपेशाणः। मुकुटेकार्षापणम् । याज्ञिकाश्वः । वैयाकरणहस्ती । दृषदिमाषकः।

'आदिः' इति प्रागन्ताधिकारात् (६.२.१४३) । 'उदात्तः' इति 'प्रकृत्या भगालाम्' (६.२.१३७) इति यावत् ॥

२७२८. सप्तमीहारिणौ धर्म्येऽहरणे ॥ ६५ ॥ (३७८८)

सप्तम्यन्तं हारिवाचि च पूर्वपदं धर्म्यवाचिनि हरणशब्दादन्यस्मिन्नुत्तरपदे आद्युदात्तं भवति । हारीति देयं यः स्वीकरोति सोऽभिधीयते । 'धर्म्यम्' इत्याचारनियतं देयमुच्यते। धर्मो ह्यनुवृत्त आचारः, तस्मादनपेतं तेन वा प्रप्यमिति । स्तूपेशाणः। मुकुटेकार्षापणम्। हलेद्विपदिका। हलेत्रिपदिका । दृषदिमाषकः । 'संज्ञायाम्' (२.१.४४) इति सप्तमीसमासः 'कारनाम्नि च' (३.६.१०) इति विभक्तेरलुक् । हारिणियाज्ञिकाश्वः । वैयाकरणहस्ती । मातुलाश्वः । पितृव्यगवः ।

क्वचिदयमाचारो व्यवस्थितः - स्तूपादिषु शाणादि दातव्यम्, याज्ञिकादीनामश्वादीति ।

धर्म्य इति किम्? स्तम्बेरमः । कर्मकरवर्द्धितकः । अहरण इति किम्? वडवहरणम् । वडवाया अयं वाडवः, तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते हरणमिति तदुच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते विप्रतिषेधेन - इत्येतदहरण इत्यनेन ज्ञाप्यते, तेन वाडवहार्यमिति हारिस्वरः सिद्धो भवति ॥

२७२९. युक्ते च ॥ ६६ ॥ (३८००)

युक्तवाचिनि च समासे पूर्वपदमाद्युदात्तं भवति । गोबल्लवः । अश्वबल्लवः। गोमणिन्दः । अश्वमणिन्दः । गौसंख्यः । अश्वसंख्यः । युक्त इति = समाहितः, कर्त्तव्ये तत्परो यः स उच्यते॥

२७३०. विभाषाऽध्यक्षे ॥ ६७ ॥ (३८०१)

अध्यक्षशब्द उत्तरपदे विभाषा पूर्वपदमाद्युदात्तं भवति । गवाध्यक्षः । गवाध्यक्षः। अश्वाध्यक्षः । अश्वाध्यक्षः ॥

२७३१. पापं च शिल्पिनि ॥ ६८ ॥ (३८०२)

पापशब्दः शिल्पिवाचिन्युत्तरपदे विभाषाऽऽद्युदात्तो भवति । पापनापितः । पपनापितः। पापकुलालः । पपकुलालः ।

'पापाणके कुत्सितैः' (२.१.५४) इति पापशब्दस्य प्रतिपदोक्तः समानाधिकरणसमास इति षष्ठीसमासे न भवति - पापस्य नापितः पापनापित इति ॥

२७३२. गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ॥ ६९ ॥ (३८०३)

गोत्रवाचिन्यन्तेवासिवाचिनि चोत्तरपदे माणवब्राह्मणयोश्च क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । जङ्घावात्स्यः । यो जङ्घादानं ददान्यहमिति वात्स्यः सम्पद्यते स जङ्घावात्स्य इति क्षिप्यते । भार्यसौश्रुतः । सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः। वशाब्राह्मकृतेयः । ब्रह्मकृतशब्दः शुभ्रादिषु पठ्यते । गोत्र ।

अन्तेवासि-कुमरीदाक्षाः। कम्बलचारायणीयाः । घृतरौढीयाः । ओदनपाणीनीयाः। कुमार्यादिलाभकामा ये दक्षादिभिः प्रोक्तानि शास्त्राण्यधीयते तच्छिष्यतां वा प्रतिपद्यन्ते त एवं क्षिप्यन्ते । अन्तेवासि ।

माणव - भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवो भवति । माणव ।

ब्राह्मण-दासीब्राह्मणः । वृषलीब्राह्मणः । भयब्राह्मणः । यो भयेन ब्राह्मणः सम्पद्यते। अत्र यस्यान्यत् समासलक्षणं नास्ति, 'सुप्सुपा' इत्येव तत्र समासः कर्त्तव्यः ।

गोत्रादिष्विति किम्? दासीश्रात्रियः । क्षेप इति किम्? महाब्राह्मणः ॥

२७३३. अङ्गानि मैरेये ॥ ७० ॥ (३८०४)

मैरेयशब्द उत्तरपदे तदङ्गवाचीनि पूर्वपदान्याद्युदात्तानि भवन्ति । गुडमैरेयः । मधुमैरेयः। मद्यविशेषो मैरेयः, तस्य गुडविकारस्य गुडोऽङ्गं भवति मधुविकारस्य तस्य मधु मध्वङ्गम् ।

अङ्गानीति किम्? परममरेय; । मैरेय इति किम्? पुष्पसवः । फलसवः ॥

२७३४. भक्ताख्यास्तदर्थेषु ॥ ७१ ॥ (३८०५)

भक्तम्=अन्नम्, तदाख्याः=तद्वाचिनः शब्दाः, तदर्थेषूत्तरपदेषु आद्युदात्ता भवन्ति। भिक्षकंसः । श्राणाकंसः । भाजीकंसः । भिक्षादयोऽन्नवचनाः ।

भक्ताख्या इति किम्? समशशलयः । समशनं समाश इति क्रियामात्रमुच्यते, न द्रव्यम्। तदर्थेष्विति किम्? भिक्षप्रियः बहुव्रीहिरयमत्र पूर्वपदमन्तोदात्तम् ॥

२७३५. गोबिडालसिंहसैन्धवेषूपमाने ॥ ७२ ॥ (३८०६)

गवादिषूपमनवाचिषूत्तरपदेषु पूर्वपदमाद्युदात्तं भवति । धान्यंगवः । हिरण्यगवः। भिक्षांबिडालः । तृणंसिंहः । काष्ठंसिंहः । सक्तुंसैन्धवः । पानसैन्धवः । धान्यं गौरिवेति विगृह्य व्याघ्रादेराकृतिगणत्वाद् 'उपमितं व्याघ्रादिभिः' (२.१.५६) इति समासः। उपमानार्थोऽपि यथाप्रसिद्धि च योजयितव्यः । गवाकृत्या सन्निवेशितं धान्यगवशब्देनोच्यते ।

उपमान इति किम्? परमसिंहः ॥

२७३६. अके जीविकार्थे ॥ ७३ ॥ (३८०७)

अकप्रत्ययान्त उत्तरपदे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । दन्तलेखकः । नखलेखकः । अवस्करशोधकः । रमणीयकारकः । दन्तलेखनादिभिर्येषां जीविका त एवमुच्यन्ते। 'नित्यं क्रीडाजीविकयोः' (२.२.१७) इति समासः ।

अक इति किम्? रमणीयकर्त्ता । जीविकार्थ इति किम्? इक्षुभक्षिकां मे धारयसि ॥

२७३७. प्राचां क्रीडायाम् ॥ ७४ ॥ (३८०८)

प्राग्देशवर्त्तिनां या क्रीडा तद्वाचिनि समासेऽकप्रत्ययान्त उत्तरपदे पूर्वपदमाद्युदात्तं भवति । उद्दालकपुष्पभञ्जिका । वीरणपुष्पप्रचायिका । शालभञ्जिका । तालभञ्जिका। 'संज्ञायाम्' (३.३.१०९) इति ण्वुल्, 'नित्यं क्रीडाजीविकयोः' (२.२.१७) इति षष्ठीसमासः ।

प्राचामिति किम्? जीवपुत्रप्रचयिका । इयमुदीचां क्रीडा ॥

क्रीडायामिति किम्? तव पुष्पपचयिकं । पर्याये ण्वुच्प्रत्ययो भवति ।

२७३८. अणि नियुक्ते ॥ ७५ ॥ (३८०९)

अणन्त उत्तरपदे नियुक्तवाचिनि समासे पूर्वपदमाद्युदात्तं भवति । छत्रंधारः । तूणीरधारः। कमण्डलुग्राहः । भृङ्गारधारः ।

नियुक्तः=अधिकृतः, स च कस्मिंश्चित्कर्तव्ये तत्परो न भवतीति 'नियुक्तः' इत्यनेन सिध्यति ।

नियुक्त इति किम्? कुण्डलावः । शरलावः ॥

२७३९. शिल्पिनि चाकृञः ॥ ७६ ॥ (३८१०)

शिल्पिवाचिनि समासेऽणन्त उत्तरपदे पूर्वपदमाद्युदात्तं भवति, स चेदण् कृञो न भवति । तन्तुवायः । तुन्नवायः । वालवायः ।

शिल्पिनीति किम्? काण्डलावः । शरलावः । अकृञ इति किम्? कुम्भकारः। अयस्करः॥

२७४०. संज्ञायां च ॥ ७७ ॥ (३८११)

संज्ञांयां विषयेऽणन्त उत्तरपदेऽकृञः पूर्वपदमाद्युदात्तं भवति । तन्तुवायो नाम कीटः । बालवायो नाम पर्वतः ।

अकृञ इत्येव-रथकारो नाम ब्राह्मणः ॥

२७४१. गोतन्तियवं पाले ॥ ७८ ॥ (३८१२)

गो, तन्ति, यव-इत्येतानि पूर्वपदानि पालशब्द उत्तरपदे आद्युदात्तानि भवन्ति। गोपालः । तन्तिपालः । यवपालः ।

अनुयुक्तार्थ आरम्भः ।

गोतन्तियवमिति किम्? वत्सपालः । पाल इति किम्? गारक्षः ॥

२७४२. णिनि ॥ ७९ ॥ (३८१३)

णिनन्त उत्तारपदे पूर्वपदमाद्युदात्तं भवति । पुष्पहारी । फलहारी । पर्णहारी ॥

२७४३. उपमानं शब्दार्थप्रकृतावेव ॥ ८० ॥ (३८१४)

उपमानवाचि पूर्वपदं शब्दार्थप्रकृतावेव णिनन्त उत्तरपदं आद्युदात्तं भवति । उपमानं नियम्यते । उष्ट्रक्रोशी । ध्वाङ्क्षरावी । खरनादी ।

उपमानग्रहणमस्य पूर्वस्य च योगस्य विषयविभागार्थम् ।

शब्दार्थप्रकृताविति किम्? वृकवञ्ची । वृकप्रक्षी । प्रकृतिग्रहणं किम्? प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था भवति तत्रैव यथा स्याद्, इह मा भूद्-गदभाच्चरी, ककिलाभिव्यहरीति ।

एवकारकरणमुपमानावधारणार्थम् । शब्दार्थप्रकृतौ त्वनुपमानमुपमानं चाद्युदात्तं भवति। सिंहविनर्दी । पुष्कलजल्पी ॥

२७४४. युक्तारोहयादयश्च ॥ ८१ ॥ (३८१५)

युक्तारोहयादयः समासा आद्युदात्ता भवन्ति । युक्तरोही । आगतरोही । आगतयोधी। आगतवञ्ची । आगतनर्दी । आगतप्रहारी । एते णिनन्ताः 'णिनि' इत्यस्यैवोदाहरणार्थं पठ्यन्ते।

पूर्वोत्तरपदनियमार्था इति केचित् । इह मा भूद्-वृक्षाराही, युक्ताध्यायीति ।

आगतमत्स्या । क्षीरहोता । भगीनीभर्त्ता । याजकादित्वात् षष्ठीसमासावेतौ ।

ग्रामगोधुक् । अश्वत्रिरात्रः । गगत्रिरात्रः । व्युष्टत्रिरात्रः शर्णपादः । समपादः। षष्ठीसमासावेतौ ।

एकशितिपात् । एकः शितिः पादोऽस्येति त्रिपदबहुव्रीहिः । तत्रैकशितिशब्दः 'तद्धितार्थोत्तरपद' इति तत्पुरुषसंज्ञः, तस्य निमित्तिस्वरबलीयस्त्वाद् अन्तोदात्तं प्राप्तमित्याद्युदात्तत्वं विधीयते ।

एवमपि नार्थ एतेन, 'इगन्त द्विगौ' (६.२.२९) इति सिद्धत्वात्? एवं तर्हि ज्ञापनार्थम्, एतज् ज्ञापयति-शित्यन्तस्योत्तरपदे द्विगुस्वरो न भवतीति । तेन द्विशितिपादित्यत्र तिशब्द उदात्तो भवति । निमित्तिस्वरबलीयस्त्वस्याप्ये-कशितिपात्स्वरवचनमेव ज्ञापकं वर्णयन्ति ।

'पात्रेसमितादयश्च' (२.१.४८) युक्तारोहयादयः, ततस्तेप्याद्युदात्ता भवन्ति ॥

२८४५. दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ ८२ ॥ (३८१६)

दीर्घान्तं पूर्वपदम्, काश, तुष, भ्राष्ट्र, वट-इत्येतानि च जे उत्तरपदे आद्युदात्तानि भवन्ति । कुटीजः । शमीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

२७४६. अन्त्यात्पूर्वं बह्वचः ॥ ८३ ॥ (३८१७)

जे उत्तरपदे बह्वचः पूर्वपदस्यान्त्यात्पूर्वमुदात्तं भवति । उपसरजः । मन्दुरजः। आमलकीजः । वडवजः ।

बह्वच इति किम्? दुग्धजानि तृणानि ॥

२७४७. ग्रामेऽनिवसन्तः ॥ ८४ ॥ (३८१८)

ग्रामशब्द उत्तरपदे पूर्वपदमाद्युदात्तं भवति न चेन्निवसद्वाचि भवति । मल्लग्रामः। वणिग्ग्रामः । ग्रामशब्दोऽत्र समूहवाची । देवग्रामः । देवस्वामिक इत्यर्थः ।

अनिवसन्त इति किम्? दाक्षिग्रमः । माहकिग्रामः । दाक्ष्यादयो निवसन्ति यस्मिन्ग्रामे स तेषामिति व्यपदिश्यते ॥

२७४८. घोषादिषु च ॥ ८५ ॥ (३८१९)

घोषादिषु चोत्तरपदेषु पूर्वपदमाद्युदात्तं भवति । दाक्षिघोषः । दाक्षिकटः । दाक्षिपल्वलः। दाक्षिह्रदः । दाक्षिबदरी । दाक्षिपिङ्गलः । दाक्षिपशङ्गः । दाक्षिशाला ।

दाक्षिरक्षा। दाक्षिशल्पी । दाक्ष्यश्वत्थः । कुन्दतृणम् । दाक्षिशाल्मली । आश्रममुनिः। शाल्मलिमुनिः । दाक्षिप्रेक्षा । दाक्षिकूटः । यान्यत्र निवासनामधेयानि तेषु निवसद्वाचीन्यपि पूर्वपदान्याद्युदात्तानि भवन्ति ।

अनिवसन्त इति नानुवर्त्तयन्ति केचित् । अपरे पुनरनुवर्त्तयन्ति ॥

२७४९. छात्र्यादयः शालायाम् ॥ ८६ ॥ (३८२०)

शालायामुत्तरपदे छात्र्यादय आद्युदात्ता भवन्ति ।

छात्रिशाला । पेलिशाला । भाण्डिशाला ।

छात्रि । पेलि भाण्डि । व्याडि । आपिशलि । आखण्डि । आपारि । गोमि। छात्र्यादिः।

यदा शालान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, तदापि 'तत्पुरुषे शालायां नपुंसके' (६.२.१२३) इत्येतस्मात्पूर्वविप्रतिषेधेन पूर्वपदमाद्युदात्तं भवति । छात्रिशालम् । पेलिशालम् ॥

२७५०. प्रस्थेऽवृद्धमकर्क्यादीनाम् ॥ ८७ ॥ (३८२१)

प्रस्थशब्द उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं भवति । इन्दप्रस्थः। कुण्डप्रस्थः। ह्रदप्रस्थः । सुवर्णप्रस्थः ।

अवृद्धमिति किम्? दाक्षिप्रस्थः । महकिपस्थः ।

अकर्क्यादीनामिति किम्? कर्कीप्रस्थः । मघीप्रस्थः ।

कर्की । मघी । मकरी । कर्कन्धू । शमी । करीर । कटुक । कुरल । बदर। कर्क्यादिः॥

२७५१. मालादीनां च ॥ ८८ ॥ (३८२२)

'प्रस्थे' इति वर्त्तते । प्रस्थ उत्तरपदे मालादीनामादिरुदात्तो भवति । मालाप्रस्थः। शालाप्रस्थः ।

माला । शाला । शोणा । द्राक्षा । क्षौम । क्षामा । काञ्ची । एक । काम । मालादिः ।

वृद्ध्यर्थ आरम्भः । एकशोणाशब्दयोः 'एङ् प्राचां देशे' (१.१.७५) इति वृद्धसंज्ञा ॥

२७५२. अमहन्नवं नगरेऽनुदीचाम् ॥ ८९ ॥ (३८२३)

नगरशब्द उत्तरपदे महन्नवशब्दवर्जितं पूर्वपदमाद्युदात्तं भवति, तच्चेदुदीचां न भवति। सुहमनगरम् । पुण्ड्रनगरम् ।

अमहन्नवमिति किम्? महानगरम् । नवनगरम् । अनुदीचामिति किम्? नदीनगरम् । कान्तीनगरम् ॥

२७५३. अर्मे चावर्णं द्व्यच् त्र्यच् ॥ ९० ॥ (३८२४)

अर्मशब्द उत्तरपदे द्व्यच्त्र्यच् पूर्वपदमवर्णान्तमाद्युदात्तं भवति । दत्तर्मम् । गुप्तर्मम्। कुक्कुटार्मम् । वायसार्मम् ।

अवर्णमिति किम्? बृहदर्मम् । द्व्यच्त्र्यजिति किम्? कपिञ्जलार्मम् ।

अमहन्नवमित्येव - महार्मम् । नवर्मम् ॥

२७५४. न भूताधिकसञ्जीवमद्राश्मकज्जलम् ॥ ९१ ॥ (३८२५)

भूत, अधिक, सञ्जीव, मद्र, अश्मन्, कज्जल-इत्येतानि पूर्वपदानि अर्मशब्द उत्तरपदे नाद्युदात्तानि भवन्ति । भूतर्मम् । अधिकार्मम् । सञ्जीवार्मम् ।

मद्राश्मग्रहणं सङ्घातविगृहीतार्थम् - मद्रर्मम् । अश्मार्मम् । मद्राश्मर्मम्। कज्जलार्मम् । समासान्तोदात्तत्वमेवात्र भवति ।

आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् (म. भा.) । दिवोदासाय गायत । वध्र्यश्वाय दाशुषे ॥ [देवोदासं वध्र्यश्वाय दाशुषे । ऋ. ६.६१.१] ।

२७५५. अन्तः ॥ ९२ ॥ (३८२६)

'अन्तः' इत्यधिकृतम्, इत उत्तरं यद्वक्ष्यामस्तत्र पूर्वपदस्यान्त उदात्तो भवतीत्येवं वेदितव्यम् । वक्ष्यति - 'सर्वं गुणकात्स्न्र्ये (६.२.९३) सर्वश्वेतः । सर्वकृष्णः ।

प्राक् 'उत्तरपदादिः' (६.२.१११) इत्येतस्मादयमधिकारो वेदितव्यः ॥

२७५६. सर्वं गुणकात्स्न्र्ये ॥ ९३ ॥ (३८२७)

सर्वशब्दः पूर्वपदं गुणकात्स्न्र्ये वर्त्तमानमन्तोदात्तं भवति । सर्वश्वेतः । सर्वकृष्णः। सर्वमहान् ।

सर्वमिति किम्? परमतः । आश्रयव्याप्त्या परमत्वं श्वेतत्वस्येति गुणकास्त्न्र्ये वर्त्तते । गुणग्रहणं किम्? सवसौवर्णः । सर्वराजतः ।

कात्स्न्र्ये इति किम्? सर्वेषां श्वेततरः सवश्वतः । 'गुणात्तरेण समासस्तरलोपश्च वक्तव्यः' (का.वा. १) इत्येवमत्र समासः, तरब्लोपश्च ॥

२७५७. संज्ञायां गिरिनिकाययोः ॥ ९४ ॥ (३८२८)

संज्ञायां विषये गिरि, निकाय-इत्येतयोरुत्तरपदयोः पूर्वपदमन्तोदात्तं भवति । अञ्जनागिरिः । निकाये - शाप्पिण्डिनिकायः । माण्डिनिकायः । चिखिल्लिनिकायः।

संज्ञायामिति किम्? परमगिरिः । बृहमणनिकयः ।

२८५८. कुमार्यां वयसि ॥ ९५ ॥ (३८२९)

कुमार्यामुत्तरपदे वयसि गम्यमाने पूर्वपदमन्तोदात्तं भवति । वृद्धकुमारी । जरत्कुमारी।

कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिर्वयोविशेषवचनैः समानाधिकरणो भवति । तच्च वय इह गृह्यते, न कुमारत्वमेव ।

वयसीति किम्? परमकुमारी ॥

२७५९. उदकेऽकेवले ॥ ९६ ॥ (३८३०)

अकेवलम्=मिश्रम्, तद्वाचिनि समासे उदकशब्द उत्तरपदे पूर्वपदमन्तोदात्तं भवति । गुडमिश्रमुदकम् गडोदकम् । तिलोदकम् ।

स्वरे कृते एकादेशः 'स्वरितो वानुदात्ते पदादौ' (८.२.६) इति पक्षे स्वरितो भवति । गुडौदकम् । तिलोदकम् ।

अकेवल इति किम्? शीतादकम् । उष्णादकम् ॥

२८६०. द्विगौ क्रतौ ॥ ९७ ॥ (३८३१)

द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वपदमन्तोदात्तं भवति । गर्गत्रिरात्रः । चरकत्रिरात्रः। कुसुरविन्दसप्तरात्रः । गर्गाणां त्रिरात्रः गर्गत्रिरात्रः ।

द्विगाविति किम्? अतिरात्रः अचश्चित्त्वादन्तोदात्तः । क्रताविति किम्? बिल्वसप्तरात्रः। बिल्वशतस्य बिल्वहोमस्य वा सप्तरात्रो बिल्वसप्तरात्रः ॥

२७६१. सभायां नपुंसके ॥ ९८ ॥ (३८३२)

सभाशब्द उत्तरपदे नपुंसकलिङ्गे समासे पूर्वपदमन्तोदात्तं भवति । गापालसभम्। पशपालसभम् । स्त्रीसभम् । दुसीसभम् ।

सभायामिति किम्? ब्राह्मणसनम् ।

नपुंसकमिति किम्? राजसभा । ब्रह्मणसभा ।

सभायां प्रतिपदोक्तमिह नपुंसकलिङ्गं गृह्यत इति रमणीयसभं ब्राह्मणकुलमित्यत्र न भवति ॥

२७६२. पुरे प्राचाम् ॥ ९९ ॥ (३८३३)

पुरशब्द उत्तरपदे प्राचां देशे पूर्वपदमन्तोदात्तं भवति । ललाटपरम् । कञ्चीपरम् । शिवदत्तपरम् । कर्णिपुरम् । नार्मपुरम् ।

प्राचामिति किम्? शिवपुरम् ॥

२७६३. अरिष्टगौडपूर्वे च ॥ १०० ॥ (३८३४)

अरिष्ट, गौड - इत्येवम्पूर्वे समासे पुरशब्द उत्तरपदे पूर्वपदमन्तोदात्तं भवति। अरिष्टपुरम्। गौडपुरम् ।

पूर्वग्रहणं किम्? इहापि यथा स्यात् - अरिष्टश्रितपुरम् । गौडभृत्यपरम् ॥

२७६४. न हास्तिनफलकमार्देयाः ॥ १०१ ॥ (३८३५)

हास्तिन, फलक, मार्देय-इत्येतानि पूर्वपदानि पुरशब्द उत्तरपदे नान्तोदात्तानि भवन्ति। 'पुरे प्राचाम्' । (६.२९९) इति प्राप्तिः प्रतिषिध्यते । हस्तिनपुरम् । फलकपुरम् । मार्देयपरम् । मृदोरपत्यं मार्देयः । शुभ्रादित्वाद् (४.१.१२३) ढक् ।

२७६५. कुसूलकूपकुम्भशालं बिले ॥ १०२ ॥ (३८३६)

कुसूल, कूप, कुम्भ, शाला-इत्येतानि पूर्वपदानि बिलशब्दे उत्तरपदेऽन्तोदात्तानि भवन्ति। कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालाबिलम् ।

कुसूलादिग्रहणं किम्? सपबिलम् । बिल इति किम्? कुसूलस्वमी ॥

२७६६. दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ॥ १०३ ॥ (३८३७)

दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि भवन्ति ग्रामजनपदाख्यानवाचिषूत्तरपदेषु, चानराटशब्दे च । पूर्वेषकामशमी । अपरेषुकामशमी । पूर्वकृष्णमृत्तिका । अपरकृष्णमृत्तिका । जनपद - पूर्वपञ्चालाः । अपरपञ्चालाः । आख्यान - पूर्वाधिरमम् । पर्वाधिरामम् । पूर्वययातम्। अपरययातम् । अधिराममधिकृत्य कृतो ग्रन्थ आधिरामम् । तथा यायातम् । चानराट - पूर्वचानराटम् । अपरचानराटम्।

शब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम् ॥

२७६७. आचार्योपसर्जनश्चान्तेवासिनि ॥ १०४ ॥ (३८३८)

आचार्योपसर्जनान्तेवासिवाचिन्युत्तरपदे दिक्शब्दा अन्तोदात्ता भवन्ति । पूर्वपाणिनीयाः। अपरपणिनीयाः । पूर्वकाशकृत्स्नाः । अपरकशकृत्स्नाः ।

आचार्योपसर्जन इति किम्? पूर्वशिष्याः । अन्तेवासिनीति किम्? पूर्वपाणिनीयं शास्त्रम्॥

२७६८. उत्तरपदवृद्धौ सर्वं च ॥ १०५ ॥ (३८३९)

उत्तरपदस्य (७.३.१०) इत्येवमधिकृत्य या विहिता वृद्धिस्तद्वत्युत्तरपदे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति । सर्वपाञ्चालकः । पूर्वपाञ्चालकः । उत्तरपाञ्चालकः।

सुसर्वार्धदिक्शब्देभ्यः 'जनपदस्य' इति तदन्तविधिना जनपदलक्षणो (४.२.१२३) वुञ्प्रत्ययः । 'सुसर्वार्द्धाज्जनपदस्य' (७.३.१२), 'दिशोऽमद्राणम्' (७.३.१३) इति चोत्तरपदवृद्धिः ।

अधिकारलक्षणादिह न भवति-सर्वभासः सर्वकरक इति ॥

२७६९. बहुव्रीहौ विश्वं संज्ञायाम् ॥ १०६ ॥ (३७४०)

बहुव्रीहौ समासे विश्वशब्दः पूर्वपदं संज्ञायां विषयेऽन्तोदात्तं भवति । विश्वदेवः। विश्वयशाः। विश्वमहान् । पूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं प्राप्तम् ।

बहुव्रीहाविति किम्? विश्वे च देवाः विश्वदेः । संज्ञायामिति किम्? विश्वे देवा अस्य विश्वदेवः । विश्वामित्रः, विश्वजिन इत्यत्र 'संज्ञायां मित्राजिनयोः' (६.२.१६५) इत्येतद्भवति परत्वात् ।

'बहुव्रीहौ' इत्येतदधिक्रियते प्रागव्ययीभावसंज्ञानात् (६.२.१२१) ॥

२७७०. उदराश्वेषुषु ॥ १०८ ॥ (३८४१)

उदर, अश्व, इषु-इत्येतेषूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये पूर्वपदमन्तोदात्तं भवति । वृकोदरः । दमोदरः । हर्यश्वः । यावनाश्वः । सुवर्णपुङ्खेषुः। महेषुः ॥

२७७१. क्षेपे ॥ १०८ ॥ (३८४२)

क्षेपे गम्यमाने उदरादिषूत्तरपदेषु बहुव्रीहौ समासे संज्ञायां विषये पूर्वपदमन्तोदात्तं भवति। कुण्डोदरः । घटोदरः । कटुकाश्वः । स्पन्दिताश्वः । अनिघतेषुः । चलाचलेषुः।

अनुदरः, सुदर इत्यत्र 'नञ्सुभ्याम्' (६.२.१७२) इत्येतद्भवति विप्रतिषेधेन॥

२७७२. नदी बन्धुनि ॥ १०९ ॥ (३८४३)

बहुवीहौ समासे बन्धुन्युत्तरपदे नद्यन्तं पूर्वपदमन्तोदात्तं भवति । गर्गीबन्धुः। वत्सीबन्धुः।

नदीति किम्? ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । बन्धुनीति किम्? गार्गीप्रयः॥

२७७३. निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥ ११० ॥ (३८४४)

बहुव्रीहौ समासे निष्ठान्तमुपसर्गपूर्वं पूर्वपदमन्यतरस्यामन्तोदात्तं भवति । प्रधौतमखः। प्रक्षलितपादः ।

यदि मुखशब्दः स्वाङ्गवाची, तदा पक्षे 'मुखं स्वाङ्गम्' (६.२.१६८) इत्येतद्भवति, न चेत्पूर्वपदप्रकृतिस्वरत्वेन 'गतिरन्तरः' (६.२.४९) इत्येतद्भवति । पधातमखः, प्रधौतमुखः । प्रक्षलितपादः ।

निष्ठेति किम्? पसेचकमुखः । उपसर्गपूर्वमिति किम्? शुष्कमुखः ॥

२७७४. उत्तरपदादिः ॥ १११ ॥ (३८४५)

'उत्तरपदादिः' इत्येतदधिकृतम् । यदित ऊर्ध्वमनुक्रमिष्याम उत्तरपदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति-'कर्णो वर्णलक्षणात्' । (६.२.११२) शुक्लकर्णः, कृष्णकर्णः।

'उत्तरपदस्य' -इत्येतद् आपादपरिसमाप्तेः । 'आदिः' इति 'प्रकृत्या भगालम्' (६.२.१२६) इति यावत् ॥

२७७५. कर्णो वर्णलक्षणात् ॥ ११२ ॥ (३८४६)

बहुव्रीहौ समासे वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्द उत्तरपदमाद्युदात्तं भवति । शुक्लकर्णः । कृष्णकर्णः । लक्षणात्-दात्राकर्णः । शङ्कुकर्णः । 'लक्षणस्य' (६.३.११५) इति दीर्घत्वम् ।

पशूनां विभागज्ञापनार्थं दात्रशङ्कुप्रतिरूपकं कर्णादिषु चिह्नं यत् क्रियते तदिह लक्षणं गृह्यते, तेन स्थूलकर्ण इत्यत्र न भवति ।

कर्ण इति किम्? श्वतपादः । कूटशङ्गः । वर्णलक्षणादिति किम्? शाभनकर्णः॥

२७७६. संज्ञौपम्ययोश्च ॥ ११३ ॥ (३८४७)

संज्ञायामौपम्ये च यो बहुव्रीहीर्वर्त्तते तत्र कर्णशब्द उत्तरपदमाद्युदात्तं भवति। संज्ञायाम्-कुञ्चिकर्णः । मणिकर्णः । औपम्ये-गाकर्णः । खरकर्णः ॥

२७७७. कण्ठपृष्ठग्रीवाजङ्घं च ॥ ११४ ॥ (३८४८)

कण्ठ, पृष्ठ, ग्रीवा, जाङ्घा-इत्येतानि उत्तरपदानि बहुव्रीहौ समासे संज्ञौपम्ययोरादि्युदात्तानि भवन्ति ।

कण्ठः संज्ञायाम्-शितिकण्ठः (तै.सं. ४.५.११.१) नीलकण्ठः । औपम्ये-खरकण्ठः । उष्ट्रकण्ठः ।

पृष्ठः संज्ञायाम्-कण्डुपृष्ठः । नकपृष्ठः । औपम्ये-गपृष्ठः । अजपृष्ठः ।

ग्रीवा संज्ञायाम् - सग्रीवः । नीलग्रीवः । दृशग्रीवः । औपम्ये-गाग्रीवः । अश्वग्रीवः ।

जङ्घा संज्ञायाम्-नारीजङ्घः । तलजङ्घः । औपम्ये-गाजङ्घः । अश्वजङ्घः । एणीजङ्घः ।

२७७८. शृङ्गमवस्थायां च ॥ ११५ ॥ (३८४९)

शृङ्गशब्द उत्तरपदमवस्थायां संज्ञौपम्ययोश्च बहुव्रीहौ आदि्युदात्तं भवति । उदि्गतशृङ्गः । दि्व्यङ्गुलशृङ्गः । त्र्यङ्गलशृङ्गः । अत्र शृङ्गोदि्गमनादिकृतो गवादेर्वयोविशेषः= अवस्था । संज्ञायाम्-ऋष्यशृङ्गः । औपम्ये-गाशृङ्गः । मेषशृङ्गः।

अवस्थादिष्विति किम्? स्थलशृङ्गः ॥

२७७९. नञो जरमरमित्रमृताः ॥ ११६ ॥ (३८५०)

नञ उत्तरे जरमरमित्रमृता बहुव्रीहौ समासे आदि्युदात्ता भवन्ति । अजरः । अमरः । अमित्रः । अमृतः ।

नञ इति किम्? ब्राह्मणमित्रः । जरादय किम्? अशत्रुः । 'नञ्सुभ्याम्' (६.२.१७२) इति। उत्तरपदान्तोदात्तत्वमेवात्र भवति ॥

२७८०. सोर्मनसी अलोमोषसी ॥ ११७ ॥ (३८५१)

सोरुत्तरमनन्तमसन्तं च बहुव्रीहौ समासे आदि्युदात्तं भवति लोमोषसी वर्जयित्वा। सुकर्म । सुधर्म । सुप्रथिमा । असन्तम्-सुपयाः । सुयशाः । सुस्रोताः । सुस्रत् । सुध्वत् ।

सोरिति किम्? कृतकर्मा । कृतयशाः । मनसी इति किम्? सुराजा सुतक्षा । अलोमोषसी इति किम्? सुलोमा । सुषा ।

'अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च' (व्या.पा. १२९) इत्यनर्थकयोरपि मनसोरिह ग्रहणम् । 'नञ्सुभ्याम्' (६.२.१७२) इत्यस्यायमपवादः ।

कपि तु परत्वात् 'कपि पूर्वम्' (६.२.१७३) इत्येतद्भवति । सुकर्मकः । सुस्रोतस्कः ॥

२७८१. क्रत्वादाश्च ॥ ११८ ॥ (३८५२)

क्रत्वादयः सोरुत्तरे बहुव्रीहौ समासे आद्युदात्ता भवन्ति । सुक्रतः (तै. सं. १.२.६.१) । सुदृशीकः । (तै. सं. ३.४.११.१) ।

क्रतु । दृशीक । प्रतीक । प्रपूर्त्ति । हव्य । भग । क्रत्वादिः ॥

२७८२. आद्युदात्तं द्व्यच्छन्दसि ॥ ११९ ॥ (३८५३)

यदाद्युदात्तं द्व्यच् उत्तरपदं बहुव्रीहौ समासे सोरुत्तरं तदाद्युदात्तमेव भवति छन्दसि विषये । स्वश्वस्त्वा सुरथा मर्जयेम (तै. सं. १.२.१४.४) । नित्स्वरेणाश्वरथशब्दावाद्युदात्तौ ।

आद्युदात्तमिति किम्? या सुबाहुः स्वङ्गुरिः (रुक् २.३२.७) । बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः । द्व्यजिति किम्? सुगुरसत् । सुहरण्यः । 'नञ्सुभ्याम्' (६.१.१७२) इत्यस्यायमपवादः ॥

२७८३. वीरवीर्यौ च ॥ १२० ॥ (३८५४)

वीर, वीर्य-इत्येतौ च शब्दौ सोरुत्तरौ बहुव्रीहौ समासे छन्दसि विषये आद्युदात्तौ भवतः। सुवीरेणते [सुवीरस्ते । ऋ. ४.१७.४] । सुवीर्यस्य पतयः स्याम (तै.सं १.७.१३.४) ।

वीर्यमिति यत्प्रत्ययान्तम्, तत्र 'यतोऽनावः' (६.१.१२३) इति आद्युदात्तत्वं न भवतीत्येतदेव वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥

२७८४. कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ १२१ ॥ (३८५५)

कूल, तीर, तूल, मूल, शाला, अक्ष, सम - इत्येतानि उत्तरपदानि अव्ययीभावसमास आद्युदात्तानि भवन्ति । परिकूलम् । उपकूलम् । परितीरम् । उपतीरम् । परितूलम् । उपतूलम्। परिमूलम् । उपमूलम् । परिशालम् । उपशालम्। उपाक्षम् । पर्यक्षम् । सषमम् । विषमम् । निषमम् । दुःषमम् । तिष्ठद्गुप्रभृतिषु (२.१.१७) एते पठ्यन्ते ।

कूलादिग्रहणं किम्? उपकुम्भम् । अव्ययीभाव इति किम्? परमकूलम् । उत्तमकूलम् । पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं विप्रतिषेधेन भवति । परिकूलम् । उपकूलम्॥

२७८५. कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥ १२२ ॥ (३८५६)

कंस, मन्थ, शूर्प, पाय्य, काण्ड-इत्येतान्युत्तरपदानि द्विगौ समास आद्युदात्तानि भवन्ति । द्विकंसः । त्रिकंसः । द्विमन्थः । त्रिमन्थः । द्विशूर्पः । त्रिशूर्पः । द्विपाय्यः। त्रिपाय्यः । द्विकाण्डः। त्रिकाण्डः ।

द्विगाविति किम्? परमकंसः । उत्तमकंसः ॥

२७८६. तत्पुरुषे शालायां नपुंसके ॥ १२३ ॥ (३८४७)

शालाशब्दान्ते तत्पुरुषे समासे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तं भवति । ब्रह्मणशालंम्। क्षत्रियशालंम् । विभाशा ' सेनासुराच्छायाशालानिशानाम्' (२.४.२५) इति नपुंसकलिङ्गता ।

तत्पुरुष इति किम्? दृढशालं ब्राह्मणकुलम् । शालायामिति किम्? ब्रह्मणसनम्। नपुंसक इति किम्? ब्रह्मणशाला ॥

२७८७. कन्था च ॥ १२४ ॥ (३८५८)

तत्पुरुषे समासे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तं भवति । सौशमिकन्थंम्। आहवकन्थंम् । चप्पकन्थंम् । 'संज्ञायां कन्थोशीनरेषु' (२.४.२०) इति नपुंसकलिङ्गता । षष्ठीसमासा एते ।

नपुंसक इत्येव-दक्षिकन्था ॥

२७८८. आदिश्चिहणादीनाम् ॥ १२५ ॥ (३८५९)

कन्थान्ते तत्पुरुषे समासे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तो भवति । चिहंणकन्थम्। मडंरकन्थम् । 'मड्डर' इति केचित् पठन्ति । मड्डंरकन्थम् ।

चिहण । मडर । मड्डर । वैतुल । पटत्क । चैत्तालिकर्णः । वैतालिकर्णिरित्यन्ये पठन्ति । कुक्कुट । चिक्कण । चित्कण इत्यपरे पठन्ति । चिहणादिः ।

'आदिः' इति वर्तमाने पुनरादिग्रहणं पूर्वपदाद्युदात्तार्थम् ॥

२७८९. चेलखेटकटुककाण्डं गर्हायाम् ॥ १२६ ॥ (३८६०)

चेल, खेट, कटुक, काण्ड-इत्येतान्युत्तरपदानि तत्पुरुषे समासे गर्हायां गम्यमानायामाद्युदात्तानि भवन्ति । पुत्रचेलंम् । भयाचेलंम् । उपानत्खेटंम् । नगरखेटंम्। दधिकटुंकम् । उदश्वित्कटुंकम् । भतकाण्डंम् । पजाकाण्डंम् ।

चेलादीनां सादृश्येन पुत्रादीनां गर्हा, तत्र पुत्रश्चेलमिवेति विगृह्य व्याघ्रादेराकृतिगणत्वाद् 'उपमितं व्याघ्रादिभिः' (२.१.५६) इति समासः ।

गर्हायामिति किम्? परमचेलम् ॥

२७९०. चीरमुपमानम् ॥ १२७ ॥ (३८६१)

चीरमुत्तरपदमुपमानवाचि तत्पुरुषे समासे आद्युदात्तं भवति । वस्त्रं चीरमिव वस्त्रचीरम् । पटचीरम् । कम्बलचीरम् ।

उपमानमिति किम्? परमचीरम् ॥

२७९१. पललसूपशाकं मिश्रे ॥ १२८ ॥ (३८६२)

पलल, सूप, शाक-इत्येतान्युत्तरपदानि मिश्रवाचिनि तत्पुरुषे समासे आद्युदात्तानि भवन्ति। गुडपललम् । घृतपललम् । घृतसूपः । मुलकसूपः । घृतशाकम् । मुद्गशाकम् । गुडेन मिश्रं पललं गुडपललम् । 'भक्ष्येण मिश्रीकरणम्' (१.१.३५) इति समासः ।

मिश्र इति किम्? परमपललम् ॥

२७९२. कूलसूदस्थलकर्षाः संज्ञायाम् ॥ १२९ ॥ (३८६३)

कूल, सूद, स्थल, कर्ष-इत्येतान्युत्तरपदानि तत्पुरुषे समासे संज्ञायां विषये आद्युदात्तानि भवन्ति । दाक्षिकूलम् । महकिकूलम् । देवसूदम् । भाजीसूदम् । दाण्डयनस्थली। महकिस्थली। दक्षिकर्षः । ग्रामनामधेयान्येतानि ।

स्थलग्रहणम् - लिङ्गविशिष्टत्वात्स्थलीशब्दोऽपि गृह्यते । 'जानपदकुण्ड' (४.१.४२) इत्यनेन ङीष् ।

संज्ञायामिति किम्? परमकूलम् ॥

२७९३. अकर्मधारये राज्यम् ॥ १३० ॥ (३७६४)

कर्मधारयवर्जिते तत्पुरुषे समासे 'राज्यम्' इत्येतदुत्तरपदमाद्युदात्तं भवति । ब्रह्मणराज्यम्। क्षत्रियराज्यम् ।

अकर्मधारय इति किम्? परमराज्यम् ।

'चेलराज्यादिस्वरादव्ययस्वरो भवति पूर्वविप्रतिषेधेन' (म. भा.)-कुचेलम्, कुराज्यम् ॥

२७९४. वर्ग्यादयश्च ॥ १३१ ॥ (३८६५)

'वर्ग्य' -इत्येवमादीन्युत्तरपदानि अकर्मधारये तत्पुरुषे समासे आद्युदात्तानि भवन्ति । वासुदेववर्ग्यः । वासुदेवपक्ष्यः । अर्जुनवर्ग्यः । अर्जुनपक्ष्यः ।

अकर्मधारय इत्येव - परमवर्ग्यः । वर्गः । प्रातिपदिकेषु न पठ्यन्ते ।

दिगादिषु (४.३.४५) तु-वर्ग, पूग, गण, पक्ष-इत्येवमादयो ये पठिताः, त एव यत्प्रत्ययान्ता वर्ग्यादय इह प्रतिपत्तव्याः ॥

२७९५. पुत्रः पुम्भ्यः ॥ १३२ ॥ (३८६६)

पुत्रशब्दः पुंशब्देभ्य उत्तरस्तत्पुरुषे आद्युदात्तो भवति । कानटिपुत्रः । दामकपुत्रः। महिषकपुत्रः ।

पुत्र इति किम्? कौनटिमतुलः । पुम्भ्य इति किम् ? गार्गीपत्रः । वात्सीपुत्रः॥

२७९६. नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ॥ १३३ ॥ (३८६७)

आचार्यः=उपाध्यायः । राजा=ईश्वरः । ऋत्विजः=याजकाः । संयुक्ताः=स्त्रीसम्बन्धिनः । श्यालादयः । ज्ञातयः=मातृपितृसम्बन्धिनो बान्धवाः । आचार्याद्याख्येभ्यः परः पुत्रशब्दो नाद्युदात्तो भवति । आख्याग्रहणात्स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं भवति । आचार्यपुत्रः। उपाध्यायपुत्रः । शाकटायनपुत्रः.। राजपुत्रः । ईश्वरपुत्रः । नन्दुपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः। होतुःपुत्रः । भ्रातुष्पुत्रः। 'ऋतो विद्यायोनिसम्बन्धेभ्यः' (६.३.२३) इति षष्ठ्या अलुक् । संयुक्तपुत्रः। सम्बन्धिपुत्रः । श्यालपुत्रः । ज्ञातिपुत्रः । पुत्रस्वरे प्रतिषिद्धे समासान्तोदात्वमेव भवति ॥

२७९७. चूर्णादीन्यप्राणिषष्ठ्याः ॥ १३४ ॥ (३८६८)

'उत्तरपदादिः' इति वर्त्तते, 'तत्पुरुष' इति च चूर्णादीन्युत्तरपदानि अप्राणिवाचिनः षष्ठ्यन्तात्पराणि तत्पुरुषे समासे आद्युदात्तानि भवन्ति । मद्गचूर्णम् । मसूरचूर्णम् ।

अप्राणिषष्ठ्या इति किम्? मत्स्यचूर्णम् । षष्ठ्या इति किम्? परमचूर्णम् ।

चूर्ण । करिप । करिव । शाकिन । शाकट । द्राक्षा । तूस्त । कुन्दम । दलप । चमसी। चक्कन । चौल । चूर्णादिः ।

'चूर्णादीन्यप्राण्युपग्रहात्' इति सूत्रस्य पाठान्तरम् । तत्र 'उपग्रह' इति षष्ठ्यन्तमेव पूर्वाचार्योपचारेण गृह्यते ॥

२७९८. षट् च काण्डादीनि ॥ १३५ ॥ (३८६९)

षट् पूर्वोक्तानि काण्डादीन्युत्तरपदानि अप्राणिषष्ठ्या आद्युदात्तनि भवन्ति । 'काण्डं गर्हायाम्' (६.२.१२६) इत्युक्तम्, अगर्हायामपि भवति-दर्भकाण्डम्, शरकाण्डम् । 'चीरमुपमानम्' (६.२.१२७) इत्युक्तम्, अनुपमानमपि भवति - दर्भचीरम्, कुशचीरम् । 'पललसूपशाकं मिश्रे'

(२.१.१२८) इत्युक्तम्, अमिश्रेऽपि भवति -तिलपललम्, मुद्गसूपः, मलकशाकम् । 'कूलं संज्ञायाम्' (६.२.१२९) इत्युक्तम्, असंज्ञायामपि भवति - नदीकूलम्, समुद्रकूलम् ।

षडिति किम्? राजसूदः ॥

२७९९. कुण्डं वनम् ॥ १३६ ॥ (३८७०)

'कुण्ड' -शब्दोऽत्र कुण्डसादृश्येन वने वर्तते । 'कुण्डम्' इत्येतदुत्तरपदं वनवाचि तत्पुरुषे समासे आद्युदात्तं भवति । दर्भकुण्डम् । शरकुण्डम् ।

वनमिति किम्? मृत्कुण्डम् ॥

२८००. प्रकृत्या भगालम् ॥ १३७ ॥ (३८७१)

भगालवाच्युत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । कुम्भीभगालम् । कुम्मीकपालम्। कुम्भीनदालम् । भगालादयो मध्योदात्ताः ।

'प्रकृत्या' इत्येतदधिकृतम् 'अन्तः' (६.२.१४३) यावद्वेदितव्यम् ॥

२८०१. शितेर्नित्याबह्वज् बहुव्रीहावभसत् ॥ १३८ ॥ (३८७२)

शितेरुत्तरपदं नित्यं यदबह्वज् भसच्छब्दवर्जितं बहुव्रीहौ समासे तत्प्रकृतिस्वरं भवति । शितिपादः । शित्यंसः । शित्योष्ठः (तै.सं. ५.६.१४.१) । पादशब्दो वृषादित्वादाद्युदात्तः । अंसौष्ठशब्दौ च प्रत्ययस्य नित्त्वादाद्युदात्तौ ।

शितेरिति किम्? दर्शनीयपादः । नित्यग्रहणं किम्? शीतिककुत् (तै.सं. ५.६.१४.१) । ककुदस्यावस्थायां लोपो विधीयते । तत्रावस्थाया अन्यत्र शीतिककुद इति बह्वजुत्तरपदं भवतीति तेन न नित्याबह्वच् । अबह्वजिति किम्? शितिललाटः । बहुव्रीहाविति किम्? शितेः पादः शितिपादः । अभसदिति किम्? शितिभसत् (तै.सं. ५.७.१४.१) । शितिशब्द आद्युदात्तः ।

पूर्वपदप्रकृतिस्वरापवादो योगः ॥

२८०२. गतिकारकोपपदात्कृत् ॥ १३९ ॥ (३८७३)

'तत्पुरुषे' इति वर्त्तते, न 'बहुव्रीहौ' इति । गतेः कारकादुपपदाच्च कृदन्तमुत्तरपदं तत्पुरुषे समासे प्रकृतिस्वरं भवति । प्रकारकः । प्रकरणम् । प्रहारकः । पहरणम् । कारकात्-इध्मप्रव्रश्चनः । पलशशातनः । श्मश्रुकल्पनः । उपपदात्-ईषत्करः । दुष्करः । सुकरः । सर्वत्रैवात्र लित्स्वरः ।

गतिकारकोपपदादिति किम्? देवदत्तस्य कारको देवदत्तकारकः । देवदत्तस्येति शेषलक्षणा षष्ठी ।

कृद्ग्रहणं विस्पष्टार्थम् । प॒प॒च॒ति॒त॒राम्, प॒प॒च॒ति॒त॒माम्-इत्यत्र तरबाद्यन्तेन समासे कृते पश्चादाम्, तत्र सतिशिष्टत्वादाम एव स्वरो भवतीत्येके ।

प्रपचतिदेश्याद्यर्थं तु कृद्ग्रहणं दृश्यत एव ॥

२८०३. उभे वनस्पत्यादिषु युगपत् ॥ १४० ॥ (३८७४)

'प्रकृत्या' इति वर्त्तते । वनस्पत्यादिषु समासेषु उभे पूर्वोत्तरपदे युगपत् प्रकृतिस्वरे भवतः । व॒न॒स्पतिः (तै. सं २.६.२०.५) । वन-परिशब्दावाद्युदात्तौ, पारस्करप्रभृतित्वात् सुट् ।

बृ॒ह॒स्पतिः (तै.सं ६.४.१०.१) । बृहतां पतिः, 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' (ग. सू. १६०) इति सुट् तकारलोपश्च । बृहदित्येतदन्तोदात्तं निपातयन्ति । तस्य केचिदाद्युदात्तत्वं वर्णयन्ति ।

श॒चीपतिः । शचीशब्दः 'कृदिकारादक्तिनः' (ग. सू. ५०) इति ङीषन्तत्वादन्तोदात्तः। केचित्तु शार्ङ्गरवादिषु पठन्ति, तेषामाद्युदात्तः ।

त॒नू॒नपा॑त् (तै. सं. ४.१.८.१) । तनोतेरौणादिक ऊप्रत्ययः तेन तनूशब्दोऽन्तोदात्तः। न पाति न पालयति वा नपात्, क्विबन्तः, 'नभ्राण्नपात्' (६.३.७५) इत्यादिनाऽऽद्युदात्तो निपातितः। तन्वा नपात्, तनूनपात् ।

न॒राशंसः (तै.सं. ४.१.८.१) । नरा अस्मिन्नासीनाः शंसन्ति नरा एनं शंसन्तीति वा नराशंसः । 'नृ नये' (धा.पा. ८१०), अबन्तो नरशब्द आद्युदात्तः । शंसशब्दोऽपि घञन्तः, 'अन्येषामपि दृश्यते' (६.३.१६७) इति दीर्घत्वम् ।

शु॒न॒ःशेपः (तै.सं. ५.२.१.३) शुन इव शेपोऽस्येति बहुव्रीहिः । तत्र शेपपुच्छलाङ्गूलेषु शुनः संज्ञायाम्' (६.३.२१ वा.) इति षष्ठ्या अलुक् । उभावाद्युदात्तौ ।

शण्ड॒पर्कौ (तै. सं. ६.४.१०.१) । शण्ड-पर्कशब्दौ घञन्तत्वादाद्युदात्तौ । तयोर्द्वन्द्वे 'अन्येषामपि दृश्यते' (६.३.१६७) इति दीर्घत्वम् ।

तृष्णा॑वरूत्री । तृष्णाशब्द आद्युदात्तः, वरूत्रीशब्दो ग्रसितादि (७.२.३४) सूत्रे निपातितोऽन्तोदात्तः । तत्र द्वन्द्वे दीर्घत्वं पूर्ववत् ।

'ब॒म्बावि॒श्ववं॑यसौ' (तै.सं. ६.६.८४) बम्बशब्दोऽन्तोदात्तः । विश्ववयःशब्दोऽपि 'बहुव्रीहौ विश्वं संज्ञायाम्' (६.२.१०६) इति विश्वशब्दोऽन्तोदात्तः । तयोर्द्वन्द्वे दीर्घत्वं पूर्ववत् ।

मम्रृ॒त्युः । मर् इति मृङो विच्प्रत्ययः । मृत्युशब्दोऽन्तोदात्तः ।

द्वन्द्वानामदेवताद्वन्द्वार्थः, अनुदात्ताद्युत्तरपदार्थश्च वनस्पत्यादिषु पाठः ॥

२८०४. देवताद्वन्द्वे च ॥ १४१ ॥ (३८७५)

देवतावाचिनां यो द्वन्द्वस्तत्र युगपदुभे पूर्वोत्तरपदे प्रकृतिस्वरे भवतः । इन्द्रसोमा । इन्द्रवरुणौ । इन्द्रबृहस्पती। 'ऋक्रेन्द्राग्र' (उणादि. १९६) इति इन्द्रशब्द आद्युदात्तो निपातितः । सोम इति मन्प्रत्ययान्तः । वरुण उनन्प्रत्ययान्तः, तेनाद्युदात्तः । बृहस्पतिशब्दे वनस्पत्यादित्वाद् द्वावुदात्तौ, तेन इन्द्राबृहस्पती-इत्यत्र त्रय उदात्ता भवन्ति ।

देवताग्रहणं किम्? प्लक्षन्यग्रोधौ । द्वन्द्वग्रहणं किम्? अग्निष्टोमः ॥

२८०५. नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥ १४२ ॥ (३८७६)

उत्तरपदेऽनुदात्तादौ पृथिवीरुद्रपूषमन्थिवर्जिते देवताद्वन्द्वे नोभे युगपत्प्रकृतिस्वरे भवतः । इन्द्राग्नी (तै.सं. २.२.२.१) । इन्द्रवायू (तै. सं ६.६.८.३) । अग्नि-वायुशब्दावन्तोदात्तौ।

उत्तरपदग्रहणम् 'अनुदात्तादौ' इत्युत्तरपदविशेषणं यथा स्याद्, द्वन्द्वविशेषणं मा भूदिति ।

'अनुदात्तादौ' इति विधिप्रतिषेधयोर्विषयविभागार्थम् ।

अपृथिव्यादिष्विति किम्? द्यावापृथिव्यौ (तै.सं. २.६.९.५) । द्यावाशब्द आद्युदात्तो निपातितः । पृथिवीशब्दो ङीष्प्रत्ययान्तत्वादन्तोदात्तः ।

रुद्र-सोमारुद्रौ (तै.सं. १.८.२२.५) । 'रोदेर्णिलुक्च' (उणादि १८९) इति रुद्रशब्दो रक्प्रत्ययान्तोऽन्तोदात्तः ।

पूषन्-इन्द्रापुषणौ । 'श्वन्नुक्षन्पूषन्' (उणादि. १६५) इति पूषान्तोदात्तो निपात्यते ।

मन्थिन्-शक्रामन्थिनौ (तै.सं.६.४.१०.२१) । मन्थोऽस्यास्तीति मन्थी, इन्नन्तत्वादन्तोदात्तः । पृथिव्यादिषु तु उभे युगपत् प्रकृतिस्वरे भवत एव ॥

२८०६. अन्तः ॥ १४३ ॥ (३८७७)

'अन्तः' इत्यधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र समासस्योत्तरपदस्यान्त उदात्तो भवतीत्येवं तद्वेदितव्यम् । वक्ष्यति - 'थाथघञ्क्ताजबित्रकाणाम्' (६.२.१४४) इति । सनीथः । अवभृथः ॥

२८०७. थाथघञ्क्ताजबित्रकाणाम् ॥ १४४ ॥ (३८७८)

थ, अथ, घञ्, क्त, अप्, इत्र, क - इत्येवमन्तानामुत्तरपदानां गतिकारकोपपदात्परेषामन्त उदात्तो भवति । सुनीथः । अवभृथः (तै.सं. १.७.५.३)।

'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उणादि १६७) इति 'अवे भृञः' (उणादि. १६८) इति च क्थन्प्रत्ययान्तावेतौ । तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनाद्युदात्तमुत्तरपदं स्यात् ।

अथ-आ॑व॒सथः (तै.ब्रा. १.१.१.६) । उ॒प॒व॒सथः । 'उपसर्गे वसेः' (उणादि. ४.३) इत्यथन्प्रत्ययः ।

घञ्-प॒भे॒दः । का॒ष्ठ॒भ॒दः । र॒ज्जु॒भ॒दः ।

क्त-दू॒रा॒दा॒ग॒तः । वि॒श॒ष्कः । आ॒त॒m॒शु॒w॒कः ।

अच्-प॒क्ष॒यः । प॒ज॒यः । 'क्षयो निवासे' (६.१.२०१), 'जयः करणम्' (२.१.२०२) इति आद्युदात्तौ क्षयजयशब्दौ प्रयोजयतः ।

अप्-प्र॒ल॒वः । प॒स॒वः (तै.सं. १.१.४.२) ।

इत्र - प॒ल॒वि॒त्रम् । प॒स॒वि॒त्रम् ।

क - गा॒वृ॒षः, ख॒री॒वृ॒षः । गां वर्षति, खरीं वर्शतीति मूलविभुजादित्वात् (का.वा.) कप्रत्ययः । प॒वृ॒षः । प॒हृ॒षः । 'इगुपध' (३.१.१३५) इति कप्रत्ययः । 'वृषादीनां च' (६.१.२०३) इति वृषशब्द आद्युदात्तः ।

गतिकारकोपपदादित्येव - सुस्तुतं भवता ।

कर्मप्रवचनीयेऽव्ययस्वर एव भवति ॥

२८०८. सूपमानात् क्तः ॥ १४५ ॥ (३८७९)

'सु' इत्येतस्मादुपमानाच्च परं क्तान्तमुत्तरपदमन्तोदात्तं भवति । स॒कृ॒तम् (तै.सं. ४.७.२.२) सु॒भु॒क्तम् । सु॒पी॒तम् । उपमानात्-वृ॒का॒व॒लु॒प्त॒म् । श॒श॒प्लु॒तम्। सि॒ꣳह॒वि॒न॒र्दि॒तम्। सुशब्दाद् 'गतिरनन्तरः' (६.२.४९) इति प्राप्ते उपमानादपि 'तृतीया कर्मणि' (६.२.४८) इति, अयमपवादः ।

गतिकारकोपपदादित्येव - सुस्तुतं भवता ॥

२८०९. संज्ञायामनाचितादीनाम् ॥ १४६ ॥ (३८८०)

संज्ञायां विषये गतिकारकोपपदात् क्तान्तमुत्तरपदमन्तोदात्तं भवति आचितादीन्वर्जयित्वा । स॒म्भू॒तो रामायणः । उ॒प॒हू॒तः शाकल्यः । प॒रि॒ज॒ग्धः कौडिन्यः। सम्भूत इति प्राप्त्यर्थाद् भवतेः कर्मणि क्तः ।

'गतिरनन्तरः' (६.२.४९) इत्यत्र हि 'कर्मणि' इत्यनुवर्तते, तद्बाधनार्थं चेदम् । ध॒न॒ष्खा॒ता नदी । कु॒द्दा॒ल॒खा॒ता नगरी । ह॒स्ति॒मृ॒दि॒ता भूमिः । 'तृतीया कर्मणि' (६.२.४८) इति प्राप्तिरिह बाध्यते ।

अनाचितादीनामिति किम्? अ॑चितम् । पर्य॑चितम् । अस्थ॑पितम् । परि॑गृहीतम् । नि॑रुक्तम् । प्रतिप॑न्नम् । प्रश्लिष्टम् । उप॑हतम् । उप॑स्थतम् ॥

संहिताऽगवि (ग. रू. १७१) । संहिताशब्दो यदा गोरन्यस्य संज्ञा, तदाऽन्तोदात्तो न भवति । यदा तु गोः संज्ञा, तदाऽन्तोदात्त एव ॥

२८१०. प्रवृद्धादीनां च ॥ १४७ ॥ (३८८१)

प्रवृद्धादीनां च क्तान्तमुत्तरपदमन्तोदात्तं भवति । प॒व्॒वृ॒द्धं यानम् । प्र॒व्॒वृ॒द्धो वृषलः। प॒य॒क्ताः सक्तवः । आकर्षेऽव॒हि॒तः । अ॒व॒हि॒तो भोगेषु । ख॒ट्व॒रू॒ढः । क॒वि॒श॒स्तः (तै.सं. २.५.९.२) ।

यानादीनामत्र गणे पाठः प्रायोवृत्तिप्रदर्शनार्थः, न विषयनियमार्थः । यानादिभ्योऽन्यत्रापि तेषामन्तोदात्तत्वं भवत्येव । विषयनियमार्थ एवेत्येके ।

असंज्ञार्थोऽयमारम्भः ।

आकृतिगणश्च प्रवृद्धादिर्द्रष्टव्यः । तेन 'पु॒नरु॒स्॒यू॒तं व॑स॒ देय॒म्' (मै.सं. १.७.२), 'पु॒नर्नि॒ष्कृ॒तो रथः॒' (तै.सं. १.५.२.४) - इत्येवमादि सिद्धं भवति ॥

२८११. कारकाद्दत्तश्रुतयोरेवाशिषि ॥ १४८ ॥ (३८८२)

'संज्ञायाम्' इति वर्त्तते, 'क्तः' इति च । संज्ञायां विषये आशिषि गम्यमानायां कारकादुत्तरयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तो भवति । देवा एनं देयासु॒द्व॒द्व॒त्तः । विष्णु॒रेनं श्रूयाद् वि॒ष्णु॒श्रु॒तः ।

कारकादिति किम्? कारकान्नियमो मा भूत्-सम्भू॑तो रामायणः । दत्तश्रुतयोरिति किम्? दे॒व॑पलितः । एतस्मान्नियमादत्र संज्ञायामनाचितादीनाम्' (६.२.१४६) इत्यन्तोदात्तत्वं न भवति, 'तृतीया कर्मणि' (६.२.४८) इत्येवात्रभवति ।

एवकारकरणं किम्? कारकावधारणं यथा स्याद्, दत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति - सं॒श्र॒तः, वि॒श्र॒तः ।

आशिषीति किम्? अनाशिषि नियमो मा भूत् (म. भा.) । देवैः खाता दु॒व॒खा॒ता ।

कारकाद्दत्तश्रुतयोराशिष्येव - इत्ययमप्यत्र नियम इष्यते, तेनाहतो नदति दे॒व॑दत्त इत्यत्र न भवति । देवदत्त इति कस्यचित् शङ्खस्य नाम । तत्र 'तृतीया कर्मणि' (६.२.४८) इति पूर्वपदप्रकृतिस्वरत्वमेव भवति ॥

२८१२. इत्थम्भूतेन कृतमिति च ॥ १४९ ॥ (३८८३)

इमं प्रकारमापन्नः=इत्थम्भूतः । 'इत्थम्भूतेन कृतम्' इत्येतस्मिन्नर्थे यः समासो वर्त्तते तत्र क्तान्तमुत्तरपदमन्तोदात्तं भवति । सुप्तप्रलपितम् । उन्मत्तपलपितम् । पमत्तगीतम् । विपन्नश्रुतम् ।

'कृतम्' इति क्रियासामान्ये करोतिर्वर्त्तते, नाभूतप्रादुर्भाव एव; तेन प्रलपिताद्यपि कृतं भवति । 'तृतीया कर्मणि (६.२.४८) इत्यस्यायमपवादः ।

भावे तु यदि प्रलपितादयः, तदा थाथादिस्वरेणैव (६.२.१४४) सिद्धमन्तोदात्तत्वं भवति ॥

२८१३. अनो भावकर्मवचनः ॥ १५० ॥ (१५०)

अनप्रत्ययान्तमुत्तरपदं भाववचनं कर्मवचनं च कारकात्परमन्तोदात्तं भवति। ओदनभोजनं सुखम् । पयःपानं सुखम् । चन्दनप्रियङ्गुकालेपनं सुखम् । कर्मवचनः - राजभोजनाः शालयः । राजाच्छदनानि वासांसि ।

'कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्, (३.३.११६) इत्ययं योग उभयथा वर्ण्यते - कर्मण्युपपदे भावे ल्युड् भवति, कर्मण्यभिधेये ल्युड् भवतीति। तत्र पूर्वस्मिन् सूत्रार्थे भाववचनोदाहरणानि, उत्तरत्र कर्मवचनोदाहरणानि ।

अन इति किम्? हस्तहार्यमुदश्वित् । भावकर्मवचन इति किम्? दन्तधावनम्। करणे ल्युट् ।

कारकादित्येव - निदर्शनम् । अवलेखनम् ।

सर्वेषु प्रत्युदाहरणेषु प्रकृतिस्वरो भवति ॥

२८१४. मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ॥ १५१ ॥ (३८८५)

मन्नन्तम्, क्तिन्नन्तम्, व्याख्यान, शयन, आसन, स्थान-इत्येतानि, याजकादयः क्रीतशब्दश्चोत्तरपदमन्तोदात्तं भवति । मन्-रथवर्त्म, शकटवर्त्म । क्तिन्-पाणिनिकृतिः, अपिशलिकृतिः । व्याख्यान-ऋगयनव्याख्यानम्, छन्दव्याख्यानम् । शयन-राजशयनम्, ब्राह्मणशयनम् । आसन-राजासनम् । ब्राह्मणासनम् । स्थान - गास्थनम्, अश्वस्थानम्। याजकादिः - ब्रह्मणयजकः । क्षत्रियायाजकः । ब्राह्मणपूजकः । क्षत्रियपूजकः। याजकादयो ये 'याजकादिभिश्च' (२.२.९) इति षष्ठीसमासार्थाः पठ्यन्ते त एवेह गृह्यन्ते । क्रीत - गाक्रीतः । अश्वक्रीतः ।

कृत्स्वरापवादोऽयं योगः । क्रीतशब्दे तु 'तृतीया कर्मणि' (६.२.४८) इत्यस्यापवादः ।

व्याख्यानशयनासनस्थानानामभावकर्मार्थं ग्रहणम् ।

कारकादित्येव - प्रकृतिः । पहृतिः ।

२८१५. सप्तम्याः पुण्यम् ॥ १५२ ॥ (२८८६)

सप्तम्यन्तात्परं पुण्यमित्येतदुत्तरपदमन्तोदात्तं भवति । अध्ययने पुण्यम् अध्ययनपुण्यम्। वेदे पुण्यं वेदपुण्यम् । 'सप्तमी' (२.१.४०) इति योगविभागात्समासः। 'तत्पुरुषे तुल्यार्थ'(६.२.२) इति पूर्वपदप्रकृतिस्वरत्वं प्राप्तमित्यन्तोदात्तत्वं विधीयते । उणादीनां तु व्युत्पत्तिपक्षे - कृत्स्वरेणाद्युदात्तः पुण्यशब्दः स्यादिति ।

सप्तम्या इति किम्? वेदेन पुण्यं वेदपुण्यम् ॥

२८१६. ऊनार्थकलहं तृतीयायाः ॥ १५३ ॥ (३८८७)

ऊनार्थान्युत्तरपदानि, कलहशब्दश्च तृतीयान्तात् पराण्यन्तोदात्तानि भवन्ति । माषोनम्। कार्षापणोनम् । माषविकलम् । कार्षापणविकलम् । कलह - असिकलहः। वक्कलहः।

तृतीयापूर्वपदप्रकृतिस्वरापवादो योगः ।

अत्र केचिदर्थ इति स्वरूपग्रहणमिच्छन्ति । धान्येनार्थो धान्यार्थः ।

ऊनशब्देनैव त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव तृतीयासमासपरिग्रहे सिद्धे तृतीयाग्रहणं विस्पष्टार्थम् ॥

२८१७. मिश्रं चानुपसर्गमसन्धौ ॥ १५४ ॥ (३८८८)

`तृतीया' इति वर्त्तते । 'मिश्र' -इत्येतदुत्तरपदमनुपसर्गं तृतीयान्तात्परमन्तोदात्तं भवत्यसन्धौ गम्यमाने । गुडमिश्राः । तिलमिश्राः । सर्पिर्मिश्राः ।

मिश्रमिति किम्? गुडधानाः । अनुपसर्गमिति किम्? गुडसम्मिश्राः ।

इहानुपसर्गग्रहणं ज्ञापकम् - अन्यत्र मिश्रग्रहणे सोपसर्गग्रहणस्य । तेन 'मिश्रश्लक्ष्णैः' (२.१.३१) इति सोपसर्गेणापि मिश्रशब्देन तृतीयासमासो भवति ।

असन्धाविति किम्? ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहितः = ऐकार्थ्यमापन्नः।

सन्धिरिति हि पणबन्धेनैकार्थ्यमुच्यते ।

केचित्पुनराहुः - गृह्यमाणविशेषा प्रत्यासत्तिः=सन्धिरिति, अत्र राज्ञो ब्राह्मणैः सह देशप्रत्यासत्तावपि सत्यां मूर्त्तिविभागस्वरूपभेदो गृह्यत इति ब्राह्मणमिश्रो राजेति प्रत्युदाह्रियते।

उदाहरणेष्वविभागापत्तिरेव - गुडमिश्रा इति ।

२८१८. नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः ॥ १५५ ॥ (३८७९)

सम्प्तादि, अर्ह, हित, अलम्-इत्येवमर्था ये तद्धितास्तदन्तान्युत्तरपदानि नञो गुणप्रतिषेधे वर्त्तमानात् पराण्यन्तोदात्तानि भवन्ति । सम्पादि-कर्णवेष्टकाभ्यां सम्पादि मुखं कार्णवेष्टकिकम्, न कार्णवेष्टकिकम् अकार्णवेष्टकिकम् । अर्ह - छेदमर्हति छैदिकः, न छैदेकः अच्छैदिकः । हित-वत्सेभ्यो हितो वत्सीयः, न वत्सीयः अवत्सीयः । अलमर्थ-सन्तापाय प्रभवति सान्तापिकः, न सान्तापिकः असान्तपिकः।

नञ इति किम्? गर्दभरथमर्हति गार्दभरथिकः । विगर्दभरथिकः । गुणप्रविषेध इति किम्? गार्दभरथिकादन्योऽगर्दभरथिकः । 'गुण' इति तद्धितार्थप्रवृत्तिनिमित्तं सम्पादित्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते समासे तत्रायं विधिः-कर्णवेष्टकाभ्यां न सम्पादि मुखमिति ।

सम्पाद्यर्हहितालमर्था इति किम्? पाणिनीयमधीते पाणिनीयः, न पाणिनीयोऽपणिनीयः। तद्धिता इति किम्? कन्यां वोढुमर्हति कन्यावोढा, न वोढा अवौढा-'अर्हे कृत्यतृचश्च' (३.३.१६९) इति तृच् ॥

२८१९. ययतोश्चातदर्थे ॥१५६ ॥ (३८९०)

य, यत् इत्येतौ यौ तद्धितावतदर्थे वर्तेते तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयादन्त उदात्तो भवति । पाशानां समूहः पाश्या, न पाश्या अपाश्या। अतृष्या । यत्-दन्तेषु भवं दन्त्यम्, न दन्त्यम् अदन्त्यम् । अकर्ण्यम् ।

अतदर्थ इति किम्? पादार्थमुदकं पाद्यम्, न पाद्यमपद्यम् ।

तद्धिता इत्येव - अदेयम् । गुणप्रतिषेध इत्येव - दन्त्यादन्यत् अदन्त्यम् ।

निरनुबन्धकैकानुबन्धकयोर्ययतोर्ग्रहणादिह न भवति-'वामदेवाड्ड्यड्ड्यौ' (४.२.५) वामदेव्यम्, न वामदेव्यम् अवमदेव्यमिति ।

२७२०. अच्कावशक्तौ ॥ १५७ ॥ (३८९१)

अच्, क-इत्येवमन्तमशक्तौ गम्यमानायामुत्तरपदं नञः परमन्तोदात्तं भवति । अपचे यः पक्तुं न शक्नोति । अजयः । कः खल्वपि - अविक्षिपः । अविलिखः।

अशक्ताविति किम्? अपचः दीक्षितः । अपचः परिव्राजकः ॥

२८२१. आक्रोशे च ॥ १५७ ॥ (३८९२)

आक्रोशे च गम्यमाने नञ उत्तरमच्कान्तमन्तोदात्तं भवति । अपचोऽयं जाल्मः। अपठोऽयं जाल्मः । पक्तुं पठितुं शक्तोऽप्येवमाक्रुश्यते । अविक्षिपः । अविलिखः ॥

२८२२. संज्ञायाम् ॥ १५९ ॥ (३८९३)

अक्रोशे गम्यमाने नञः परमुत्तरपदं संज्ञायां वर्तमानमन्तोदात्तं भवति । अदेवदत्तः। अयज्ञदत्तः । अविष्णुमित्रः ॥

२८२३. कृत्योकेष्णुच्चार्वादयश्च ॥ १६० ॥ (३८९४)

कृत्य, उक, इष्णुच्-इत्येवमन्ताश्चार्वादयश्च नञ उत्तरेऽन्तोदात्ता भवन्ति । कृत्य-अकर्त्तव्यम् । अकरणयम् । उक-अनागामुकम् । अनपलाषुकम् । इष्णुच्-अनलङ्करिष्णुः । अनिराकरिष्णुः ।

इष्णुज्ग्रहणे 'कर्त्तरि भुवः खिष्णुच्' (३.२.४७) इत्यस्य द्व्यनुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्याद् भवति । अनाढ्यम्भविष्णुः । असभगम्भविष्णुः ।

चार्वादयः - अचारुः । असाधुः । अयौधिकः । अवदान्यः ।

चारु । साधु । यौधिक । अनङ्गमेजय । अत्र द्वितीये नञ्समासेऽन्तोदात्तत्वम्। अनङ्गमजयः । वदान्यः । अकस्मात् । अत्रापि द्वितीये नञ्समासेऽन्तोदात्तत्वम्-अनकस्मात्।

वर्त्तमानवर्द्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः संज्ञायाम् (ग. सू. १७२)। एते वर्त्तमानादयः संज्ञायां द्रष्टव्याः । विकारसदृशे व्यस्तसमस्ते (ग. सू. १७३) । अविकरः । असदृशः । अविकारसदृशः । गृहपति । गृहपतिकः ।

राजाहनोश्छन्दसि (ग. सू. १७४) । अराजा । अनहः । भाषायां नञ्स्वर एव भवति । चार्वादिः ॥

२८२४. विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥ १६१ ॥ (३८९५)

तृन्नन्त, अन्न, तीक्ष्ण, शुचि-इत्येतेषु नञ उत्तरेषु विभाषाऽन्त उदात्तो भवति । अकर्त्ता, अकर्त्ता । अन्न-अनन्नम्, अनन्नम् । तीक्ष्ण-अतीक्ष्णम्, अतीक्ष्णम् । शुचि - अशुचिः । अशचिः । पक्षे-अव्ययस्वर एव भवति ॥

२८२५. बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ १६२ ॥ (३८९६)

बहुव्रीहौ समासे इदम्, एतद्, तत्-इत्येतेभ्य उत्तरस्य प्रथमशब्दस्य पूर्वणप्रत्ययान्तस्य च क्रियागणने वर्त्तमानस्यान्त उदात्तो भवति । इदं प्रथमं गमनं भोजनं वा यस्य स इ॒द॒म्प॒थ॒म, इ॒द॒न्द्वि॒त॒यः, इ॒द॒न्तृ॒तीयः । ए॒त॒त्प्र॒थमः, ए॒त॒द्वि॒तीयः ए॒त॒त्तृ॒तीयः । त॒त्प॒थ॒मः त॒द्वि॒तीयः, त॒त्तृ॒तीयः ।

बहुव्रीहाविति किम्? अनेन प्रथम इदम्प्रथमः । 'तृतीया' (२.१.३०) इति योगविभागात्समासः । इदमेतत्तद्भ्य इति किम्? यत्प्रथमः । प्रथमपूरणयोरिति किम्? तानि बहून्यस्य तद्बहुः । क्रियागणन इति किम्? अयं प्रथम एषां त इदम्प्रथमाः । द्रव्यगणनमेतत्। गणन इति किम्? अयं प्रथम एषाम् ते इदम्प्रथमाः। इदम्प्रधाना इत्यर्थः ।

उत्तरपदस्य कार्यित्वात् कपि पूर्वम् (६.२.१७३) अन्तोदात्तं भवति । इ॒द॒म्प॒थ॒म॒काः।

'बहुव्रीहौ' इत्येतद् 'वनं समासे' (६.२.१७८) इति प्रागेतस्मादधिकृतं वेदितव्यम् ॥

२८२६. संख्यायाः स्तनः ॥ १६३ ॥ (३८९७)

संख्यायाः परः स्तनशब्दो बहुव्रीहौ समासेऽन्तोदात्तो भवति । द्वि॒स्त॒ना । त्रि॒स्त॒ना । च॒तुः॒स्त॒ना ।

संख्याया इति किम्? दु॒र्श॒नीयस्तना । स्तन इति किम्? द्विशिराः ॥

२८२७. विभाषा छन्दसि ॥ १६४ ॥ (३८९८)

छन्दसि विषये बहुव्रीहौ समासे संख्यायाः परः स्तनशब्दो विभाषाऽन्तोदात्तो भवति । द्विस्त॒नां कु॑र्याद्वामदेवः । द्विस्त॒नां क॑रोति द्यावा॑पृथि॒व्योर्दो॑हय॒ । चतः॑स्तनां करोति पशू॒नां दोह॑याष्टस्त॒नां करोति॒ छन्द॑सां॒ दोह॑य॒ (तै.सं. ५.१.६.४) ।

२८२८. संज्ञायां मित्राजिनयोः ॥ १६५ ॥ (३८९९)

संज्ञायां विषये बहुव्रीहौ समासे मित्र, अजिन - इत्येतयोरुत्तरपदयोरन्त उदात्तो भवति। द॒व॒मि॒त्रः । ब॒ह्म॒मि॒त्रः । वृ॒का॒जि॒नः । कु॒ला॒जि॒नः । कृ॒ष्ण॒जि॒नः।

संज्ञायामिति किम्? प्रियमित्रः । महाजिनः ।

ऋषिप्रतिषेधो मित्रे (का.वा.१) । वि॒श्वामि॒त्र॒ ऋषिः (तै. सं. ४.३.२.२) ॥

२८२९. व्यवायिनोऽन्तरम् ॥ १६६ ॥ (३९००)

व्यवायी=व्यवधाता, तद्वाचिनः परमन्तरं बहुव्रीहौ समासेऽन्तोदात्तं भवति । वस्त्रान्तरः। पटान्तरः । कम्बलान्तरः । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः। वस्त्रव्यवधायक इत्यर्थः।

व्यवायिन इति किम्? आत्मान्तरः । आत्मा=स्वभावोऽन्तरः=अन्यो यस्यासावात्मान्तरः॥

२८३०. मुखं स्वाङ्गम् ॥ १६७ ॥ (३९०१)

मुखमुत्तरपदं स्वाङ्गवाचि बहुव्रीहौ समासेऽन्तोदात्तं भवति । गारमखः । भद्रमुखः। स्वाङ्गमिति किम्? दीर्घमुखा शाला । स्वाङ्गमद्रवादिलक्षणमिह गृह्यते ।

२८३१. नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥ १६८ ॥ (३९०२)

अव्यय, दिक्शब्द, गो, महत्, स्थूल, मुष्टि, पृथु, वत्स-इत्येतेभ्यः परं मुखं स्वाङ्गवाचि बहुव्रीहौ समासे नान्तोदात्तं भवति । अव्यय-उच्चैर्मखः । नीच्चैर्मखः। दिक्शब्द - प्राङ्मखः । पत्यङ्मखः । गो-गोमखः । महत्-महामखः । स्थूल-स्थूलमखः । मुष्टि-मुष्टिमुखः । पृथु-पृथुमुखः । वत्स-वत्समखः । पूर्वपदप्रकृतिस्वरो यथायोगमेषु भवति । गोमुष्टिवत्सपूर्वस्योपमानलक्षणो विकल्पः पूर्वविप्रतिषेधेन बाध्यते ॥

२८३२. निष्ठोपमानादन्यतरस्याम् ॥ १३९ ॥ (३९०३)

निष्ठान्तादुपमानवाचिनश्च मुखं स्वाङ्गमुत्तरपदमन्यतरस्यां बहुव्रीहौ समासेऽन्तोदात्तं भवति । पक्षालितमुखः पक्षलितमुखः, प्रक्षलितमुखः । यदैतदुत्तरपदान्तोदात्ततत्वं न भवति, तदा 'निष्टोपसर्गपूर्वमन्यतरस्याम्' (६.२.११०) इति पक्षे पूर्वपदान्तोदात्ततत्वम्, तदभावपक्षेऽपि पूर्वपदप्रकृतिस्वरत्वेन गतिस्वर इति त्रीण्युदाहरणानि भवन्ति । उपमानात् - सिंहमुखः सिंहमखः । व्याघ्रमुखः व्याघ्रमुखः ॥

२८३३. जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ॥ १७० ॥ (३९०४)

जातिवाचिन आच्छादनवर्जितात् कालवाचिनः सुखादिभ्यश्च परं क्तान्तं कृतमितप्रतिपन्नन् वर्जयित्वा बहुव्रीहौ समासेऽन्तोदात्तं भवति । सङ्गरजग्धः । पलाण्डुभक्षितः। सरापीतः । काल - मासजातः । संवत्सरजतः । द्व्यहजातः। त्र्यहजातः । सुखादिभ्यः । सखजातः । दुःखजातः । तृप्रजातः ।

जात्यादिभ्य इति किम्? पुत्रजंतः । आहिताग्न्यादित्वात्परनिपातः । अनाच्छादनादिति किम्? वस्त्रंच्छन्नः । वसंनच्छन्नः । अकृतमितप्रतिपन्ना इति किम्? कुण्डंकृतः । कुण्डंमितः। कुण्डंप्रतिपन्नः ।

एतेषु बहुव्रीहिषु निष्ठान्तस्य पूर्वनिपातो न भवति, अस्मादेव ज्ञापकात् । प्रत्युदाहरणेषु पूर्वपदप्रकृतिस्वरो योजयितव्यः ।

सुखादयस्तृतीयेऽध्याये (३.१.१८) पठ्यन्ते ॥

२८३४. वा जाते ॥ १७१ ॥ (३९०५)

जातशब्द उत्तरपदे वाऽन्त उदात्तो भवति बहुव्रीहौ समासे जातिकालसुखादिभ्यः। दन्तजातः । दन्तंजातः । स्तनजातः । स्तनंजातः । कालात्-मासजातः । मासंजातः। संवत्सरजातः । संवत्सरजंतः । सुखादिभ्यः - सुखजातः । सुखजंतः । दुःखजतः। दुःखजंतः ।

२८३५. नञ्सुभ्याम् ॥ १७२ ॥ (३९०६)

नञ्सुभ्यां परमुत्तरपदं बहुव्रीहौ समासेऽन्तोदात्तं भवति । अयवो देशः । अव्रीहिः। अमाषः। सयवः । सव्रीहिः । समाषः ।

समासस्यैतदन्तोदात्तत्वमिष्यते । समासान्ताश्चावयवा भवन्तीति-अनृचः, बहुवच इत्यत्र कृते समासान्तेऽन्तोदात्तत्वं भवति ।

२८३६. कपि पूर्वम् ॥ १७३ ॥ (३९०७)

नञ्सुभ्यां कपि परतः पूर्वमन्तोदात्तं भवति । अकुमरीकौ देशः । अवृषलीकः। अब्रह्मबन्धूकः । सुकुमारीकः । सुवृषलीकः । सुब्रह्मबन्धूकः ॥

२८३७. ह्रस्वाऽन्तेऽन्त्यात्पूर्वम् ॥ १७४ ॥ (३९०८)

ह्रस्वोऽन्तो यस्य तदिदं ह्रस्वान्तमुत्तरपदं समासो वा, तत्रान्त्यात् पूर्वमुदात्तं भवति कपि परतो नञ्सुभ्यां परं बहुव्रीहौ समासे । अयवंको देशः । अव्रीहिंकः। अमाषंकः । सयवंकः । सुव्रीहिंकः । समाषंकः ।

पूर्वमिति वर्त्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमप्रतिपत्त्यर्थम् - ह्रस्वान्तेऽन्त्यादेव पूर्वमुदात्तं भवति, न कपि पूर्वमिति । तेन अजंकः, सुजंकः इत्यत्र कबन्तस्यैवान्तोदात्तत्वं भवति ॥

२८३८. बहोर्नञ्वदुत्तरपदभूम्नि ॥ १७५ ॥ (३९०९)

उत्तरपदार्थबहुत्वे यो बहुशब्दो वर्तते तस्मान्नञ इव स्वरो भवति । 'नञ्सुभ्याम्' (३.२.१७२) इत्युक्तम्, बहोरपि तथा भवति - बहुयवो देशः, बहुव्रीहिः, बहुतिलः। 'कपि पूर्वम्' (६.२.१७३) इत्युक्तम्, बहोरपि तथा भवति - बहुकुमारीको देशः, बहुवष्लीकः, बहुब्रह्मबन्धूकः । ह्रस्वान्तेऽन्त्यात्पूर्वम् (६.२.१७४) इत्युक्तम्, बहोरपि तथा भवति-बहुयवंको देशः, बहुव्रीहिंकः, बहुमाषंकः । 'नञो जरमरमित्रमृताः' (६.२.११६) इत्युक्तम्, बहोरपि तथा भवति - बहुजरः । बहुमरः । बहुमित्रः । बहुमृतः ।

उत्तरपदभूम्नीति किम् ? बहुषु मनोऽस्य बहुमना अयम् ॥

२८३९. न गुणादयोऽवयवाः ॥ १७६ ॥ (३९१०)

गुणादयोऽवयववाचिनो बहोरुत्तरे बहुव्रीहौ नान्तोदात्ता भवन्ति । बहुगुणा रज्जुः। बह्वक्षरं पदम् । बहुच्छन्दोमानम् । बहुसूक्तः बह्वध्यायः ।

गुणादिराकृतिगणो द्रष्टव्यः ।

अवयवा इति किम्? बहुगुणो ब्राह्मणः । अध्ययनश्रुतसदाचारादयोऽत्र गुणाः॥

२८४०. उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ॥ १७७ ॥ (३९११)

उपसर्गात् स्वाङ्गं ध्रुवं पर्शुवर्जितमन्तोदात्तं भवति बहुव्रीहौ समासे । पुपृष्ठः। प्रादरः । पुललटः ।

'ध्रुवम्' इत्येकरूपमुच्यते । ध्रुवमस्य शीतमिति यथा । सततं यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठः ।

उपसर्गादिति किम्? दुर्शनीयललाटः । स्वाङ्गमिति किम्? प्रशाखो वृक्षः । ध्रुवमिति किम्? उद्बहुः क्रोशति । अपर्शिर्वति किम्? उत्पर्शुः । विपर्शुः ॥

२८४१. वनं समासे ॥ १७८ ॥ (३९१२)

समासमात्रे 'वनम्' इत्येतदुत्तरपदमुपसर्गात्परमन्तोदात्तं भवति । पुवणे यष्ष्टव्यम् । निवणे प्रणिधीयते । 'प्रनिरन्तः' (८.४.५) इति णत्वम् ।

समासग्रहणं समासमात्रपरिग्रहार्थम्, बहुव्रीहावेव हि स्यात् ॥

२८४२. अन्तः ॥ १७९ ॥ (३९१३)

अन्तश्शब्दादुत्तरं वनमन्तोदात्तं भवति । अन्तवणो देशः ।

अनुपसर्गार्थ आरम्भः ॥

२८४३. अन्तश्च ॥ १८० ॥ (३९१४)

अन्तश्शब्दश्चोत्तरपदमुपसर्गादन्तोदात्तं भवति । प्रान्तः । पर्यन्तः । बहुव्रीहिरयम्, प्रादिसमासो वा ॥

२८४४. न निविभ्याम् ॥ १८१ ॥ (३९१५)

नि, वि-इत्येताभ्यामुत्तरोऽन्तशब्दो नान्तोदात्तो भवति । न्यन्तः । व्यन्तः (तै.ब्रा. २.१.३.१) । पूर्वपदप्रकृतिस्वरत्वे कृते यणादेशः । तत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इति स्वरितो भवति ॥

२८४५. परेरभितोभावि मण्डलम् ॥ १८२ ॥ (३९१६)

'परेरुत्तरमभितोभाविवचनं मण्डलं चान्तोदात्तं भवति । परिकुलम् । परितीरम् । परिमण्डलम् । बहुव्रीहिरयम्, प्रादिसमासः, अव्ययीभावो वा । अव्ययीभावपक्षेऽपि हि 'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' (६.२.३३) इति पूर्वपदप्रकृतिस्वरत्वं प्राप्तमनेन बाध्यते ।

अभित इत्युभयतः, अभितो भावोऽस्यास्तीति तदभितोभावि । यच्चैवं स्वभावं कूलादि, तदभितोभाविग्रहणेन गृह्यते ॥

२८४६. प्रादस्वाङ्गं संज्ञायाम् ॥ १८३ ॥ (३९१७)

प्रादुत्तरपदमस्वाङ्गवाचि संज्ञायां विषयेऽन्तोदात्तं भवति । प्रकोष्ठम् । प्रगृहम्। पद्वारम् ।

अस्वाङ्गमिति किम्? प्रहस्तम् । प्रपदम् । संज्ञायामिति किम्? प्रपीठम् ॥

२८४७. निरुदकादीनि च ॥ १८४ ॥ (३९१८)

निरुदकादीनि च शब्दरूपण्यन्तोदात्तानि भवन्ति । निरुदकम् । निरुलपम् । निरुपलमित्यन्ये पठन्ति । निर्मक्षिकम् । निर्मशकम् । एषां प्रादिसमासः, बहुव्रीहिर्वा। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् ।

निष्कालकः । निष्क्रान्तः कालकादिति कन्प्रत्ययान्तेन कालशब्देन प्रादिसमासः। निष्कालिकः-इत्यन्ये पठन्ति ।

निष्पेषः, दुस्तरीपः 'अवितृस्तृतन्त्रिभ्यः ईः (उणादि ४४६)-तरीः, तां पातीति तरीपः, कुत्सितस्तरीपो दुस्तरीपः । निस्तरीप इति केचित् पठन्ति । अपरे-ाेस्तरीक इति । ते तरिशब्दान्ते बहुव्रीहौ कपं कुर्वन्ति ।

निरजिनम् । उदजिनम् । उपाजिनम् ।

परेर्हस्तपादकेशकर्षाः (ग.सू. १७५) । परिहस्तः । परिपादः । परिकेशः । परिकर्षः । निरुदकादिराकृतिगणः ॥

२८४८. अभेर्मुखम् ॥ १८५ ॥ (३९१९)

अभेरुत्तरं मुखमन्तोदात्तं भवति । अभिमुखः । बहुव्रीहिरयम्, प्रादिसमामो वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् ।

'उपसर्गात्स्वाङ्गम्' (६.२.१७७) इति सिद्धे वचनमबहुव्रीह्यर्थम्, अध्रुवार्थम्, अस्वाङ्गार्थं च। अभिमुखा शाला ॥

२८४९. अपाच्च ॥ १८६ ॥ (२९२०)

अपाच्चोत्तरं मुखमन्तोदात्तं भवति । अपमुखः । अपमुखम् । अव्ययीभावोऽप्यत्र प्रयोजयति । तत्रापि हि परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' (६.२.३३) इत्युक्तम् ।

योगविभाग उत्तरार्थः ॥

२८५०. स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च ॥ १८७ ॥ (३९२१)

स्फिग, पूत, वीणा, अञ्जस् अध्वन्, कुक्षि - इत्येतान्युत्तरपदानि सीरनामानि च नामशब्दश्च अपादुत्तराण्यन्तोदात्तानि भवन्ति । अपस्फिगम् । अपपूतम् । अपवीणम् । अपाञ्जः। अपाध्वा ।

'उपसर्गादध्वनः' (५.४.८५) इति यदा समासान्तो नास्ति, तदाऽनेनान्तोदात्तत्वं भवति । तस्मिन् हि सत्यच्प्रत्ययस्य चित्त्वादेव सिद्धम् । 'अनित्यश्च समासान्तः' इत्येतदेव ज्ञापकम्।

अपकुक्षिः । अपसीरः । अपहलम् । अपलाङ्गलम् । अपनाम । सर्वत्र प्रादिसमासः, बहुव्रीहिः, अव्ययीभावो वा ।

स्फिगपूतकुक्षीणां ग्रहणमबहुव्रीह्यर्थम्, अध्रुवार्थम्, (म. भा.) अस्वाङ्गार्थं च ॥

२८४१. अधेरुपरिस्थम् । १८८ ॥ (३९२२)

अधेरुत्तरमुपरिस्थवाचि अन्तोदात्तं भवति । अधिदन्तः । अधिकर्णः । अधकेशः। अध्यारूढो दन्त इति प्रादिसमासः । अध्यारूढो वा दन्त इति समानाधिकरण उत्तरपदलोपी समासः ।

दन्तस्योपरि योऽन्यो दन्तो जायते स उच्यते=अधिदन्त इति ।

उपरिस्थमिति किम्? अधिकरणम् ॥

२८५२. अनोरप्रधानकनीयसी ॥ १८९ ॥ (३९२३)

अनोरुत्तरमप्रधानवाचि कनीयश्चान्तोदात्तं भवति । अनुगतो ज्येष्ठमनुज्यष्ठः । अनुमध्यमः। पूर्वपदार्थप्रधानः प्रादिसमासोऽयम् । अनुगतः कनीयान् अनुकनीयान्। उत्तरपदार्थप्रधानोऽयम् । प्रधानार्थं च कनीयोग्रहणम् ।

अप्रधानकनीयसी इति किम्? अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥

२८५३. पुरुषश्चान्वादिष्टः ॥ १९० ॥ (३९२४)

पुरुषशब्दोऽन्वादिष्टवाची चानोरुत्तरोऽन्तोदात्तो भवति । अन्वादिष्टः पुरुषः अनुपरुषः। अन्वादिष्टः= अन्वाचितः, कथितानुकथितो वा । अन्वादिष्ट इति किम्? अनुगतः पुरुषोऽनपुरुषः॥

२८५४. अतेरकृत्पदे ॥ १९१ ॥ (३९२५)

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तो भवति । अत्यङ्कुशो नागः । अतिकुशोऽश्वः । पदशब्दः खल्वपि - अतिपदा शक्वरी ।

अकृत्पदे इति किम्? अतिकारकः ।

अतेर्धातुलोप इति वक्तव्यम् (का. वा.१) । इह मा भूत् शोभनो गार्ग्यः अतिगार्ग्यः । इह च यथा स्यात् - अतिक्रान्तः कारकादतिकारक इति ॥

२८५५. नेरनिधाने ॥ १९२ ॥ (३९२६)

नेः परमुत्तरपदमन्तोदात्तं भवत्यनिधाने । निधानम्=अप्रकाशता, [तद्भिन्नमनिधानम्=प्रकाशनम् ।] निमलम् । न्यक्षम् । नितणम् । बहुव्रीहिरयम् प्रादिसमासो वा। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् ।

अनिधान इति किम्? निवाग्वृषलः । निर्दण्डः । निहितवाक्, निहितदण्ड इत्यर्थः । निशब्दोऽत्र निधानार्थं ब्रवीति । प्रादयो हि वृत्तिविषये ससाधनां क्रियामाहुः॥

२८५६. प्रतेरंश्वादयस्तत्पुरुषे ॥ १९३ ॥ (३१२७)

प्रतेरंश्वादयस्तत्पुरुषे समासेऽन्तोदात्ता भवन्ति । प्रतिगतोंऽशुः प्रत्यंशुः । पतिजनः। पतिराजा ।

राजशब्दः समासान्तस्यानित्यत्वाद्यदा टज् नास्ति तदा प्रयोजयति । तस्मिन्हि सति चित्वादेवान्तोदात्तत्वं सिद्धम् ।

तत्पुरुष इति किम्? प्रतिगता अंशवोऽस्य प्रत्यंशुरयमुष्ट्रः ।

अंशु । जन । राजन् । उष्ट्र । खेटक । अजिर । आर्द्रा । श्रवण । कृत्तिका । अर्द्ध । पुर। अंश्वादि ॥

२८५७. उपाद् द्व्यजजिनमगौरादयः ॥ १९४ ॥ (३९२८)

उपादुत्तर द्व्यजजिनं चान्तोदात्तं भवति तत्पुरुषे समासे गौरादीन् वर्जयित्वा। उपगतो देवमुपदेवः । उपसोमः । उपेन्द्रः । उपहाडः । अजिन-उपाजिनम् ।

अगौरादय इति किम्? उपगौरः । उपतैषः ।

तत्पुरुष इत्येव - उपगतः सोमोऽस्य उपसोमः ।

गौर । तैष । नैष । तैट । लेट । लोट । जिह्वा । कृष्णा । कन्या । गुड । कल्य । वाह । गौरादिः ॥

२८५८. सोरवक्षेपणे ॥ १९५ ॥ (३९२९)

सुशब्दात्परमुत्तरपदं तत्पुरुषे समासेऽन्तोदात्तं भवति अवक्षेपणे गम्यमाने । अवक्षेपणम्=निन्दा । इह खल्विदानिं सुस्थण्डिले सुस्फिगाभ्यां सुपत्यवसितः । सुशब्दोऽत्र पूजायामेव । वाक्यार्थस्तु अवक्षेपणम्, असूयया तथाभिधानात् ।

सोरिति किम्? कुबह्मणः । अवक्षेपण इति किम्? शोभनेषु तृणेषु सुतृणेषु॥

२८५९. विभाषोत्पुच्छे ॥ १९३ ॥ (३९३०)

उत्पुच्छशब्दे तत्पुरुषे विभाषाऽन्त उदात्तो भवति । उत्क्रान्तः पुच्छाद् उत्पुच्छः, उत्पुच्छः ।

यदा तु पुच्छमुदस्यति उत्पुच्छयति, उत्पुच्छयतेरच् उत्पुच्छः, तदा थाथादिसूत्रेण (६.२.१४४) नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयमिति सेयमुभयत्र विभाषा भवति ।

अत्पुरुष इत्येव - उदस्तं पुच्छमस्य उत्पुच्छः ॥

२८६०. द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥ १९७ ॥ (३९३१)

द्वि, त्रि - इत्येताभ्यामुत्तरेषु पाद्, दत्, मूर्धन्-इत्येषूत्तरपदेषु यो बहुव्रीहिस्तत्र विभाषाऽन्त उदात्तो भवति । द्वौ पादावस्य द्विपात् (मै.सं. २.६.८.३) द्विपात् । त्रिपात्, त्रिपत् । द्विदन् द्विदन्। त्रिदन् त्रिदन् । द्विमूर्धा द्विमूर्धा । मूर्धा त्रिमूर्धा। पादिति कृताकारलोपः पादशब्दो गृह्यते। ददिति कृतददादेशो दन्तशब्दः ।

मूर्धन्निति त्वकृतसमासान्तो नान्त एव मूर्धन्शब्दः । तस्यैतत्प्रयोजनम् - असत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकम् - अनित्यः समासान्तो भवतीति ।

यदापि समासान्तः क्रियते, तदापि बहुव्रीहेः कार्यित्वात् तदेकदेशत्वाच्च समासान्तस्यान्तोदात्तत्वं पक्षे भवत्येव - द्विमूर्धः, त्रिमूर्धः ।

द्वित्रिभ्यामिति किम्? कल्याणमूर्धा । पादादिष्विति किम्? द्विहस्तम् । बहुव्रीहाविति किं? द्वयोर्मूर्धा द्विमूर्धा ॥

२८६१. सक्थं चाक्रान्तात् ॥ १९८ ॥ (३९३२)

सक्थमिति कृतसमासान्तः सक्थिशब्दोऽत्र गृह्यते, सोऽक्रान्तात्परो विभाषान्तोदात्तो भवति। गारसक्थः गारसक्थः । श्लक्षणसक्थः श्लक्ष्णसक्थः।

अक्रान्तादिति किम्? चक्रसक्थः । षचश्चित्त्वान्नित्यमन्तोदात्तत्वं भवति ॥

२८६२. परादिश्छन्दसि बहुलम् ॥ १९९ ॥ (३९३३)

छन्दसि विषये परादिरुदात्तो भवति बहुलम् । परशब्देनात्र सक्थशब्द एव गृह्यते । अग्निजसक्थमालभेत । त्वाष्ट्रौ लोमशसक्थौ (तै. सं. ५.५.२३.१) । ऋजबाहुः। वाक्पतिः । चित्पतिः ।

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः ॥ (म.भा.)

परादिरुदाहृतः ।

परान्तश्च - *अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम्*(म. भा.) । त्रिबन्धुरण त्रिवृता रथेन त्रिचक्रेण (ऋ. १.११८.२) ।

पूर्वान्तः - *पूर्वपदान्तोदात्तप्रकरणे मरुद्वृद्धादीनां छन्दस्युपसंख्यानम्* । मरुद्वृद्धः ।

पूर्वादिः - *पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्* । 'दिवोदासाय सामगाय ते' इत्येवमादि सर्वं संगृहीतं भवति ॥

॥ इति श्रीवामनविरचितायां काशिकावृत्तौ
षष्ठाध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ षष्ठाध्याये
तृतीयः पादः

२८६३. अलुगुत्तरपदे ॥ १ ॥ (१५८)

'अलुक्' इति च 'उत्तरपदे इति च एतदधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामोऽलुगुत्तरपद इत्येवं तद्वेदितव्यम् । वक्ष्यति - 'पञ्चम्याः स्तोकादिभ्यः' (६.३.२) । स्तोकान्मुक्तः । 'अल्पान्मुक्तः' ।

उत्तरपद इति किम्? निष्क्रान्तः स्तोकाद् निःस्तोकः ।

अन्यार्थमिदमुत्तरपदग्रहणमिहाप्यलुको निवृत्तिं करोतीत्येवमर्थं 'लक्षणप्रतिपदोक्त' (व्या.परि. ३) परिभाषा नाश्रयितव्या ।

अलुगधिकारः प्रागानङः (६.३.२५) । उत्तरपदाधिकारः प्राग्ङ्गाधिकारात् (६.४.१) ॥

२८६४. पञ्चम्याः स्तोकादिभ्यः ॥ २ ॥ (९५९)

स्तोकान्तिकदूरार्थकृच्छ्राणि स्तोकादीनि, तेभ्यः परस्याः पञ्चम्या उत्तरपदेऽलुग्भवति । स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः । अभ्याशादागतः। दूरादागतः । विप्रकृष्टादागतः। कृच्छ्रान्मुक्तः ।

समासे कृते प्रातिपदिकत्वात्सुपो लुकि प्राप्ते प्रतिषेधः क्रियते ।

द्विवचनबहुवचनान्तानां तु स्तोकादीनामनभिधानात्समास एव न भवति - स्तोकाभ्यां मुक्तः, स्तोकेभ्यो मुक्त इति । तेनात्र न कदाचिदप्यैकपद्यम्, ऐकस्वर्यं च भवति ।

ब्राह्मणाच्छंसिन उपसंख्यानं कर्तव्यम् (का.वा.) । ब्राह्मणादादाय शंसतीति ब्राह्मणाच्छंसी इति । ऋत्विग्विशेषस्य रूढिरियम् । तस्या व्युत्पत्तिरसता सता वाऽवयवार्थेन क्रियते ॥

२८६५. ओजः सहोम्भस्तमसस्तृतीयायाः ॥ ३ ॥ (९६०)

ओजस्, सहस्, अम्भस्, तमस्-इत्येतेभ्य उत्तरस्यास्तृतीयाया अलुग्भवति उत्तरपदे । ओजसाकृतम् । सहसाकृतम् । अम्भसाकृतम् । तमसाकृतम् ।

अञ्जस उपसंख्यानं कर्तव्यम् (का.वा.१) । अञ्जसाकृतम् ।

पुंसानुजो जनुषान्ध इति वक्तव्यम् (का.वा.२) । पुंसानुजः ॥

२८६६. मनसः संज्ञायाम् ॥ ४ ॥ (९६१)

मनस उत्तरस्यास्तृतीयायाः संज्ञायामलुग्भवति । मनसादत्ता । मनसागुप्ता । मनसासङ्गता ।

संज्ञायामिति किम्? मनोदत्ता । मनोगुप्ता ॥

२८६७. आज्ञायिनि च ॥ ५ ॥ (९६२)

आज्ञायिन्युत्तरपदे मनस उत्तरस्यास्तृतीयाया अलुग्भवति । मनसाऽऽज्ञातुं शीलमस्य मनसाज्ञायी ॥

२८६८. आत्मनश्च पूरणे ॥ ६ ॥ (९६३)

आत्मन उत्तरस्यास्तृतीयायाः पूरणप्रत्ययान्त उत्तरपदेऽलुग्भवति । आत्मनापञ्चमः.। आत्मनाषष्ठः । 'तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम्' (का.वा.) इति तृतीया । 'तृतीया' (३.१.३०) इति योगविभागात्समासः । आत्मना वा कृतः पञ्चम आत्मनापञ्चमः ।

कथं 'जनार्दनस्त्वात्मचतुर्थ एव' इति ? बहुव्रीहिरयम्-आत्मा चतुर्थोऽस्यासावात्मचतुर्थः (म. भा.) ॥

२८६९. वैयाकरणाख्यायां चतुर्थ्याः ॥ ७ ॥ (९६४)

वैयाकरणानामाख्या वैयाकरणाख्या । आख्या=संज्ञा । यया संज्ञया वैयकरणा एव व्यवहरन्ति तस्यामात्मन उत्तरस्याश्चतुर्थ्या अलुग्भवति । आत्मनेपदम् । आत्मनेभाषा.। तादर्थ्ये चतुर्थी (का.वा.) । 'चतुर्थी' इति योगविभागात्समासः ॥

२८७०. परस्य च ॥ ८ ॥ (९६५)

परस्य च या चतुर्थी तस्या वैयाकरणाख्यायामलुग्भवति । परस्मैपदम् । परस्मैभाषा ॥

२८७१. हलदन्तात्सप्तम्याः संज्ञायाम् ॥ ९ ॥ (९६६)

हलन्तादददन्ताच्चोत्तरस्याः सप्तम्याः संज्ञायामलुग्भवति । युधिष्ठिरः । त्वचिसारः। गविष्ठिर इत्यत्र तु 'गवियुधिभ्यां स्थिरः' (६.३.९५) इत्यत एव वचनादलुक् । अदन्तात्-अरण्येतिलकाः । अरण्येमाषकाः । वनेकिंशुकाः । वनेहरिद्रकाः । वनेबल्बजकाः । पूर्वाह्णस्फोटकाः । कूपेपिशाचकाः ।

हलदन्तादिति किम्? नद्याः कुक्कुटिका नदीकुक्कुटिका । भूम्यां पाशाः भूमिपाशाः.। संज्ञायामिति किम्? अक्षशौण्डः ।

हृद्द्युभ्यां ङेः (का.वा. १) । हृद, दिव् - इत्येताभ्यामुत्तरस्य ङेरलुक् भवति.। हृदिस्पृक्। दिविस्पृक् ॥

२८७२. कारनाम्नि च प्राचां हलादौ ॥ १० ॥ (९६८)

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या अलुग्भवति । कूपेशाणम् । दृषदिमाषकः । हलेद्विपदिका । हलेत्रिपदिका ।

कारविशेषस्य संज्ञा एताः, तत्र पूर्वेणैव सिद्धे नियमार्थमिदम् । एते च त्रयो नियमविकल्पा अत्रेष्यन्ते - कारनाम्न्येव, प्राचामेव, हलादावेवेति ।

कारनाम्नीति किम्? अभ्यर्हिते पशुः अभ्यर्हितपशुः । कारादन्यस्यैतद्देयस्य नाम । प्राचामिति किम्? यूथे पशुः यूथपशुः । हलादाविति किम्? अविकटे उरणः अविकटोरणः । हलदन्तादित्येव - नद्यां दोहनी नदीदोहनी ॥

२८७३. मध्याद् गुरौ ॥ ११ ॥ (९६९)

मध्यादुत्तरस्याः सप्तम्या गुरावुत्तरपदेऽलुग्भवति । मध्येगुरुः ।

अन्ताच्चेति वक्तव्यम् (का.वा.१) । अन्तेगुरुः । 'सप्तमी' इति योगविभागात् समासः॥

२८७४. अमूर्द्धमस्तकात् स्वाङ्गादकामे ॥ १२ ॥ (९७०)

मूर्द्धमस्तकवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अकाम उत्तरपदेऽलुग्भवति। कण्ठे कालोऽस्य कण्ठेकालः । उरसिलोमा । उदरेमणिः ।

अमूर्द्धमस्तकादिति किम्? मूर्द्धशिखः । मस्तकशिखः । अकाम इति किम्? मुखे कामोऽस्य मुखकामः । स्वाङ्गादिति किम्? अक्षशौण्डः ।

हलदन्तादित्येव-अङ्गुलित्राणः । जङ्घावलिः ॥

२८७५. बन्धे च विभाषा ॥ १३ ॥ (९७१)

'बन्धे' इति घञन्तो गृह्यते, तस्मिन्नुत्तरपदे हलदन्तादुत्तरस्याः सप्तम्या विभाषाऽलुग्भवति । हस्तेबन्धः, हस्तबन्धः । चक्रेबन्धः, चक्रबन्धः । उभयत्रविभाषेयम्। स्वाङ्गाद्धि बहुव्रीहौ पूर्वेण नित्यमलुक् प्राप्नोति; तत्पुरुषे तु स्वाङ्गादस्वाङ्गाच्च 'नेन्त्सद्धबध्नातिषु च' (६.३.१९) । इति प्रतिषेधः प्राप्नोति ।

हलदन्तादित्येव = गुप्तिबन्धः ॥

२८७६. तत्पुरुषे कृति बहुलम् ॥ १४ ॥ (९७२)

तत्पुरुषे समासे कृदन्त उत्तरप्दे सप्तम्या बहुलमलुग्भवति । स्तम्बेरमः । कर्णेजपः ।

न च भवति - कुरुचरः, मद्रचरः ॥

२८७७. प्रावृट्शरत्कालदिवां जे ॥ १५ ॥ (९७३)

प्रावृट्, शरत्, काल, दिव्-इत्येतेषां जे उत्तरपदे सप्तम्या बहुलमलुग्भवति। प्रावृषिजः । शरदिजः । कालेजः । दिविजः । पूर्वस्यैवायं प्रपञ्चः ॥

२८७८. विभाषा वर्षक्षरशरवरात् ॥ १६ ॥ (९७४)

वर्ष, क्षर, शर, वर-इत्येतेभ्यः उत्तरस्याः सप्तम्या ज उत्तरपदे विभाषाऽलुग्भवति.। वर्षेजः, वर्षजः । शरेजः, शरजः । वरेजः, वरजः ॥

२८७९. घकालतनेषु कालनाम्नः ॥ १७ ॥ (९७५)

घसंज्ञके प्रत्यये कालशब्दे तनप्रत्यये च परतः कालनाम्न उत्तरस्याः सप्तम्या विभाषाऽलुग्भवति । घ-पूर्वाह्णेतरे, पूर्वाह्णतरे । पूर्वाह्णेतमे, पूर्वाह्णतमे । काल-पूर्वाह्णेकाले, पूर्वाह्णकाले। तन-पूर्वाह्णेतने, पूर्वाह्णतने ।

कालनाम्न इति किम्? शुक्लतरे, शुक्लतमे ।

हलदन्तादित्येव-रात्रितरायाम् । उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नेष्यते; 'हृदयस्य हृल्लेख' (६-३-५०) इति लेखग्रहणाल्लिङ्गात् । तेन घतनग्रहणे तदन्तग्रहणं न भवति।

कालेति न स्वरूपग्रहणम् ।

२८८०. शयवासवासिष्वकालात् ॥ १८ ॥ (९७६)

शय, वास, वासिन्-इत्येतेषूत्तरपदेष्वकालवाचिन उत्तरस्याः सप्तम्या विभाषाऽलुग्भवति। खेशयः, खशयः । ग्रामेवासः, ग्रामवासः । ग्रामेवासी, ग्रामवासी।

अकालादिति किम्? पूर्वाह्णशयः ।

हलन्तादित्येव-भूमिशयः ।

अपो योनियन्मतुषु सप्तम्या अलुग्वक्तव्यः । अप्सुयोनिः । अप्सव्यः । अप्सुमन्तौ । अप्सु भव इति दिगादित्वात् (४-३-५४) यत् प्रत्ययः । सर्वत्र 'सप्तमी' इति योगविभागात्समासः॥

२८८१. नेल्त्सिद्धबध्नातिषु च ॥ १९ ॥ (९७७)

इन्नन्ते उत्तरपदे सिद्धशब्दे बध्नातौ च परतः सप्तम्या अलुग्न भवति । स्थण्डिलवर्ती। सिद्धसांकाश्यसिद्धः । काम्पिल्यसिद्धः । बध्नाति - चक्रबद्धः। चारबद्धः । 'सप्तमी' इति योगविभागात् समासः ।

चक्रबन्ध इति केचिदुदाहरन्ति, तत्पचाद्यजन्तं द्रष्टव्यम् । घञन्ते हि 'बन्धे च विभाषा' (६-३-१३) इत्युक्तम् ॥

२८८२. स्थे च भाषायाम् ॥ २० ॥ (९७८)

स्थे चोत्तरपदे भाषायां सप्तम्या अलुग्न भवति । समस्थः । विषमस्थः । कूटस्थः । पर्वतस्थः ।

भाषायामिति किम्? कृष्णोऽस्याखरेष्ठः । [कृष्णोम्यारेष्ठः । वा. स. २-१] । 'पूर्वपदात्' (८-३-१०६) इति षत्वम् ॥

२८८३. षष्ठ्या आक्रोशे ॥ २१ ॥ (९७९)

आक्रोशे गम्यमाने उत्तरपदे षष्ठ्या अलुग्भवति । चौरस्य कुलम् । वृषलस्य कुलम् ।

आक्रोशे इति किम्? ब्राह्मणकुलम् ।

षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु यथासंख्यमलुग् वक्तव्यः (का. वा.१) । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ।

आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति चालुग्वक्तव्यः (का.वा.२) । अमुष्यापत्यमामुष्यायणः । नडादित्वात् (४-१-९९) फक् । अमुष्य पुत्रस्य भाव आमुष्यपुत्रिका । मनोज्ञादित्वाद्वुञ् (४-१-१३३) तथा-आमुष्यकुलिकेति ।

देवानाम्प्रिय इत्यत्र च षष्ठ्या अलुग् वक्तव्यः (का.वा.३) । देवानाम्प्रियः ।

शेपपुच्छलाङ्गूलेषु शुनः संज्ञायां षष्ठ्या अलुग्वक्तव्यः (का.वा. ४) । शुनःशेपः। शुनः पुच्छः । शुनोलाङ्गूलः ।

दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः (का.वा.५) । दिवोदासाय गायति ॥

२८८४. पुत्रेऽन्यतरस्याम् ॥ २२ ॥ (९८०)

पुत्रशब्द उत्तरपदे आक्रोशे गम्यमानेऽन्यतरस्यां षष्ठ्या अलुग् भवति । दास्याः पुत्रः दासीपुत्रः । वृषल्याः पुत्रः, वृषलीपुत्रः ।

आक्रोश इत्येव - ब्राह्मणीपुत्रः ॥

२८८५. ऋतो विद्यायोनिसम्बन्धेभ्यः ॥ २३ ॥ (९८१)

ऋकारान्तेभ्यो विद्यासम्बन्धवाचिभ्यो योनिसम्बन्धवाचिभ्यश्चोत्तरस्याः षष्ठ्या अलुग्भवति होतुरन्तेवासी । होतुः पुत्रः । पितुरन्तेवासी । पितुः पुत्रः ।

ऋत इति किम्? आचार्यपुत्रः । मातुलपुत्रः ।

विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम् (का.वा.१) । विद्यायोनिसम्बन्धवाचिन्येवोत्तरपदे यथा स्याद्, अन्यत्र मा भूत् - होतृधनम् । पितृधनम् । होतृगृहम् । पितृगृहम् ॥

२८८६. विभाषा स्वसृपत्योः ॥ २४ ॥ (९८२)

स्वसृ, पति-इत्येतयोरुत्तरपदयोऋकारान्तेभ्यो विद्यायोनिसम्बन्धवाचिभ्यो विभाषाऽलुग्भवति । मातुःष्वसा । मातुःस्वसा । मातृष्वसा । पितुःष्वसा । पितुःस्वसा। पितृष्वसा । यदा लुक् तदा 'मातृपितृभ्यां स्वसा' (८-३-८४) इति नित्यं षत्वम्.। यदा त्वलुक् तदा 'मातृपितृभ्यामन्यतरस्याम्' (८-३-८५) इति विकल्पेन षत्वम् । दुहितुःपतिः । दुहतृपतिः। ननान्दुपतिः । ननान्दृपतिः ॥

२८८७. आनङ् ऋतो द्वन्द्वे ॥ २५ ॥ (९२१)

ऋकारान्तानां विद्यायोनिसम्बन्धवाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति । होतापोतारौ । नेष्टोद्गातारौ । प्रशास्ताप्रतिहर्तारौ । योनिसम्बन्धेभ्यः - मातापितरौ । यातानन्दरौ ।

नकारोच्चारणं (र) परत्वनिवृत्त्यर्थम् ।

ऋत इति किम्? पितृपितामहौ । 'पुत्रे' इत्यत्रानुवर्त्तते, 'ऋतः' इति च । तेन पुत्रशब्देऽप्युत्तरपदे ऋकारान्तस्यानङादेशो भवति । पितापुत्रौ । मातापुत्रौ ॥

२८८८. देवताद्वन्द्वे च ॥ २६ ॥ (९२२)

देवतावाचिनां यो द्वन्द्वस्तत्रोत्तरपदे पूर्वपदस्यानङादेशो भवति । इन्द्रावरुणौ (ऋ. ६-६८-१)। इन्द्रासोमौ (ऋ. ६-७२-३) । इन्द्राबृहस्पती (ऋ ४-६९-१).।

'द्वन्द्वे' इति वर्तमाने पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यार्थम् । अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्येतन्निपात्यते । तत्र ये लोके प्रसिद्धसाहचर्याः वेदे च ये सहवापनिर्दिष्टास्तेषामिह ग्रहणं भवति । तेन ब्रह्मप्रजापती, शिववैश्रवणावित्येवमादौ न भवति।

उभयत्र वायोः प्रतिषेधो वक्तव्यः (का.वा.१) । अग्निवायू । वाय्वग्नी ॥

२८८९. ईदग्नेः सोमवरुणयोः ॥ २७ ॥ (९२३)

सोम, वरुण- इत्येतयोर्देवताद्वन्द्वेऽग्नेरीकारादेशो भवति । अग्नीषोमौ (ऋ. १.९३.१) । अग्नीवरुणौ । 'अग्नेः स्तुत्स्तोमसोमाः' (८.३.८२) इति षत्वम् ॥

२८९०. इद् वृद्धौ ॥ २८ ॥ (९२५)

कृतवृद्धावुत्तरपदे देवताद्वन्द्वेऽग्नेरिकारादेशो भवति । आग्निवारुणी-मनड्वाहीमालभेत (काठ, १३.६) आग्निमारुतं कर्म क्रियते । अग्नीवरुणौ देवते अस्य, अग्नीमरुतौ देवते अस्येति तद्धितः । तत्र 'देवताद्वन्द्वे च' (७.३.२१) इत्युभयपदवृद्धौ कृतायामानङ्, ईत्वं च बाधितुमिकारः क्रियते ।

वृद्धाविति किम्? आग्नेन्द्रः । 'नेन्द्रस्य परस्य' (७.३.२४) इत्युत्तरपदवृद्धिः प्रतिषिध्यते।

इद् वृद्धौ विष्णोः प्रतिषेधो वक्तव्यः (म. भा.) । आग्नावैष्णवं चरुं निर्वपेत् (मै.सं. १.५.१) ॥

२८९१. दिवो द्यावा ॥ २९ ॥ (९२६)

दिवित्येतस्य 'द्यावा' इत्ययमादेशो भवति देवताद्वन्द्वे उत्तरपदे । द्यावाक्षामे (ऋ. ८.१८.१६) । द्यावाभूमी (ऋ. १०.६५.४) ॥

२८९२. दिवसश्च पृथिव्याम् ॥ ३० ॥ (९२७)

पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवः 'दिवस्' -इत्ययमादेशो भवति, चकाराद् 'द्यावा' च। दिवस्पृथिव्यौ (ऋ. २.२.३) द्यावापृथिव्यौ ।

अकारोच्चारणं सकारस्य विकाराभावप्रतिपत्त्यर्थम् । तेन रुत्वादीनि न भवन्ति।

कथम् 'द्यावा चिदस्मै पृथिवी नमेते' (ऋ २.१२.१३) इति? कर्तव्योऽत्र यत्नः ॥

२८९३. उषासोषसः ॥ ३१ ॥ (९२८)

उषसः 'उषासा' इत्ययमादेशो भवति देवताद्वन्द्वे उत्तरपदे । उषासासूर्यम् । उषासानक्ता (ऋ. १.१२२.२) ॥

२८९४. मातरपितरावुदीचाम् ॥ ३२ ॥ (९२९)

'मातरपितरौ' इत्युदीचामाचार्याणां मतेनारङादेशो मातृशब्दस्य निपात्यते । मातरपितरौ।

उदीचामिति किम्? मातापितरौ ॥

२८९५. पितरामातरा च च्छन्दसि ॥ ३३ ॥ (३५३८)

'पितरामातरा' इति छन्दसि निपात्यते । आ मा गन्तां पितरामातरा च (वा.सं. ९.१९)। पूर्वपदस्य अराङादेशो निपात्यते । उत्तरपदे तु 'सुपां सुलुक्' (७.१.३९) इति आकारादेशः, तत्र 'ऋतो ङिसर्वनामस्थानयोः' (७.३.११०) इति गुणः ।

छन्दसीति किम्? मातापितरौ ॥

२८९६. स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ ३४ ॥ (८३१)

भाषितः पुमान्येन समानायामाकृतावेकस्मिन्प्रवृत्तिनिर्मित्ते स भाषितपुंस्कः शब्दः । तदेतदेवं कथं भवति? भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते, तस्य प्रतिपादको यः शब्दः सोऽपि भाषितपुंस्कः । ऊङोऽभावः अनूङ्, भाषितपुंस्कादनूङ् यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनूङ् स्त्रीशब्दः । बहुव्रीहिरयम्, अलुग् निपातनात् पञ्चम्याः । तस्य

भाषितपुंस्कादनूङः स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति समानाधिकरणे उत्तरपदे स्त्रीलिङ्गे पूरणीप्रियादिवर्जिते । दर्शनीयभार्यः । श्लक्ष्णचूडः । दीर्घजङ्घः ।

स्त्रिया इति किम्? ग्रामणि ब्राह्मणकुलं दृष्टिरस्य ग्रामणिदृष्टिः । भाषितपुंस्कादिति किम्? खट्वाभार्यः । समानायामाकृताविति किम्? द्रोणीभार्यः ।

कथं गर्भिभार्यः, प्रसूतभार्यः, प्रजातभार्य इति । कर्तव्योऽत्र यत्नः ।

अनूङ इति किम्? ब्रह्मबन्धूभार्यः । समानाधिकरण इति किम्? कल्याण्या माता कल्याणीमाता । स्त्रियामिति किम्? कल्यणी प्रधानमेषां कल्याणीप्रधाना इमे.।

प्रधानपूरणीग्रहणं कर्तव्यम्, इह मा भूत्-कल्याणपञ्चमीकः पक्ष इति । 'अप् पूरणीप्रमाण्योः' ।

अपूरणीति किम्? कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीदशमाः । (५.४.११६) इत्यत्रापि प्रधानपूरणीग्रहणमेवेत्यप्प्रत्ययो न भवति.।

अप्रियादिष्विति किम्? कल्याणीप्रियः ।

प्रिया । मनोज्ञा । कल्याणी । सुभगा । दुर्भगा भक्तिः । सचिवा । अम्बा । कान्ता । क्षान्ता । समा । चपला । दुहिता । वामा प्रियादिः । दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात् सिद्धमिति समाधेयम् ॥

२८९७. तसिलादिष्वाकृत्वसुचः ॥ ३५ ॥ (८३६)

'पञ्चम्यास्तसिल्' (५.३.७) इत्यतः प्रभृति 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (५.४.१७) इति प्रागेतस्माद् ये प्रत्ययास्तेषु भाषितपुंस्कादनूङ्स्त्रियाः पुंवद्भवति । तस्याः शालायाः=ततः । तस्यां=तत्र यस्या=यतः । यस्यां=यत्र ।

तसिलदिषु परिगणनं कर्तव्यम्-त्रतसौ (५.३.१०), (५.३.७) । तरप्तमपौ (५.३.४७) (५.३.५५) चरट्जातीयरौ (५.३.५३), (५.३.६९) । कल्पब्देश्यदेशीयरः (५.३.६७) । रूपप्पाशपौ (५.३.६६), (५.३.४७) । थम्थालौ (५.३.२४), (५.३.३३)। दार्हिलौ (५.३.१५-१६) । तिल्तातिलौ (५.४.४१) ।

शसि बहवल्पार्थस्य पुंवद्भावो वक्तव्यः (म. भा.) । बहवीभ्यो देहि, अल्पाभ्यो देहि=बहुशो देहि, अल्पशो देहि ।

त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः (म. भा.) । पट्व्या भावः पटुत्वम् । पटुता । गुणवचनस्येति किम्? कठ्या भावः कठीत्वम्, कठीता ।

कथमाग्नायो देवताऽस्य आग्नेयः स्थालीपाक इति ? कर्तव्योऽत्र यत्नः ।

भस्याढे तद्धिते पुंवद्भवो वक्तव्यः (म. भा.) । हस्तिनीनां समूहो हास्तिकम्। अढ इति किम्? श्यैनेयः । रौहिणेयः ।

ठक्छसोश्च पुंवद्भावो वक्तव्यः (का.वा.१२) । भवत्याश्छात्त्रा भावत्काः । भवदीयाः ॥

२८९८. क्यङ्मानिनोश्च ॥ ३६ ॥ (८३७)

क्यङि परतो मानिनि च स्त्रिया भाषितपुंस्कादनूङ् पुंवद्भवति । एनी-एतायते । श्येनी-श्येतायते । मानिनि-दर्शनीयमानी अयमस्याः । दर्शनीयमानिनीयमस्याः ॥

मानिनोग्रहणामस्त्र्यर्थम्, असमानाधिकरणार्थं च (का.वा.१) । इह तु दर्शनीयमात्मानं मन्यते दर्शनीयमानिनीति पूर्वेणैव सिद्धम् ॥

२८९९. न कोपधायाः ॥ ३७ ॥ (८३८)

कोपधायाः स्त्रियाः पुंवद्भावो न भवति । पाचिकाभार्यः । कारिकाभार्यः । मद्रिकाभार्यः । वृजिकाभार्यः । मद्रिकाकल्प । वृजिकाकल्पा । मद्रिकायते । वृजिकायते । मद्रिकामानिनी । वृजिकायते । मद्रिकामानिनी । विजिकामानिनी । विलेपिकाया धर्म्यं वैलेपिकम् (म.भा.) ।

कोपधप्रतिषेधे तद्धितवुग्रहणं कर्तव्यम् (का.वा.१) । इह मा भूत्-पाकभार्यः, भेकभार्य इति॥

२९००. संज्ञापूरण्योश्च ॥ ३८ ॥ (९३९)

संज्ञायाः पूरण्याश्च स्त्रियाः पुंवद्भावो न भवति । दत्ताभार्यः । गुप्ताभार्यः । दत्तापाशा। गुप्तापाशा । दत्तायते । गुप्तायते । दत्तामानिनी । गुप्तामानिनी ।

पूरण्याः-पञ्चमीभार्यः । दशमीभार्यः । पञ्चमीपाशा । दशमीपाशा । पञ्चमीयते.। दशमीयते पञ्चमीमानिनी । दशमीमानिनी ।

२९०१. वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥ ३९ ॥ (९४०)

'न' इति वर्तते । वृद्धेर्निमित्तं यस्मिन् स वृद्धिनिमित्तस्तद्धितः स यदि रक्तेऽर्थे विकारे च न विहितः, तदन्तस्य स्त्रीशब्दस्य न पुंवद्भवति । स्रौघ्नीभार्यः। माथुरीभार्यः । स्रौघ्नीपाशा । स्रौघ्नीयते । माथुरीयते । स्रौघ्नीमानिनी । माथुरीमानिनी.।

वृद्धिनिमित्तस्येति किम्? मध्यमभार्यः । तद्धितस्येति किम्? काण्डलावभार्यः। बहुव्रीहिपरिग्रहः किमर्थः? तावद्भार्यः । यावद्भार्यः ।

अरक्तविकार इति किम्? कषायेण रक्ता काषायी, काषायी बृहतिका यस्य स काषायबृहतिकः लोहस्य विकारो लौही, लौही ईषा यस्य रथस्य स लौहेषः । खादिरेषः ॥

२९०२. स्वाङ्गाच्चेतोऽमानिनि ॥ ४० ॥ (८४१)

स्वाङ्गादुत्तरो य ईकारस्तदन्तायाः स्त्रिया न पुंवद्भवति अमानिनि परतः । दीर्घकेशीभार्यः। श्लक्ष्णकेशीभार्यः । दीर्घकेशीपाशा । श्लक्षणकेशीपाशा । दीर्घकेशीयते । श्लक्ष्णकेशीयते ।

स्वाङ्गादिति किम्? पटुभार्यः । ईत इति किम्? अकेशभार्यः । अमानिनीति किम्? दीर्घकेशमानिनी ॥

२९०३. जातेश्च ॥ ४१ ॥ (८४२)

जातेश्च स्त्रिया न पुंवद्भवति अमानिनि परतः । कठीभार्यः । बह्वृचीभार्यः। कठीपाशा । बह्वृचीपाशा । कठीयते । बह्वृचीयते ।

अमानिनीत्येव - कठमानिनी । बहवृचमानिनी ।

अयं प्रतिषेध औपसङ्ख्यानिकस्य पुंवद्भावस्य नेष्यते । [म.भा. ६.३.३५.११] हस्तिनीनां समूहो हास्तिकम् ॥

२९०४. पुंवत्कर्मधारयजातीयदेशीयेषु ॥ ४२ ॥ (८४६)

कर्मधारये समासे जातीय, देशीय-इत्येतयोश्च प्रत्यययो र्भाषितपुंस्कादनूङ् स्त्रियाः पुंवद्भवति प्रतिषेधार्थोऽयमारम्भः ।

'न कोपधायाः' (६.३.३७) इत्युक्तम्, तत्रापि भवति । पाचकवृन्दारिका । पाचकजातीया । पाचकदेशीया ।

'संज्ञापूरणयोश्च' (६.३.३८) इत्युक्तम्, तत्रापि भवति । दत्तवृन्दारिका । दत्तजातीया । दत्तदेशीया । पूरण्याः- पञ्चमवृन्दारिका । पञ्चमजातीया । पञ्चमदेशीया.।

'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (६.३.३९) इत्युक्तम्, तत्रापि भवति। स्त्रौध्नजातीया । स्त्रौघ्नदेशीया ।

'स्वाङ्गाच्चेतोऽमानिनि' (६.३.४०) इत्युक्तम्, तत्रापि भवति । श्लक्ष्णमुखवृन्दारिका । श्लक्ष्णमुखजातीया । श्लक्ष्णमुखदेशीया ।

'जातेश्च' (६.३.४१) इत्युक्तम्, तत्रापि भवति । कठवृन्दारिका । कठजातीया। कठदेशीया।

भाषितपुंस्कादित्येव-खट्वावृन्दारिका ।

अनूङित्येव-ब्रह्मबन्धूवृन्दारिका ॥

कुक्कुट्यादीनामण्डादिषु पुंवद्भावो वक्तव्यः (का.वा.१) । कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । मृग्याः क्षीरं मृगक्षीरम् । काक्याः शावः काकशावः ।

न वाऽस्त्रीपूर्वपदस्य विवक्षितत्वात् (का.वा.२) । स्त्रीत्वेन विना पूर्वपदार्थोऽत्र जातिः सामान्येन विवक्षितः ।

पुंवद्भावाद् ह्रस्वत्वं खिद्घादिषु भवति विप्रतिषेधेन (म. भा.) । खित्-कालिम्मन्या हरिणिम्मन्या । घादि-पट्वितरा । पट्वितमा । पट्विरूपा । पट्विकल्पा.। क-पट्विका । मृद्विका ।

इहेडबिड्, दरद्, पृथ, उशिजित्येते जनपदशब्दाः क्षत्त्रियवचनाः । तत्र तद्राजप्रत्ययस्य स्त्रियाम् 'अतश्च' (४.१.१७७) इति लुकि कृते इडबिट्वृन्दारिकेति विगृह्य समासः क्रियते । ततः पुंवद्भावेन ऐडबिडादयः पुंशब्दाः क्रियन्ते । ऐडबिडवृन्दारिका । औशिजवृन्दारिका । दारदवृन्दारिका । पार्थवृन्दारिका ॥

२९०५. घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ॥ ४३ ॥ (९८५)

घ, रूप, कल्प, चेलट्, ब्रुव, गोत्र, मत, हत-इत्येतेषु परतो भाषितपुंस्कात् परो यो ङीप्रत्ययस्तदन्तस्यानेकाचो ह्रस्वो भवति । घ-ब्राह्मणितरा, ब्राह्मणितमा । रूप-ब्राह्मणिरूपा । कल्प-ब्राह्मणिकल्पा । चेलट्-ब्राह्मणिचेली । ब्रुव-ब्राह्मणिब्रुवा। गोत्र-ब्राह्मणिगोत्रा । मत-ब्राह्मणिमता । हत ब्राह्मणिहता ।

घरूपकल्पाः प्रत्ययाश्चेलडादीन्युत्तरपदानि ।

'ब्रुव' इति - ब्रवीतीति ब्रुवः पचाद्यचि, वच्यादेशो गुणश्च निपातनान्न भवति ।

ङ्य इति किम्? दत्तातरा । गुप्तातरा । अनेकाच इति किम्? 'नद्याः शेषस्यान्यतरस्याम्' (६.३.४४) इति वक्ष्यति ।

भाषितपुंस्कादित्येव-आमलकीतरा । कुवलीतरा ॥

२९०६. नद्याः शेषस्यान्यतरस्याम् ॥ ४४ ॥ (९८६)

नद्याः शेषस्य घादिषु परतो ह्रस्वो भवति अन्यतरस्याम् । कश्च शेषः? अडी च या नदी ङ्यन्तं च यदेकाच् । ब्रह्मबन्धूतरा, ब्रह्मन्धुतरा । वीरबन्धूतरा, वीरबन्धुतरा। स्त्रितरा, स्त्रीतरा । स्त्रितमा, स्त्रीतमा ।

कृन्नद्याः प्रतिषेधो वक्तव्यः (म. भा. सौनागवा.) । लक्ष्मीतरा । तन्त्रीतरा ॥

२९०७. उगितश्च ॥ ४५ ॥ (९८७)

उगितश्च परस्या नद्या घादिषु अन्यतरस्यां ह्रस्वो भवति । श्रेयसितरा, श्रेयसीतरा, श्रेयस्तरा । विदुषितरा, विदुषीतरा, विद्वत्तरा ।

पुंवद्भावोऽप्यत्र पक्षे वक्तव्यः प्रकर्षयोगात्प्राक् स्त्रीत्वस्याविवक्षितत्वाद्वा सिद्धम्॥

२९०८. आन्महतः समानाधिकरणजातीययोः ॥ ४६ ॥ (८०७)

समानाधिकरण उत्तरपदे जातीये च प्रत्यये परतो महत आकारादेशो भवति। महादेवः । महाब्राह्मणः । महाबाहुः । महाबलः । जातीये-महाजातीयः ।

समानाधिकरणजातीययोरिति किम्? महतः पुत्रो महत्पुत्रः । लक्षणोक्तत्वादेवात्र न भविष्यतीति चेद्? बहुव्रीहावपि न स्याद्-महाबाहुरिति । तदर्थं समानाधिकरणग्रहणं वक्तव्यम् ।

अमहान् महान् सम्पन्नो महद्भूतश्चन्द्रमाः - इत्यत्र गौणत्वान्महदर्थस्य न भवत्यात्त्वम्।

महदात्त्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्वचनं चासमानाधिकरणार्थम् (का.वा.१).। महत्या घासः महाघासः । महत्याः करः महाकरः । महत्या विशिष्टः महाविशिष्टः ।

अष्टनः कपाले हविष्युपसंख्यानम् (का.वा.२) । अष्टाकपालं चरुं निर्वपेत् । हविषीति किम्? अष्टकपालं ब्राह्मणस्य ।

गवि च युक्तेऽष्टन उपसंख्यानं कर्त्तव्यम् (का.वा.३) । अष्टागवेन शकटेन । युक्त इति किम्? अष्टगवं ब्राह्मणस्य ।

गवि च युक्तेऽष्टन उपसंख्यानं कर्त्तव्यम् (का.वा.३) । अष्टागवेन शकटेन । युक्त इति किम्? अष्टगवं ब्राह्मणस्य ।

तपरकरणं विस्पष्टार्थम् ॥

२९०९. द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥ ४७ ॥ (८०८)

द्वि, अष्टन्-इत्येतयोराकारादेशो भवति संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योः। द्वादश । द्वाविंशतिः । द्वात्रिंशत् । अष्टादश । अष्टाविंशतिः । अष्टात्रिंशत् ।

द्व्यष्टन इति किम्? पञ्चदश । संख्यायामिति किम्? द्वैमातुरः । आष्टमातुरः। अबहुव्रीह्यशीत्योरिति किम्? द्वित्रः । द्विदशाः । द्व्यशीतिः ।

प्राक् शतादिति वक्तव्यम् [म. भा.] । इह मा भूत्-द्विशतम् । द्विसहस्रम् । अष्टशतम्। अष्टसहस्रम् ॥

२९१०. त्रेस्त्रयः ॥ ४८ ॥ (८०९)

'त्रि' इत्येतस्य 'त्रयस्' इत्ययमादेशो भवति संख्यायामबहुव्रीहयशीत्योः । त्रयोदश । त्रयोविंशतिः । त्रयस्त्रिंशत् ।

'संख्यायाम्' इत्येव-त्रैमातुरः ।

'अबहुव्रीहयशीत्योः' इत्येव-त्रिदशाः । त्र्यशीतिः ।

'प्राक् शतात्' इत्येव-त्रिशतम् । त्रिसहस्रम् ॥

२९११. विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥ ४९ ॥ (८१०)

चत्वारिंशत्प्रभृतौ सङ्ख्यायामुत्तरपदेऽबहुव्रीहयशीत्योः सर्वेषां द्व्यष्टन्, त्रि-इत्येतेषां यदुक्तं तद्विभाषा भवति । द्विचत्वारिंशत्, द्वाचत्वारिंशत् । त्रिंपञ्चाशत्, त्रयःपञ्चाशत् । अष्टपञ्चाशत्, अष्टापञ्चाशत् ।

सर्वेषाम्-ग्रहणं त्रयाणामपि यथा स्यात् ।

प्राक् शतादित्येव-द्विशतम् । अष्टशतम् । त्रिशतम् ॥

२९१२. हृदयस्य हृल्लेखयदण्लासेषु ॥ ५० ॥ (९८८)

हृदयस्य 'हृत्' इत्ययमादेशो भवति लेख, यत्, अण्, लास-इत्येतेषु परतः। हृदयं लिखतीति हृल्लेखः । यत्-हृदयस्य प्रियं हृद्यम् । अण्-हृदयस्येदं हार्दम्। लास-हृदयस्य लासो हृल्लासः ।

'लेख' इत्यणन्तस्य ग्रहणमिष्यते । घञि तु - हृदयस्य लेखो हृदयलेखः ।

एतदेव लेखग्रहणं ज्ञापकम्-उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्ताग्रहणस्य ॥

२९१३. वा शोकष्यञ्रोगेषु ॥ ५१ ॥ (९८९)

शोक, ष्यञ्, रोग- इत्येतेषु परतो हृदयस्य वा 'हृत्' इत्ययमादेशो भवति। हृच्छोकः, हृदयशोकः । ष्यञ्-सौहार्द्यम्, सौहृदयम् । ब्राह्मणादित्वात् ष्यञ् (५.१.१२४) । हृदादेशपक्षे 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' (७.३.१९) इत्युभयपदवृद्धिः । रोगे - हृद्रोगः, हृदयरोगः ।

हृदयशब्देन समानार्थो हृत्-शब्दः प्रकृत्यन्तरमस्ति, तेनैव सिद्धे विकल्पविधानं प्रपञ्चार्थम् ॥

२९१४. पादस्य पदाज्यातिगोपहतेषु ॥ ५२ ॥ (९९०)

पादस्य 'पद' इत्ययमादेशो भवति आजि, आति, ग, उपहत-इत्येतेषूत्तरपदेषु। पादाभ्यामजतीति पदाजिः । पादाभ्यामततीति पदातिः । 'अज्यतिभ्यां पादे च' (उणादि ५८०-८१) इत्यौणादिक इण्प्रत्ययः । तत्राजेर्वीभावो न भवति, अत एव निपातनात् । पादाभ्यां गच्छतीति पदगः । पादेनोपहतः पदोपहतः । पादशब्दो वृषादित्वादाद्युदात्तः, तस्य स्थाने पदादेश उपदेश एवान्तोदात्तो निपात्यते । तेन पदोपहत इति 'तृतीया कर्मणि' (६.२.४८) इति पूर्वपदप्रकृतिस्वरत्वेनान्तोदात्तत्वं भवति । पदाजिः, पदातिः, पदगः-इत्येतेषु कृत्स्वरेण समासस्यैवान्तोदात्तत्वम् ॥

२९१५. पद्यत्यतदर्थे ॥ ५३ ॥ (९९१)

यत्प्रत्यये परतः पादस्य पदित्ययमादेशो भवत्यतदर्थे । पादौ विध्यन्ति पद्याः शर्कराः । पद्याः कण्टकाः ।

अतदर्थ इति किम्? पादार्थमुदकं पाद्यम् ।

पद्भावे इके चरतावुपसङ्ख्यानम् (का.वा.१) । पादाभ्यां चरति पदिकः । 'पर्पादिभ्यः ष्ठन्' (४.४.१०) इति पादशब्दात् ष्ठन्प्रत्ययः ।

शरीरावयववचनस्य पादशब्दस्य ग्रहणमिहेष्यते, तेन 'पणपादमाषशताद्यद्' (५.१.३४) इत्यत्र पदादेशो न भवति । द्विपाद्यम् । त्रिपाद्यम् ॥

२९१६. हिमकाषिहतिषु च ॥ ५४ ॥ (९९२)

हिम, काषिन्, हति-इत्येतेषु पादशब्दस्य पदित्ययमादेशो भवति । हिम- पद्धिमम् । काषिन्-अथ पत्काषिणो यान्ति । हति - पद्धतिः ॥

२९१७. ऋचः शे ॥ ५५ ॥ (९९३)

ऋक्सम्बन्धिनः पादशब्दस्य शे परतः पदित्ययमादेशो भवति । पच्छो गायत्रीं शंसति । पादंपादं शंसतीति 'संख्यैकवचनाच्च वीप्सायाम्' (५.४.४३) इति शस्प्रत्ययः ।

ऋच इति किम्? पादशः कार्षापणं ददातीति ॥

२९१८. वा घोषमिश्रशब्देषु ॥ ५६ ॥ (९९४)

घोष, मिश्र, शब्द-इत्येतेषु चोत्तरपदेषु पादस्य वा 'पद्' इत्ययमादेशो भवति । पद्घोषः। पादघोषः । पन्मिश्रः, पादमिश्रः । पच्छब्दः, पादशब्दः ।

निष्के चेति वक्तव्यम् (का.वा. १) । पन्निष्कः, पादनिष्कः ॥

२९१९. उदकस्योदः संज्ञायाम् ॥ ५७ ॥ (९९५)

उदकशब्दस्य संज्ञायां विषये 'उद' -इत्ययमादेशो भवति उत्तरपदे परतः । उदमेघो नाम यस्य औदमेघिः पुत्रः । उदवाहो नाम यस्य औदवाहिः पुत्रः ।

संज्ञायामिति किम्? उदकगिरिः ।

संज्ञायामुत्तरपदस्य उदकशब्दस्य उदादेशो भवतीति वक्तव्यम् (का.वा.१) । लोहितोदः । नीलोदः । क्षीरोदः ॥

२९२०. पेषंवासवाहनधिषु च ॥ ५८ ॥ (९९६)

पेषं, वास, वाहन, धि- इत्येतेषु चोत्तरपदेषु उदकस्य 'उद' इत्ययमादेशो भवति । उदपेषं पिनष्टि 'स्नेहने पिषः' (३.४.६८) इति णमुल् । वास-उदकस्य वास उदवासः । वाहन-उदकस्य वाहन उदवाहनः । धि-उदकं धीयतेऽस्मिन्नित्युदधिः.॥

२९२१. एकहलादौ पूरयितव्येऽन्यतरस्याम् ॥ ५९ ॥ (९९७)

'उदकस्योदः' इति वर्त्तते । एकः=असहायः तुल्यजातीयेनानन्तरेण हलादिना.। हल् आदिर्यस्योत्तरपदस्य तदेकहलादिः, तस्मिन्नेकहलादौ पूरयितव्यवाचिन्यन्य-तरस्यामुदकस्य 'उद' इत्ययमादेशो भवति । उदकुम्भः, उदककुम्भः । उदपात्रम्। उदकपात्रम् ।

एकहलादाविति किम्? उदकस्थालम् । पूरयितव्य इति किम्? उदकपर्वतः॥

२९२२. मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ॥ ६० ॥ (९९८)

मन्थ, ओदन, सक्तु, बिन्दु, वज्र, भार, हार, वीवध, गाह-इत्येतेषूत्तरपदेषूदकस्य 'उद' इत्ययमादेशो भवति अन्यतरस्याम् । उदकेन मन्थ उदमन्थः, उदकमन्थः । ओदन-उदकेनौदनः उदौदनः, उदकौदनः । सक्तु-उदकेन सक्तुः उदसक्तुः, उदकसक्तुः । बिन्दु-उदकस्य बिन्दुः उदबिन्दुः उदकबिन्दुः । वज्र-उदकस्य वज्रः उदवज्रः, उदकवज्रः । भार-उदकं बिभर्तीति उदभारः उदकभारः । हार-उदकं हरतीति उदहारः, उदकहारः । वीवध-उदकस्य वीवधः उदवीवधः, उदकवीवधः.। गाह - उदकं गाहत इति उदगाहः, उदकगाहः ॥

२९२३. इको ह्रस्वोऽङ्यो गालवस्य ॥ ६१ ॥ (९९९)

इगन्तस्याङ्यन्तस्योत्तरपदे ह्रस्वो भवति गालवस्याचार्यस्य मतेनान्यतरस्याम्। ग्रामणिपुत्रः, ग्रामणीपुत्रः । ब्रह्मबन्धुपुत्रः, ब्रह्मबन्धूपुत्रः ।

इक इति किम्? खट्वापादः । मालापादः । अङ्य इति किम्? गार्गीपुत्रः । वात्सीपुत्रः ।

गालवग्रहणं पूजार्थम्, 'अन्यतरस्याम्' इति हि वर्तते ।

व्यवस्थितविभाषा चेयम् । तेनेह न भवति - कारीषगन्धीपुत्र इति ।

इयङुवङ्भाविनामव्ययानां च न भवति - श्रीकुलम्, भ्रूकुलम् । काण्डीभूतम्, वृषलीभूतम्।

भ्रुकुंसादीनां तु भवत्येव-भ्रुकुंसः, भ्रुकुटिः ।

अपर आह-भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् (म. भा.) भ्रकुंसः । भ्रकुटिः ॥

२९२४. एक तद्धिते च ॥ ६२ ॥ (१०००)

एकशब्दस्य तद्धिते उत्तरपदे च ह्रस्वो भवति । एकस्या आगतमेकरूप्यम्। एकमयम् । एकस्या भाव एकत्वम् । एकता । उत्तरपदे-एकयाः क्षीरम् एकक्षीरम्। एकदुग्धम् ।

लिङ्गविशिष्टस्य ग्रहणमेकशब्दह्रस्वत्वं प्रयोजयति । अचा हि गृह्यमाणमत्र विशेष्यते, न पुनरच् गृह्यमाणेनेति ॥

२९२५. ङ्यापोः संज्ञाछन्दसोर्बहुलम् ॥ ६३ ॥ (१००१)

ङ्यन्तस्याबन्तस्य च संज्ञाछन्दसोर्बहुलं ह्रस्वो भवति । ङ्यन्तस्य संज्ञायाम्-रेवतिपुत्रः, रोहिणिपुत्रः, भरणिपुत्रः । न च भवति - नान्दीकरः, नान्दीघोषः, नान्दीविशालः । ङ्यन्तस्य छन्दसि - कुमारिदा, उर्विदा [कुमारिदा प्रफर्विदा । काठ. ३९.९] । न च भवति = फाल्गुनीपौर्णमासी, जगतीच्छन्दः ।

आबन्तस्य संज्ञायाम्-शिलवहम्, शिलप्रस्थम् । न च भवति - लोमकागृहम्। लोमकाषण्डम् । आबन्तस्य छन्दसि - अजक्षीरेण जुहोति, ऊर्णमृदा [ऊर्णम्रदा]पृथिवी विश्ववधायसम् । न च भवति - ऊर्णा सूत्रेणकवयो वयन्ति ॥

२९२६. त्वे च ॥ ६४ ॥ (१००२)

त्वप्रत्यये परतो ङ्यापोर्बहुलं ह्रस्वो भवति । तदजाया भावः अजत्वम् । अजात्वम् । तद्रोहिण्या भावो रोहिणित्वम् (काठ. सं. ८.१) संज्ञायामसम्भ-वाच्छन्दस्येवोदाहरणानि भवन्ति॥

२९२७. इष्टकेषीकामालानां चिततूलभारिषु ॥ ६५ ॥ (१००६)

इष्टकेषीकामालानां चित्, तूल, भारिन्-इत्येतेषूत्तरपदेषु यथासंख्यं ह्रस्वो भवति । इष्टकचितम् । इषीकतूलम । मालभारिणी कन्या ।

इष्टकादिभ्यस्तदन्तस्यापि ग्रहणं भवति । पक्वेष्टकचितम् । मुञ्जेषीकतूलम्। उत्पलमालभारिणी कन्या ॥

२९२८. खित्यनव्ययस्य ॥ ६६ ॥ (२९४३)

खिदन्ते उत्तरपदेऽनव्ययस्य ह्रस्वो भवति । कालिम्मन्या । हरिणिम्मन्या । मुमा ह्रस्वो न बाध्यते; अन्यथा हि ह्रस्वशासनमनर्थकं स्यात् ।

अनव्ययस्येति किम्? दोषामन्यमहः । दिवामन्या रात्रिः ।

'अनव्ययस्य' इत्येतदेव ज्ञापकमिह खिदन्तग्रहणस्य ॥

२९२९. अरुर्द्विषदजन्तस्य मुम् ॥ ६७ ॥ (२९४२)

अरुस्, द्विषत्-इत्येतयोरजन्तानां च खिदन्त उत्तरपदे मुमागमो भवति अनव्ययस्य । अरुन्तुदः । द्विषन्तपः । अजन्तानाम्-कालिम्मन्या ।

अरुर्द्विषदजन्तस्येति किम्? विद्वन्मन्यः ।

अनव्ययस्येत्येव-दोषामन्यमहः । दिवामन्या रात्रिः ।

अन्तग्रहणं किम्? कृताजन्तकार्यप्रतिपत्त्यर्थम् । अतो ह्रस्वे कृते मुम्भवति॥

२९३०. इच एकाचोऽम्प्रत्ययवच्च ॥ ६८ ॥ (२९९४)

इजन्तस्य एकाचः खिदन्ते उत्तरपदेऽमागमो भवति, अम्प्रत्ययवच्च द्वितीयैकवचनवच्च स भवति । अमिति हि द्विरावर्तते । गाम्मन्यः । स्त्रीम्मन्यः, स्त्रियम्मन्यः । नरम्मन्यः । श्रियम्मन्यः । भ्रुवम्मन्यः । 'अम्प्रत्ययवच्च' - इत्यतिदेशादात्वपूर्वसवर्णगुणेयङुवङादेशा भवन्ति।

इच इति किम्? त्वङ्मन्यः । एकाच इति किम्? लेखाभ्रुम्मन्यः ।

अथेह कथं भवितव्यम्-श्रियमात्मानं ब्राह्मणकुलं मन्यत इत्युपक्रम्य? 'श्रिमन्यमिति भवितव्यम्' इति भाष्ये स्थितम् । तत्रेदं भाष्यकारस्य दर्शनम्-अत्र विषये परित्यक्तस्वलिङ्गः श्रीशब्दो ब्राह्मणकुले वर्तते, यथा-प्रष्ठादयः स्त्रियाम् । तत्र 'स्वमोर्नपुंसकात्' (७.१.२३) इत्यमो लुग्भवति ॥

२९३१. वाचंयमपुरन्दरौ च ॥ ६९ ॥ (२९५७)

वाचंयम, पुरन्दर-इत्येतौ निपात्येते । वाचंयम आस्ते । पुरं दारयतीति पुरन्दरः ॥

२९३२. कारे सत्यागदस्य ॥ ७० ॥ (१००७)

कारशब्द उत्तरपदे सत्य, अगद-इत्येतयोर्मुमागमो भवति । सत्यं करोतीति, सत्यस्य वा कारः सत्यङ्कारः । एवम्-अगदङ्कारः ।

अस्तुसत्यागदस्य कार इति वक्तव्यम् (का.वा.१) । अस्तुङ्कारः ।

भक्षस्य छन्दसि कारे मुम् वक्तव्यः (का.वा.१) । भक्षं करोतीति, भक्षस्य वा कारः भक्षङ्कारः । छन्दसीति किम्? भक्षकारः ।

चेनोर्भव्ययां मुम्वक्तव्यः (का.वा. ३) । धेनुम्भव्या ।

लोकस्य पृणे मुम्वक्तव्यः (का.वा.४) लोकम्पृणः ।

इत्येऽनभ्याशस्य मुम्वक्तव्यः (का.वा.५) अनभ्याशमित्यः ।

भ्राष्ट्राग्न्योरिन्धे मुम्वक्तव्यः (का.वा.६) भ्राष्ट्रमिन्धः । अग्निमिन्धः ।

गिलेऽगिलस्य मुम्वक्तव्यः (का.वा.७) तिमिङ्गिलः । अगिलस्येति किम्? गिलगिलः ।

गिलगिले चेति वक्तव्यम् (का.वा.८) तिमिङ्गिलगिलः ।

उष्णभद्रयोः करणे मुम्वक्तव्यः (का.वा.९) उष्णङ्करणम् । भद्रङ्करणम् ।

सूतोग्रराजभोजमेर्वित्येतेभ्य उत्तरस्य दुहितृशब्दस्य पुत्रडादेशो वा वक्तव्यः (का.वा. १०) सूतपुत्री । सूतदुहिता । उग्रपुत्री । उग्रदुहिता । राजपुत्री । राजदुहिता। भोजपुत्री । भोजदुहिता । मेरुपुत्री । मेरुदुहिता ।

केचित्तु शार्ङ्गरवादिषु पुत्रशब्दं पठन्ति, तस्य पुत्रीति भवति ।

अन्यत्रापि हि दृश्यते- शैलपुत्रीति ॥

२९३३. श्येनतिलस्य पाते ञे ॥ ७१ ॥ (१२६८)

श्येन, तिल-इत्येतयोः पातशब्द उत्तरपदे ञप्रत्यये परे मुमागमो भवति । श्येनपातोऽस्यां क्रीडायाम् श्यैनम्पाता मृगया । तैलम्पाता ।

ञ इति किम्? श्येनपातः ॥

२९३४. रात्रेः कृति विभाषा ॥ ७२ ॥ (१००८)

रात्रेः कृदन्ते उत्तरपदे विpषा मुमागमो भवति । रात्रिञ्चरः, रात्रिचरः । रात्रिमटः, रात्र्यटः। अप्राप्तविभाषेयम् ।

खिति हि नित्यं मुम् भवति - रात्रिम्मन्यः ॥

२९३५. नलोपो नञः ॥ ७३ ॥ (७५७)

नञो नकारस्य लोपो भवत्युत्तरपदे । अब्राह्मणः । अवृषलः । असुरापः । असोमपः ।

नञो नलोपोऽवक्षेपे तिङ्युपसंख्यानं कर्तव्यम् (का.वा.१) । अपचसि त्वं जाल्म । अकरोषि त्वं जाल्म ॥

२९३६. तस्मान्नुडचि ॥ ७४ ॥ (७५८)

तस्माल्लुप्तनकारान्नञः नुडागमो भवति अजादावुत्तरपदे । अनजः । अनश्वः।

तस्मादिति किम्? नञ एव हि स्यात् । पूर्वान्ते हि 'ङमो ह्रस्वादचि ङमुण्नित्यम्' [८.३.३२] इति ङमुट् प्राप्नोति ॥

२९३७. नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु प्रकृत्या ॥७५॥ (७५९)

नभ्राट्, नपात्, नवेदाः, नासत्याः, नमुचि, नकुल, नख, नपुंसक, नक्षत्र, नक्र, नाक- इत्येतेषु नञ् प्रकृत्या भवति । न भ्राजत इति नभ्राट्-भ्राजतेः क्विबन्तस्य नञ्समासः । न पातीति नपात्-पातिः शत्रन्तः । न वेत्तीति नवेदाः - वेत्तिरसुन्प्रत्ययान्तः.। नासत्याः-सत्सु साधवः सत्याः, न सत्या असत्याः, न असत्याः न आसत्याः नासत्याः । न मुञ्चतीति नमुचिः - मुचेरौणादिकः किप्रत्ययः। नास्य कुलमस्ति नकुलः । नख-नास्य खमस्तीति नखम् । नपुंसक-न स्त्री न पुमान्नपुंसकम्-स्त्रीपुंसयोः पुंसकभावो निपात्यते । नक्षत्र-न क्षरते क्षीयत इति वा नक्षत्रम्-क्षियः, क्षरतेर्वा क्षत्रमिति निपात्यते । नक्र-न क्रामतीति नक्रः - क्रमेर्डप्रत्ययो निपातनात् । नाक-नास्मिन्नकमस्ति नाकम् ।

२९३८. एकादिश्चैकस्य चादुक् ॥ ७६ ॥ (८११)

एकादिश्च नञ्प्रकृत्या भवति एकशब्दस्य चादुगागमो भवति । एकेन न विंशतिः एकान्नविंशतिः । एकान्नत्रिंशत् । 'तृतीया' इति योगविभागात्समासः ।

पूर्वान्तोऽयमादुक् क्रियते । पदान्तलक्षणोऽत्रानुनासिको विकल्पेन यथा स्याद् इति ॥

२९३९. नगोऽप्राणिष्वन्यतरस्याम् ॥ ७७ ॥ (७६०)

नञ्प्रकृत्या भवत्यन्तरस्याम् । नगा वृक्षाः, अगा वृक्षाः । नगाः पर्वताः, अगाः पर्वताः । न गच्छन्तीति नगाः । गमेर्डप्रत्ययः (उणादि २३५) ।

अप्राणिष्विति किम्? अगो वृषलः शीतेन ॥

२९४०. सहस्य सः संज्ञायाम् ॥ ७८ ॥ (१००९)

सहशब्दस्य स इत्ययमादेशो भवति संज्ञायां विषये । साश्वत्थम् । सपलाशम्। सशिंशपम् ।

संज्ञायामिति किम्? सहयुध्वा । सहकृत्वा ।

सादेश उदात्तो निपात्यते (म. भा.) । उदात्तानुदात्तवतो हि सहशब्दस्यान्तर्यतः स्वरितः स्यात् स च निपातस्वरः पूर्वपदप्रकृतिस्वरत्वं यत्र, तत्र उपयुज्यते । अन्यत्र समासान्तोदात्तत्वेन बाध्यत एव - सेष्टि सपशुबन्धमिति ॥

२९४१. ग्रन्थान्ताधिके च ॥ ७९ ॥ (१०१०)

ग्रन्थान्ते, अधिके च वर्त्तमानस्य सहशब्दस्य स इत्ययमादेशो भवति । सकलं ज्यौतिषमधीते समुहूर्तम् । ससंग्रहं व्याकरणमधीयते । कलान्तम्, मुहूर्त्तान्तम्, संग्राहन्तमिति 'अन्तवचने' (२.१.६) - अव्ययीभावः समासः । तत्र 'अव्ययीभावे चाकाले' (६.३.८१) इति कालवाचिन्युत्तरपदे सभावो न प्राप्नोतीत्ययमारम्भः ।

अधिके-सद्रोणा खारी । समाषः कार्षापणः । सकाकिणीको माषः ॥

२९४२. द्वितीये चानुपाख्ये ॥ ८० ॥ (१०११)

द्वयोः सहयुक्तयोरप्रधानो यः स द्वितीयः । उपाख्यायते=प्रत्यक्षत उपलभ्यते यः स उपाख्यः, उपाख्यादन्योऽनुपाख्यः=अनुमेयस्तस्मिन् द्वितीयेऽनुपाख्ये सहस्य स इत्ययमादेशो भवति । साग्निः कपोतः । सपिशाचा वात्या । सराक्षसीका शाला । अग्न्यादयः साक्षादनुपलभ्यमानाः कपोतादिभिरनुमीयमानास्तदुपाख्या भवन्ति॥

२९४३. अव्ययीभावे चाकाले ॥ ८१ ॥ (६६०)

अव्ययीभावे च समासेऽकालवाचिन्युत्तरपदे सहस्य स इत्ययमादेशो भवति। सचक्रंधेहि। सधुरं प्राज ।

अकाल इति किम्? सहपूर्वाह्णम् ॥

२९४४. वोपसर्जनस्य । ८२ ॥ (८४९)

उपसर्जनसर्वावयवः समास उपसर्जनम्, यस्य सर्वेऽवयवा उपसर्जनीभूताः स सर्वोपसर्जनो बहुव्रीहिर्गृह्यते । तदवयवस्य सहशब्दस्य वा स इत्ययमादेशो भवति । सपुत्रः । सहपुत्रः । सच्छात्रः । सहच्छात्रः ।

उपसर्जनस्येति किम्? सहयुध्वा । सहकृत्वा ।

सहकृत्वप्रियः, प्रियसहकृत्वेति, इह बहुव्रीहौ यदुत्तरपदं तत्परः सहशब्दो न भवतीति सभावो न भवति ॥

२९४५. प्रकृत्याशिष्यगोवत्सहलेषु ॥ ८३ ॥ (८५०)

प्रकृत्या सहशब्दो भवति आशिषि विषयेऽगोवत्सहलेषु । स्वस्ति देवदत्ताय सहपुत्राय सहच्छात्राय सहामात्याय ।

अगोवत्सहलेष्विति किम्? स्वस्ति भवते सहगवे, सगवे । सहवत्साय, सवत्साय । सहहलाय, सहलाय । 'वोपसर्जनस्य' (६.३.८२) इति पक्षे भवत्येव सभावः ॥

२९४६. समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु ॥ ८४ ॥ (१०१२)

'सः' इति वर्तते । समानस्य 'स' इत्ययमादेशो भवति छन्दसि विषये मूर्द्धन्, प्रभृति, उदर्क-इत्येतान्युत्तरपदानि वर्ज्जयित्वा । अनुभ्राता॒ स॒गं॑भ्र्यः (वा.सं.४.२०) । अनुसखा॒ सयू॑थ्यः (वा.सं. ४.२०) यो न॒: सन॑त्यः (ऋ. २.३०.९)। समानो गर्भः सगर्भः, तत्र भवः सगर्भ्यः । 'सगर्भसयूथसनुताद्यत्' (४.४.१३४) इति यप्रत्ययः ।

अमूर्धप्रभृत्युदर्केष्विति किम्? समानमूर्धा । समानप्रभृतयः । समानोदर्काः।

'समानस्य' इति योगविभाग इष्टप्रसिध्यर्थः क्रियते । तेन सपक्षः, साधर्म्यम्, सजातीयः - इत्येवमादयः सिद्धा भवन्ति ॥

२९४७. ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥ ८५ ॥ (१०१३)

ज्योतिस्, जनपद, रात्रि, नाभि, नामन्, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन, बन्धु-इत्येतेषूत्तरपदेषु समानस्य 'स' इत्ययमादेशो भवति । सज्योतिः । सजनपदः । सरात्रिः । सनाभिः । सनामा । सगोरः । सरूपः । सस्थानः । सवर्णः.। सवयाः । सवचनः । सबन्धुः ॥

२९४८. चरणे ब्रह्मचारिणि ॥ ८६ ॥ (१०१४)

चरणे गम्यमाने ब्रह्मचारिण्युत्तरपदे समानस्य स इत्ययमादेशो भवति । समानी ब्रह्मचारी। ब्रह्म=वेदः, तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म, तच्चरतीति ब्रह्मचारी । समानः, तस्यैव ब्रह्मणः, समानत्वादित्ययमर्थो भवति । समाने ब्रह्मणि व्रतचारी=सब्रह्मचारीति ॥

२९४९. तीर्थे ये ॥ ८७ ॥ (१०१५)

तीर्थशब्दे उत्तरपदे यत्प्रत्ययपरे परतः समानस्य स इत्ययमादेशो भवति । सतीर्थ्यः । 'समानतीर्थे वासी' (४.४.१०७) इति यत्प्रत्ययः ॥

२९५०. विभाषोदरे ॥ ८८ ॥ (१०१६)

उदरशब्द उत्तरपदे यत्प्रत्ययान्ते समानस्य विभाषा स इत्ययमादेशो भवति । सोदर्यः, समानोदर्यः । 'समानोदरे शयित ओ चोदात्तः' (४.४.१०८) इति यत् ॥

२९५१. दृग्दृशवतुषु ॥ ८९ ॥ (१०१७)

दृक्, दृश, वतु-इत्येतेषु परतः समानस्य स इत्ययमादेशो भवति । सदृक्, सदृशः । 'त्यदादिषु दृशोऽनालोचने कञ्च' (३.२.६०) इत्यत्र 'समानान्ययोश्चेति वक्तव्यम्' (का.वा.) इति कञ्क्विनौ प्रत्ययौ क्रियेते ।

दृक्षे चेति वक्तव्यम् (का.वा.१) । सदृक्षः ॥

दृशेः क्सप्रत्ययोऽपि तत्रैव वक्तव्यः (म. भा.) । वतुग्रहणमुत्तरार्थम् ॥

२९५२. इदंकिमोरीश्की ॥ ९० ॥ (१०१८)

इदम्, किम्-इत्येतयोरीश्, की-इत्येतौ यथासङ्ख्यमादेशौ भवतो दृग्दृशवतुषु। ईदृक्, ईदृशः, इयान् । कीदृक्, कीदृशः, कियान् । 'किमिदम्भ्यां वो घः' (५.२.४०) इति वतुप् ।

दृक्षे चेति वक्तव्यम् (म. भा.) । ईदृक्षः । कीदृक्षः ॥

२९५३. आ सर्वनाम्नः ॥ ९१ ॥ (४३०)

सर्वनाम्न आकारादेशो भवति दृग्दृशवतुषु । तादृक्, तादृशः, तावान् । यादृक्, यादृशः, यावान् ।

दृक्षे चेति वक्तव्यम् (म. भा.) । तादृक्षः । यादृक्षः ॥

२९५४. विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥ ९२ ॥ (४१८)

विष्वक्, देव-इत्येतयोः सर्वनाम्नश्च टेः अद्रीत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्त उत्तरपदे । विष्वगञ्चतीति विष्वद्र्यङ् (७.२५.१) । देवद्र्यङ् । सर्वनाम्नः - तद्र्यङ् (तै.सं. ५.५.१.२) । यद्र्यङ् (तै.सं. ५.५.१.१) ।

अद्रिसध्र्योरन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम् (का.वा.१) । तत्र यणादेशे कृते 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८.२.४) इत्येष स्वरो भवति ।

विष्वग्देवयोरिति किम्? अश्वाची । अञ्चताविति किम्? विष्वग्युक् । वप्रत्यय इति किम्? विष्वगञ्चनम् ।

वप्रत्ययग्रहणमन्यत्र धातुग्रहणे तदादिविधिप्रतिपत्त्यर्थम् । तेनायस्कृतम्, अयस्कार इत्यत्र 'अतः कृकमिकंसकुम्भपात्र' (८.३.४६) इति सत्वं भवति ।

छन्दसि स्त्रियां बहुलमिति वक्तव्यम् (म. भा.) । विश्वाची च घृताची च (ऋ. ७.४३.३)। (ऋ. १.१६७.३) त्यत्र न भवति । कद्रीचीत्यत्र तु भवत्येव ॥

२९५५. समः समि ॥ ९३ ॥ (४२१)

समित्येतस्य 'समि' -इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदे । सम्यक्, सम्यञ्चौ, सम्यञ्चः ॥

२९५६. तिरसस्तिर्यलोपे ॥ ९४ ॥ (४२३)

'तिरस्' इत्येतस्य 'तिरि' इत्ययमादेशो भवत्यञ्चतौ वप्रत्ययान्त उत्तरपदेऽलोपे=यदाऽस्य लोपो न भवति । तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः ।

अलोप इति किम्? तिरश्चा । तिरश्चे । 'अचः' इत्यकारलोपः ॥

२९५७. सहस्य सध्रिः ॥ ९५ ॥ (४२२)

सहेत्यस्य 'सध्रि' इत्ययमादेशो भवत्यञ्चतौ वप्रत्ययान्ते उत्तरपदे । सध्र्यङ्, सध्र्यञ्चौ, सध्र्यञ्चः । सध्रीचः । सध्रीचा ।

२९५८. सध मादस्थयोश्छन्दसि ॥ ९६ ॥ (३५२९)

छन्दसि विषये माद, स्थ-इत्येतयोरुत्तरपदयोः सहस्य 'सध' -इत्ययमादेशो भवति । सधमादो द्युम्न्य एकास्ताः [सधमादौ द्युम्निनीरापः । वा सं. १०.७] सधस्थाः (तै.सं. ५.७.७.१)॥

२९५९. द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥ ९७ ॥ (९४१)

द्वि, अन्तर्-इत्येताभ्यामुपसर्गाच्चोत्तरस्याबित्येतस्य ईकारादेशो भवति । द्वीपम्। अन्तरीपम् । उपसर्गात्-समीपम् । वीपम् । नीपम् ।

समाप ईत्वे प्रतिषेधो वक्तव्यः (क.वा.१) । समापं नाम देवयजनम् ।

अपर आह-इत्वमनवर्णादिति वक्तव्यम् [म. भा.]। इह मा भूत् - प्रापम्, परापम् ।

अप्शब्दं प्रति क्रियायोगाभावाद् उपसर्गग्रहणं प्राद्युपलक्षणार्थम् ।

२९६०. ऊदनोर्देशे ॥ ९८ ॥ (९४२)

अनोरुत्तरस्याप ऊकारादेशो भवति देशाभिधाने । अनूपो देशः ।

देश इति किम्? अन्वीपम् ।

दीर्घोच्चारणमवग्रहार्थम् । अनु ऊपोऽनूप इति ॥

२९६१. अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोति-कारकरागच्छेषु ॥९९॥ (१०२५)

अषष्ठीस्थस्य अतृतीयास्थस्य चान्यशब्दस्य दुगागमो भवति आशिस्, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक, राग, छ-इत्येतेषु परतः । अन्या आशीः अन्यदाशीः । अन्या आशा अन्यदाशा । अन्या आस्था अन्यदास्था । अन्य आस्थितः अन्यदास्थितः । अन्य उत्सुकः अन्यदुत्सुकः । अन्या ऊतिः अन्यदूतिः। अन्यः कारकः अन्यत्कारकः । अन्यो रागः अन्यद्रागः । अन्यस्मिन् भवः अन्यदीयः। गहादिष्वन्यशब्दो (४.२.१३८) द्रष्टव्यः ।

अषष्ठ्यतृतीयास्थस्येति किम्? अन्यस्य आशीः अन्याशीः । अन्येन आस्थितः अन्यास्थितः ॥

दुगागमोऽविशेषेण वक्तव्यः कारकच्छयोः ।
षष्ठीतृतीययोर्नेष्ट आशीरादिषु सप्तसु ॥

अन्यस्य कारकम् अन्यत्कारकम् । अन्यस्येदम् अन्यदीयम् ।

अस्य च द्विर्नञ्ग्रहणं लिङ्गम् ॥

२९६२. अर्थे विभाषा । १०० ॥ (१०२६)

अर्थशब्दे उत्तरपदे अन्यस्य विभाषा दुगागमो भवति । अन्यदर्थः, अन्यार्थः॥

२९६३. कोः कत्तत्पुरुषेऽचि ॥ १०१ ॥ (१०२७)

'कु' इत्येतस्य कदित्ययमादेशो भवति तत्पुरुषे समासेऽजादावुत्तरपदे । कदजः । कदश्वः। कदुष्ट्रः । कदन्नम् ।

तत्पुरुष इति किम्? कूष्ट्रो राजा । अचीति किम्? कुब्राह्मणः । कुपुरुषः ।

कद्भावे त्रावुपसंख्यानम् (का.वा.१) । कुत्सितास्त्रयः कत्त्रयः ॥

२९६४. रथवदयोश्च ॥ १०२ ॥ (१०२८)

'रथ' , 'वद' -इत्येतयोश्चोत्तरपदयोः कोः 'कत्' इत्ययमादेशो भवति । कद्रथः । कद्वदः॥

२९६५. तृणे च जातौ ॥ १०३ ॥ (१०२९)

तृणशब्दे उत्तरपदे जातावभिधेयायां कोः कदादेशो भवति । कत्तृणा नाम जातिः ।

जाताविति किम्? कुत्सितानि तृणानि कुतृणानि ॥

२९६६. का पथ्यक्षयोः ॥ १०४ ॥ (१०३०)

पथिन्, अक्ष-इत्येतयोरुत्तरपदयोः कोः 'का' इत्ययमादेशो भवति । कापथः। काक्षः ॥

२९६७. ईषदर्थे च ॥ १०५ ॥ (१०३१)

ईषदर्थे वर्त्तमानस्य कोः 'का' इत्ययमादेशो भवति । कामधुरम् । कालवणम्। अजादावपि परत्वात् कादेश एव भवति । काम्लम् । कोष्णम् ॥

२९६८. विभाषा पुरुषे ॥ १०६ ॥ (१०३२)

पुरुषशब्दे उत्तरपदे विभाषा कोः 'का' इत्ययमादेशो भवति । कापुरुषः । कुपुरुषः । अप्राप्तविभाषेयम् ।

ईषदर्थे तु पूर्वविप्रतिषेधेन नित्यं 'का' भवति । ईषत्पुरुषः कापुरुषः ॥

२९६९. कवञ्चोष्णे ॥ १०७ ॥ (१०३३)

उष्णशब्द उत्तरपदे कोः कवमित्ययमादेशो भवति, का च विभाषा । कवोष्णम्। कोष्णम्। कदुष्णम् ॥

२९७०. पथिचच्छन्दसि ॥ १०८ ॥ (३५३०)

पथिशब्द उत्तरपदे छन्दसि विषये कोः कव, का-इत्येतावादेशौ भवतो विभाषा । कवपथः। कापथः । कुपथः ॥

१९७१. पृषोदरादीनि यथोपदिष्टम् ॥ १०९ ॥ (१०३४)

पृषोदरादीनि शब्दरूपाणि, येषु लोपागमवर्णविकाराः शास्त्रेण न विहिताः, दृश्यन्ते च, तानि यथोपदिष्टानि साधूनि भवन्ति । यानि यथोपदिष्टानि=शिष्टैरुच्चारितानि, प्रयुक्तानि, तानि तथैवानुगन्तव्यानि । पृषदुदरं यस्य पृषोदरम् । पृषद् उद्वानं यस्य पृषोद्वानम् । अत्र तकारलोपो भवति । वारिवाहको बलाहकः । पूर्वशब्दस्य बशब्द आदेश उत्तरपदादेश्च लत्वम् । जीवनस्य मूतो जीमूतः । वनशब्दस्य लोपः । शवानां शयनं श्मशानम् । शवशब्दस्य श्मादेशः शयनशब्दस्यापि शानशब्द आदेशः । ऊर्ध्वं खमस्येति उलूखलम् । ऊर्ध्वखशब्दयोरुलू, खल-इत्येतावादेशौ भवतः । पिशिताशः पिशाचः । पिशिताशशब्दयोर्यथायोगं पिशाचशब्दावादेशौ । ब्रुवन्तोऽस्यां सीदन्तीति बृसी । सदेरधिकरणे डट् प्रत्ययः । ब्रुवच्छब्दस्य चोपपदस्य वृशब्द आदेशो भवति । महयां रौतीति मयूरः । रौतेरचि टिलोपः । महीशब्दस्य मयूभावः । एवमन्येऽपि अश्वत्थकपित्थप्रभृतयो यथायोगमनुगन्तव्याः ।

दिक्शब्दस्य उत्तरस्य तीरस्य तारभावो वा भवति (का.वा.१) । दक्षिणतीरम्, दक्षिणतारम्, उत्तरतीरम्, उत्तरतारम् ।

वाचो वादेर्डत्वं च ल्भावश्चोत्तरपदस्येञि प्रत्यये भवति (का.वा.२) । वाचं वदतीति वाग्वादः । तस्यापत्यं वाड्वालिः ।

षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं च भवति (का.वा.३) । षड् दन्ता अस्य षोडन् । षट् च दश च षोडश ।

धासु वा षष उर्वं भवति उत्तरपदादेश्च ष्टुत्वम् [म. भा.]। षोढा, षड्धा कुरु । बहुवचननिर्द्देशो नानाधिकरणवाचिनो धाशब्दस्य प्रतिपत्त्यर्थः । इह मा भूत्-षट् दधाति धयति वा षड्धेति ॥

दुरो दाशनाशदभध्येषूत्वं वक्तव्यमुत्तरपदादेश्च ष्टुत्वम् । [म. भा.] कृच्छ्रेण दाश्यते नाश्यते दभ्ये च यः स दूडाशः । दूणाशः । दूडभः । दम्भेः खल्वनुनासिकलोपो निपातनात् । दुष्टं ध्यायतीति दूढ्यः । दुःशब्दोपपदस्य ध्यायतेः, 'आतश्चोपसर्गे' (३.१.१३६) इति कप्रत्ययः ।

स्वरो रोहतौ छन्दस्युत्वं वक्तव्यम् (का.वा.५) । जाय एहि सुवो [स्वो] रोहाव (तै.सं. १.७.९.१) ।

पीवोपवसनादीनां च लोपो वक्तव्यः (का.वा.६) । पीवोपवसनानां (ऋ.खि. ५.७.२) पयीपवसनानाम् ।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

२९७२. संख्याविसायपूर्वस्याहनस्याहनन्यतरस्यां ङौ ॥ ११० ॥ (२३८)

संख्या, वि, साय इत्येवम्पूर्वस्याहनशब्दस्य स्थाने अहनित्ययमादेशो भवत्यन्यतरस्यां ङौ परतः । द्वयोरहनोर्भवः द्व्यहनः । त्र्यहनः । द्व्यह्नि, द्व्यहनि । त्र्यह्नि, त्र्यहनि । द्व्यह्ने । त्र्यह्ने । व्यपगतमहो व्यहनः । व्यह्नि, व्यहनि । व्यह्ने । सायमहनः सायाहनः । सायाह्नि, सायाहनि । सायाह्ने ।

एकदेशिसमासः पूर्वादिभ्योऽन्यस्यापि भवतीत्येतदेव विसायपूर्वस्याहनस्य ग्रहणं ज्ञापकम्। तेन मध्यमहनो मध्याह्न इत्यपि भवति ।

संख्याविसायपूर्वस्येति किम्? पूर्वाह्णे । अपराह्णे ॥

२९७३. ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ १११ ॥ (१७४)

ढकाररेफयोर्लोपो यस्मिन् स ढ्रलोपः, तत्र पूर्वस्याणो दीर्घो भवति । लीढम्। मीढम् । उपगूढम् । मूढः । रलोपे-नीरक्तम् । अग्नीरथः । इन्दूरथः । पुनारक्तं वासः । प्रातराजक्रयः ।

पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्य दीर्घार्थम् ।

अण इति किम्? आतृढम्, आवृढम् ॥

२९७४. सहिवहोरोदवर्णस्य ॥ ११२ ॥ (२३५७)

सहि, वहि-इत्येतयोरवर्णस्यौकार आदेशो भवति ढ्रलोपे । सोढा, सोढुम्, सोढव्यम् । वोढा, वोढुम्, वोढव्यम् ।

अवर्णस्येति किम्? ऊढः । ऊढवान् । वर्णग्रहणं किम्? कृतायामपि वृद्धौ यथा स्यात्-उदवोढाम् । उदवोढम् । तादपि परस्तपरः, तपरत्वादाकारस्य ग्रहणं न स्यात् ॥

२९७५. साढ्यै साढ्वा साढेति निगमे ॥ ११३ ॥ (३५३१)

साढ्यै, साढ्वा, साढा-इति निगमे निपात्यन्ते । साढ्यै समन्तात् (मै.सं. १.६.३१) । साढ्वा शत्रून् (मै. सं. ६.८.५) । सहेः क्त्वाप्रत्यये ओत्वाभावः । पक्षे क्त्वाप्रत्ययस्य ध्यैभावः। साढा-इति तृचि रूपमेतत् ।

निगम इति किम्? सोढ्वा, सोढेति भाषायाम् ॥

२९७६. संहितायाम् ॥ ११४ ॥ (१०३५)

'संहितायाम्' इत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः संहितायामित्येवं तद्वेदितव्यम् । वक्ष्यति - 'द्व्यचोऽतस्तिङः' (६.३.१३५) इति । विद्मा हि त्वा सत्पत्तिं शूर गोनाम् (ऋ. १०.४६.१) । संहितायामिति किम्? विद्मा, हि, त्वा, सत्पतिं, शूर, गोनाम् ॥

२९७७. कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रु वस्वस्तिकस्य ॥ ११५ ॥ (१०३६)

कर्णशब्दे उत्तरपदे लक्षणवाचिनो दीर्घो भवति विष्ट, अष्टन्, पञ्चन्, मणि, भिन्न, छिन्न, छिद्र, स्रुव, स्वस्तिक-इत्येतान्वर्जयित्वा । दात्राकर्णः । द्विगुणाकर्णः। त्रिगुणाकर्णः । द्व्यङ्गुलाकर्णः । अङ्गुलाकर्णः ।

यत्पशूनां स्वामिविशेषसम्बन्धज्ञापनार्थं दात्राकारादि क्रियते तदिह लक्षणं गृह्यते ।

लक्षणस्येति किम्? शोभनकर्णः । अविष्टादीनामिति किम्? विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः॥

२९७८. नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ ११६ ॥ (१०३७)

नहि, वृति, वृषि, व्यधि, रुचि, सहि, तनि-इत्येतेषु क्विप्रत्ययान्तेषूत्तरपदेषु पूर्वपदस्य दीर्घो भवति संहितायां विषये । नहि-उपानत्, परीणत् । वृति-नीवृत्, उपावृत् । वृषि-प्रावृट्, उपावृट् । व्यधि-मर्मावित्, हृदयावित्, श्वावित् । रुचि - नीरुक्, अभिरुक् । सहि-ऋतीषट् । तनि - तरीतत् ।

गमः क्वाविति (६.४.४०) गमादीनामिष्यते । ततस्तनोतेरप्यनुनासिकलोपः.।

क्वाविति किम्? परिणहनम् ॥

२९७९. वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ॥ ११७ ॥ (१०३८)

वन, गिरि - इत्येतयोरुत्तरपदयोर्यथासंख्यं कोटरादीनां किंशुलकादीनां च दीर्घो भवति संज्ञायां विषये । वने कोटरादीनाम् - कोटरावणम्, मिश्रकावणम्, सिध्रकावणम्, सारिकावणम् ।

गिरौ किंशुलकादीनाम् - किंशुलकागिरिः । अञ्जलागिरिः ।

कोटरकिंशुलकादीनामिति किम्? असिपत्रवनम् । कृष्णगिरिः ।

कोटर । मिश्रक । पुरक । सिध्रक । सारिक । कोटरादिः ।

किंशुलक । शाल्वक । अञ्जन । भञ्जन । लोहित । कुक्कुट । किंशुलकादिः ॥

२९८०. वले ॥ ११८ ॥ (१०४०)

वले परतः पूर्वस्य दीर्घो भवति । आसुतीवलः । कृषीवलः । दन्तावलः । 'रजःकृष्यासुतिपरिषदो वलच्' (५.२.११२) इति वलच्प्रत्ययो गृह्यते, न प्रातिपदिकम्।

अनुत्साहभ्रातृपितृणामित्येव । उत्साहवलः । भ्रातृवलः । पितृवलः ॥

२९८१. मतौ बह्वचोऽनजिरादीनाम् ॥ ११९ ॥ (१०४१)

मतौ परतो बह्वचोऽजिरादिवर्जितस्य दीर्घो भवति संज्ञायां विषये । उदुम्बरावती। मशकावती । वीरणावती । पुष्करावती । अमरावती । 'नद्यां मतुप्' (४.२.८५) इति मतुप्प्रत्ययः। 'संज्ञायाम्' (८.२.११) इति मतोर्वत्वम् ।

बह्वच इति किम्? व्रीहिमती । अनजिरादीनामिति किम्? अजिरवती । खदिरवती । हंसकारण्डववती । चक्रवाकवती ।

'संज्ञायाम्' इत्येव-वलयवती ॥

२९८२. शरादीनां च ॥ १२० ॥ (१०४२)

शरादीनां च मतौ दीर्घो भवति संज्ञायां विषये । शरावती । वंशावती ।

शर । वंश । धूम । अहि । कपि । मणि । मुनि । शुचि । हनु । शरादिः ।

'संज्ञायाम्' (८.२.११) इति मतोर्वत्वम् । यवादित्वाद् व्रीह्यादिभ्यो न भवति ॥

२९८३. इको वहेऽपीलोः ॥ १२१ ॥ (१०४३)

इगन्तस्य पूर्वपदस्य पीलुवर्जितस्य वह उत्तरपदे दीर्घो भवति । ऋषीवहम् । कपीवहम्। मुनीवहम् ।

इक इति किम्? पिण्डवहम् । अपीलोरिति किम्? पीलुवहम् ।

अपील्वादीनामिति वक्तव्यम् [म. भा.] इह मा भूत्-दारुवहम् ॥

२९८४. उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥ १२२ ॥ (१०४४)

उपसर्गस्य घञन्ते उत्तरपदेऽमनुष्येऽभिधेये बहुलं दीर्घो भवति । वीक्लेदः । वीमार्गः । अपामार्गः । न च भवति - प्रसेवः, प्रसारः ॥

सादकारयोः कृत्रिमे दीर्घो भवति (का.वा.१) । प्रासादः । प्राकारः । कृत्रिम इति किम्? प्रसादः । प्रकारः ।

वेशादिषु विभाषा दीर्घो भवति [म. भा.]। प्रतिवेशः, प्रतीवेशः । प्रतिरोधः, प्रतीरोधः ।

अमनुष्य इति किम्? निषादो मनुष्यः ॥

२९८५. इकः काशे ॥ १२३ ॥ (१०४५)

इगन्तस्योपसर्गस्य काशशब्द उत्तरपदे दीर्घो भवति । नीकाशः । वीकाशः। अनूकाशः । पचाद्यजन्तोऽयं काशशब्दः, न तु घञन्तः ।

इक इति किम्? प्रकाशः ॥

२९८६. दस्ति ॥ १२४ ॥ (३०७९)

'दा' इत्येतस्य यस्तकारादिरादेशस्तस्मिन्परत इगन्तस्योपसर्गस्य दीर्घो भवति। नीत्तम्। वीत्तम् । परीत्तम् । 'अच उपसर्गात्तः' (७.४.४७) इत्यन्तस्य यद्यपि तकारः क्रियते, तथापि चर्त्वस्याश्रयात्सिद्धत्वमिति तकारादिर्भवति । इक इत्येव-प्रत्तम्, अवत्तम् ।

द इति किम्? वितीर्णम् । नितीर्णम् । तीति किम्? सुदत्तम् ॥

२९८७. अष्टनः संज्ञायाम् ॥ १२५ ॥ (१०४६)

अष्टन्-इत्येतस्योत्तरपदे संज्ञायां दीर्घो भवति । अष्टावक्रः । अष्टाबन्धुरः । अष्टापदम्।

संज्ञायामिति किम्? अष्टपुत्रः । अष्टभार्यः ॥

२९८८. छन्दसि च ॥ १२६ ॥ (३५३२)

छन्दसि विषयेऽष्टन उत्तरपदे दीर्घो भवति । 'आग्नेयमष्टाकपालं निर्वपेत् चरुम् ।' (मै.सं. १.२.७) अष्टाहिरण्या दक्षिणा । अष्टापदी देवता सुमती । अष्टौ पादावस्या इति बहुव्रीहौ पादस्य लोपे कृते 'पादोऽन्यतरस्याम्' (४.१.८) इति ङीप् ।

गवि च युक्ते भाषायामष्टनो दीर्घो भवतीति वक्तव्यम् । अष्टागवं शकटम् ॥

२९८९. चितेः कपि ॥ १२७ ॥ (१०४७)

चितिशब्दस्य कपि परतो दीर्घो भवति । एकचितीकः । द्विचितीकः । त्रिचितीकः ॥

२९९०. विश्वस्य वसुराटोः ॥ १२८ ॥ (३७९)

विश्वशब्दस्य वसु, राट्-इयेतयोरुत्तरपदयोर्दीर्घ आदेशो भवति । विश्वावसुः। विश्वाराट् ।

राडिति विकारनिर्देशः - यत्रास्यैतद्रूपं तत्रैव यथा स्यात् । इह न भवति - विश्वराजौ । विश्वराजः ॥

२९९१. नरे संज्ञायाम् ॥ १२९ ॥ (१०४८)

नरशब्द उत्तरपदे संज्ञायां विषये विश्वस्य दीर्घो भवति । विश्वानरो नाम यस्य वैश्वानरिः पुत्रः ।

संज्ञायामिति किम्? विश्वे नरा यस्य स विश्वनरः ॥

२९९२. मित्रे चर्षौ ॥ १३० ॥(१०४९)

मित्रे चोत्तरपदे ऋषावभिधेये विश्वस्य दीर्घो भवति । विश्वामित्रो नाम ऋषिः।

ऋषाविति किम्? विश्वमित्रो माणवकः ॥

२९९३. मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥ १३१ ॥ (३५३३)

मन्त्रविषये सोम, अश्व, इन्द्रिय, विश्वदेव्य-इत्येतेषां मतुप्प्रत्यये परतो दीर्घो भवति । सोमावती (ऋ. १०.९७.७) । अश्वावती (ऋ.१०९७.७) । इन्द्रियावती (तै.सं. २.४.२.१) । विश्वदेव्यावती (तै.सं. ४.१.६.१) ।

२९९४. ओषधेश्च विभक्तावप्रथमायाम् ॥ १३२ ॥ (३५३४)

'मन्त्रे' इति वर्तते । ओषधिशब्दस्य विभक्तावप्रथमायां परतो दीर्घो भवति । ओषधीभिरपीपतत् । नमः पृथिव्यै नम ओषधीभ्यः । (तै.आ. २.१२.१) ।

विभक्ताविति किम्? ओषधिपते । अप्रथमायामिति किम्? स्थिरेयमस्त्वोषधिः॥

२९९५. ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ॥ १३३ ॥ (३५३५)

ऋचि विषये तु, नु, घ, मक्षु, तङ्, कुत्र, उरुष्य-इत्येषां दीर्घो भवति । आ तू न॑ इन्द्र वृत्रहन् (वा.सं. ३.६५) नु-नू करणे । घ - उ॒त वा॑ घा स्यू॒लात् (ऋ. १.१०९.२) । मक्षु-मक्षू गो॑मन्तमीमहे (ऋ. ८.३३.३) । तङ्-भर॑ता जु॒तवे॑दसम् (ऋ. १०.१७६.२) । तडिति थादेशस्य डित्त्वपक्षे ग्रहणम्, तेनेह न भवति - शृ॒णो॑त ग्रावाणः (तै.सं. १.३.१३.१) कु-कूमनः । त्र-अत्रा गौः । उरुष्य-उ॒रुष्यु॒ णो॑ऽग्नेः । (ऋ. १.९१.१५) ।

२९९६. इकः सुञि ॥ १३४ ॥ (३५३६)

सुञ् निपातो गृह्यते । इगन्तस्य सुञि परतो मन्त्रविषये दीर्घो भवति । अ॒भी षु णः॑ सखीनाम् (ऋ. ४.३१.३) । ऊ॒र्ध्व ऊ॒ षु ण॑ ऊ॒तये॒ (ऋ. १.३६.१३) । 'सुञः (८.३.१०७) इति षत्वम्, 'नश्च धातुस्थोरुषुभ्यः' (८.४.२७) इति णत्वम् ॥

२९९७. द्व्यचोऽतस्तिङः ॥ १३५ ॥ (३५३७)

'ऋचि' इति वर्तते । द्व्यचस्तिङन्तस्यात ऋग्विषये दीर्घो भवति । वि॒द्मा हि त्वा॒ गोप॑तिं शि॒र गोना॑म् (ऋ. १०.४७.१) । विद्मा शि॒रस्य॑ पि॒तर॑म् (अ. वे. १.२.१)।

द्व्यच इति किम्? अ॒श्वा भवत॑ वा॒जन॑ः (वा.सं. ९.६) । अत इति किम्? आ दे॒वान्व॑क्षि॒ यक्षि॑ च (ऋ. ५.२६.१) ॥

२९९८. निपातस्य च ॥ १३६ ॥ (३५३८)

'ऋचि' इत्येव । निपातस्य च ऋग्विषये दीर्घ आदेशो भवति । ए॒वा ते॑ (ऋ. १०.२०.१०) । अच्छा॑ ते (ऋ. १.२.२) ॥

२९९९. अन्येषामपि दृश्यते ॥ १३७ ॥ (३५३९)

अन्येषामपि दीर्घो दृश्यते स शिष्टप्रयोगादनुगन्तव्यः । यस्य दीर्घत्वं न विहितम्, दृश्यते च प्रयोगे, तदनेन कर्त्तव्यम् । केशाकेशि । कचाकचि । जलाषाट्। नारकः पूरुषः ॥

शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु । श्वादन्तः । श्वादंष्ट्रः । श्वाकर्णः । श्वाकुन्दः। श्वावराहः । श्वापुच्छः । श्वापदः ॥

३०००. चौ ॥ १३८ ॥ (४१७)

चौ परतः पूर्वपदस्य दीर्घो भवति । 'चौ' 'इत्यञ्चतिर्लुनकाराकारो गृह्यते । दधीचः पश्य। दधीचा । दधीचे । मधूचः पश्य । मधूचा । मधुचे । अन्तरङ्गोऽपि हि यणादेशो दीर्घविधानसामर्थ्यान्न प्रवर्त्तते ॥

३००१. सम्प्रसारणस्य ॥ १३९ ॥ (१००४)

'उत्तरपदे' इति वर्तते । सम्प्रसारणान्तस्य पूर्वपदस्योत्तरपदे दीर्घो भवति । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः । कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । करिषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्य-'अल्पाख्यायाम्' ,(५.४.१३६) 'उपमानाच्च' (५.४.१३७) इति

इकारः समासान्तः । करीषगन्धेरपत्यं कारीषगन्ध्या, कुमुदगन्धेरपत्यं कौमुदगन्ध्या, तस्याः पुत्रः कौमुदगन्धीपुत्रः [तस्याः पतिः]कौमुदगन्धीपतिः ।

'इको ह्रस्वोऽङ्योगालवस्य' (६.३.६१) इत्येतन्न भवति; व्यवस्थितविभाषा हि सा । अकृत एव दीर्घत्वे ह्रस्वाभावपक्षे कृतार्थेनापि दीर्घेण पक्षान्तरे परत्वाद् ह्रस्वो बाध्यते ।

पुनः प्रसङ्गविज्ञानं न च भवति; 'सकृद्गतौ विप्रतिषेधे यद्वाधितं तद्बाधितमेवे' (व्या.प.४०) ति ॥

॥ इति श्रीवामनविरचितायां काशिकावृत्तौ

षष्ठस्याध्यायस्य तृतीयः पादः ॥

अथ षष्ठाध्याये

चतुर्थः पादः

३००२. अङ्गस्य ॥ १ ॥ (२००)

अधिकारोऽयमा सप्तमाध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामोऽङ्गस्येत्येवं तद्वेदितव्यम् । वक्ष्यति- "हलः'' (६.४.२) । हूतः । जीनः । "संवीतः'' ।

अङ्गस्येति किम्? निरुतम् । दुरुतम् । नामि दीर्घः - अग्नीनाम् । वायूनाम्.। अङ्गस्येति किम्? क्रिमिणां पश्य । पामनां पश्य । 'अतो भिस ऐस्' (७.१.९) - वृक्षैः । प्लक्षैः।

अङ्गस्येति किम्? ब्राह्मणभिस्सा । ओदनभिस्सिटा । अङ्गाधिकारः कृतोऽन्यार्थः 'नामि' -दीर्घत्वाद्यपि व्यवस्थापयतीति तदर्थमर्थवद्ग्रहणपरिभाषा (व्या.प.१) नाश्रयितव्या भवति।

अङ्गस्येति सम्बन्धसामान्ये एषा षष्ठी यथायोगं विशेषेष्ववतिष्ठते ।

अथ वा - प्रातिपदिकार्थमात्रविवक्षित विभक्त्यर्थमधिक्रियते । तदुत्तरत्र यथायोगं विपरिणम्यते । ततोऽकारान्तादङ्गाद् भिस ऐसित्येवमाद्यपि सम्यक् सम्पन्नं भवति ॥

३००३. हलः ॥ २ ॥ (२५५९)

अङ्गावयवाद्धलो यदुत्तरं सम्प्रसारणम् तदन्तस्याङ्गस्य दीर्घो भवति । हूतः । जीनः । संवीतः ।

हल इति किम्? उतः । उतवान् । अङ्गावयवादिति किम्? निरुतम् । तदन्तस्येति किम्? विद्धः । विचितः ।

अण इत्येव-तृतीयः । 'तृतीयेति' (२.३.१८) वा निपातनादत्र दीर्घाभावः ।

अङ्गग्रहणमावर्तयितव्यम् - हल्विशेषणार्थम्, अङ्गकार्यप्रतिपत्त्यर्थं च ॥

३००४. नामि ॥ ३ ॥ (२०९)

'नाम्' -इत्येतत्षष्ठीबहुवचनमागतनुट्कं गृह्यते । तस्मिन्परतोऽङ्गस्य दीर्घो भवति । अग्नीनाम् । वायूनाम् । कर्तृणाम् । 'अणः' इत्येतदत्र निवृत्तम् ।

आगतनुट्कग्रहणमुत्तरार्थम्, कृते च नुटि दीर्घप्रतिपत्त्यर्थम्, अन्यथा हि नुडेव न स्यात्।

नामिदीर्घ आमि चेत्स्यात् कृते दीर्घे न नुड् भवेत् ।

वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्म्मणाम् ॥ (म. भा.)

३००५. न तिसृचतसृ ॥ ४ ॥ (३००)

तिसृ, चतसृ-इत्येतयोर्नामिदीर्घो न भवति । तिसृणाम् । चतसृणाम् ।

इदमेव 'नामि' इति दीर्घप्रतिषेधवचनं ज्ञापकम्-'अचि र ऋतः' (७.२.१००) इत्येतस्मात्पूर्वविप्रतिषेधेन नुडागमो भवतीति ॥

३००६. छन्दस्युभयथा ॥ ५ ॥ (३५४०)

छन्दसि विषये तिसृचतसृ-इत्येतयोर्नामि परत उभयथा दृश्यते-दीर्घश्च, अदीर्घश्च । तिसृणां (मै.सं. ४.५.९) मध्यदिने, तिसृणां (ऋ. ५.६९.२) मध्यदिने । चतसृणां (का.सं. २७.९) मध्यदिने, चतसृणां (का.सं. २७.९) मध्यदिने, चतसृणां मध्यं दिने ॥

३००७. नृ च ॥ ६ ॥ (२८४)

'नृ' इत्येतस्य नामि परे उभयथा भवति । त्वं नृणाम् (पै. २.१०.४) नृपते, त्वं नॄणाम् (ऋ. १४३.७) नृपते ।

केचिदेतत् 'छन्दसि' इति नानुवर्तयन्ति, तेन भाषायामपि विकल्पो भवति ॥

३००८. नोपधायाः । ७ ॥ (३७०)

नान्तस्याङ्गस्योपधाया नामि परतो दीर्घो भवति । पञ्चानाम् । सप्तानाम् । नवानाम्। दशानाम् ।

न इति किम्? चतुर्णाम् । नामीत्येव-चर्मणाम् ॥

३००९. सर्वनामस्थाने चासम्बुद्धौ ॥ ८ ॥ (२५०)

सर्वनामस्थाने च परतोऽसम्बुद्धौ नोपधाया दीर्घो भवति । राजा, राजानौ, राजानः । राजानम्, राजानौ । सामानि तिष्ठन्ति । सामानि पश्य ।

सर्वनामस्थान इति किम्? राजनि । सामनि । असम्बुद्धाविति किम्? हे राजन् । हे तक्षन् ॥

३०१०. वा षपूर्वस्य निगमे ॥ ९ ॥ (३५४१)

षपूर्वस्याचो नोपधाया निगमविषये सर्वनामस्थाने परतोऽसम्बुद्धौ वा दीर्घो भवति । 'स तक्षाणं तिष्ठन्तमब्रवीत्, (मै.२.४.१) स तक्षणं तिष्ठन्तमब्रवीत् । ऋभुक्षाणमिन्द्रम्, ऋभुक्षणमिन्द्रम् (ऋ. १.१११.४) ।

निगम इति किम्? तक्षा, तक्षाणौ, तक्षाणः ॥

३०११. सान्तमहतः संयोगस्य ॥ १० ॥ (३१७)

सकारान्तस्य संयोगस्येयो नकारः महतश्च तस्योपधाया दीर्घो भवति सर्वनामस्थाने परतोऽसम्बुद्धौ । श्रेयान्, श्रेयांसौ, श्रेयांसः । श्रेयांसि । पयांसि । यशांसि । महतः खल्वपि - महान् । महान्तौ । महान्तः ।

असम्बुद्धाविति किम्? हे श्रेयन् । हे महन् ॥

३०१२. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ॥ ११ ॥ (२७७)

अप्-इत्येतस्य यतृनन्तस्य तृजन्तस्य, स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ-इत्येतेषां चाङ्गानामुपधाया दीर्घो भवति सर्वनामस्थाने परतोऽसम्बुद्धौ। अप्-आपः । बह्वाम्पि तडागानीति केचिदिच्छन्ति, तत्र 'समासान्तो विधिरनित्यः' इति समासान्तो न क्रियते। नित्यमपि च नुममकृत्वा दीर्घत्वमिष्यते । तृन्-कर्तारौ कटान् । वदितारौ जनापवादान्। कर्त्तारः ।

तृच्-कर्त्तारौ कटस्य । कर्तारः । हर्त्तारौ भारस्य, हर्त्तारः ।

स्वसृ-स्वसा । स्वसारौ । स्वसारः ।

नप्तृ-नप्ता । नप्तारौ । नप्तारः ।

नेष्टृ-नेष्टा । नेष्टारौ । नेष्टारः ।

त्वष्टृ-त्वष्टा । त्वष्टारौ । त्वष्टारः ।

क्षत्तृ-क्षत्ता । क्षत्तारौ । क्षत्तारः ।

होतृ-होता । होतारौ । होतारः ।

पोतृ-पोता । पोतारौ । पोतारः ।

प्रशास्तृ-प्रशास्ता । प्रशास्तारौ । प्रशास्तारः ।

नप्त्रादीनां ग्रहणमव्युत्पत्तिपक्षे विध्यर्थम् । व्युत्पत्तिपक्षे नियमार्थम्-एवम्भूतानामन्येषां संज्ञाशब्दानां दीर्घो मा भूदिति । पितरौ, पितरः । मातरौ, मातरः।

असम्बुद्धाविति किम्? हे कर्तः । हे स्वसः ॥

३०१३. इन्हन्पूषार्यम्णां शौ ॥ १२ ॥ (३५६)

इन्, हन्, पूषन्, अर्यमन्-इत्येवमन्तानामङ्गानां शौ परत उपधाया दीर्घो भवति । बहुदण्डीनि । बहुच्छत्रीणि । बहुवृत्रहाणि । बहुभ्रूणहाणि । बहुपूषाणि । बहर्वर्यमाणि ।

सिद्धे सत्यारम्भो नियमार्थः - "इन्हन्पूषार्यम्णामुपधायाः शावेव दीर्घा भवति, नान्यत्र"। (म. भा.) दण्डिनौ । छत्त्रिणौ । वृत्रहणौ । पूषणौ । अर्यमणौ ।

दीर्घविधिर्य इहेन्प्रभृतीनां, तं विनियम्य सुटीति सुविद्वान् ।

शौ नियमं पुनरेव विधध्याद् भ्रूणहनीति तथास्य न दुष्येत् ॥

शास्मि निवर्त्त्य सुटीत्यविशेषे शौ नियमं कुरु वाऽप्यसमीक्ष्य ।

दीर्घविधेरुपधानियमान्मे हन्त । यि दीर्घविधौ च न दोषः ॥

सुट्यापि वा प्रकृतेऽनवकाशाः, शौ नियमोऽप्रकृतप्रतिषेधे ।

यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ॥ (म. भा. श्लो.वा. १-३)

हन्तेः 'अनुनासिकस्य क्विझलोः क्ङिति' (२.४.१५) इति दीर्घत्वं यत् तदपि नियमेन बाध्यते वृत्रहणि, भ्रूणहनीति । कथम्? योगविभागः क्रियते-इन्हन्पूषार्यम्णां सर्वनामस्यान एव दीर्घो भवति, नान्यत्रेति । ततः 'शौ' इति द्वितीयो नियमः - शावेव सर्वनामस्थाने दीर्घो भवति, नान्यत्रेति । सर्वस्योपधालक्षणस्य दीर्घस्य नियमेन निवृत्तिः क्रियते ।

यस्तु न उपधालक्षणः, स भवत्येव- वृत्रहायते, भ्रूणहायते ।

अथ वा- अनुवर्त्तमानेऽपि सर्वनामस्थानग्रहणे सामर्थ्यादयमविशेषेण नियमः। शिशब्दो हि सर्वनामस्थानं नपुंसकस्य, न च तस्यान्यत् सर्वनामस्थानमस्तीत्यविशेषेण नियमः ।

तत्र तु 'नपुंसकस्य' इत्येतन्नाश्रीयते । तेनानपुंसकस्यापि दीर्घो न भवति ।

सर्वनामस्थानसंज्ञाविधाने तु नपुंसकस्य व्यापारोऽस्तीति तत्र नियमः क्रियमाणो नपुंसकस्य स्यात् ॥

३०१४. सौ च ॥ १३ ॥ (३५७)

सावसम्बुद्धौ परत इन्हन्पूषार्यम्णामुपधाया दीर्घो भवति । दण्डी । वृत्रहा । पूषा । अर्यमा ।

असम्बुद्धाविति किम्? हे दण्डिन् । हे वृत्रहन् । हे पूषन् । हे अर्यमन् ॥

३०१५. अत्वसन्तस्य चाधातोः ॥ १४ ॥ (४२५)

अतु, अस्-इत्येवमन्तस्य अधातोरुपधायाः सावसम्बुद्धौ परतो दीर्घो भवति। डवतु-भवान्। क्तवतु-कृतवान् । मतुप्-गोमान् । यवमान् । अत्र कृते दीर्घे नुमागमः कर्त्तव्यः । यदि हि परत्वान्नित्यत्वाच्च नुम् स्यात्, दीर्घस्य निमित्तमतूपधा विहन्येत । असन्तस्य-सुपयाः । सुयशाः । सुश्रोताः ।

अधातोरिति किम्? पिण्डं ग्रसते इति पिण्डग्रः, चर्म वस्ते इति चर्मवः । अनर्थकोऽप्यसशब्दो गृह्यते; 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (व्या.प. १६९) इति ।

अन्तग्रहणमुपदेशप्रयोगैकदेशस्याप्यत्वन्तस्य परिग्रहार्थम्, अन्यथा मतुपो ग्रहणं न स्याद्-उपदेशे रूपनिर्ग्रहहेतौ नायमत्वन्त इति ।

असम्बुद्धावित्येव-हे गोमन् । हे सुपयः ॥

३०१६. अनुनासिकस्य क्विझलोः क्ङिति ॥ १५ ॥ (२३३३)

अनुनासिकान्तस्याङ्गस्य उपधाया दीर्घो भवति क्विप्रत्यये परतो झलादौ च क्ङिति । प्रशान् । प्रतान् । झलादौ किति-शान्तः । शान्तवान् । शान्ता । शान्तिः। ङिति खल्वपि-शंशान्तः । तन्तान्तः । यङ्लुगन्तादयं तस् ।

अनुनासिकस्येति किम्? ओदनपक् । पक्वः । पक्ववान् । क्विझलोरिति किम्? गम्यते। रम्यते । क्ङितीति किम्? गन्ता । रन्ता ॥

३०१७. अज्झनगमां सनि ॥ १६ ॥ (२६१४)

अजन्तानमङ्गानां हनिगम्योश्च सनि झलादौ परे दीर्घो भवति । अजन्तानाम्-विवीषति। तुष्टूषति । चिकीर्षति । जिहीर्षति । हन्-जिघांसति । गम् - अधिजिगांसते।

गमेरिङादेशस्येति वक्तव्यम् (म. भा.) । इह मा भूत्-संजिगंसते वत्सो मात्रेति । 'स्वर्गलोकं समजिगांसदि' ति छन्दसि यदनिङादेशस्यापि दीर्घत्वं दृश्यते, तद् 'अन्येषामपि दृश्यते' (६.३.१३७) इत्यनेन भवति ।

अथ वा - इहाज्ग्रहणं न कर्त्तव्यम्, सनि दीर्घो भवतीत्येतावदेव सूत्रं कर्त्तव्यम् । तत्राचा गृह्यमाणस्य विशेषणे सति सिद्धमजन्तस्य दीर्घत्वम्? तत्क्रियते प्रवृत्तिभेदेन गमेरपि विशेषणार्थम्-अजन्तस्याङ्गस्य दीर्घो भवति, अजादेशस्य गमेरिति । ततो न वक्तव्यमिदम्-गमेरिङादेशस्येति ॥

३०१५. तनोतेर्विभाषा ॥ १७ ॥ (२६२२)

तनोतेरङ्गस्य सनि झलादौ विभाषा दीर्घो भवति । तितांसति । तितंसति ।

झलीत्येव-तितनिषति । 'सनीवन्तर्ध०' (७.२.४९) इत्यत्र तनोतेरुपसंख्यानादिडागमो भवति विकल्पेन ॥

३०१९. क्रमश्च क्त्वि ॥ १५ ॥ (३३२९)

क्रम उपधाया विभाषा दीर्घो भवति क्त्वाप्रत्यये झलादौ परतः । क्रन्त्वा, क्रान्त्वा ।

झलीत्येव-क्रमित्वा । प्रक्रम्य, उपक्रम्येति बहिरङ्गोऽपि ल्यबादेशः 'अन्तरङ्गानपि विधीन्बान्धते' इति पूर्वमेव, दीर्घत्वं न प्रवर्त्तते ॥

३०२०. च्छ्वोः शूडनुनासिके च ॥ १९ ॥ (२५३१)

'छ' इत्येतस्य सतुक्कस्य, वकारस्य च स्थाने यथासंख्यं श्, ऊठ्-इत्येतावादेशौ भवतः, अनुनासिकादौ प्रत्यये परतः क्वौ झलादौ च क्ङिति । प्रश्नः । विश्नः । अन्तरङ्गत्वात् 'छे च' (६.१.७३) इति तुकि कृते सतुक्कस्य शादेशः ।

वकारस्य ऊठ्-स्योनः । सिवेरौणादिके नप्रत्यये (उणादि, २९३) लघूपधगुणात् पूर्वमूठ् क्रियते, तत्र कृतेऽन्तरङ्गत्वाद् यणादेशो नानाश्रयत्वाच्च न 'वार्णादाङ्गं बलीयो' (व्या.प.३९) भवति ।

क्वौ छस्य - शब्दप्राट् । 'क्विब्वचि' (उणादि. २२५) इत्यादिनौणादिकः क्विप्, दीर्घश्च । गोविट् । वकारस्य-अक्षद्यूः । हिरण्यष्ठ्यूः । 'असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प.४२) इति 'नाजानन्तर्ये' (व्या.प.४६) इति प्रतिषिध्यते ।

झलादौ छस्य पृष्टः । पृष्टवान् । पृष्ट्वा । वकारस्य-द्यूतः । द्यूतवान् । द्यूत्वा। क्ङितीत्येव-द्युभ्याम् । द्युभिः ।

केचिदत्र 'क्ङिति' इति नानुवर्त्तयन्ति । कथं द्युभ्यम्, द्युभिरिति, ऊठि कृते? 'दिव उत्' (६.१.१३१) इति तपरत्वान्मात्राकालो भविष्यति ।

'छशां षः' (८.२.३६) इत्यत्र छग्रहणं न कर्त्तव्यम् । अनेनैव हि सर्वत्र शकारो विधीयते ।

ऊठष्ठित्करणम् 'एत्येधत्यूठ्सु' (६.१.१७९) इति विशेषणार्थम् । 'वाह ऊठ्' (६.४.१३२) इत्ययमपि ठिदेव ॥

३०२१. ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥ २० ॥ (२६५४)

ज्वर, त्वर, स्रिवि, अव, मव-इत्येतेषामङ्गानां वकारस्य उपधयाश्च स्थाने ऊडित्ययमादेशो भवति क्वौ परतोऽनुनासिके झलादौ च क्ङिति । जूः, जुरौ, जुरः.। जूर्त्तोझ् । त्वर-तूः, तुरौ, तुरः । तूर्त्तिः । स्रिवि-सूः, सुवौ, सुवः । सूतः। सूतवान् । सूतिः । अव्-ऊः, उवौ, उवः । ऊतिः । मव-मूः, मुवौ, मुवः । मूतः। मूतवान् । मूतिः ।

ज्वरत्वरोरुपधा वकारात् परा, स्रिव्यवमवां पूर्वा ॥

३०२२. राल्लोपः ॥ २१ ॥ (२६५५)

रेफादुत्तरयोश्छ्वोर्लोपो भवति क्वौ परतो झलादौ क्ङिति च परतः । मुर्छा-मूः, मुरौ, मुरः। मूर्त्तः । मूर्त्तवान् । मूर्त्तिः । 'न ध्याख्यापॄमूर्छिमदाम्' (८.२.४८) इति निष्ठानत्वाभावः । हुर्छा-हूः, हुरौ, हुरः । हूर्णः । हूर्णवान् । हूर्त्तिः । राल्लोपे सतुक्कस्य छस्याभावात् केवलो गृह्यते। वकारस्य-'तुर्वी' -तूः, तुरौ, तुरः । तूर्णः.। तूर्णवान् । तूर्त्तिः । 'धुर्वी' -धूः । धुरः । धूर्णवान् । धूर्त्तिः ॥

३०२३. असिद्धवदत्राभात् ॥ २२ ॥ (२१८३)

असिद्धवदित्ययमधिकारो यदित ऊर्ध्वमनुक्रमिष्याम आ अध्यायपरिसमाप्तेस्तद् असिद्धवद्भवतीत्येवं वेदितव्यम् । आ भादिति विषयनिर्द्देशः । आभसंशब्दनाद् यदुच्यते तत्र कर्त्तव्ये ।

अत्रेति समानाश्रयत्वप्रतिपत्त्यर्थम् । तच्चेदत्र यत्र भवति तदाभाद् शास्त्रीयं विधीयते तदाश्रयमेव भवति । व्याश्रयं तु नासिद्धवद्भवतीत्यर्थः ।

असिद्धवचनमुत्सर्गलक्षणाभावार्थम्, आदेशलक्षणप्रतिषेधार्थं च (म.भा.) । एधि, शाधीत्यत्र एत्वशाभावायोः कृतयोर्झल्लक्षणं धित्वं प्राप्नोति, असिद्धत्वाद्भवति। आगहि, जहीत्यत्रानुनासिकलोपे जभावे च 'अतो हेः' (६.४.१०५) इति लुक् प्राप्नोति, असिद्धत्वान्न भवति।

आ भादिति किम्? अभाजि । रागः । 'अत उपधायाः' (७.२.११६) इति वृद्धौ कर्तव्यायां नलोपो नासिद्धो भवति ।

अत्रग्रहणं किम्? पपुषः पश्य । चिच्युषः पश्य । लुलुवुषः पश्य । वसुसम्प्रसारणमाल्लोपे यणादेशे उवङादेशे च कर्तव्ये नासिद्धं भवति । आल्लोपादीनि वसौ, वस्वन्तस्य विभक्तौ सम्प्रसारणमिति समनाश्रयत्वं नास्ति । 'असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प. ४२) इति? एतदप्यत्र न भवति, किं कारणम्? एषा हि परिभाषा आ भाच्छास्त्रीया, तस्यां प्रवर्तमानायां वसुसम्प्रसारणादीनामाभाच्छा-स्त्रीयाणामेवासिद्धत्वादन्तरङ्गबहिरङ्गयोः युगपत्समुपस्थानं नास्तीति परिभाषा न प्रवर्तते ।

वुग्युटावुवङ्यणोः सिद्धौ भवत इति वक्तव्यम् (का.वा.११) । वुग् उवङादेशे-बभूव, बभूवतुः, बभूवुः । युट् यणादेशे - उपदिदीये, उपदिदीयाते, उपदिदीयिरे ।

आ भादित्ययमभिविधावाङ् । तेन भाधिकारेऽप्यसिद्धवद्भवति ॥

३०२४. श्यान्नलोपः ॥ २३ ॥ (२५४४)

श्नादिति-श्नमयमुत्सृष्टमकारो गृह्यते, तत उत्तरस्य नकारस्य लोपो भवति । अनक्ति। भनक्ति । हिनस्ति ।

शकारवतो ग्रहणं किम्? यज्ञानाम्, यत्नानाम्-'सुपि च' (७.३.१०२) इति परत्वात् कृतेऽपि दीर्घत्वे स्थानिवद्भावान्नलोपः स्यादेव ।

विश्नानाम्, प्रश्नानामित्यत्र 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' (व्या.प. ३) इत्येवं न भवति ॥

३०२५. अनिदितां हल उपधायाः क्ङिति ॥ २४ ॥ (४१५)

अनिदिआमङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति क्ङिति प्रत्यये परतः । स्रस्तः, ध्वस्तः । त्रस्यते, ध्वस्यते । सनीस्रस्यते, दनीध्वस्यते ।

अनिदितामिति किम्? नन्द्यते, नानन्द्यते । हल इति किम्? नीयते, नेनीयते। उपधाया इति किम्? नह्यते, नानह्यते । क्ङितीति किम्? स्रंसिता, ध्वंसिता ।

अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानं कर्त्तव्यम् (का.वा.१) । विलगितः । विकपितः । उपतापशरीरविकारयोरिति किम्? बिलङ्गितः। विकम्पितः ।

रञ्जेर्णौ मृगरमण उपसंख्यानं कर्त्तव्यम् (का.वा.३) । रजयति मृगान् । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वादुपधाह्रस्वत्वम् । मृगरमण इति किम्? रञ्जयति वस्त्राणि ।

घिनुणि च रञ्जेरुपसंख्यानं कर्तव्यम् (का.वा.४) । रागो । 'त्यजरजभज' इति निपातनाद्वा सिद्धम् ।

रजक-रजन-रजःसूपसंख्यानं कर्त्तव्यम् (का.वा.५) । रजकः । रजनम् । रजः ॥

३०२६. दंशसञ्जस्वञ्जां शपि ॥ २५ ॥ (२३९६)

दंश, सञ्ज, ष्वञ्ज-इत्येतेषामङ्गानां शपि परत उपधाया नकारस्य लोपो भवति । दशति । सजति । परिष्वजते ॥

३०२७. रञ्जेश्च ॥ २६ ॥ (२३९७)

रञ्जेश्च शपि परत उपधाया नकारस्य लोपो भवति । रजति, रजतः, रजन्ति। पृथग्योगकरणमुत्तरार्थम् ॥

३०२८. घञि च भावकरणयोः ॥ २७ ॥ (३१८८)

भावकरणवाचिनि घञि परतो रञ्जेरुपधाया नकारस्य लोपो भवति । भावे-आश्चर्यो रागः। विचित्रो रागः । करणे-रज्यतेऽनेनेति रागः ।

भावकरणयोरिति किम्? रजन्ति तस्मिन्निति रङ्गः ॥

३०२९. स्यदो जवे ॥ २८ ॥(३१८६)

जवेऽभिधेये 'स्यदः' इति घञि निपात्यते । स्यन्देर्नलोपो वृद्ध्यभावश्च । इक्प्रकरणात् 'न धातुलोपः' (१.१.४) इति प्रतिषेधो नास्ति-गोस्यदः, अश्वस्यदः।

जव इति किम्? तैलस्यन्दः । घृतस्यन्दः ॥

३०३०. अवोदैधोद्मप्रश्रथहिमश्रथाः ॥ २९ ॥ (३१८७)

अवोद, एध ओद्म, प्रश्रथ, हिमश्रथ-इत्येते निपात्यन्ते ।

अवोद इति, उन्देरवपूर्वस्य घञि नलोपो निपात्यते ।

एध इति, अन्धेर्घञि नलोपो गुणश्च निपात्यते 'न धातुलोप आर्धधातुके' (१.१.४) इति हि प्रतिषेधः स्यात् ।

ओद्म इति, उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च निपात्यते ।

प्रश्रथ इति, प्रपूर्वस्य श्रन्थेर्घञि नलोपो वृद्ध्यभावश्च निपात्यते ।

हिमश्रथ इति , हिमपूर्वस्य श्रन्थेर्घञ्येव निपातनम् ॥

३०३१. नाञ्चेः पूजायाम् ॥ ३० ॥ (४२४)

अञ्चेः पूजायामर्थे नकारस्य लोपो न भवति । अञ्चिता अस्य गुरवः । अञ्चितमिव शिरो वहति । 'अञ्चेः पूजायाम्' (७.२.४३) इति इडागमः ।

पूजायामिति किम्? उदक्तमुदकं कूपात् । उद्धृतमित्यर्थः । 'यस्य विभाषा' (७२.१५) इतीट्प्रतिषेधः ॥

३०३२. क्त्वि स्कन्दिस्यन्दोः ॥ ३१ ॥ (३३२१)

क्त्वाप्रत्यये परतः स्कन्द, स्यन्द-इत्येतयोर्नकारलोपो न भवति । स्कन्त्वा। स्यन्त्वा । इन्देरूदित्वात् (धा.पा. ७६१) पक्षे इडागमः (७.२.४४) स्यन्दित्वा । तत्र यदा इडागमस्तदा 'न क्त्वा सेट्' (१.२.२८) इति कित्त्वप्रतिषेधादेव नलोपाभावः॥

३०३३. जान्तनशां विभाषा ॥ ३२ ॥ (३३३०)

जान्तानामङ्गानां नशेश्च क्त्वाप्रत्यये परतो विभाषा नकारलोपो न भवति । रङ्क्त्वा, रक्त्वा । भङ्क्त्वा, भक्त्वा ।

नशः - नष्ट्वा, नंष्ट्वा । इट्पक्षे-नशित्वा ॥

३०३४. भञ्जेश्च चिणि ॥ ३३ ॥ (२७५४)

भञ्जेश्च चिणि परतो विभाषा नकारलोपो भवति । अभाजि, अभञ्जि ।

अप्राप्तोऽयं नलोपः पक्षे विधीयते, ततो नेति नानुवर्तते ॥

३०३५. शास इदङ्हलोः ॥ ३४ ॥ (३४८६)

शास उपधाया इकारादेशो भवति अङि परतो हलादौ च क्ङिति । अन्वशिषत्, अन्वशिषताम्, अन्वशिषन् । हलादौ किति-शिष्टः । शिष्टवान् । ङिति-आवां शिष्वः । वयं शिष्मः । इत्त्वे कृते 'शासिवसिघसीनां च' (८.३.६०) इति षत्वम्।

अङ्हलोरिति किम्? शासति । शशासतुः, शशासुः ।

क्वौ च शास इत्वं भवतीति वक्तव्यम् (म. भा.) । आर्यान् शास्तीति आर्यशीः । मित्रशीः ।

यस्मात् शासेरङ् विहितः 'शासु अनुशिष्टौ' (धा.पा.१०७६) इति, तस्यैवेदं ग्रहणमिष्यते । 'आङः शासु इच्छायाम्' (धा.पा. १०२३) इत्यस्य न भवति - आशास्ते, आशास्यमानः ।

क्विप्प्रत्यये तु तस्यापि भवतीति वक्तव्यम् (म.भा.) । आशीः, आशिषौ, आशिषः । 'क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्' (८.२.१०४) इति निपातनाद्वा सिद्धम्॥

३०३६. शा हौ ॥ ३५ ॥ (२४८७)

शासो हौ परतः 'शा' इत्ययमादेशो भवति । अनुशाधि । प्रशाधि ।

'उपधायाः' इति निवृत्तम्, ततः 'शासः' इति स्थानेयोगा (१.१.४९) षष्ठी भवति ।

'क्ङिति' इत्येतदपि निवृत्तम् । तेन यदा 'वा छन्दसि' (३.४.८८) इति पित्त्वं हिशब्दस्य, तदाप्यादेशो भवत्येव । शाधीत्याद्युदात्तमपि छन्दसि दृश्यते ॥

३०३७. हन्तेर्जः ॥ ३६ ॥ (२४३१)

हन्तेर्धातोर्ज इत्ययमादेशो भवति हौ परतः । जहि शत्रून् ॥

३०३८. अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति ॥ ३७ ॥ (२४२८)

[अनुनासिकान्तानाम्] अनुदात्तोपदेशानामङ्गानां वनतेस्तनोत्यादीनां चानुनासिकलोपो भवति झलादौ क्ङिति प्रत्यये परतः । यमु-यत्वा । यतः । यतवान् । यतिः ।

रमु-रत्वा । रतः । रतवान् । रतिः । अनुदात्तोपदेशा अनुनासिकान्ता यमिरमिनमिगमिहनिमन्यतयः ।

वनति-वतिः । क्तिनि रूपमेतत् । क्तिचि तु 'न क्तिचि दीर्घश्च' (६.४३९) इति भवति। अन्यत्र झलादाविटा भवितव्यम् ।

तनोत्यादयः - ततः । ततवान् । सनोतेरात्वं वक्ष्यति । क्षणि-क्षतः । क्षतवान्.। ऋणु-ऋतः । ऋतवान् । तृणु-तृतः । तृतवान् । घृणु-घृतः । घृतवान् । वनु - वतः । वतवान् । मनु - मतः । मतवान् । ङिति - अतत । अतथाः ।

अनुदात्तोपदेशवनतितनोत्यादीनामिति किम्? शान्तः । शान्तवान् । तान्तः । तान्तवान्। दान्तः । दान्तवान् । अनुनासिकस्येति किम्? पक्वः । पक्ववान् । झलीति किम्? गम्यते । रम्यते । क्ङितीति किम्? यन्ता । यन्तव्यम् । उपदेशग्रहणं किम्? इह च यथा स्यात् - गतिः । इह च मा भूत्-शान्तः, शान्तवानिति ॥

३०३९. वा ल्यपि ॥ ३८ ॥ (३३३४)

ल्यपि परतोऽनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो वा भवति । व्यवस्थितविभाषा चेयम्, तेन मकारान्तानां विकल्पो भवति । अन्यत्र नित्यमेव लोपः । प्रत्यय, प्रयम्य । प्ररत्य, प्ररम्य । प्रणत्य, प्रणम्य । आगत्य, आगम्य । आहत्य । प्रमत्य । प्रवत्य । प्रक्षत्य ॥

३०४०. न क्तिचि दीर्घश्च ॥ ३९ ॥ (३३१४)

क्तिचि परतोऽनुदात्तोपदेशादीनामनुनासिकलोपो दीर्घश्च न भवति । यन्तिः । वन्तिः । तन्तिः ।

अनुनासिकलोपे प्रतिषिद्धे 'अनुनासिकस्य क्विझलोः क्ङिति' (६.४.१५) इति दीर्घः प्राप्नोति, सोऽपि प्रतिषिद्ध्यते ॥

३०४१. गमः क्वौ ॥ ४० (२९८६)

गमः क्वौ परतोऽनुनासिकलोपो भवति । अङ्गगत् । कलिङ्गगत् । अध्वगतो हरयः ।

गमादीनामिति वक्तव्यम् (म. भा.) । इहापि यथा स्यात् - सम्यत् । परीतत्।

ऊ च गमादीनामिति वक्तव्यम् । (म. भा) । अग्रेगूः । अग्रेभ्रूः ॥

३०४२. विड्वनोरनुनासिकस्यात् ॥ ४१ ॥ (२९८२)

विटि वनि च प्रत्यये परतोऽनुनासिकान्तस्याङ्गस्याकार आदेशो भवति । 'अ॒ब्जाः गा॒जाः ऋ॑त॒जाः अ॑द्रि॒जाः' (ऋ. ४.४०.५) । 'गा॒षा इ॑न्द्रो नृ॒षा अ॑सि' (ऋ. ९.२.१०) । 'कूपखाः । शतखाः । सहस्रखाः । दधिक्राः । अग्रेगा उन्नेतॄणाम्। 'जनसनखनक्रमगमो विट्' (३.२.६७) इति

विट् प्रत्ययः । 'सनोतेरनः' (८.३.१०८) इति षत्वम्-गोषा इन्दो नृषा असीत्यत्र । वन्-विजावा । अग्रेजावा । 'अन्येभ्योऽपि दृश्यन्ते' (३.२.७५) इति वनिप्प्रत्ययः ।

'अनुनासिकस्य' इति वर्त्तमाने पुनरनुनासिकग्रहणमनुनासिकमात्रपरिग्रहार्थम्, अन्यथा ह्ययनुदात्तोपदेशवनतितनोत्यादीनामेव स्यात् ॥

३०४३. जनसनखनां सञ्झलोः ॥ ४२ ॥ (२५०४)

'झलि' , 'क्ङिति' इति चानुवर्त्तते । जन, सन, खन-इत्येतेषामङ्गानां सनि झलादौ क्ङिति झलादौ [च] प्रत्यये परत आकार आदेशो भवति । जन्-जातः.। जातवान् । जातिः । सन् - सनि, सिषासति । सातः । सातवान् । सातिः । खन्-खातः । खातवान् । खातिः ।

झल्ग्रहणं सन्विशेषणार्थं किमर्थमनुवर्त्त्यते? इह मा भूत्-जिजनिषति । सिसनिषति । चिखनिषति । सनोतेः 'सनीवन्तर्ध' (७.२.४९) इति पक्षे इडागमः।

तदिह सनोत्यर्थमेव सन्ग्रहणम् । अत्र झलादौ क्ङिति सनोतेर्विप्रतिषेधाद् आत्त्वमनुनासिकलोपं बाधते ।

'घुमास्थागापाजहातिसां हलि' (६.४.६६) इति हल्ग्रहणं ज्ञापकम्-अस्मिन्नसिद्धप्रकरणे विप्रतिषेधो भवतीति ॥

३०४४. ये विभाषा ॥ ४३ ॥ (३२१९)

यकारादौ क्ङिति प्रत्यये परतो जनसनखनामाकार आदेशो भवति विभाषा । जायते, जन्यते । जाजायते, जञ्जन्यते । सायते, सन्यते । सासायते, संसन्यते । खायते, खन्यते । चाखायते, चङ्खन्यते । जनेः श्यनि 'ज्ञाजनोर्जा' (७.३.७९) इति नित्यं जादेशो भवति ॥

३०४५. तनोतेर्यकि ॥ ४४ ॥ (२८५९)

तनोतेर्यकि परतो विभाषा आकार आदेशो भवति । तायते, तन्यते ।

यकीति किम्? तन्तन्यते ।

३०४६. सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥ ४५ ॥ (३३१५)

सनोतेरङ्गस्य क्तिचि प्रत्यये परत आकार आदेशो भवति लोपश्चास्यान्यतरस्याम्। सातिः, सन्तिः, सतिः ।

अन्यतरस्यांग्रहणं विस्पष्टार्थम् । ये - सम्बद्धं हि विभाषाग्रहणमिह निवृत्तमित्याशङ्क्येत॥

३०४७. आर्धधातुके ॥ ४६ ॥ (२३०७)

'आर्धधातुके' इत्यधिकारः । 'न ल्यपि' (६.४.६९) इति प्रागेतस्माद्यदित ऊर्ध्वमनुक्रमिष्यामः 'आर्धधातुके' इत्येवं तद्वेदितव्यम् । वक्ष्यति-

"अतो लोपः । (६.४.४८)_ चिकीर्षिता । जिहीर्षिता । आर्धधातुक इति किम्? भवति । भवतः ।'' अदिप्रभृतिभ्यः शपि लुग्वचनं (२.४.७२) प्रत्ययलोपलक्षणप्रतिषेधार्थं स्यादित्येतन्न ज्ञापकं शपो लोपाभावस्य ।

"यस्य हलः (६.४.४९) । बेभिदिता । बेभिदितुम् । बेभिदितव्यम् । आर्धधातुक इति किम्? बेभिद्यते ।''

"णेरनिटि (६.४.५१) । कारणा । हारणा । आर्धधातुक इति किम्? कारयति। हारयति।''

"आतो लोपः (६.४.६४) । ययतुः । ययुः । ववतुः । ववुः । आर्धधातुक इति किम्? यान्ति । वान्ति ।''

"घुमास्थागापाजहातिसां हलि (६.४.६६) । दीयते । धीयते । आर्धधातुक इति किम्? अदाताम् । अधाताम्'' ।

"वाऽन्यस्य संयोगादेः (६.४.६८) । स्नेयात्, स्नायात् । आर्धधातुक इति किम्? स्नायात्। आशीर्लिङोऽन्यत्र न भवति '' ।

"स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च (६.४.६२) । कारिषीष्ट । हारिषीष्ट । आर्धधातुक इति किम्? क्रियेत । ह्रियेत । यगन्तस्याजन्तत्वाच्चिण्वद्भावे सति वृद्धिः स्यात्, ततश्च युक् प्रसज्येत'' ।

अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् ।

आल्लोप ईत्वमेवं च चिण्वद्भावश्च सीयुटि ॥ (म. भा. श्लोक वा.१)

३०४८. भ्रस्जो रोपधयो रमन्यतरस्याम् ॥ ४७ ॥ (२५३५)

भ्रस्जो रेफस्योपधायाश्च रमन्यतरस्यां भवति । 'रोपधयोः' इति स्थानषष्ठीनिर्देशादुपधा, रेफश्च निवर्त्तेते । मित्त्वाच्चायमचोऽन्त्यात्परो भवति । भ्रष्टा, भर्ष्टा। भ्रष्टुम्, भर्ष्टुम् । भ्रष्टव्यम्, भर्ष्टव्यम् । भ्रज्जनम्, भर्ज्जनम् ।

भृष्टः, भृष्टवान् इत्यत्र पूर्वविप्रतिषेधेन सम्प्रसारणं भवति ।

उपदेश इत्येव - बरीभृज्यते ॥

३०४९. अतो लोपः ॥ ४८ ॥ (२३०८)

अकारान्तस्यार्धधातुके लोपो भवति। चिकीर्षिता । चिकीर्षितुम् । चिकीर्षितव्यम्.। धिनुतः । कृणुतः ।

अत इति किम्? चेता । स्तोता । तपरकरणं किम्? याता । वाता । आर्धधातुक इति किम्? वृक्षत्वम् । वृक्षता ।

वृद्धिदीर्घाभ्यामतो लोपः पूर्वविप्रतिषेधेन (म. भा.) । चिकीर्षकः । जिहीर्षकः। चिकीर्ष्यते। जिहीर्ष्यते ॥

३०५०. यस्य हलः ॥ ४९ ॥ (२६३१)

हल उत्तरस्य यशब्दस्यार्धधातुके लोपो भवति । बेभिदिता । बेभिदितुम् । बेभिदितव्यम्।

'यस्य' इति सङ्घातग्रहणमेतत् । तत्र 'अलोऽन्त्यस्य' (१.१५२) इत्येतन्न भवति; 'अतो लोपः' (६.४.४८) इत्यनेनैव तस्य सिद्धत्वात् ।

'हलः' इति वा पञ्चमीनिर्देशः, तत्र 'आदेः परस्य' (१.१.५४) इति यकारोऽनेन लुप्यते ।

सङ्घातग्रहणं किम्? ईर्ष्यिता । मव्यिता । हल इति किम्? लोलूयिता । पोपूयिता ॥

३०५१. क्यस्य विभाषा ॥ ५० ॥ (२६६०)

क्यस्य हल उत्तरस्य विभाषा लोपो भवति आर्धधातुके । समिधिता, समिध्यिता.। दृषदिता, दृषद्यिता । समिधमात्मन इच्छति, समिधमिवात्मानमाचरति - इति वा क्यच्क्यङौ यथायोगं कर्त्तव्यौ ॥

३०५२. णेरनिटि ॥ ५१ ॥ (२३१३)

अनिडादावार्धधातुके णेर्लोपो भवति । इयङ्यण्गुणवृद्धिदीर्घाणामपवादः। अततक्षत् । अररक्षत् । आटिटत् । आशिशत् । कारणा । हारणा । कारकः । हारकः.। कार्यते । हार्यते । ज्ञीप्सति ।

अनिटीति किम्? कारयिता । हारयिता ।

३०५३. निष्ठायां सेटि ॥ ५२ ॥ (३०५७)

निष्ठायां सेटि परतो णेर्लोपो भवति । कारितम् । हारितम् । गणितम् । लक्षितम् ।

सेटीति किम्? संज्ञपितः पशुः । इड्ग्रहणसामर्थ्यादिह पूर्वेणापि न भवति। 'सनीवन्तर्ध' (७.२.४९) इति ज्ञप्रेरिटि विकल्पिते 'यस्य विभाषा' (७.३.१५) इति निष्ठायां प्रतिषेधः ।

अथ पुनः 'एकाचः' इति तत्रानुवर्त्तते, तदा नित्यमत्र भवितव्यमेवेडागमेनेति सेड्ग्रहणमनर्थकम्? तत् क्रियते कालावधारणार्थम् - इडागमे कृते णिलोपो यथा स्यात् । अकृते हि तत्र णिलोपे सति कारितमित्यत्र 'एकाच उपदेशेऽनुदात्तात्' (७.२.१०) इतीटः प्रतिषेधः प्रसज्येत ॥

३०५४. जनिता मन्त्रे ॥ ५३ ॥ (३५४२)

ज॑नी॒तेति मन्त्रविषये इडादौ णिलोपो निपात्यते । 'यो नः॑ पि॒ता जनि॒ता' (ऋ. १०.८२.३)। मन्त्र इति किम्? जनयिता ।

३०५५. शमिता यज्ञे ॥ ५४ ॥ (३५४३)

यज्ञकर्मणि शमितेति इडादौ तृचि णिलोपो निपात्यते । शृतं हविः शमितः। तृचि सम्बुद्ध्यन्तमेतत् ।

यज्ञे इति किम्? शृतं हविः शमयितः ॥

३०५६. अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ५५ ॥ (२३११)

आम्, अन्त, आलु, आय्य, इत्नु, इष्णु-इत्येतेषु परतो णेरयादेशो भवति । कारयाञ्चकार। हारयाञ्चकार । अन्त-गण्डयन्तः । मण्ड्यन्तः । आलु-स्पृहयालुः.। आय्य-स्पृहयाय्यः (ऋ. ६.४.१२) । गृहयाय्यः । इत्नु-स्तनयित्नुः । इष्णु-पोषयिष्णवः (मै.४.२.१४) पारयिष्णवः ।

'न' इति वक्तव्ये अयादेशवचनमुत्तरार्थम् ॥

३०५७. ल्यपि लघुपूर्वात् ॥ ५६ ॥ (३३३६)

ल्यपि परतो लघुपूर्वाद्वर्णादुत्तरस्य णेरयादेशो भवति । प्रणमय्य, प्रथमय्य, प्रदमय्य, प्रशमय्य, सन्दमय्य गतः । प्रबेभिदय्य गतः । प्रगणय्य गतः ।

ह्रस्वयलोपाल्लोपानमसिद्धत्वं न भवति, असमानाश्रयत्वात् - ह्रस्वादयो हि णौ, ल्यपि णेरयादेशो भवति । लघुपूर्वादिति किम्? प्रपात्यः गतः ॥

३०५८. विभाषाऽऽपः ॥ ५७ ॥ (३३३७)

इडादेशस्य लाक्षणिकत्वान्न भवति - अध्याप्य गतः ॥

३०५९. युप्लुवोर्दीर्घश्छन्दसि ॥ ५८ ॥ (३५४४)

यु, प्लु-इयेतयोर्ल्यपि परतश्छन्दसि विषये दीर्घो भवति । 'दान्त्यनुपूर्वं वियूय' (ऋ. १०.१३१.२) । 'यत्रा यो दक्षिणा परिप्लूय' (काठ. सं. २५.३) ।

छन्दसीति किम्? संयुत्य । आप्लुत्य ॥

३०६०. क्षियः ॥ ५९ ॥ (३३३८)

क्षियश्च दीर्घो भवति ल्यपि परतः । प्रक्षीय ॥

३०६१. निष्ठायामण्यदर्थे ॥ ६० ॥ (३०१४)

ण्यतः कृत्यस्यार्थो=भावकर्मणी, ताभ्यामन्यत्र या तिष्ठा तस्यां क्षियो दीर्घो भवति । आक्षीणः । प्रक्षीणः । परिक्षीणः । अकर्मकत्वात् क्षियः कर्त्तरि क्तः ।

प्रक्षीणमिदं देवदत्तस्येति 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (६.४.७६) इत्यधिकरणे क्तः ।

अण्यदर्थ इति किम्? अक्षितमसि मा मेक्षेष्ठाः (तै.सं. १.६.५.१) । क्षितमिति भावे दीर्घाभावात् 'क्षियो दीर्घात्' (८.२.४६) इति निष्ठानत्वमपि न भवति ॥

३०६२. वाऽऽक्रोशदैन्ययोः ॥ ६१ ॥ (३०८१)

आक्रोशे गम्यमाने, दैन्ये च क्षियो निष्ठायामण्यदर्थे वा दीर्घो भवति । क्षितायुरेधि । क्षीणायुरेधि । दैन्ये-क्षितकः । क्षीणकः । क्षितोऽयं तपस्वी । क्षीणोऽयं तपस्वी ॥

३०६३. स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ ६२ ॥ (२७५७)

स्य, सिच्, सीयुट्, तासि-इत्येतेषु भावकर्मविषयेषु परत उपदेशेऽजन्तानामङ्गानाम्, हन्, ग्रह, दृश्-इत्येतेषां च चिण्वत्कार्यं भवति वा । यदा चिण्वत् तदा इडागमो भवति । कस्य? स्यसिच्सीयुट्तासीनामेवेति वेदितव्यम्; ते हि प्रकृताः । अङ्गस्य तु लक्ष्यविरोधान्न क्रियते ।

कानि पुनरस्य योगस्य प्रयोजनानि?

चिण्वद्वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।

इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥ (म. भा. श्लो. वा.)

अजन्तानां तावत्-चायिष्यते, चेष्यते, अचायिष्यत, अचेष्यत । दायिष्यते, दास्यते, अदायिष्यत, अदास्यत । शामिष्यते, शमिष्यते, शमयिष्यते, अशामिष्यत, अशमिष्यत, अशमयिष्यत । हन्-घानिष्यते, हनिष्यते, अघानिष्यत, अहनिष्यत । ग्रह - ग्राहिष्यते, ग्रहीष्यते, अग्राहिष्यते, अग्रहीष्यते । 'ग्रहोऽलिटि दीर्घः' (७.२.३७) इति प्रकृतस्येटो दीर्घत्वम् । दृश् - दर्शिष्यते, द्रक्ष्यते, अदर्शिष्यत, अद्रक्ष्यत ।

सिच्यजन्तानाम्-अचायिषाताम्, अचेषाताम् । अदायिषाताम्, अदिषाताम् । अशामिषाताम् । अशमिषाताम्, अशमयिषाताम् । हन्-अघानिषाताम्, अवधिषाताम्, अहसाताम्। ग्रह्-अग्राहिषाताम्, अग्रहीषाताम् । दृश् - अदर्शिषाताम्, अदृक्षाताम्।

सीयुटि अजन्तानाम्-चायिषीष्ट, चेषीष्ट । दायिषीष्ट, दासीष्ट । शामिषीष्ट, शमिषीष्ट, शमयिषीष्ट । हन्-घानिषीष्ट, वधिषीष्ट । ग्रह-ग्राहिषीष्ट, ग्रहीषीष्ट । दृश्-दर्शिषीष्ट, दृक्षीष्ट ।

तासावजन्तानाम्-चायिता, चेता । दायिता, दाता । शामिता, शमिता, शमयिता.। हन् - घानिता, हन्ता । ग्रह-ग्राहिता, ग्रहीता । दृश्-दर्शिता, दर्ष्टा, द्रष्टा ।

स्यासिच्सीयुट्तासिष्विति किम्? चेतव्यम्, दातव्यम् । भावकर्मणोरिति किम्? चेष्यति। दास्यति । उपदेश इति किम्? कारिष्यते - इति गुणे कृते रपरत्वे च न प्राप्नोति, उपदेशग्रहणाद् भवति । अज्झनग्रहदृशामिति किम्? पठिष्यते ।

अङ्गाधिकारविहितं कार्यमिहातिदिश्यते, तेन हनिणिङामादेशा न भवन्ति । हनिष्यते, घानिष्यते । एष्यते, आयिष्यते । अध्येष्यते, अध्यायिष्यते । 'हनो वध लिङि' (२.४.४२), 'लुङि च' , (२.४.४३) 'इणो गा लुङि' ,(२.४.४५) 'विभाशा लुङ्लृङोः' (२.४.५०) इत्येते विधयो न भवन्ति॥

३०६४. दीङो युडचि क्ङिति ॥ ६३ ॥ (२५०७)

दीङो युडागमो भवति अजादौ क्ङिति प्रत्यये परतः । उपदिदीये, उपदिदीयाते, उपदिदीयिरे ।

'दीङः' इति पञ्चमीनिर्देशादजादेर्युडागमो भवति । विधानसामर्थ्याच्च 'एरनेकाचः' (६.४.८२) इति यणादेशे कर्त्तव्ये तस्यासिद्धत्वं न भवति ।

अचीति किम्? उपदेदीयते । क्ङितीति किम्? उपदानम् ॥

३०३५. आतो लोप इटि च ॥ ६४ ॥ (२६७२)

इट्यजादावार्धधातुके क्ङिति चाकारान्तस्याङ्गस्य लोपो भवति । इटि-पपिथ। तस्थिथ । किति-पपतुः, पपुः । तस्थतुः तस्थुः । गोदः । कम्बलदः । ङिति-प्रदा। प्रधा ।

'आर्धधातुके' इत्येव - यान्ति । वान्ति । व्यत्यरे । व्यत्यले । रातेर्लातेश्च लङि इटि रूपम् ।

अचीत्येव-ग्लायते । दासीय ॥

३०६६. ईद्यति ॥ ६५ ॥ (२८४३)

ईकार आदेशो भवति आकारान्तस्याङ्गस्य यति परतः । देयम् । धेयम् । हेयम् । स्तेयम् ॥

३०३७. घुमास्थागापाजहातिसां हलि ॥ ६६ ॥ (३४६२)

घुसंज्ञकानामङ्गानां मा, स्था, गा, पा, जहाति, सा-इत्येतेषां हलादौ क्ङिति प्रत्यये परत ईकारादेशो भवति । दीयते, देदीयते । धीयते, देधीयते । मीयते, मेमीयते । स्थीयते, तेष्ठीयते। गीयते, जेगीयते । अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत । पीयते, पेपीयते ।

पातेरिह ग्रहणं नास्ति; लुग्विकरणत्वात् । पायते - इत्येव तस्य भवति ।

हीयते । जेहीयते । जहातेरिह निर्देशाद् जिहातेर्ग्रहणं न भवति । हायते । षोऽन्तकर्मणि' (धा.पा. ११४८) - अवसीयते, अवसेसीयते ।

हलीति किम्? ददतुः, ददुः । आतो लोपाद्धि परत्वादीत्वं स्यात् । एतदेव हल्ग्रहणं ज्ञापकम्-अस्मिन् प्रकरणे विप्रतिषेधेनासिद्धत्वं भवति ।

'क्ङिति' इत्येव-दाता । धाता ॥

३०३८. एर्लिङि ॥ ६७ ॥ (२३७४)

घुमास्थागापाजहातिसामङ्गानां लिङि परत एकारादेशो भवति । देयात् । मेयात् । धेयात् । स्थेयात् । गेयात् । पेयात् । अवसेयात् ।

'क्ङिति' इत्येव-दासीष्ट । धासीष्ट ॥

३०३९. वाऽन्यस्य संयोगादेः ॥ ३८ ॥ (२३७८)

घ्वादिभ्योऽन्यस्य संयोगादेराकारान्तस्य वा एकारादेशो भवति लिङि परतः । ग्लेयात्, ग्लायात् । म्लेयात्, म्लायात् ।

अन्यस्येति किम्? स्थेयात् । संयोगादेरिति किम्? यायात् ।

'क्ङिति' इत्येव-ग्लासीष्ट । 'अङ्गस्य' इत्येव-निर्वायात् ॥

३०७०. न ल्यपि ॥ ६९ ॥ (३३३५)

ल्यापि प्रत्यये परतो घुमास्थागापाजहातिसां यदुक्तं तन्न [भवति] । प्रदाय । प्रधाय । प्रमाय । प्रस्थाय । प्रगाय । प्रपाय । प्रहाय । अवसाय ॥

३०७१. मयतेरिदन्यतरस्याम् ॥ ७० ॥ (३३१८)

मयरेरिकारादेशो वा भवति ल्यपि परतः । अपमित्य, अपमाय ॥

३०७२. लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥ ७१ ॥ (२२०६)

लुङ्, लङ्, लृङ्-इत्येतेषु परतोऽङ्गस्याडागमो भवति, उदात्तश्च स भवति । लुङ्-अकार्षीतु, अहार्षीत् । लङ्-अकरोत्, अहरत् । लृङ्-अकरिष्यत्, अहरिष्यत्॥

३०७३. आडजादीनाम् ॥ ७२ ॥ (२२५४)

आडागमो भवत्यजादीनां लुङ्लङ्लृङ्क्षु परतः, उदात्तश्च स भवति । ऐक्षिष्ट। ऐहिष्ट । औब्जीत् । औम्भीत् । लङ्-ऐक्षत ऐहत । औब्जत् । औम्भत् । लृङ्-ऐक्षिष्यत । औब्जिष्यत्। औम्भिष्यत् ।

इह ऐज्यत, औप्यत, औह्यतेति लङि कृते लावस्थायामाडा-गमादन्तरङ्गत्वाल्लादेशः क्रियते, तत्र कृते विकरणो नित्यत्वादडागमं बाधते । शब्दान्तरप्राप्तेरडागमस्यानित्यत्वम्; कृते हि विकरणान्तस्याङ्गस्य तेन भवितव्यम्, अकृते तु धातुमात्रस्य 'शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति (परि.) ।

ननु शब्दान्तरादिति विकरणोऽनित्यः? विकरणे कृते सम्प्रसारणमडाग-मान्नित्यत्वादेव भवति, सम्प्रसारणे च कृतेऽजाद्यङ्गं जातमिति 'आडजादीनाम्' इत्याडागमः ॥

३०७४. छन्दस्यपि दृश्यते ॥ ७३ ॥ (३५४५)

छन्दसि विषये आडागमो दृश्यते । यतो हि विहितस्ततोऽन्यत्रापि दृश्यते । 'आडजादीनाम्' (६.४.७२) इत्युक्तम्, अनजादीनामपि दृश्यते-'सुरुचा॑ व॒न आ॑वः' (वा.सं. १३.३) । आनक् । आयुनक् । 'आबः' इति वृञो लुङि 'मन्त्रे घसह्वर' (२.४.८०) इति लेर्लुकि कृते च भवति, तथा 'आनक्' इति नशेः । 'आयुनक्' इति युजेर्लङि ॥

३०७५. न माङ्योगे ॥ ७४ ॥ (२२२८)

माङ्योगे लुङ्लङ्लृङ्क्षु यदुक्तं तन्न भवति । मा भवान् कार्षीत् । मा भवान् हार्षीत् । मा स्म करोत् । मा स्म हरत् । मा भवानीहिष्ट, मा भवानीक्षिष्ट । मा स्म भवानीहत । मा स्म भवानीक्षत ॥

३०७६. बहुलं छन्दस्यमाङ्योगेऽपि ॥ ७५ ॥ (३५४६)

छन्दसि विषये माङ्योगेऽपि बहुलमडाटौ भवतः । अमाङ्योगेऽपि न भवतः। अमाङ्योगे तावत्- 'जनिष्ठा उग्रः' (ऋ. १०.७३.१) । 'काममूनयीः (ऋ.१.५३.३)। काममर्दयीत् । माङ्योगेऽपि भवतः-'मा वः क्षेत्रे परबीजान्यवाप्सुः (आ.ध. २.१३.६) मा अभित्थाः । मा आवः ॥

३०७७. इरयो रे ॥ ७६ ॥ (३५४७)

'इरे' -इत्येतस्य छन्दसि विषये बहुलं 'रे' इत्ययमादेशो भवति । 'गर्भ प्रथमं दध्र आपः। (ऋ. १०.८२.५) । याऽस्य परिदध्रे । परिदद्रश्रे । घात्रो रेभावस्यासिद्धत्वादातो लोपो भवति ।

न च भवति-'परमाया धियोऽग्निकर्माणि चक्रिरे । अत्र रेशब्दस्य सेटां धातूनामिटि कृते पुना रेभावः क्रियते, तदर्थम् 'इरयोः' इत्ययं द्विवचननिर्देशः ॥

३०७८. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ७७ ॥ (२७१)

श्नुप्रत्ययान्तस्याङ्गस्य धातोरिवर्णोवर्णान्तस्य 'भ्रू' इत्येतस्य च इयङ्, उवङ्-इत्येतावादेशौ भवतोऽजादौ प्रत्यये परतः । आप्नुवन्ति । राध्नुवन्ति । शक्नुवन्ति । धातोः - चिक्षियतुः, चिक्षियुः । लुलुवतुः, लुलुवुः । नियौ, नियः । लुवौ, लुवः। भ्रुवौ, भ्रुवः ।

अचीति किम्? आप्नुयात् । शक्नुयात् । राध्नुयात् । श्नुधातुभ्रुवामिति किम्? लक्ष्म्यै। वध्वै । य्वोरिति किम्? चक्रतुः । चक्रुः ।

इयङुवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन । चयनम्, चायकः । लवनम्, लावकः ।

इयङुवङ्प्रकरणे तन्वादीनां छन्दसि बहुलमुपसंख्यानं कर्तव्यम् (म. भा.) तन्वं (आ.वे.५.३.१) पुषेम i॒नुवं (तै. सं १.५.५.४) पुषेम । विष्वं पुषेम, विषुवं पुषेम । स्वर्गो लोकः, सुवर्गो (तै. १.५.७.१) लोकः । त्र्यम्बकं (तै. १.८.६) यजामहे, त्रियम्बकं यजामहे ॥

३०७९. अभ्यासस्यासवर्णे ॥ ७८ ॥ (२२९०)

अभ्यासस्येवर्णोवर्णान्तस्यासवर्णेऽचि परत इयङ्, उवङ्-इत्येतावादेशौ भवतः.। इयेषा । उवोष । इयर्त्ति ।

असवर्ण इति किम्? ईयतुः, ईयुः । ऊवतुः, ऊवुः । [ईषतुः, ईषुः । ऊषतुः, ऊषुः ।]

'अचि' इत्येव-इयाज । उवाप ॥

३०८०. स्त्रियाः ॥ ७९ ॥ (३०१)

'स्त्री' -इत्येतस्याजादौ प्रत्यये परत इयङादेशो भवति । स्त्री, स्त्रियौ, स्त्रियः । स्त्रीणाम्-इत्यत्र परत्वान्नुडागमः ।

पृथग्योगकरणमुत्तरार्थम् ॥

३०८१. वाऽम्शसोः ॥ ८० ॥ (३०२)

अमि शसि परतः स्त्रियां वा इयङादेशो भवति । स्त्रीं पश्य, स्त्रियं पश्य । स्त्रीः पश्य, स्त्रियः पश्य ॥

३०८२. इणो यण् ॥ ८१ ॥ (२४५५)

इणोऽङ्गस्य यणादेशे भवति अचि परतः । यन्ति । यन्तु । आयन् । इयङादेशापवादोऽयम् । 'मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते' (व्या.प. १०) इति गुणवृद्धिभ्यां परत्वादयं बाध्यते । अनयम् । आयकः ॥

३०८३. एरनेकाचोऽसंयोगपूर्वस्य ॥ ८२ ॥ (२७२)

धातोरिति वर्तते, तेन संयोगो विशेष्यते । धातोरवयवः संयोगः पूर्वो यस्मादिवर्णान्न भवति असावसंयोगपूर्वः तदन्तस्याङ्गस्यानेकाचोऽचि परतो यणादेशो भवति । निन्यतुः, निन्युः। उन्न्यौ, उन्न्यः । ग्रामण्यौ । ग्रामण्यः ।

एरिति किम्? असंयोगपूर्वग्रहणमिवर्णविशेषणं यथा स्याद्, अङ्गविशेषणं मा भूदिति । लुलुवतुः, लुलुवुः-इत्येतत्तु 'ओः सुपि' (६.४.८३) इति नियमादपि सिध्यति ।

अनेकाच इति किम्? नियौ, नियः । असंयोगपूर्वस्येति किम्? यवक्रियौ । यवक्रियः । धातुना संयोगविशेषणं किम्? इहापि न स्याद्-उन्न्यौ, उन्न्य इति ।

गतिकारकाभ्यामन्यपूर्वस्य नेष्यते । परमनियौ । परमनिय इति ॥

३०८४. ओः सुपि ॥ ८३ ॥ (२८१)

धात्ववयवः संयोग पूर्वो यस्मादुवर्णान्न भवति तदन्तस्याङ्गस्यानेकाचोऽजादौ सुपि परतो यणादेशो भवति । खलप्वौ, खलप्वः । शतस्वौ, शतस्वः । सकृल्ल्वौ, सकृल्ल्वः ।

सुपीति किम्? लुलुवतुः, लुलुवुः ।

'अनेकाचः' इत्येव - लुवौ, लुवः ।

'असंयोगपूर्वस्य' इत्येव-कटप्रुवौ, कटप्रुवः ।

'गतिकारकाभ्यामन्यपूर्वस्य नेष्यते' इत्येव-परमलुवौ, परमलुवः ।

३०८५. वर्षाभश्च ॥ ८४ ॥ (२८२)

वर्षाभू-इत्येतस्याजादौ सुपि परतो यणादेशो भवति । वर्षाभ्वौ, वर्षाभ्वः ।

'पुनर्भ्वश्चेति वक्तव्यम् (क.वा.) पुनर्भ्वौ, पुनर्भ्वः ॥

कारापूर्वस्यापीष्यते-काराभ्वौ, काराभ्वः ॥

३०८६. न भूसुधियोः ॥ ८५ ॥ (२७३)

भू, सुधी-इत्येतयोर्यणादेशो न भवति । प्रतिभुवौ, प्रतिभुवः । सुधियौ, सुधियः ॥

३०८७. छन्दस्युभयथा ॥ ८६ ॥ (३५४५)

छन्दसि विषये भू, सुधी-इत्येतयोरुभयथा दृश्यते । 'वनेषु चित्रं u॒pu॑ वि॒शे' ,(ऋ. ४.७.१) वि॒शे वि॒भुवं॑म् (तै.सं. १.५.५) । सुध्यो हव्यमग्ने, सिधियो हव्यमग्ने ॥

३०८८. हुश्नुवोः सार्वधातुके ॥ ८७ ॥ (२३८७)

'हु' इत्येतस्याङ्गस्य श्नुप्रत्ययान्तस्यानेकाचोऽसंयोगपूर्वस्याजादौ सार्वधातुके परतो यणादेशो भवति । जुह्वति, जुह्वi । सुन्वन्ति, सुन्वन्तु, असुन्वन् ।

हुश्नुवोरिति किम्? योयुवति । रोरुवति ।

इदमेव हुश्नुग्रहणं ज्ञापकम् - भाषायामपि यङ्लुगस्तीति । छन्दसि 'छन्दस्युभयथा' (६.४.८६) इत्यार्धधातुकत्वादेव यणादेशस्याप्रसङ्गः । न च यङ्लुगन्तादन्यत् प्रत्युदाहरणम् उवर्णान्तमनेकाजसंयोगपूर्वं सार्वधातुके विद्यते ।

सार्वधातुक इति किम्? जुहुवतुः, जुहुवुः ।

'असंयोगपूर्वस्य' इत्येव-आप्नुवन्ति । राध्नुवन्ति ॥

३०८९. भुवो वुग्लुङ्लिटोः ॥ ८८ ॥ (२१७४)

भुवो वुगागमो भवति लुङि लिटि चाजादौ परतः । अभूवन् । अभूवम् । लिट्-बभूव, बभूवतुः, बभूवुः ॥

३०९०. ऊदुपधाया गोहः ॥ ८९ ॥ (२३३४)

गोहोऽङ्गस्य उपधाया ऊकारादेशो भवति अजादौ प्रत्यये परतः । निगूहयति। निगूहकः। साधु निगूही । निगूहंनिगूहम् । [निगूहन्ति] । निगूहो वर्तते ।

उपधाया इति किम्? अलोऽन्त्यस्य मा भूत् ।

'गोहः' इति विकृतग्रहणं विषयार्थम् (म. भा.) । यत्रास्यैतद्रूपं तत्रैव यथा स्यात्, इह मा भूत्-निजुगुहतुः, निजुगुहुः ।

अयादेशप्रतिषेधार्थं च केचिदिच्छन्ति । निगूह्य गत इत्युत्वस्यासिद्धत्वाद् 'ल्यपि लघुपूर्वात्' (६.४.५६) इत्ययादेशः स्यात् । व्याश्रयत्वादेवासिद्धत्वमत्र नास्ति-णावूत्वम्, ण्यन्तस्य च ल्यप्ययादेश इति ।

अचीत्येव-निगोढा । निगोढुम् ॥

३०९१. दोषो णौ ॥ ९० ॥ (२६०४)

दोष उपधाया ऊकार आदेशो भवति णौ परतः । दूषयति । दूषयतः । दूषयन्ति ।

विकृतग्रहणं प्रक्रमाभेदार्थम् । पूर्वत्र हि 'गोहः' इत्युक्तम् ।

णाविति किम्? दोषो वर्तते ॥

३०९२. वा चित्तविरागे ॥ ९१ ॥ (२६०५)

चित्तविकारार्थे दोष उपधाया वा ऊकारादेशो भवति णौ परतः । चित्तं दूषयति, चित्तं दोषयति । प्रज्ञां दूषयति, प्रज्ञां दोषयति ।

३०९३. मितां ह्रस्वः ॥ ९२ ॥ (२५६८)

मितो धातवः 'घटादयो मितः' (सि.कौ. पृ. ७३२) इत्येवमादयो ये प्रतिपादिताः, तेषामुपधाया ह्रस्वो भवति णौ परतः । घटयति । व्यथयति । जनयति । रजयति । शमयति। ज्ञपयति ।

केचिदत्र 'वा' इत्यनुवर्त्तयन्ति, सा च व्यवस्थितविभाषा, तेन उत्क्रामयति, संक्रामयतीत्येवमादि सिद्धं भवति ॥

३०९४. चिण्ण्मुलोर्दीर्घोऽन्यतरस्याम् ॥ ९३ ॥ (२७६२)

चिण्परे णमुल्परे च णौ परतो मितामङ्गानामुपधाया दीर्घो भवति अन्यतरस्याम्.। अशमि, अशामि । अतमि, अतामि । शमंशमम्, शामंशामम् । तमन्तमम्, तामन्तामम्।

दीर्घग्रहणं किम्, न ह्रस्वविकल्प एव विधीयते? नैवं शक्यम्; शमयन्तं प्रयुक्ते-इति द्वितीये णिचि ह्रस्वविकल्पो न स्यात् ।

णिलोपस्य स्थानिवद्भावाद् दीर्घविधौ त्वजादेशो न स्थानिवात् । शमयन्तं प्रयुक्तान् । अशमि, अशामि । शमंशमम्, शामंशामम् । शंशमयतेः - अशंशमि, अशंशामि । अशंशमि । शंशामम् ।

योऽसौ णौ णिर्लुप्यते, यश्च यङकारः, तयोर्द्वीर्घविधौ आदेशो न स्थानिवद्भवतीति अस्थानिवद्भावादीर्घः सिद्धो भवति । ह्रस्वविकल्पे तु विधीयमाने स्थानिवद्भावः स्यात् ।

णिण्यन्ते यङ्ण्यन्ते त्वसिद्धिरेव । व्याश्रयत्वादसिद्धत्वमपि नास्ति । णौ हि णियङोर्लोपः, चिण्णमुल्परे णावङ्गस्य दीर्घत्वम् ॥

३०९५. खचि ह्रस्वः ॥ ९४ ॥ (२९५५)

खच्परे णौ परतो ह्रस्वो भवत्यङ्गस्योपधायाः । द्विषन्तपः । परन्तपः । पुरन्दरः ॥

३०९६. हलादो निष्ठायाम् ॥ ९५ ॥ (३०७३)

हलादोऽङ्गस्योपधाया ह्रस्वो भवति निष्ठायां परतः । प्रहलान्नः । प्रहलन्नवान् ।

निष्ठायामिति किम्? प्रहलादयति । 'हलाद' इति योगविभागः क्रियते, क्तिन्यपि यथा स्यात्-प्रहलत्तिरिति ॥

३०९७. छादेर्घेऽद्व्युपसर्गस्य ॥ ९६ ॥ (३२९७)

छादेरङ्गस्याद्व्युपसर्गस्य घप्रत्यये परत उपधाया ह्रस्वो भवति । उरश्छदः । दन्तच्छदः।

णिलोपस्य चासिद्धत्वं स्थानिवद्भावो वा वचनसामर्थ्यादत्र न भवतीति ह्रस्वभाविन्युपधा भवति ।

अद्व्युपसर्गस्येति किम्? समुपच्छादः ।

अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् (म. भा.) । समुपातिच्छादः । उत्तरा हि संख्या पूर्वसंख्याकृतं व्यपदेशं निवर्त्तयति, न हि त्रिपुत्रो द्विपुत्र इति व्यपदिश्यते.॥

३०९८. इस्मन्त्रन्क्विषु च ॥ ९७ ॥ (२९८५)

इस्, मन्, त्रन्, क्वि-इत्येतेषु परतश्छादेरुपधाया ह्रस्वो भवति । छदिः । छद्म । छत्त्रम्। धामच्छत् । उपच्छत् ।

३०९९. गमहनजनखनघसां लोपः क्ङित्यनङि ॥ ९८ ॥ (२३६३)

गम, हन, जन, खन, घस-इत्येतेषामङ्गानामुपधाया लोपो भवत्यजादौ प्रत्यये क्ङित्यनङि परतः । जग्मतुः, जग्मुः । जघ्नतुः, जघ्नुः । [जज्ञतुः, जज्ञुः] जज्ञे, जज्ञाते, जज्ञिरे। चख्नतुः, चख्नुः । जक्षतुः, जक्षुः । 'अक्षन्नमीमदन्त पितरः' (वा. सं. १९.३६) ।

क्ङितीति किम्? गमनम् । हननम् । अनङीति किम्? अगमत् । अघसत् ।

अचीत्येव - गम्यते, हन्यते ॥

३१००. तनिपत्योश्छन्दसि ॥ ९९ ॥ (३५४९)

तनि, पति-इत्येतयोश्छन्दसि विषये उपधाया लोपो भवति अजादौ क्ङिति प्रत्यये परतः। 'वितत्निरे कवयः' (ऋ. १.१६४.५) । 'शकुना इव पप्तिम (ऋ. १.१०४.२०) ।

छन्दसीति किम्? वितेनिरे । पेतिम ॥

३१०१. घसिभसोर्हलि च ॥ १०० ॥ (३५५०)

घसि, भस-इत्येतयोश्छन्दसि उपधाया लोपो भवति हलादावजादौ च क्ङिति प्रत्यये परतः । 'सग्धिश्च मे सपीतश्च मे' (वा.सं. १८.९) । 'बब्धां ते हरी धानाः' (नि. ५.१२) ।

सग्धिरिति-अदेः क्तिनि 'बहुलं छन्दसि' (२.४.३९) इति घस्लादेशे उपधाया लोपे च कृते 'झलो झलि' (८.२.२६) इति सकारलोपः । धत्वं तकारस्य, जश्त्वं घकारस्य । ततः समानाग्धिः - सग्धिरिति समासे कृते समानस्य सभावः ।

बब्धामिति - भसेर्लोटि तामि श्लौ द्विर्वचने कृते उपधलोपसलोपधत्वजश्त्वानि कर्त्तव्यानि। द्विर्वचनात्परत्वान्नित्यत्वाच्च उपधालोपः प्राप्नोति; छान्दसत्वात् स तथा न क्रियते ।

अजादौ-बप्सति । क्ङितीत्येव-'अंशून् बभस्ति' (काठ. सं. ३५.१४) ॥

३१०२. हुझल्भ्यो हेर्धिः ॥ १०१ ॥ (२४२५)

'हु' इत्येतस्मात् झलन्तेभ्यश्चोत्तरस्य हलादेर्हेः स्थाने धिरादेशो भवति । जुहुधि । झलन्तेभ्यः - भिन्धि । छिन्धि ।

हुझल्भ्य इति किम्? क्रीणीहि । प्रीणीहि ।

हेरिति किम्? जुहुताम् ।

हलीत्येव-रुदिहि । स्वपिहि ।

इह जुहुतात्, भिन्तात् त्वमिति परत्वात् तातङि कृते 'सकृद् गतौ विप्रतिषेधे यब्दाधितं तद्वधितमेव' (चा.प.६०) इति पुनर्धिभावो न भवति ।

भिन्धकि, छिन्धकीत्यत्र परत्वाद् धिभावे कृते पुनःप्रसङ्गविज्ञानादकच् क्रियते॥

३१०३. श्रुशृणुपृकृवृभ्यश्छन्दसि ॥ १०२ ॥ (३५५१)

श्रु, शृणु, पॄ, कृ, वृ-इत्येतेभ्य उत्तरस्य हेर्धिरादेशो भवति छन्दसि विषये। 'श्रधी हवमिन्द्र' (ऋ. २.११.३) । 'शृणुधी गिरः' (ऋ. ८.१३.७) । पूर्द्धि (ऋ. ८.७८.१०) उरुण॑स्कृधि (ऋ. ८.५७.११) । अपा॑वृधि (ऋ. १.७.६) ।

शृणुधीत्यत्र धिभावविधानसामर्थ्याद् 'उतश्च प्रत्ययात्' (६.४.१०४) इति हेर्लुग्न भवति । 'अन्येषामपि दृश्यते' (६.३.१३७) इति दीर्घत्वम् । अतोऽन्यत्र 'व्यत्ययो बहुलम्' (३.१.८५) इति शप्, तस्य 'बहुलं छन्दसि' (२.४.७३) इति लुक् ॥

३१०४. अङितश्च ॥ १०३ ॥ (३५५३)

अङितश्च हेर्धिरादेशो भवति । 'वा छन्दसि' (३.४.८८) इति पित्त्वेनास्याङित्त्वम्.। 'सो॑मं रार॒न्धि' (ऋ.१.९१.१३) । 'अस्मभ्यं॒ तद्धर्यश्व॒ प्रय॑न्धि' (ऋ. ३.३६.९) । 'यु॒यो॒ध्य॒स्मज्ज॑हु॒रा॒णम॑नः॒' (ऋ. १.१८९.२०)

अङित इति किम्? 'हव्यं प्रीणीहि' (काठ. सं. ४०.९४) ।

रारन्धीति-रमेर्व्यत्ययेन परस्मैपदम्, शपः श्लुः, अभ्यासदीर्घत्वं छान्दसत्वात्। मलेपाभावास्तु अङित्त्वादेव । प्रयन्धीति-यमेः शपो लुक् । युयोधीति-यौतेः शपः श्लुः ॥

३१०५. चिणो लुक् ॥ १०५ ॥ (२३२९)

चिण उत्तरस्य प्रत्ययस्य लुग्भवति । अकारि । अहारि । अलावि । अपाचि।

अकारितराम्, अहारितमामित्यत्र तलोपस्यासिद्धत्वात् तरप्तमपोर्न लुग्भवति; 'चिणो लुक्' इत्येतद्विषयभेदाद्भिद्यते ॥

३१०६. अतो हेः ॥ १०५ ॥ (२२००)

अकारान्तादङ्गादुत्तरस्य हेर्लुग्भवति । पच । पठ । गच्छ । धाव ।

अत इति किम्? युहि । रुहि । तपरकरणं किम्? लुनीहि । पुनीहि । ईत्वस्यासिद्धत्वादाकार एव भवति ॥

३१०७. उतश्च प्रत्ययादसंयोगपूर्वात् ॥ १०६ ॥ (२३३४)

उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादुत्तरस्य हेर्लुग्भवति । चिनु । सुनु । कुरु ।

उत इति किम्? लुनीहि । पुनीहि । प्रत्ययादिति किम्? रुहि । युहि । असंयोगपूर्वादिति किम्? प्राप्नुहि । राध्नुहि । तक्ष्णुहि ॥

उतश्च प्रत्ययाच्छन्दोवावचनम् (म. भ.) । 'उतश्च प्रत्ययात्' इत्यत्र 'छन्दसि वा' इति वक्तव्यम् । आतनुहि यातुधानान् । 'धिनुहि यज्ञपतिम्' (काठ सं. १.६)। तेन मा भगिनं कृणुहि (अ. वे. १२९.१)

३१०८. लोपश्चास्यान्यतरस्यां म्वोः ॥ १०७ ॥ (२३३३)

योऽयमुकारोऽसंयोगपूर्वः तदन्तस्य प्रत्ययस्यान्यतरस्यां लोपो भवति वकारमकारादौ प्रत्यये परतः । सुन्वः, सुनुवः । सुन्मः , सुनुमः । तन्वः, तनुवः। तन्मः, तनुमः ।

प्रत्ययस्येत्येव-युवः, युमः । असंयोगपूर्वस्येत्येव-शक्नुवः, शक्नुमः ।

लुगिति वर्त्तमाने, लोपग्रहणमन्त्यलोपार्थम् ॥

३१०९. नित्यं करोतेः ॥ १०८ ॥ (२५४८)

करोतेरुत्तरस्य उकारप्रत्ययस्य वकारमकारादौ प्रत्यये परतो नित्यं लोपो भवति । कुर्वः, कुर्मः । उकारलोपस्य दीर्घविधावस्थानिवद्भावाद् 'हलि च' (८.२.७७) इति दीर्घत्वं प्राप्तम्, 'न भकुर्छुराम्' (८.२.७९) इति प्रतिषिध्यते ॥

३११०. ये च ॥ १०९ ॥ (२५४९)

यकरादौ च प्रत्यये परतः करोतेरुत्तरस्योकारप्रत्ययस्य नित्यं लोपो भवति । कुर्यात्, कुर्याताम्, कुर्युः ॥

३१११. अत उत्सार्वधातुके ॥ ११० ॥ (२४६७)

उकारप्रत्ययान्तस्य करोतेरकारस्य स्थाने उकार आदेशो भवति सार्वधातुके क्ङिति परतः। कुरुतः । कुर्वन्ति ।

सार्वधातुकग्रहणं किम्? भूतपूर्वेऽपि सार्वधातुके यथा स्यात् - कुरु ।

तपरकरणं लघूपधस्य गुणनिवृत्त्यर्थम् ।

क्ङितीत्येव-करोति । करोषि । करोमि ॥

३११२. श्नसोरल्लोपः ॥ १११ ॥ (२४६९)

श्नस्यास्तेश्चाकरस्य लोपो भवति, सार्वधातुके क्ङिति परतः । रुन्धः, रुन्धन्ति [रुन्द्धः, रुन्द्धन्ति] । भिन्तः, भिन्दन्ति । अस्तेः-स्तः, सन्ति ।

क्ङितीत्येव - भिनत्ति । अस्ति ।

'श्नसोः' इत्याकारस्य पररूपत्वं शकन्ध्वादिषु द्रष्टव्यम् ॥

३११३. श्नाभ्यस्तयोरातः ॥ ११२ ॥ (२४८३)

'श्ना' इत्येतस्याभ्यस्तानां चाङ्गानामाकारस्य लोपो भवति सार्वधातुके क्ङिति परतः । लुनते । लुनताम् । अलुनत । अभ्यस्तानाम् -मिमते । मिमताम् । अमिमत.। सञ्जिहते । सञ्जिहताम् । समजिहत ।

श्नाभ्यस्तयोरिति किम्? यान्ति । वान्ति । आत इति किम्? बिभ्रति ।

क्ङितीत्येव-अलुनात् । अजहात् । आद्ग्रहणं स्पष्टार्थम् ॥

३११४. ई हल्यघोः ॥ ११३ ॥ (२४९७)

श्नान्तानामङ्गानामभ्यस्तानां च घुवर्जितानामात ईकारादेशो भवति हलादौ सार्वधातुके क्ङिति परतः । लुनीतः, पुनीतः । लुनीथः, पुनीथः । लुनीते, पुनीते। अभ्यस्तानाम्- मिमीषे । मिमीध्वे । सञ्जिहीते । सञ्जिहीषे । सञ्जिहीध्वे ।

हलीति किम्? लुनन्ति । मिमते । अघोरिति किम्? दत्तः । धत्तः ।

क्ङितीत्येव-लुनाति । जहाति ॥

३११५. इद्दरिद्रस्य ॥ ११४ ॥ (२४८२)

दरिद्रातेर्हलादौ सार्वधातुके क्ङिति परत इकारादेशो भवति । दरिद्रितः । दरिद्रिथः । दरिद्रिवः । दरिद्रिमः ।

हलीत्येव-दरिद्रति । क्ङितीत्येव - दरिद्राति ।

दरिद्रातेरार्धधातुके लोपो वक्तव्यः (का.वा. १) ।

सिद्धश्च प्रत्ययविधौ भवतीति वक्तव्यम् (का.वा.२) । दरिद्रातीति दरिद्रः । आकारान्तलक्षणो णप्रत्ययो न भवति, पचादित्वादजेव भवति ।

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।

दिदरिद्रासतीत्येके दिदरिद्रषतीति वा ॥ (म. भा.)

अद्यतन्यां वेति वक्तव्यम् (का.वा.३) । अदरिद्रीत्, अदरिद्रासीत् । 'दरिद्रस्य' इति निर्देशे छान्दसं ह्रस्वत्वं द्रष्टव्यम् ॥

३११६. भियोऽन्यतरस्याम् ॥ ११५ ॥ (२४९२)

'भी' इत्येतस्याङ्गस्यान्यतरस्यामिकारादेशो भवति हलादौ क्ङिति सार्वधातुके परतः । बिभितः, बिभीतः । बिभिथः, बिभीथः । बिभिवः, बिभीवः । बिभिमः, बिभीमः ।

हलादावित्येव-बिभ्यति । क्ङितीत्येव-बिभेति । सार्वधातुक इयेव-भीयते॥

३११७. जहातेश्च ॥ ११६ ॥ (२४९८)

जहातेश्च इकारादेशो भवति अन्यतरस्यां हलादौ क्ङिति सार्वधातुके परतः। जहितः, जहीतः । जहिथः, जहीथः ।

हलादावित्येव-जहति । क्ङितीत्येव -जहाति । सार्वधातुक इत्येव - हीयते। जेहीयते ।

पृथग्योगकरणमुत्तरार्थम् ॥

३११८. आ च हौ ॥ ११७ ॥ (३४९९)

जहातेराकारश्चान्तादेशो भवति इकारश्चान्यतरस्यां हौ परतः । जहाहि, जहिहि, जहीहि॥

३११९. घ्वसोरेद्धावभ्यासलोपश्च ॥ ११९ ॥ (२४७१)

घुसंज्ञकानामङ्गानामस्तेश्च एकारादेशो भवति हौ परतोऽभ्यासलोपश्च । देहि। धेहि । अस्तेः-

'श्नसोरल्लोपः' (६.४.१११) इत्यकारलोपः, एधि । शिदयं लोपः, तेन सर्वस्याभ्यासस्य भवति ॥

३१२१. अत एकहल्मध्येऽनादेशादेर्लिटि ॥ १२० ॥ (२२६०)

लिटि परत आदेश आदिर्यस्याङ्गस्य नास्ति तस्य एकहल्मध्ये असहाययोर्हलोर्मध्ये योऽकारस्तस्य एकारादेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतः । रेणतुः, रेणुः । येमतुः, येमुः । पेचतुः, पेचुः । देमतुः, देमुः ।

अत इति किम्? दिदिवतुः । दिदिवुः । तपरकरणं किम्? ररासे, ररासाते, ररासिरे । एकहल्मध्य इति किम्? [ररक्षतुः, ररक्षुः] । तत्सरतुः, तत्सरुः । अनादेशादेरिति किम्? चकणतुः, चकणुः । जगणतुः, जगणुः । बभणतुः, बभणुः।

लिट आदेश-विशेषणं किम्? इहापि यथा स्यात् - नेमतुः, नेमुः । सेहे, सेहाते, सेहिते । अनैमित्तिके नत्वसत्वे, तदादिर्लिट्यादेशादिर्न भवति ।

इहाभ्यासजश्त्वचर्त्वयोरसिद्धत्वं नास्ति, तेन तदादिरप्यादेशादिर्भवति । तथा च फलिभजोरेत्वं विधीयते । रूपाभेदे चादेशादिर्नाश्रीयत इति शसिदद्योः प्रतिषेधवचनं ज्ञापकम्, अन्यथा हि पेचतुः, पेचुः, देमतुः देमुरित्येवमादीनामपि प्रकृतिजश्चरादीनामेत्वं न स्यत् ।

क्ङितीत्येव - अहं पपच । अहं पपठ ।

दम्भेरेत्वं वक्तव्यम् (का.वा.५) । देभतुः । देभुः । नलोपस्यासिद्धत्वान्न प्राप्नोति ।

नशिमन्योरलिट्येत्वं वक्तव्यम् (का.वा.) । अनेशम् । मेनका । अनेशमिति नशेर्लुङि पुषादित्वादङ् । मेनकेति मनेः 'आशिषि च' इति वुन् । क्षिपकादिषु प्रक्षेपादित्वं न क्रियते ।

छन्दस्यमिपचोरप्यलिटि एत्वं वक्तव्यम् (म. भा.) । व्येमानम् । अमेर्विपूर्वस्य चानशि मुक् न क्रियते । लिङि - पेचिरन् । पेचिरन्नित्येतस्य छान्दसं ह्रस्वत्वम्।

यजिवप्योश्च (म. भा.) आयेजे । आवेपे । यजेर्वपेश्च लिङि इटि 'छन्दस्यपि दृश्यते' (६.४.७३) इत्यनजादेरप्याडागमः ॥

३१२२. थलि च सेटि ॥ १२१ ॥ (२२६१)

थलि च सेटि परतोऽनादेशादेरङ्गस्य एकहल्मध्यगतस्यातः स्थाने एकार आदेशो भवति अभ्यासलोपश्च । मेचिथ । शेकिथ ।

सेटिति किम्? पपक्थ ।

थल्ग्रहणां विस्पष्टार्थम् । अक्ङिदर्थमेतद्वचनमित्यन्यस्येटोऽसम्भवात् ।

अत इत्येव-दिदेविथ । 'एकहल्मध्यगतस्य' इत्येव-ततक्षिथ । ररक्षिथ । अनादेशादेरित्येव-चकणिथ । बभणिथ ॥

३१२३. तृफलभजत्रपश्च ॥ १२२ ॥ (२३०१)

तृ, फल, भज, त्रप-इत्येतेषामङ्गानामत एकारादेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । तेरतुः, तेरुः, तेरिथ । फेलतुः, फेलुः, फेलिथ। भेजतुः, भेजिथ । त्रेपे, त्रेपाते, त्रेपिरे ।

तरतेर्गुणार्थं वचनम् । फलिभजोरादेशाद्यर्थम् । त्रपेरनेकहल्मध्यार्थम् ।

श्रन्थेश्चेति वक्तव्यम् । श्रेथतुः, श्रेथुः ॥

३१२४. राधो हिंसायाम् ॥ १२३ ॥ (२५३२)

राधो हिंसायामर्थेऽवर्णस्य एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । अपरेधतुः, अपरेधुः, अपरेधिथ ।

हिंसायामिति किम्? रराधतुः, रराधुः, रराधिथ ।

अत-इत्येतदिहोपस्थितं तपरत्वकृतमपास्य कालविशेषमसम्भवादवर्णमात्रं प्रतिपादयति ।

अथ वा-'श्नाभ्यस्तयोरातः' (६.४.१२) - 'इत्यनुवर्त्तते' इति व्याख्येयम् ।

एकहल्मध्ये वा यः स स्थानी भविष्यति ॥

३१२५. वा जृभ्रमुत्रसाम् ॥ १२४ ॥ (२३५६)

जृ, भ्रमु, त्रस-इत्येतेषामङ्गानामतः स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । जेरतुः, जेरुः, जेरिथ । जजरतुः, जजरुः, जजरिथ । भ्रेमतुः, भ्रेमुः, भ्रेमिथ । बभ्रमतुः, बभ्रमुः, बभ्रमिथ। त्रेसतुः, त्रेसुः, त्रेसिथ । तत्रसतुः, तत्रसुः, तत्रसिथ ॥

३१२६. फणां च सप्तानाम् ॥ १२५ ॥ (२३५४)

फणादीनां सप्तानां धातूनामवर्णस्य स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परतः, थलि च सेटि ।

(१) फेणतुः, फेणुः, फेणिथ । पफणतुः, पफणुः, पफणिथ ।

(२) रेजतुः, रेजुः, रेजिथ । रराजतुः, रराजुः, रराजिथ ।

(३) भ्रेजे, भ्रेजाते, भ्रेजिरे । बभ्राजे, बभ्राजाते, बभ्राजिरे ।

(४) भ्रेशे, भ्रेशाते, भ्रेशिरे । बभ्राशे, बभ्राशाते, बभ्राशिरे ।

(५) भ्लेशे, भ्लेशाते, भ्लेशिरे । बभ्लाशे, बभ्लाशाते, बभ्लाशिरे ।

(६) स्येमतुः, स्येमुः, स्येमिथ । सस्यमतुः, सस्यमुः, सस्यमिथ ।

(७) स्वेनतुः, स्वेनुः, स्वेनिथ । सस्वनतुः, सस्वनुः, सस्वनिथ ।

सप्तानामिति किम्? दध्वनतुः, दध्वनुः, दध्वनिथ ॥

३१२७. न शसददवादिगुणानाम् ॥ १२६ ॥ (२२६३)

शस, दद-इत्येतयोर्वकारादीनां च धातूनां गुण इत्येवमभिनिर्वृत्तस्य च योऽकारस्तस्य स्थाने एकारादेशो न भवति, अभ्यासलोपश्च । विशशसतुः, विशशसुः, विशशसिथ । ददे, ददाते, ददिरे ।

वादीनाम्-ववमतुः ववमुः, ववमिथ । गुणस्य-विशशरतुः, विशशरुः, विशशरिथ । लुलविथ, पुपविथ ।

गुणशब्दाभिनिर्वृत्तस्यार्शब्दस्यौकारस्य चायमकार इति एत्वं प्रतिषिध्यते ॥

३१२८. अर्वणस्त्रसावनञः ॥ १२७ ॥ (३६४)

अर्वन्नित्येतस्याङ्गस्य 'तृ' इत्येयमादेशो भवति, सुश्चेत्ततः परो न भवति, स च नञ उत्तरो न भवति । अर्वन्तौ, अर्वन्तः । अर्वन्तम्, अर्वन्तौ, अर्वतः । अर्वता, अर्वद्भ्याम्, अर्वद्भिः। अर्वती । आर्वतम् ।

असाविति किम्? अर्वा । अनञ इति किम्? अनर्वाणौ, अनर्वाणः । 'अनर्वाणं वृषभं मन्द्रजिह्वम्' (ऋ. १.१९०.१) ॥

३१२९. मघवा बहुलम् ॥ १२८ ॥ (३६०)

'मघवन्' इत्येतस्याङ्गस्य बहुलम् 'तृ' इत्ययमादेशो भवति । मघवान्, मघवन्तौ, मघवन्तः । मघवन्तम्, मघवन्तौ, मघवतः । मघवता । मघवती । माघवताम्।

न च भवति मघवा, मघवानौ, मघवानः । मघवानम्, मघवानौ, मघोनः । मघोना, मघवभ्याम्, मघवभिः । 'म॒घोनी॑' । (ऋ. १.४७.७) माघवानम् ॥

३१३१. पादः पत् ॥ १३० ॥ (१४४)

'पादः' इति पादशब्दो लुप्ताकारो गृह्यते, तदन्तस्यङ्गस्य भस्य 'पत्' इत्ययमादेशो भवति । स च 'निर्दिश्यमानस्यादेशा भवन्ति' (व्या. प. १०६) इति पाच्छब्दस्यैव भवति, न तदन्तस्य सर्वस्य । द्विपदः पश्य । द्विपदा । द्विपदे । द्विपदिकां ददारि । त्रिपदिकां ददाति । वैयाघ्रपद्यः ॥

३१३२. वसोः सम्प्रसारणम् ॥ १३१ ॥ (४३५)

वस्वन्तस्य भस्य सम्प्रसारणं भवति । विदुषः पश्य । विदुषा । विदुषे । पेचुषः पश्य। पेचुषा । पेचुषे । पपुषः पश्य ।

आकारलोपे कर्त्तव्ये वसुसम्प्रसारणस्य व्याश्रयत्वादसिद्धत्वं न भवति ।

वसुग्रहणे क्वसोरपि ग्रहणमिष्यते ।

३१३३. वाह ऊठ् ॥ १३२ ॥ (३२९)

'वाहः' इत्येवमन्तस्य भस्य ऊठ् इत्येतत्सम्प्रसारणं भवति । प्रष्ठौहः । प्रष्ठौहा । प्रष्ठौहे। दित्यौहः । दित्यौहा । दित्यौहे । 'एत्येधत्यूठसु' (६.१.८९) इति वृद्धिः ।

अथ किमर्थमूठ् क्रियते, सम्प्रसारण एव कृते गुणे च 'वृद्धिरेचि' (६.१८८) इति वृद्धौ सत्यां सिद्धं रूपं भवति-प्रष्ठौह इति, अनकारान्ते चोपपदे वहेण्विर्न दृश्यते? ज्ञापनार्थम् । एतज्ज्ञापयति-भवत्येषा परिभाषा 'असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प. ४२) इति । तस्यां हि सत्यां बहिरङ्गस्य सम्प्रसारणस्यासिद्धत्वाद् अन्तरङ्गो गुणो न स्यात् ॥

३१३४. श्वयुवमघोनामतद्धिते ॥ १३३ ॥ (३६२)

श्वन्, युवन्, मघवन्-इत्येतेषामङ्गानामतद्धिते प्रत्यये परतः सम्प्रसारणं भवति.। शुनः, शुना, शुने । यूनः, यूना, यूने । मघोनः, मघोना, मघोने ।

अतद्धित इति किम्? शौवं मांसम् । यौवनं वर्त्तते । माघवनः । स्थालीपाकः। शुनो विकारे 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४), द्वारादित्वादैजागमः ।

श्वादीनामेतत्सम्प्रसारणं नकारान्तानामिष्यते (म. भा.) । इह न भवति-युवतीः पश्य । मघवतः, मघवता, मघवते । तदर्थमुत्तरत्र योगविभागं कुर्वन्ति - 'अल्लोपः' , 'अनः' ; अन इत्युभयोः शेष इति ॥

३१३५. अल्लोपोऽनः ॥ १३४ ॥ (२३४)

'अन्' इत्येवमन्तस्य भस्य अकारलोपो भवति । राज्ञः पश्य । राज्ञा । राज्ञे। तक्ष्णः पश्य । तक्ष्णा । तक्ष्णे ।

अनो नकारान्तस्यायं लोप इष्यते । इह न भवति - राजकीयमिति ॥

३१३६. षपूर्वहन्धृतराज्ञामणि ॥ १३५ ॥ (११६०)

षकारपूर्वो योऽन् हनो धृतराज्ञश्च तस्याकारलोपो भवति अणि परतः । औक्ष्णः । ताक्ष्णः। औणघ्नः । धार्त्तराज्ञः ।

षपूर्वहन्धृतराज्ञामिति किम्? सामनः । वैमनः । 'अन् इति प्रकृतिभावेनाल्लोपटिलोपावुभावपि न भवतः । अणीति किम्? ताक्षण्यः ॥

३१३७. विभाषा ङिश्योः ॥ १३६ ॥ (२३७)

ङौ परतः शीशब्दे च अनो विभाषा अकारलोपो भवति । राज्ञि, राजनि । साम्नि, सामनि । साम्नी, सामनी ॥

३१३८. न संयोगाद्वमन्तात् ॥ १३७ ॥ (३५५)

वकारमकारान्तात्संयोगादुत्तरस्यानोऽकारस्य लोपो न भवति । पर्वणा, पर्वणे। अथर्वणा, अथर्वणे ।

संयोगादिति किम्? प्रतिदीव्ना । प्रतिदीव्ने । साम्ना, साम्ने । वमन्तादिति किम्? तक्ष्णा । तक्ष्णे ॥

३१३९. अचः ॥ १३८ ॥ (४१६)

'अचः' इत्ययमञ्चतिर्लुप्तनकारो गृह्यते, तदन्तस्य भस्य अकारस्य लोपो भवति । दधीचः पश्य । दधीचा, दधीचे । मधूचः पश्य । मधूचा, मधूचे ॥

३१४०. उद ईत् ॥ १३९ ॥ (४२०)

उद उत्तरस्याच ईकारादेशो भवति । उदीचः । उदीचा । उदीचे ॥

३१४१. आतो धातोः ॥ १४० ॥ (२४०)

आकारान्तस्य धातोर्भस्य लोपो भवति । कीलालपः पश्य । कीलालपा, कीलालपे । शुभंयः पश्य । शुभंया, शुभंये ।

आत इति किम्? निया, निये । धातोरिति किम्? खट्वाः पश्य । मालाः पश्य ।

'आतः' इति योगविभागः तेन 'क्त्वो ल्यप्' ,(७.१.३७) 'हलः श्नः शानच्' (३.१.८३) - इत्येवमादि सिद्धं भवति ॥

३१४२. मन्त्रेष्वाङ्यादेरात्मनः ॥ १४१ ॥ (३५५४)

मन्त्रेषु आङि परत आत्मन आदेर्लोपो भवति । त्मना देवेभ्यः । त्मना सोमेषु.।

मन्त्रेष्विति किम्? आत्मना कृतम् । आङीति किम्? यदात्मनस्तन्नो वरिष्ठा।

आङोऽन्यत्रापि दृश्यते । 'त्मन्यंसमञ्चन् महयम् (ऋ. १०.११०.१०) ॥

३१४३. ति विंशतेडिति ॥ १४२ ॥ (८४४)

भस्य विंशतेस्तिशब्दस्य डिति प्रत्यये परतो लोपो भवति । विंशत्या क्रीतः विंशकः । विंशं शतम् । विंशतेः पूरणो विंशः । एकविंशः ॥

डितीति किम्? विंशत्या ॥

३१४४. टेः ॥ १४३ ॥ (३१६)

टिसंज्ञकस्य डिति प्रत्यये परतो लोपो भवति । कुमुद्वान् । नड्वान् । वेतस्वान् । उपसरजः । मन्दुरजः । त्रिंशता क्रीतः त्रिंशकः । डित्यभस्याप्यनुबन्धकरण-सामर्थ्यात् टिलोपो भवति ॥

३१४५. नस्तद्धिते ॥ १४४ ॥ (६७९)

नकारान्तस्य भस्य टेर्लोपो भवति तद्धिते परतः । आग्निशर्मिः । औडुलोमिः। बाह्वादित्वादिञ्प्रत्ययः ।

न इति किम्? सात्वतः । तद्धित इति किम्? शर्मणा । शर्मणे ।

नान्तस्य टिलोपे सब्रह्मचारिपीठसर्प्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलि-शिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानं कर्तव्यम् (का.वा.१) । अत्र ये इन्नन्तास्तेषाम् 'इनण्यनपत्ये' (६.४.१६४) इति प्रकृतिभावः प्राप्तः, ये त्वन्नन्तास्तेषाम् 'अन्' (६.४.१६७) इति । सब्रह्मचारिण इमे साब्रह्मचाराः । पीठसर्पिणः- पैठसर्पाः। कलापिना प्रोक्तमधीयते कालापाः । कुथुमिनः - कौथुमाः । तैतिलिजाजलिनावाचार्यौ, तत्कृतो ग्रन्थ उपचारात् तैतिलिजाजलिशब्दाभ्यामभिधीयते, तं ग्रन्थमधीयते तैतिलाः, जाजलाः । शैषिकेष्वर्थेषु वृद्धत्वादत्र छः प्राप्नोति । एवं लाङ्गलाः शैलालाः । शिखण्डिनः - शैखण्डाः । सूकरसद्मनः - सौकरसद्माः । सुपर्वणः - सौपर्वाः।

अश्मनो विकार उपसंख्यानम् (म. भा.) । अश्मनो विकारः आश्मः । आश्मनोऽन्यः ।

चर्मणः कोश उपसंख्यानम् (म. भा.) । चार्मः कोशः । चार्मणोऽन्यः ।

शुनः सङ्कोच उपसंख्यानम् (म. भा.) । शौवः सङ्कोचः । शौवनोन्यः ।

अव्ययानां च सायम्प्रातिकाद्यर्थमुपसंख्यानम् (म. भा.) । के पुनः सायम्प्रातिकादयः ? येषामव्ययानामविहितष्टिलोपः, प्रयोगे च दृश्यते, ते सायम्प्रातिकप्रकारा ग्रहीतव्याः ।

सायम्प्रातर्भवः सायम्प्रातिकः । पौनःपुनिकः । बाह्यः । कौतस्कुतः । 'कालाट्ठञ्' (४.३.११) इति ठञ्प्रत्ययः ।

ट्युट्युलौ तु नेष्येते । आरातीयः, शाश्वतिकः, शाश्वतः - इत्येवमादिषु न दृश्यते टिलोपः॥

३१४६. अह्नष्टखोरेव ॥ १४५ ॥ (७८९)

'अहन्' इत्येतस्य टखोरेव परतष्टिलोपो भवति । द्वे अहनी समाहृते द्व्यहः। त्र्यहः । द्वे अहनी अधीष्टो भृतो भावी वा द्व्यहीनः । त्र्यहीनः । अह्नां समूहः क्रतुः अहीनः ।

अह्नः समूहे खो वक्तव्यः । सिद्धे सत्यारम्भो नियमार्थः । इह मा भत्-अह्ना निर्वृत्त माह्निकम् ।

एवकारकरणं विस्पष्टार्थम् । अह्न एव टखोः - इत्येवं नियमो न भविष्यति; 'आत्माध्वानौ खे' (६.४.१६९) इति प्रकृतिभावविधानात् ॥

३१४७. ओर्गुणः ॥ १४६ ॥ (८४७)

उवर्णान्तस्य भस्य गुणो भवति तद्धिते परतः । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । पिचव्यः कार्पासः । कमण्डलव्या मृत्तिका । परशव्यमयः । औपगवः। कापटवः ।

'ओरोत्' इति वक्तव्ये गुणग्रहणं 'संज्ञापूर्वको विधिरनित्यो' (व्या.प.६४) यथा स्यात्, तेन स्वायम्भुव इति सिद्धं भवति ॥

३१४८. ढे लोपोऽकद्रवाः ॥ १४७ ॥ (११४२)

ढे परत उवर्णान्तस्य भस्याकद्रवा लोपो भवति । कामण्डलेयः । शैतबाहेयः। जाम्बेयः । माद्रबाहेयः ।

अकद्रवा इति किम्? काद्रवेयो मन्त्रमपश्यत् ॥

३१४९. यस्येति च ॥ १४८ ॥ (३११)

इवर्णान्तस्यावर्णान्तस्य च भस्य ईकारे परे तद्धिते च लोपो भवति । इवर्णान्तस्य ईकारे-दक्षी । प्लाक्षी । सखी ।

सवर्णदीर्घत्वे हि सत्यतिसखेरागच्छतीत्यत्र एकादेशस्यान्तवत्त्वादसखीति (१.४.७) घिसंज्ञायाः प्रतिषेधः स्यात् ।

इवर्णान्तस्य तद्धिते-दुलि दौलेयः । वलि, वालेयः । अत्रि, आत्रेयः ।

अवर्णान्तस्य ईकारे-कुमारी । गौरी । शार्ङ्गरवी ।

अवर्णान्तस्य तद्धिते-दाक्षिः । प्लाक्षिः । चौडिः । बालाकिः । सौमित्रिः ।

यस्येत्यौडः श्यां प्रतिषेधो वक्तव्यः (का.वा.१) । काण्डे । कुड्ये । सौर्ये हिमवतः शृङ्गे। औङ शीभावे कृते 'यस्येति च' इति, 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः' (६.४.१५९) इति च लोपः प्राप्नोति ।

इयङुवङ्भ्यां लोपो भवति विप्ततिषेधेन (का.वा.२) वत्सान्प्रीणाति वत्सप्रीः, तस्याप्त्यं वात्सप्रेयः । चतुष्पाद्भ्यो ढञ् (४.१-१३५) इति ढञ् प्रत्ययः । लेखभ्रूः, शुभ्रादिः, तस्या अपत्यं लैखाभ्रेयः ॥

३१५०. सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ १४९ ॥ (४९९)

सूर्य, तिष्य, अगस्त्य, मत्स्य-इत्येतेषां यकारस्य उपधाया भस्य लोपो भवति ईति परतस्तद्धिते च । सूर्येणैकदिक् सौरी बलाका । अणि यो यस्येति लोपस्तस्यासिद्धत्वं नास्ति; व्याश्रयत्वात् । ईकारे तु यस्तस्यासिद्धत्वाद् उपाधायकारो भस्याणन्तस्य सूर्यस्य सम्बन्धीति लुप्यते । तिष्य-तैषमहः । तैषी रात्रिः । अगस्त्यस्यापत्यं स्त्री, ऋषित्वादणि कृते-आगस्ती । आगस्तीयः । मत्स्य-गौरादित्वान् ङीष्, मत्सी ।

उपधाया इति किम्? मत्स्यचरी ।

यग्रहणमुत्तरार्थम् । विषयपरिगणनमत्र कर्त्तव्यम्-

मत्स्यस्य ड्यामिति वक्तव्यम् (का.वा.५) । इह मा भूत्-मत्स्यस्येदं मांसं मात्स्यम् ।

सूर्यागस्त्ययोश्छे च ड्यां च (का.वा.६) । सौरीयः । सौरी । आगस्तीयः । आगस्ती । इह मा भूत्-सौर्य चरुं निर्वपेत् । आगस्त्यः ।

तिष्यपुष्ययोर्नक्षत्राणि (का.वा.७) । तिष्येण नक्षत्रेण युक्तः कालः तैषः । पौषः ।

अन्तिकस्य तसि कादिलोप आद्युदात्तं च (का.वा.८) । अन्तिकशब्दस्य तसिप्रत्यये परतः ककारादेः शब्दस्य लोपो वक्तव्यः, आद्युदात्तं च । अन्तितो न दूराद् ।

तमे तादेश्च (म.भा.) । तमप्रत्यये अन्तिकशब्दस्य तकारादेः ककारादेश्च लोपो वक्तव्यः। तत्र तादिलोपे-अन्तमः । कादिलोपे-अन्तितमः ।

कादिलोपे बहुलमिति वक्तव्यम् (म. भा.) । अन्यत्रापि हि दृश्यते-अन्तिके सीदतीति अन्तिषत् । 'पूर्वपदात्' इति षत्वम् ।

ये च (म. भा.) । अन्तियः ॥

३१५१. हलस्तद्धितस्य ॥ १५० ॥ (४७२)

'तद्धिते' इति निवृत्तम् । हल उत्तरस्य तद्धितयकारस्य उपधाया ईति परतो लोपो भवति। गार्गी । वात्सी ।

हल इति किम्? कारिकेयी । तद्धितस्येति किम्? वैद्यस्य भार्या वद्यी ॥

३१५२. आपत्यस्य च तद्धितेऽनाति ॥ १५१ ॥ (१०८२)

अपत्ययकारस्य हल उत्तरस्य तद्धिते अनाकारादौ यलोपो भवति । गर्गाणां समूहो गार्गकम् । वात्सकम् ।

आपत्यस्येति किम्? साङ्काश्यकः । काम्पिल्यकः ।

तद्धितग्रहणमीत्यनापत्यस्यापि लोपार्थम् - सौमी इष्टीः ।

अनातीति किम्? गार्ग्यायणः । वात्स्यायनः ।

हल इत्येव - कारिकेयस्यापत्यं कारिकेयिः ॥

३१५१. क्यच्व्योश्च ॥ १५२ ॥ (२११९)

क्य, च्वि-इत्येतयोश्च परत आपत्ययकारस्य हल उत्तरस्य लोपो भवति । वात्सीयति । गार्गीयति । वात्सायते । गार्गायते । च्वौ-गार्गीभूतः । वात्सीभूतः ।

आपत्यस्येत्येव-साङ्काश्यायते । साङ्काश्यभूतः ।

हल् इत्येव - कारिकेयीयति । कारिकेयीभूतः ॥

३१५४. बिल्वकादिभ्यश्छस्य लुक् ॥ १५३ ॥ (१३११)

नडादिषु बिल्वादयः पठ्यन्ते । 'नडादीनां कुक्च' (४.२.९१) इति कृतकुगागमा बिल्वकादयो भवन्ति, तेभ्य उत्तरस्य छस्य भस्य तद्धिते परतो लुग् भवति । बिल्वा यस्यां सन्ति बिल्वकीया, तस्यां भवाः बैल्वकाः । वेणुकीयाः, वैणुकाः । वेत्रकीयाः, वैत्रकाः । वेतसकीयाः, वैतसकाः । तृणकीयाः, तार्णकाः । इक्षुकीयाः ऐक्षुकाः । काष्ठकीयाः, काष्ठकाः । कपोतकीयाः, कापोतकाः ।

क्रुञ्चाह्रस्वत्वं च (ग.सू. ९२) । क्रुञ्चकीयाः, क्रौञ्चकाः ।

छग्रहणं किम्? छमात्रस्य लुग्यथा स्याद् कुको निवृत्तिर्मा भूदिति; अन्यथा हि 'सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभाव' (व्या.प. ४८) इति कुगपि निवर्त्तेत। लुग्ग्रहणं सर्वलोपो यथा स्याद्, यकारमात्रस्य मा भूत् ॥

३१५५. तुरिष्ठेमेयस्सु ॥ १५४ ॥ (२००८)

इष्ठन्, इमनिच्, ईयसुन्-इत्येतेषु परतः तृशब्दस्य लोपो भवति । आसुतिं करिष्ठः । विजयिष्ठः । वहिष्ठः । दोहीयसी धेनुः ।

सर्वस्य तृशब्दस्य लोपार्थं वचनम् । अन्त्यस्य हि 'टेः' (६.४.१५५) इत्येव सिद्धः ।

लुगित्येतदत्र नानुवर्त्तते; तथा हि सति 'न लुमताङ्गस्य' (१.१.६३) इति प्रतिषेधाद् गुणो न स्यात् ।

इमनिज्ग्रहणमुत्तरार्थम् । इतरौ तु 'तुश्छन्दसि' (५.३.५९) इति भवतः ॥

३१५६. टेः ॥ १५५ ॥ (१८८६)

भस्य टेर्लोपो भवति इष्ठेमेयस्सु परतः । पटु-पटिष्ठः, पटिमा, पटीयान् । लघु-लघिष्ठः, लघिमा, लघीयान् ।

णाविष्ठवत्प्रातिपदिकस्य कार्यं भवतीति वक्तव्यम् (का.वा.१) ।

किं प्रयोजनम्? पुंवद्भावरभावटिलोपयणादिपरार्थम् (म. भा.) । पुंवद्भावः - एनीमाचष्टे एतयति । श्येतयति । 'तसिलादिष्वाकृत्वसुचः' (६.३३५) इति इष्ठे पुंवद्भाव उक्तः । रभावः - पृथुमाचष्टे प्रथयति । भ्रदयति । टिलोपः-पटुमाचष्टे पटयति । लघयति । यणादिपरम् - स्थूलमाचष्टे स्थवयति ।

भारद्वाजीयास्तु पठन्ति-'णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरविन्मतोर्लुक्कनर्थम्' (म. भा.) इति । स्रग्विणमाचष्टे स्रजयति । वसुमन्तमाचष्टे वसयति । युवानमाचष्टे यवयति । कनयति । एतदुभयमप्युदाहरणमात्रम्, न परिगणनम् ।

प्रादयोऽपि हीष्यन्ते-प्रियमाचष्टे प्रापयति ॥

३१५७. स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ॥ १५६ ॥ (२०१५)

स्थूल, दूर, युव, ह्रस्व, क्षिप्र, क्षुद्र-इत्येतेषां यणादिपरं लुप्यते इष्ठेमेयस्सु परतः, पूर्वस्य च गुणो भवति । स्थूल-स्थविष्ठः, स्थवीयान् । दूर-दविष्ठः, दवीयान् । युवन् - यविष्ठः, यवीयान्। ह्रस्व-ह्रसिष्ठः, ह्रसीयान्, ह्रसिमा । क्षिप्र-क्षेपिष्ठः, क्षेपीयान्, क्षेपिमा । क्षुद्र-क्षोदिष्ठः, क्षोदीयान्, क्षोदिमा । ह्रस्वक्षिप्रक्षुद्रशब्दाः पृथ्वादिषु पठ्यन्ते ।

परग्रहणं किम्? यविष्ठः, यवीयान्; ह्रसिष्ठः, ह्रसीयान्-इत्यत्र पूर्वस्य यणादेर्लोपो मा भूत्।

पूर्वग्रहणं विस्पष्टार्थम् ॥

३१५८. प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बहिगर्वर्षित्रब्द्राघिवृन्दाः ॥ १५७ ॥ (२०१६)

प्रिय, स्थिर, स्फिर, उरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ, वृन्दारक-इत्येतेषां प्र, स्थ, स्फ, वर्,बंहि, गर्, वर्षि, त्रप्, द्राघि, वृन्द-इत्येते यथासंख्यमादेशा भवन्ति इष्ठेमेयस्सु परतः । प्रिय-प्रेष्ठः । प्रेमा । प्रेयान् । स्थिर-स्थेष्ठः । स्थेयान्। स्फिर-स्फेष्ठः । स्फेयान् । उरु-वरिष्ठः। वरिमा । वरीयान् । बहुल-बंहिष्ठः । बंहिमा । बंहीयान् । गुरु-गरिष्ठः । गरिमा । गरीयान् । वृद्ध-वर्षिष्ठः । वर्षीयान् । तृप्र-त्रपिष्ठः त्रपीयान् । दीर्घ-द्राघिष्ठः । द्राघीयान् । द्राघिमा । वृन्दारक - वृन्दिष्ठः। वृन्दीयान् ।

प्रियोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते, तेनान्येषमिमनिज् न भवतीति नोदाह्रियते.॥

३१५९. बहोर्लोपो भू च बहोः ॥ १५८ ॥ (२०१७)

बहोरुत्तरेषामिष्ठेमेयसां लोपो भवति, तस्य च बहोः स्थाने 'भू' इत्ययमादेशो भवति । भूयान् । भूमा ।

बहुशब्दः पृथ्वादिषु पठ्यते । 'बहोः' इति पुनर्ग्रहणं स्थानित्वप्रतिपत्त्यर्थम्; अन्यथा हि प्रत्ययानामेव भूभावः स्यात् ॥

३१६०. इष्ठस्य यिट् च ॥ १५९ ॥ (२०१८)

बहोरुत्तरस्य इष्ठस्य यिडागमो भवति बहोश्च भूरादेशो भवति । भूयिष्ठः ।

लोपापवादो यिडागम; तस्मिन्निकार उच्चारणार्थः ॥

३१६१. ज्यादादीयसः ॥ १६० ॥ (२०१२)

ज्यादुत्तरस्य ईयस आकार आदेशो भवति । ज्यायान् ।

लोपस्य यिटा व्यवहितत्वादादित्युच्यते । लोपे हि सति अकृद्यकार इति दीर्घत्वेन ज्यायानिति सिध्यति ॥

३१६२. र ऋतो हलादेर्लघोः ॥ १६१ ॥ (१७८५)

रशब्द आदेशो भवति ऋकारस्य हलादेर्लघोरिष्ठेमेयस्सु परतः । प्रथिष्ठः, प्रथिमा, प्रथीयान्। म्रदिष्ठः,म्रदिमा, म्रदीयान् ।

ऋत इति किम्? पटिष्ठः, पटिमा, पटीयान् । हलादेरिति किम्? ऋजिष्ठः, ऋजिमा, ऋजीयान् ।

लघोरिति किम्? कृष्णिष्ठः, कृष्णीयान्, कृष्णिमा ।

परिगणनं कर्त्तव्यम् -

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥

तत इह न भवति- कृतमाचष्टे कृतयति, मातरमाचष्टे मातयति, भ्रातयति ॥

३१६३. विभाषर्जोश्छन्दसि ॥ १६२ ॥ (३५५५)

'ऋजु' इत्येतस्य ऋतः स्थाने विभाषा रेफ आदेशो भवति इष्ठेमेयस्सु परतश्छन्दसि विषये । रजिष्ठमेति पन्थानम् [reजिष्ठमनु नेषि पन्थाम् ऋ. १.९१.१]। त्वमृजिष्ठः ॥

३१६४. प्रकृत्यैकाच् ॥ १६३ ॥ (२०१०)

एकाज् यद्भसंज्ञकं तदिष्ठेमेयस्सु परतः प्रकृत्या भवति । स्रग्विन्निति्येतस्य विन्नन्तस्य - स्रजिष्ठः, स्रजीयान्, स्रजयति । स्रुग्वदित्येतस्य मत्वन्तस्य-स्रुचिष्ठः, स्रुचीयान्, स्रुचयति ।

एकाजिति किम्? वसुमदित्येतस्य वसिष्ठः । वसीयान् ।

प्रकृत्याऽके राजन्यमनुष्ययुवानः (म. भा.) । अके प्रत्यये परतो राजन्य, मनुष्य, युवन्-इत्येते प्रकृत्या भवन्ति । राजन्यानां समूहो राजन्यकम् । मनुष्याणां समूहो मानुष्यकम्। आपत्यस्य च तद्धितेऽनाति' (६.४.१५१) इति यलोपः प्रकृतिभावेन न भवति । यूनो भावः यौवनिका । मनोज्ञादित्वाद् वुञ्, तस्य 'नस्तद्धिते' (६.४.१४४) इति टिलोपो न भवति ॥

३१६५. इनण्यनपत्ये ॥ १६४ ॥ (१२४५)

इन्नन्तमनपत्यार्थेऽणि परतः प्रकृत्या भवति । सांकूटिनम् । सांराविणम् । सांमार्जिनम्। 'अभिविधौ भावे इनुण्' , (३.३.४४) 'अणिनुणः', (५.४.१५) इत्यण् । स्रग्विण इदं स्राग्विणम् ।

अणीति किम्? दण्डिनां समूहो दाण्डम् । 'अनुदात्तादेरञ्' (४.२.४४) इत्यञ्प्रत्ययः । अनपत्य इति किम्? मेधाविनोऽपत्यं मैधावः ॥

३१६६. गाथिविदथिकेशिगणिपणिनश्च ॥ १६५ ॥ (१२७५)

गाथिन्, विदथिन्, केशिन्, गणिन्, पनिन्-इत्येते चाणि प्रकृत्या भवन्ति । गाथिनोऽपत्यं गाथिनः । वैदथिनः । कैशिनः । गाणिनः । पाणिनः ।

अपत्यार्थोऽयमारम्भः ॥

३१६७. संयोगादिश्च ॥ १६६ ॥ (११५६)

संयोगादिश्च इननि प्रकृत्या भवति । शाङ्खिनोऽपत्यं शाङ्खिनः । माद्रिणः । वाज्रिणः॥

३१६८. अन् ॥ १६७ ॥ (११५५)

अन्नन्तमणि प्रकृत्या भवति अपत्ये चानपत्ये च । सामनः । वैमनः । सौत्वनः ॥ जैत्वनः ॥

३१६९. ये चाभावकर्मणोः ॥ १६८ ॥ (११५४)

यकारादौ च तद्धितेऽभावकर्मणोरर्थयोरन् प्रकृत्या भवति । सामसु साधुः सामन्यः । वेमन्यः ।

अभावकर्मणोरिति किम्? राज्ञो भावः कर्म वा राज्यम् । 'राजन्' इति पुरोहितादिषु (५.१.१२८) पठ्यते, ततोऽयं यक् प्रत्ययः ॥

३१७०. आत्माध्वानौ खे ॥ १६९ ॥ (११६०)

आत्मन्, अध्वन्-इत्येतौ खे परतः प्रकृत्या भवतः । आत्मने हित आत्मनीनः। अध्वानमलङ्गामी अध्वनीनः ।

ख इति किम्? प्रत्यात्मम् । प्राध्वम् । प्रत्यात्मम्-इत्यव्ययीभावे 'अनश्च' (५.४.१०८) इति समासान्तष्टच्प्रत्ययः । प्राध्वम्-इति 'उपसर्गादध्वनः' (५.४.८५) इति अच्प्रत्ययः ॥

३१७१. न मपूर्वोऽपत्येऽवर्मणः ॥ १७० ॥ (११५७)

मपूर्वोऽन् अवर्मणोऽणि परतोऽपत्येऽर्थे न प्रकृत्या भवति । सुषाम्णोऽपत्यं सौषामः । चान्द्रसामः ।

मपूर्व इति किम्? सौत्वनः । अपत्य इति किम्? चर्मणा परिवृतो रथः चार्मणः । अवर्मण इति किम्? चक्रवर्मणोऽपत्यं चाक्रवर्मणः ।

मपूर्वप्रतिषेधे वा हितनाम्न इति वक्तव्यम् (म.भा.) हितनाम्नोऽपत्यं हैतनामः, हैतनामनः ॥

३१७२. ब्राह्मोऽजातौ ॥ १७१ ॥ (११५८)

योगविभागोऽत्र क्रियते 'ब्राह्मः' इत्येतदपत्याधिकारेऽपि सामर्थ्यादपत्यादन्यत्राणि टेर्लोपार्थं निपात्यते । ब्राह्मो गर्भः । ब्राह्ममस्त्रम् । ब्राह्मं हविः । ततः 'जातौ' , अपत्य इत्येव-अपत्ये जातावणि ब्रह्मणष्टिलोपो न भवति । ब्रह्मणोऽपत्यं ब्राह्मणः।

अपत्य इत्येव - ब्राह्मी ओषधिः ॥

३१७३. कार्मस्ताच्छील्ये ॥ १७२ ॥ (१६१३)

'कार्मः' इति ताच्छील्ये टिलोपो निपात्यते । कर्मशीलः कार्मः । 'शीलम्' 'छत्त्रादिभ्यो णः' (४.४.६१-६२) इति णप्रत्ययः ।

यद्येवम्, किमर्थमिदम् 'नस्तद्धिते' (६.४.१४४) इत्येव टिलोपः सिद्धः? सत्यमेतत्; ज्ञापकार्थं तु; एतज् ज्ञापयति-ताच्छीलिके णेऽण्कृतानि भवन्तीति । तेन चौरी, तापसीति णान्तादपीकारः सिद्धो भवति ।

ताच्छील्य इति किम्? कर्मण इदं कार्मणम् ॥

३१७४. औक्षमनपत्ये ॥ १७३ ॥ (११५९)

औक्षमित्यनपत्येऽणि टिलोपो निपात्यते । औक्षं पदम् ।

अनपत्य इति किम्? उक्ष्णोऽपत्यमौक्ष्णः, 'षपूर्वहन्धृतराज्ञामणि' (६.४.१३५) इत्यलोपः॥

३१७५. दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसार-वैक्ष्वाकमैत्रेयहिरण्मयानि ॥ १७४ ॥ (११४५)

दाण्डिनायन, हास्तिनायन, आथर्वणिक, जैह्माशिनेय, वासिनायनि, भ्रौणहत्य, धैवत्य, सारव, ऐक्ष्वाक, मैत्रेय, हिरण्मय-इत्येतानि निपात्यन्ते ।

दण्डिन्, हस्तिन्-इत्येतौ नडादिषु (४.१.९९) पठ्येते, तयोरायने परतः प्रकृतिभावो निपात्यते । केषाञ्चित्तु-हस्तिन्निति नडादिषु न पठ्यते, तेषामत एव निपातनात् फगपि भवति। दण्डिनोऽपत्यं दाण्डिनायनः । हस्तिनोऽपत्यं हास्तिनायनः। अथर्वन्-इति वसन्तादिषु (४.२.६३) पठ्यते । अथर्वणा प्रोक्तो ग्रन्थोऽपि उपचाराद् अथर्वन्नित्युच्यते, तमधीते यः स आथर्वणिकः । इके प्रकृतिभावो निपात्यते ।

जिह्माशिन्- इति शुभ्रादिषु (४.१.१२३) पठ्यते, तस्य ढे (एये) परतः प्रकृतिभावो निपात्यते । जिह्माशिनोऽपत्यं जैह्माशिनेयः ।

वासिनोऽपत्यम्, 'उदीचां वृद्धादगोत्रात्' (४.१.१५७) इति फिञ्, तत्र प्रकृतिभावो निपात्यते-वासिनायनिः ।

भ्रूणहन्, धीवन्-इत्येतयोः व्यञि परतस्तकारादेशो निपात्यते । भ्रूणघ्नो भावः भ्रौणहत्यम् ।धीव्नो धैवत्यम् । 'हनस्तोऽचिण्णालोः' (८.३.३२) इति यत्तत्वं तद्धातुप्रत्यय एवेति-भ्रौणघ्नः, वार्त्रघ्न इत्यत्र न भवति, अतो भ्रौणहत्ये तत्वं निपात्यते ।

सारव-इति 'सरयू' इत्येतस्य अणि परतोऽयूशब्दस्य 'व' इत्यादेशो निपात्यते। सरय्वां भवं सारवमुदकम् ।

ऐक्ष्वाक-इति स्वरसर्वनाम्ना एकश्रुत्या पठ्यते । ततोऽयमाद्युदात्तोऽन्तोदात्तश्च निपात्यते। इक्ष्वाकोरपत्यम्, 'जनपदशब्दात्क्षत्त्रियादञ्' (४.१.१६६) इत्यञ्, तत्र उकारलोपो निपात्यते । ऐक्ष्वाकः । इक्ष्वाकुषु जनपदेषु भवः 'कोपधादाण्' (४.२.१३२) इत्यण् । ऐक्ष्वाकः ।

मैत्रेय-इति, मित्रयुशब्दो गृष्ट्यादिषु (४.१.१३६) पठ्यते, ततो ढञि कृते यादेरियादेशापवादो युशब्दलोपो निपात्यते । मित्रयोरपत्यं मैत्रेयः ।

अथ किमर्थं मित्रयुशब्दो बिदादिष्वेव (४.१.१०४) न पठ्यते, तत्राञि कृते यादेरिति इयादेशेनैव सिद्धम्; एवं च युलोपार्थं निपातनं कर्त्तव्यं न भवति; यस्कादिषु (२.४.६३) च बहुषु लुगर्थः पाठो न कर्त्तव्यो भवति, मित्रयव इत्यञो 'यञञोश्च' (२.४.६४) इत्येव हि लुकः सिद्धत्वात्? नैतदस्ति; मित्रयूणां सङ्घ इत्यत्र गोत्रचरणाद् वुञं बाधित्वा मैत्रयकः सङ्घ इत्यत्र 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' (४.३.१२७) इत्यण् प्राप्नोति ।

हिरण्मयम्-इति हिरण्यस्य मयटि यादिलोपो निपात्यते, हिरण्यस्य विकारः हिरण्मयः ।

३१७६. ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि ॥ १७५ ॥ (३५५६)

ऋत्व्य, वास्त्व्य, वास्त्व, माध्वी, हिरण्यय-इत्येतानि निपात्यन्ते छन्दसि विषये.। ऋतु, वास्तु-इत्येतयोर्यति यणादेशो निपात्यते । ऋतौ भवम् ऋत्व्यम् । (पै. १९.२५.१४) वास्तौ भवं वास्त्व्यम् । वस्तुशब्दस्याणि यणादेशो निपात्यते । वस्तुनि भवो वास्त्वः । मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते 'मा॑ध्वीर्नः स॒न्त्वोष॑धी' (ऋ. १.१०.६) । हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते (म. भा.) हि॒रण्ययम् (ऋ. १.१५.१३) ॥

॥ इत्युपाध्यायश्रीवामनकृतायां काशिकावृत्तौ
षष्ठाध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चायं षष्ठाध्यायः ॥